

(महाभारते)

भगवद्गीता अष्टादश टीका
सहित त्रयोदशोऽध्यायः

२०२३







त्रयोदशोऽध्यायः

शांकरभाष्य
आनंदगिरिकृतटीका
श्रीधरी स्वामिकृता
पिशाचभाष्य
रामानुजभाष्य
अभिनवशंकरी
परमार्थप्रपा
वनमाली
कुसुमवैजयन्ती
मधुसूदनी
सदानंदी
नीलकंठी
आनंदी
रामकंठी
लासिकी
पंचोली ॥

भाषानुवाद ॥

श्रीभगवानुवाच इदं शरीरं कौंतेय क्षेत्रमित्य
भिधीयते एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्वि
दः १ ॥

शंकरभाष्यं टी०

सप्तमेध्याये सूचिते द्वे प्रकृती ईश्वरस्य त्रिगुणात्मिकाष्टधाभि
न्नापरा संसारहेतुत्वात् परा चान्या जीवभूता क्षेत्रज्ञलक्षणा ई
श्वरात्मिका याभ्यां प्रकृतिभ्यां ईश्वरो जगदुत्पत्तिस्थितिलयहे
तुत्वं प्रतिपद्यते तत्र क्षेत्रक्षेत्रज्ञलक्षणप्रकृतिद्वयनिरूपण
द्वारेण तद्वत ईश्वरस्य तत्त्वनिर्द्धारणार्थं क्षेत्राध्याय आरभ्यते
अतीतानंतराध्याये च अद्वेष्टा सर्वभूतानामित्यादिना यावद
ध्यायपरिसमाप्तिस्तावत्तत्त्वज्ञानिनो संन्यासिनो निष्ठा
यथा ते वर्तंते इत्येतदुक्तं केन पुनस्ते तत्त्वज्ञानेन युक्ताः य
थोक्तधर्माचरणात् भगवतः प्रियाः भवंतीत्येवमर्थश्चा
यमध्याय आरभ्यते प्रकृतिश्च त्रिगुणात्मिका सर्वकार्यक
रणविषयाकारेण परिणता पुरुषस्य भोगापवर्गार्थकर्त
व्यतया देहेंद्रियाद्याकारेण संहन्यते सोयं संघात इदं शरी
रं तदेतत् भगवानुवाच इदमिति इदमिति सर्वनाम्नोक्तं वि
शिनष्टि शरीरमिति हे कौंतेय क्षतत्राणात् क्षयात् क्षरणा
त् क्षेत्रवद्वास्मिन्कर्मफलनिष्पत्तेः क्षेत्रमितीतिशब्दः एवं
शब्दपदार्थकः क्षेत्रमित्येवमभिधीयते कथ्यते एतच्छरीरं
क्षेत्रं यो वेत्ति विजानाति आपादतलमस्तकं ज्ञानेन विषयी
करोति स्वाभाविकेन औपदेशिकेन वा वेदनेन विषयीकरोति
विभागशस्तं वेदितारं प्राहुः कथयंति क्षेत्रज्ञ इतीतिशब्दः एवं
शब्दपदार्थकएव पूर्ववत्क्षेत्रज्ञ इत्येवमाहुः के तद्विदः ते क्षेत्र
क्षेत्रज्ञौ ये विदंति ते तद्विदः १ ॥

आनंदगिरिकृतटी०

मध्यमयोः षट्कयोस्त्वंतत्पदार्थौ उक्तौ अंतिमस्तु षट्को

वाक्यार्थविवेकः सप्तमाध्यायप्रधानोध्यायः आरभ्यते तत्र क्षेत्राध्यायमन्तिमाष्टका
ध्यमवतारयितुं व्यवहितं वृत्तं कीर्तयति सप्तमइति प्रकृतिद्वयस्य
ख्यातं स्मारयति ईश्वरस्येति भूमिरित्यादिनोक्ता सत्वादिरूपा प्रकृति
रपरेत्यत्र हेतुमाह संसारेति इतस्त्वन्यामित्यादिनोक्ता प्रकृतिमुक्त्वा
मति परा चेति परत्वे हेतुं सूचयति ईश्वरात्मिकेति किमर्थमीश्वरस्य प्र
कृतिद्वयमित्याशंक्य कारणत्वार्थमित्याह याभ्यामिति सृजनमनूद्य
वर्तिष्यमाणाध्यायारंभप्रकारमाह तत्रेति व्यवहितेन संबन्धमुक्त्वा
अव्यवहितेनतं विवक्षुरव्यवहितमनुवदति अतीतेति निष्ठोक्तेति सं
बन्धः निष्ठामेव व्याचष्टे यथेति वर्तते धर्मजातमनुतिष्ठन्ति तथा
पूर्वोक्तेन प्रकारेण सर्वमुक्तमिति योजना अव्यवहितमेवमनूद्य तेना
नरस्य संबंधं सद्भिरते केनेति तत्वज्ञानोक्तिरूपार्थेन संगृह्यार्थप्र
कारः जीवानां सुखदुःखादिभेदभाजां प्रतिक्षेत्रं भिन्नानां नानारूपेण
कथमित्याशंक्य संसारस्य आत्मधर्मत्वं निराकृत्य संघातनिष्ठत्वं वक्तुं
संघातोत्पत्तिप्रकारमाह प्रकृतिश्चेति भोगश्चापवर्गश्चार्थौ तयोरे
वकर्तव्यतयेति यावत् तत्वतन्त्ररश्लोके शारीरनिर्देशात् तस्यात्म
निर्वक्तव्या किमिति संघातस्योच्यते तत्राह सोयमिति उक्तेर्थे भ
गवद्वचनमवतारयति तदेतदिति तत्र दृष्टत्वेन संघातदृश्यादस्म
मात्मानं निर्दिशति इदमिति उक्तं प्रत्यक्षदृश्यविशिष्टं किंचिदितिशे
षः शरीरस्यात्मनोन्यत्वे क्षेत्रनामनिरुक्त्याहेतु क्षतेति क्षयोनाशः
क्षरणमपक्षयः यथा क्षेत्रे बीजमुप्तं फलति तद्वदित्याह क्षेत्रव
दिति क्षेत्रपदादुपरि स्थितमिति पदं क्षेत्रशब्दविषयमन्यथा वै
यर्थ्यादित्याह इतिशब्दइति क्षेत्रमित्येवमनेन क्षेत्रशब्देनेत्यर्थः
दृश्यं देहमुक्त्वा ततोतिरिक्तं दृष्टारमाह एतदिति स्वाभाविकं
मनुष्योहमिति ज्ञाने औपदेशिकं देहोनात्मा दृश्यत्वादित्यादि
विभागशः स्वतोतिरिक्तत्वेनेत्यर्थः क्षेत्रमित्यत्रेति शब्दवदत्रा
पीतिशब्दस्य क्षेत्रज्ञशब्दविषयत्वमाह इतिशब्दइति क्षेत्रज्ञ
शब्देनतं प्राहुरिति संबन्धं प्रवर्तन प्रश्नपूर्वकमाह केइत्या
दिना १ ॥

स्वामिकृत टीका ॥

भक्तानामहमुद्धर्त्ता संसारादित्यवादि यत् त्रयोदशेऽथ तत्सिद्धये
तत्त्वज्ञानमुदीर्यते तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात् भ
वामीति एवं प्रतिज्ञातं न चात्मज्ञानं विना संसारादुद्धरणं संभव
तीति तत्त्वज्ञानोपदेशार्थं प्रकृतिपुरुषविवेकाध्याय आरभ्यते
तत्र यत्सप्तमेऽध्याये परा पराचेश्वरस्य जगन्निर्माणसाधनमु
क्ते द्वे प्रकृती निर्दिष्टे तत्रैकाऽपराष्टधा भिन्ना त्रिगुणात्मिका क्षेत्र
लक्षणा परा त्वाजीवभूता क्षेत्रज्ञलक्षणा चेति प्रकृतिद्वयमुक्तं
तयोरविवेकाज्जीवभावमापन्नस्य चिदंशस्यायं संसारः यात्माजी
वोपभोगार्थमीश्वरः सृष्ट्यादिषु प्रवर्त्तते तदेव प्रकृतिद्वयं क्षेत्र
क्षेत्रज्ञशब्दवाच्यं परस्परं विविक्तं तत्त्वतो निरूपयिष्यन् श्रीभग
वानुवाच इदमिति इदं भोगायतनं शरीरं क्षेत्रमित्यभिधीयते
संसारस्य प्ररोहभूमित्वात् यत्तद्वेत्ति अहं ममेति मन्यते तं क्षे
त्रज्ञं इति प्राहुः कृषीवलवत्तत्फलभोक्तृत्वात् तद्विदः क्षेत्रक्षेत्र
ज्ञयोर्विवेकज्ञाः १ ॥

पिशाचभाष्ये टीका ४

भूम्यादिरष्टविधा प्रकृतिरीश्वरस्य शक्तिरूपा प्रतिपादिता
भूमिरापइत्यादिना ग्रंथेन नन्वीश्वरस्य स्वरूपभूता जीवभूता च
पराप्रकृतिः प्रतिपादिता अपरेयमितस्त्वन्यामित्यादिना ग्रंथेन
न तत्र तत्प्रकृतिद्वये क्षेत्रक्षेत्ररूपमीश्वरस्य स्वरूपावबोधार्थमेवप
श्चाद्वक्ष्ये निर्णयं वक्ष्यामीति सर्वं तदिति प्रहृतं क्षेत्रक्षेत्रं निर्दिशति १

रामानुजभाष्ये टीका ५

पूर्वस्मिन्षट्के परमप्राप्यस्य परस्य ब्रह्मणो वासुदेवस्य प्राप्त्युपाय
भक्तिरूपभगवदुपासनांगभूतं प्राप्तुः प्रत्यगात्मनो याथात्म्यत
न्माहात्म्यज्ञानपूर्वकैकांतिकात्यंतिकभक्तियोगनिष्ठा प्रतिपा
दिता अतिशयितैश्वर्यापेक्षाणामात्मकैवल्यमात्रापेक्षाणां च भक्ति
योगस्तत्तदपेक्षितसाधनमिति चोक्तं इदानीमुपरितने षट्के प्र
कृतिपुरुषतत्संसर्गरूपप्रपंचेश्वरतद्याथात्म्यकर्मज्ञानभ
क्तिस्वरूपतदुपादानप्रकाराश्च षट्कद्वयोदिता विशोध्यंते तत्र

तावद्वयोर्देशो देहात्मनोः स्वरूपं देहयाथात्म्यशोधनं देहविप्रक्रा
न्तिप्राप्त्युपायविविक्तात्मस्वरूपसंशोधनेन यथाविधस्यात्मनश्चा
विर्भावयहेतत्त्वतो विवेकानुसंधानप्रकारश्चोच्यते श्रीभगवानु
वाच इदमिति इदं शरीरं देवोहं मनुष्योहं स्थूलोहं कृशोहमित्या
त्मना भोक्त्रा सामानाधिकरण्येन प्रतीयमानं भोक्तुरात्मनोर्थान्तर
भूतं तत्स्वभोगक्षेत्रमिति शरीरयाथात्म्यविद्भिरभिधीयते एत
दवयवसंघातरूपेण वेदमहं वेद्मि यो वेत्ति तं वेद्यभूतादस्मा
द्देहात्त्वेनार्थान्तरभूतं क्षेत्रज्ञ इति तद्विदः आत्मयाथात्म्यविदः प्रा
हुः यद्यपि देहव्यतिरिक्तघटाद्यर्थानुसंधानवेलायां देवोहं मनु
ष्योहं घटादिकं जानामीति देहसामानाधिकरण्येन ज्ञातारमात्मान
मनुसंधत्ते तथापि देहानुभववेलायां देहमपि घटादिकमिदं वे
द्मीति वेद्यतया वेदितानुभवतीति वेदितुरात्मनो वेद्यतया शरीर
मपि घटादिवदर्थान्तरं तथा च घटादिवच्छरीरस्य वेद्यभूताच्छरीरा
त्तद्वेदिता क्षेत्रज्ञोर्थान्तरभूतः सामानाधिकरण्यप्रतीतिस्तु श
रीरस्य गोत्वादिवदात्मविशेषणत्वैकस्वभावतया तदपृथक्सि
द्धेरुपपन्ना १ ॥

अभिनवगुप्तकृतटीका ।

इदमिति षड्भिः कश्चिज्जातो क्षेत्रज्ञ उपास्य इति श्रूयते स च कि
मात्मा उत ईश्वरः अथवा तौ द्वौ यः कश्चिदन्य एवेति प्रश्नाशंका
यां श्रीभगवानादिशति संसारिणां शरीरे क्षेत्रं यत्र कर्म
बीजप्ररोहः अत एव तद्योगात्मा गतककालुष्यहृष्णिनः
क्षेत्रज्ञ उच्यते अबुद्धानां तदेव क्षेत्रं अन्वर्थभेदस्तु तथा
ह्या क्षिणोति कर्मबंधमुपभोगेन त्रायते जन्ममरणभ
यादिति तच्च अति परमात्मा वासुदेवः क्षेत्रज्ञ एतत्क्षेत्रं यो
वेदयति वेदत्यत भावितत्वपर्यो विधिः तेन यत्प्रसादाद
चेतनी भावमायाति स एव क्षेत्रज्ञो नान्यः कश्चित् विशे
षस्तु परिमितव्याप्तिकं रूपमालंब्यात्मेति भण्यते अपरि
च्छिन्नसर्वक्षेत्रव्याप्त्या परमात्मा भगवान्वासुदेवः ममेति

कर्मणि षष्ठी अहमनेन ज्ञानेन ज्ञेय इत्यर्थः येन विकारं
गच्छति यद्विकारि समासेनेत्यविभागेनैवैतान्यत्रानुसं-
धारणोत्तरेण परिच्छिनत्ति यद्यपि च ऋषिभिर्बहुधा वेदे
श्चोक्तमेतत्तथापि समासेनाहं व्याचक्षे इति अव्यक्तं प्रकृतिः
इन्द्रियाणि मनसा सहैकादश इन्द्रियगोचरा रूपादयः पंच
चेतनाहकशक्तिः पुरुषः धृतिरित्येते किल सर्वस्य ब्रह्म-
णः क्रिमिपर्यन्तस्य शारीरे निष्पन्ने वा कार्ये कामक्रोधादि-
षु चैतैव मम पर्याप्तं किमन्येत ईदृशः चाहं नित्यमेवा-
भूयासमिति प्राणसंधारणी धृतिराश्वासनात्मिका पर-
रूपस्याश्वासनेष्व रागशब्दवाच्या जायते १ ॥

परमार्थप्रपाटीका

पूर्वाध्याये सगुणनिर्गुणोपासनाभेदेन ब्रह्मप्राप्त्यवधि-
कारिद्वयमुक्तं तत्र क्रमेणामुक्तेः सुखसाध्यत्वं दुःखसा-
ध्यत्वं च दर्शितं तत्रापि सुखरूपसाधनवतः सगुणोपा-
सकस्य धर्माः श्लोकाष्टकेनोपदिष्टाः अथ क्लेशरूप-
साधनवतो निर्गुणोपासकस्य बहुसामग्रीसाध्यत-
त्त्वज्ञानपूर्विकाप्राप्तिरिति दर्शयितुं प्रथमतः क्षेत्रक्षेत्र-
ज्ञयोः स्वरूपं भगवानुपदिशति इदमिति इदं भोगायत-
नं शरीरं संसारतरुप्ररोहभूमिकत्वात्क्षेत्रमित्यभिधीय-
ते नामनिर्देशः क्रियते अथ सामान्यतः क्षेत्रज्ञस्वरू-
पमाह एतदिति एतत्क्षेत्रं यो वेत्ति जानाति तं क्षेत्रज्ञ-
मिति तद्विदः प्राज्ञाः अनेन देहातिरिक्तः क्षेत्रज्ञः कश्चि-
दस्तीति सूचितं यतोन्वयव्यतिरेकाभ्यां देहस्य घटादि-
वज्जडत्वनिश्चयेन स्वकीयद्रष्टृत्वं न संभवति एतच्छरी-

श्री॰
गी॰टी॰
त्रै॰

3

देहाद्दुःखानभिज्ञत्वदर्शनात् एवंघटद्रष्टाघटाद्भि
न्नोभवति तथादेहद्रष्टापीत्यर्थः १ ॥

वनमाली टीका

आद्येषट्के यदुक्तंहि द्वितीयेचयदीरितं जीवेजीवे
श्वरौ तदैक्यं तद्विद्धि ॥

पतेन ... १ जीवेश्वरप्रधानानां ज्ञानविशेषाधिकारीणां प्रकृतान
समानृष्ठौ नन्ते तेष पटयोदशे २ एवं षट्केन साधनेन जीवस्वरूपे द्वि
तीयषट्के च भगवत्स्वरूपे तद्रूपे किं स्वरूपं तदृष्टकाङ्क्षा मि ते षर्यं व नि
रूपिते षट्कद्वयोक्तार्थस्यैव शीघ्रं बुद्ध्यारोहाय तृतीयषट्केन विवर
णं तत्र जडवर्गयोः स्वरूपं विविधमेज्ञानमकृडक्कं तत्त्वप्रबोधाय वद्ध
लीक्रमत्रयोदशे कथ्यते तत्र जीवजडनियामकत्वेन तदुपमादिक
टेत्यादिना वेशज्ञानेन भक्तिहीनद्वितीयत्रानानाय तत्रादिस्वरूपेवक्ते
हरिज्ञानादेव मोक्षः किमर्थं तत्रादिनिरूपणमिति शंकानावत्यादि
हरतिइदमिति इदंदृश्यमानं प्रत्यक्षादिकं जडवर्गं यस्माबक्के शरीर
मिति कृतेः श्रीयत ईश्वरेणानाशयत इति शरीरं तेनैव वीर्येन इतीरं शरीरं वत
रीरं च शरीरं यद्देहमेवाव्यक्तादिकं देहादिरूपेण परिणतेन सन्दृष्टाणा
ति जीवस्य हिंसावहारहेतुर्भवतीति शरीरं हरिणार्पितं तेऽर्पितं ईशरं च
नटीरं चेति शरीरं हि सायां ईश्वरेण हीयते स्याप्यते हरिणेति ते त्रेति
निवासगतेः एतज्जडवर्गं तेत्रेयो वेत्ति तन्न हि दः तेत्रविदः सनत्कु
मार कपिलादयः तेत्रतत्त्वविवेकत्ताः तेत्रते ज्ञाः तेत्रस्य प्रधानादेरी
श्वराधीनत्वेन ज्ञानेन हि विकृतयेश्वराधीनत्वेन च जीवज्ञानेन नियाम
कत्वेनेश्वरज्ञानेन नवज्ञानत्वेन च मोक्षहेतुत्वात् दृश ज्ञानेन च जडादिनि
रूपणं विना न भवतीति चरम कृपालुना भगवता पृष्टेनापि तन्निरूप
णमारब्धमिति भावः १ ॥

कुसुमवैजयन्ती टीका ॥

भिन्नाभिन्नं जगद्यस्माच्चिदचिद्रूपकं भवेत् तं वंदे परमानंदं मुकुंदं पा
पसारकं १ देहजीवेश्वराणां वैयाथात्म्यज्ञानमादिशत् कुसुमः कुसुमा
यमित्राय त्रयोदशाध्यायोऽर्थ्यते २ प्रथमषट्केनावस्परम प्राप्यस्य पर
स्य ब्रह्मणो भगवतः प्राप्त्युपायभूतं तत्त्वं पदवाच्यप्रत्यगात्मयाथात्म्य
दर्शनेन साधनभूतं ज्ञानगर्भं निष्कामकर्म वोक्तं द्वितीयेन तत्पद
वाच्यपरमप्राप्यभूत भगवत्स्वरूपयाथात्म्यनिर्णयपूर्वकं तत्प्राप्त्यन्तरंगो
पायरूपो भक्तियोगश्चोक्तः अथेदानीमन्तिमषट्के प्रकृतिपुरुष
योस्तत्संयोगातिमित्तकस्य जगतः परमपुरुषस्य षड्विधयोदिता

११
श्री॰गी॰
टी॰

तिस्वरूपाणिकर्मज्ञानभक्तिस्वरूपाणिचपृथग्विविच्यपार्थसारथिर्द्वि
तीयेष्याणात्मस्वरूपज्ञानमाह तत्रतावत्त्रयोदशेभिन्नयोःप्रकृ
तिपुरुषयोस्संयोगादेवायंसंसारोमयेश्वरेणोवहृतस्तयोःपरमेश्व
रस्यममचस्वरूपयाथात्म्यज्ञानेविनाहेयोपादेयविवेकाभावाज्जी
वानांसंसारनिवृत्तिर्नस्यादितिमनसिनिधायदेहजीवेश्वराणांयाथा
त्म्यस्वरूपाणिविवेचयन्समप्रकृतिपुरुषयोःस्वप्रकृतिरूपयोः
स्वेनस्वरेणसहतादात्म्यसंबंधरूपंस्वभक्त्युद्बोधकेज्ञानमर्जुनाय
भगवानुवाच इदंशरीरमितिहेकौंतेयत्वनेनपेक्षयत्वेनाभि
धीयमिवममस्वतानिगुलंज्ञानेनभ्यंवदामीतिसूचितम् इदंप्रकृति
कार्यगुणत्रयात्मकेमहदहंकारपंचभूतेंद्रियप्राणादिजडवर्गसं
घातरूपेशरीरंशीर्यतेविशीर्णादिभावपरिणामंप्राप्नोतीतितत्र
स्थाभोक्तुर्जीवाद्भिन्नतयारूपंपीनोहंकृशोहंदीर्घोहंह्रस्वोहंदेवो
हंमनुष्योहमित्याद्यहंभावेनभोक्तृसामानाधिकरण्येनप्रतीयमा
नंजीवभोगायतनंक्षेत्रंभोक्तुर्जीवस्यपुण्यपापबीनोप्तसस्यखंडःखा
दिभोगप्रवस्तुप्ररोहकत्वात् क्षेत्रमित्यभिधीयतेनतत्त्वज्ञैःकथ्यते प
तच्छरीरंयोवेत्तिइदंप्रतिपरिणाममचेतनंशास्यासनादिवच्चेत
नरूपाज्जीवाद्भिन्नंजीवस्यभोगमोक्षसाधनमहंवेद्मीतियोवेत्तिजा
नातितंवेदांतिनःक्षेत्रज्ञविदःक्षेत्ररूपाच्छरीरात्तदेहिनस्तथाभिन्नःक्षेत्रज्ञस्तं
विदंतीतितद्विदःयद्वाभयदेहंजीवंचविदंतीतितद्विदःदेहात्मयाथा
त्म्यविदः [illegible] क्षेत्रज्ञइतिप्राहुःवदंति यद्यपिदेहव्य
तिरिक्तघटाद्यर्थानुसंधानवेलायांदेवोहंमनुष्योहंघटादिकंजाना
मीतिदेहसामानाधिकरण्येनज्ञातारमात्मानमनुसंधत्तेतथापिदेहा
नुभववेलायांदेहमपिघटादिकमिवेदंवेद्मीतिवेद्यतयावेदितानुभ
वतीतिवेदितुरात्मनोवेद्यतयाशरीरमपिघटादिकमिवेदंवेद्मीति
वेद्यतयावेदितानुभवतीति वेदितुरात्मनोवेद्यतयाशरीरमपिघ
टादिवदर्थांतरंतथाचघटादेरिववेद्यभूताच्छरीरादपिवेदितातत्र
ज्ञोर्थांतरभूतःसमानाधिकरणप्रतीतिस्तुशरीरस्याचेतनत्वादि
यमेणजीवाद्भिन्नत्वेपितदात्मकत्वेनतद्व्याप्यत्वेनतदधीनस्थिति

प्रहितकत्वेनतदतदृष्यकृत्सिद्धत्वेनवात्माभिन्नत्वमुपपन्नंजी
वस्यचेतनत्वज्ञातृत्वकर्तृत्वादिधर्मेणदेहाद्भिन्नत्वेपितदात्मत्वेन
ज्ञापकत्वादिनोतदृष्यकृत्वात्तदभिन्नत्वमुक्तमेवंदेहात्मनोर्भिन्ना
भिन्नरूपसम्बन्धोप्युक्तस्तत्रपर्वेत्यभिप्रायः १ ॥

मधुसूदनी ।१।

नमःपरमात्मने ॥ ध्यानाभ्यासवशीकृतेनमनसातन्निर्गुणंनिष्क्रि
यंज्योतिःकिंचनयोगिनोयदिपरंपश्यंतिपश्यंतुते अस्माकंतुतदे
वलोचनचमत्कारायभूयाच्चिरंकालिंदीपुलिनेषुयत्किमपितन्नी
लंतमोधावति प्रथममध्यमषट्कयोःतत्त्वंपदार्थौउक्तौ उत्तरस्तष
ट्कोवाक्यार्थनिष्ठः समाप्तौप्रथानोप्युनारभ्यते तत्रतेषामहंस
मुद्धर्तामृत्युसंसारसागरात् भवामीतिप्रागुक्तं नचआत्मात्मज्ञानल
क्षणात्मस्योरात्मज्ञानेविनोद्धरणंसंभवति अतोयादृशेनात्मज्ञाने
नमृत्युसंसारनिहतिर्येनचतत्त्वज्ञानेनयुक्ताः अद्वेष्टृत्वादिगुणाल
क्षणाःसंन्यासिनःप्राख्याख्याताःतदात्मतत्त्वज्ञानंवक्तव्यंतत्राद्विती
येनपरमात्मनासहजीवस्याभेदमेवविषयीकरोति तद्वेअमहे
तुकत्वात् सर्वानर्थस्यतत्रजीवानांसंसारिणांप्रतिदेहंभिन्नानाम
संसारिणांकेनपरमात्मनाकथमभेदःस्यादित्याशंकायांसंसार
स्याभित्रत्वस्यचाविद्याकल्पितताऽनात्मधर्मत्वाज्जीवस्यसंसारित्वं
भिन्नत्वेचेतिविवेचनीयंतदर्थंदेहेंद्रियांतःकरणेभ्यःक्षेत्रेभ्योवि
वेकेनक्षेत्रज्ञःपुरुषोजीवःप्रतिक्षेत्रमेकएवनिर्विकारइतिप्रति
पादनायक्षेत्रक्षेत्रज्ञविवेकःक्रियतेस्मिन्नध्याये तत्रयेद्वेप्रकृतीः
सप्तम्यादिक्षेत्ररूपतयाजीवरूपक्षेत्रज्ञतयाच अपरपरशब्दवाच्ये
सप्तमाध्यायेसूचितेतद्विवेकेनतत्त्वंनिरूपयिष्यन् इदमिंद्रियांतः
करणसहितंभोगायतनंशरीरंहेकौंतेयक्षेत्रमित्यभिधीयतेस
स्यैवास्मिन्सकृतकर्मणःफलस्यनिष्पत्तेःएतद्योवेत्तिअहंममे
तिमन्यतेतंक्षेत्रज्ञइतिप्राहुःकृषीफलवत्तत्फलभोक्तृत्वात् त
द्विदःक्षेत्रक्षेत्रज्ञयोर्विवेकविदःअत्रचअभिधीयतइतिकर्मणि
प्रयोगेनक्षेत्रस्यजडत्वात्कर्मत्वं क्षेत्रज्ञशब्दवद्वितीयाविनेवइति

१९
श्री·गी·
टी·

5

शाहमाहरन्स्वप्रकाशत्वात्कर्मत्वाभावमभिप्रैति तत्रापिहेतुत्रयंकै
श्चिदभिधीयते ततत्रकर्तृगतविशेषापेक्षा हेतुत्वेन कर्मत्वमेत
रेणैव विवेकिनःप्रवाडःस्थूलदृशामगोचरत्वादिति कथयितुं विल
क्षणवचनव्यंजकत्रकर्तृपदोपादानेनचानिर्दिशति भगवान् ॥२॥

२ ॥

सदानंदी टीका ॥

सत्त्वगुणोविनोस्थिरंवरतिमित्रेस्थिरपदंमहामायाचित्तेक्षतिल
दयमहेनचतिरो प्रवेशनेदक्षीपतिमज्ञमनंतेयदुपतिमकुंदंने
दोकेविलसितमहंनौमिशातयः तदेवंमध्यमैःषड्भिरध्यायैर्भग
वान्हरिः तत्पदार्थोनुसंधेयोमुक्तयेचेत्युदीरितं अंतःकरणशु
द्धिविवेकादिचतुष्टयं ज्ञानेमोक्षोहरेर्भक्त्यासिद्ध्यत्येनचतुष्टयं ३
हरिभक्तिंविनाकर्मतस्यादीशुद्धिकारणं नवासिद्धोद्विवेकादिन
ज्ञानेनापिमुक्तता दुरत्ययाहरेर्मायासर्वव्यामोहकारिणीहरिभक्तिं
समाश्रित्यतर्तुंशक्यामुमुक्षुभिः ५ हरिरेवजगत्सर्वंहरेर्भिन्नंनकिं
चन तस्मात्सच्चिदयोयेनेरूपासोमुक्तयेहरिः ६ इत्थंनिरूपितं
षड्भिरध्यायैर्मध्यमैरिति उपासनामध्यमोसौकांडःसंक्षेपेणतोगतः
तथाद्यशागादिषट्केनत्वंपदार्थोनिरूपितः इदानीमंतरःषट्कोखंड
वाक्यार्थगोचरः ८ सम्यग्बोधप्रधानोयंसम्यगारभ्यतेततः प्रत्य
गात्मप्रमातात्वानन्दरूपोरुद्धरणंत्रणो ९ प्रत्यगात्मावबोधेनविना
नास्तीतिनिश्चितं याद्दगात्मावबोधेनसत्योरूद्धरणंभवेत् १० या
द्दगवबोधमुक्ताःसर्वेजीवन्मुक्ततयेरिताः ताद्दगात्मावबोधोत्रवक्तव्यो
वेयमुक्तये ११ सबोधोब्रह्मणासाकंजीवस्याभेदमेवच विषयीक
रुतेयस्मात्तद्विदोनर्थकारणम् १२ तत्रसंसारिणोजीवाःप्रतिदे
हंविलक्षणाः कथमेकेनशुद्धेनतेषामैक्यंपरात्मना १३ इत्याशं
कापनोदायभगवान्परमेश्वरः संसारित्वंचभिन्नत्वमविद्याकल्पि
तंपरे १४ शुद्धाहिवस्तुतोजीवाःपरमात्मस्वरूपिणःप्रवेशादिनिया
पादोहेत्वेभ्योस्याविवेचने १५ देहेन्द्रियादिरूपेभ्यःक्षेत्रज्ञस्यकरोत्य

७

जः विवेकसतिजीवोपिक्षेत्रज्ञः पुरुषःपरः १८ एकएवप्रतिक्षेत्रं
निर्विकारोद्वयात्मकः एतन्निरूपणयैवक्षेत्रक्षेत्रज्ञयोर्द्वयोः वि
वेकःक्रियतेसाक्षिज्ञप्यायेहरिणास्वयं समसमेप्रकृतौहिप्राकाए
परागेरिते भूम्यादिक्षेत्ररूपोक्ताक्षेत्रज्ञोजीवशाङ्कितः तत्वेन
योर्विवेकेननिरूपयितुमीश्वरः १९ उवाचभ्रांतितिमिरविध्वंस
नकरंवचः इदंभोगालयंस्थूलेसेंद्रियंसमनोजडं २० शरीरंदृ
श्यमत्रतत्क्षेत्रमित्यभिधीयते स्वसकृतकर्मणांसिद्धिःसस्यानामि
वदेहके २१ अहंममाभिमानेनक्षेत्रंयोवेत्तिसर्वतः तंक्षेत्रज्ञइ
तिप्राहुःक्षेत्रक्षेत्रज्ञवेदिनः २२ अभिधीयतइत्यत्रकर्मणिवप्र
योगतः क्षेत्रस्यनाश्यात्मकमेतत्वमस्तीत्येवप्रदर्शितं २३ विनाद्धि
नोयोक्षेत्रज्ञइतिज्ञेतिशब्दतः क्षेत्रज्ञेस्वप्रकाशत्वात्कर्मत्वाभा
वइष्यते २४ अतःक्षेत्राभिधानेहिनविशेषोस्तिकर्तृगः स्थूले
वस्तुजडंक्षेत्रंयैकैश्चिदभिधीयते २५ क्षेत्रज्ञत्स्वप्रकाशत्वाद्वि
नाकर्मत्वमेवतं सम्यग्विवेकिनःप्राहुरज्ञात्याविषयत्वतः २६ ।

नीलकंठी टीका १२

ननुअव्यक्तोयमचिंत्योयमविकार्योयमुच्यते नित्यःसर्वगतःस्था
णुरचलोयंसनातन इति द्वितीयेत्वंपदार्थस्वरूपमुक्तं तथाद्वा
दशेयेत्वक्षरमनिर्देश्यमव्यक्तंपर्युपासते सर्वत्रगमचिंत्यंचकू
टस्थमचलंध्रुवमितितत्पदार्थस्वरूपमुक्तं नचतयोर्भेदःसंभ
वति लक्षणैक्यात् लक्षणंहितयोरव्यक्तत्वमचिंत्यत्वमचलत्व
सर्वगतत्वंचेत्यादिसमानं नचद्वयोःसर्वगतत्वंसंभवति अन्यो
न्यव्याहतत्वेनासर्वगतत्वापत्तेः नचलक्षणाभेदाभावेपितत्तदा
त्मगतविशेषाःसंतियेनक्षात्मनोजीवेशयोरन्योन्यंभेदःस्याव
हितिस्वात्मानंचस्वाश्रयत्वयमेवव्यावर्तयंतीतिवाच्यं विशेषा
णांसत्त्वेप्रमाणाभावात् ननुसंतिविशेषाः बंधमोक्षादिव्य
वस्थान्यथानुपपत्त्यानिर्विशेषेष्वपिपुरुषेषुभेदःसिध्यति
यथोक्तंसांख्यवृद्धैः जन्ममरणकरणानांप्रतिनियमादयुगप
त्प्रवृत्तेश्चपुरुषबहुत्वंसिद्धंत्रैगुण्यविपर्ययाच्चैवेतिजन्मादि

यवस्थातः युगपत्स्वव्यापदर्शनात्सात्त्विकराजसादिभेदाच्च न पुरु
षैक्यमित्यर्थ इति चेन्न व्यापकानेकात्मवादे भोगसांकर्यप्रसंगा
त् न ह्येकस्यांतःकरणे सुखादिरूपेण परिणते तेन प्रतिसंवेदीय
रूपवचेतनत्र इति नियंतृभाको सर्वेषामात्मनामविशेषेणाप्रति
संवेदनापत्तेर्धर्मनीयत्वात् श्रोत्रस्यैकस्याधिकरणे शष्कुलीरू
पोपाधिभेदादिवांतःकरणरूपोपाधिभेदादेकस्याप्यात्मनः श
ह्यग्रहणव्यवस्थावज्जन्मादिव्यवस्थापि सम्पत्तीति न पुरुषबहु
त्वंवकल्प्यं ननु जीवेश्वरयोर्लक्षणकाद्भेदः सिद्धे किमत्र रथ्येन
तत्प्रतिपादनार्थेनेति चेन्नात्र यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं
पश्येदिति श्रुतेर्विद्यावस्थायां भेदाभावेपि अविद्यावस्थायां भ्र
नःप्रविष्टःशास्ता जनानां एष ह्येव साधु कर्म कारयति तं यम
भ्यो लोकेभ्य उन्निनीषत इति व्यवहारदशायां शास्यशासितृभा
वेन कर्तृकारयितृभावेन च प्रसक्तस्य जीवेश्वरयोर्भेदस्य निरा
सार्थत्वात् उत्तरग्रंथस्यारंभ उपपद्यते तत्रानुपदोक्तेन तत्पदा
र्थेन सहाभेदवक्तव्यो यस्तावै भास्यभासकभावेन देहात्क्षेत्र
ज्ञस्य कुभाज्ञास्वत इवाविवेकं दर्शयति इदमिति इदमनात्मत्वे
न भास्यं घटादिवदहंकारेण शरीरं विशरणधर्मि हे कौंतेय क्षेत्रमिति
णोत्यात्मानमविद्यया त्रायते च विद्ययेति क्षेत्रं कर्मबीजप्ररोह
स्थानं क्षेत्रशब्देनोच्यते एतद्यो वेत्ति भासयति तं विदात्मानं क्षे
त्रज्ञ इत्यन्वर्थसंज्ञं प्राहुः के प्राहुः तद्विदः क्षेत्रक्षेत्रज्ञविदः प
नेन गच्छामि पश्यामि भुंजे इति ह्यनुभवाद्देहेंद्रियाहंकाराः घनी
तितो भासककोटिनिविष्टा इव भांति तथापि तेषां न वस्तुतो भा
सकत्वलक्षणो नात्मभावः सिद्धः १ ॥

आनंदीटीका १

अथैवं चतुरंशस्य भगवतः पेक्यान्स्य ज्ञानेन नियतकर्म
समुच्चितेन निःश्रेयसप्राप्तिरिति प्रकरणार्थप्रतिपादना
य प्रथमाध्यायषट्केन च त्वंपदार्थमेव प्रकृतिपुरुषकाल
गुणानां प्रकृतिविकृतीनां चोद्देशः द्वितीयाध्यायषट्केन

लक्षणं कृतम् अधुनास्मिन्नध्यायषट्के सर्वेषां परीक्षा मार
भमाणः निर्णीततावद्धर्मांशपक्षपातितया पुनः भूयः
भूयः समुद्देशलक्षणात्मपरीक्षणमिति परीक्षालक्षणा
नुगमनेन यथा महाभूतानां कारणानां कार्यजातं विष
यैन्द्रियशरीरत्वेन त्रिप्रकारम् भूमेर्हि विषयो मृत्पाषाण ६
स्थावरलक्षणः इन्द्रियं प्राणिनां गंधव्यंजकं घ्राणम् शरीर
मिदं मनुष्यवृक्षरूपमेव तथैव परापरायाः पारमेश्वर्याः प्र
कृतेरपि कार्यजातं त्रिविधमेव तत्र महदादयः प्रकृतिविकृ
तयो विषयेन्द्रियरूपाः हिरण्यगर्भादिशरीरं तु प्रसिद्धमेव
तदेवास्मदादीनां स्थूलबुद्धीनां प्रतिबोधनाय स्थूलयोः
देहदेहज्ञयोः स्वरूपलक्षणेन श्रीभगवानुवाच ॥ इदं
दृश्यमानं चतुर्विंशतितत्त्वसंघातरूपं शरीरं देहमि
त्युच्यते अस्मिन् कृतानां कर्मणामेवाप्तानां बीजानां तत्क
र्मप्रसवफलानां विपाकाश्रयपर्यायं देहमित्युच्यते प
तच्छरीरमेव वेद्यं यो वेद जानाति अस्मिन्नचेतने शरीरे य
श्चेतनस्त्वाज्जीवात्मानं देहज्ञमिति प्राहुस्तद्विद आत्मविदो
मुनयः १ ॥ रामकंठीटीका १४ ॥

अध्यायद्वादशकेन प्रक्रान्तप्रयोजनविषयमशेषमभिधे
यतत्त्वमभिहितं प्रायशो नकश्चिद्धृत्क्रमप्रोषाविद्यते के
वलमपूर्वार्थविशिष्टेनाध्यायपंचकेन निर्मलीकर
णायेदानीं प्रवर्त्यते तथा च प्रस्तावनाप्रदर्शितप्रक्रियाक्रमे
ण पारमार्थिकयथात्मैकस्वरूपव्यवस्थितोपि परमेश्वरो नि
रूपमनिजक्रीडामात्रप्रयोजनतयैकमेव स्वस्वभावं वेद्यवेद

श्री.
गी.ता.
त्र.

7

कविभागपरिकल्पनयाशाखोढयेनप्रस्तुतमवभासयामिमांमा
यामयीमहावागुरामयग्रथयत्साविषयविषयिविभागेनशरीर
शरीरिभावेनचावभासमाना समस्तंसंसारिचक्रमवमथ्नावस्थि
तानस्याःस्वेच्छानुग्राह्यत्वेनपरिगृहीतजनप्रमत्तमुद्ग्रथनोपायभू
तेसकलेप्रकरणेतत्रतत्रप्रतिपादितस्वरूपंज्ञानलक्षणमर्थमु
पदिष्टवान् तत्रविषयविषयिविभागेनावस्थितायास्तस्याउद्वे
ष्टनायसमस्तोज्ञानलक्षणोर्थःप्रपंचितः तथाहितत्रपरसं
वित्तत्वस्यजडत्वेनतविभागेनस्थूलसूक्ष्मप्रकृतिप्रपंचाविवे
कपुरःसरतयातस्यार्थस्याहंकृतत्वस्यजगतःप्रभवःप्रलय
स्थित्यादिनाप्रतिपादितयाब्रह्मतत्त्वलक्षणयापरतयाप्रकृ
त्यापरापरयोःप्रकृत्योरभेदपरमार्थतांप्रतिपादनेननिर्ण
यःकृतः इदानींशरीरशरीरिभावेनव्यवस्थितायास्तस्याउ
द्वेष्टनोपायभूतत्वेनज्ञानस्यनिर्णयार्थंसमनन्तरमध्याय
मारभते तत्रतावत् शरीरशरीरिणोर्विनत्वव्याख्यास्य
मानप्रतिपादकसंज्ञानिर्देशेनसामान्यलक्षणंप्रतिपादयन्
संक्षेपतोविविक्तिनस्यज्ञानस्यस्वरूपमपिभगवानुवाच इदं
सर्वप्रमात्प्रसिद्धतयाव्यवस्थितंशरीरंदेहःक्षेत्रसाधर्म्यात्क्षे
त्रमित्युच्यतेक्षेत्रसंज्ञयाकथ्यते यथाहिक्षेत्रंस्थलादिगतानांधान्या
दीनांबीजानांमूलस्तम्भशाखोपशाखादिविशेषप्रसवाभिव्य
क्त्याधिकरणंप्रसिद्धंदेशःक्षेत्रमित्युच्यतेतथाकर्माशयस
मतानांकर्मणांजात्यायुर्भोगलक्षणविपाकविशेषाभिव्य
क्त्यधिकरणभूतंशरीरमपीदंक्षेत्रमित्युच्यते तेनतत्कर्मवि
पाकास्पदत्वेनयदनुभूयतेतच्छरीरमितिवेदितव्यमेतत्क्षेत्रंवि
यंक्षेत्रंयोवेत्तिजानाति तद्विदःक्षेत्रज्ञस्वरूपज्ञाःक्षेत्रज्ञमितिवि
दुर्ज्ञानते किमनेनोक्तंभवति अस्मिंशरीरेद्विप्रकाराप्रतिपत्ति

रेवस्थितासर्वदेहिनामहन्तयाव्यवस्यतिकदाचिन्ममेदंशरीर
मितीदंतयाच व्यवसायितामानातावत्कश्चिदत्रविषयतएव
यच्छ्राश:प्रमात्तेनप्रतीयतेसदेवत्रज्ञोजीवश्चेतनइतिप्राति
पत्तव्य: एवमस्मिंशरीरेयद्यदृश्यतयावेदकसंबंधमात्रात्प्रतीय
ते तत्क्षेत्रंश्नतयावेदितव्योयोसौवेदकतयाप्रतीयतेसक्षेत्रज्ञ
ज्ञात्मेत्यवगंतव्यएतावत्सेवनित्यावहितत्वंशरीरशरीरिणोर्वि
वेकज्ञानकारणं तत्त्ववेद्यवेदकसंबंधमात्रनिबंधनसकलप
रापरव्यवहाराणामपिसर्वदेहिनांमायानिमीलितनत्वदृशां
स्वप्नेपिनोन्मिषति यावदीश्वरानुग्रहशास्त्रैकवसाततन्तदैव
षांनत्मिलिता तेनानुगृहीतएवविषयोप्यज्ञानस्पतितात्पर्य
यतउक्तं तद्विद:केचनैवयोगिनस्तंविदुरिति

१ [illegible]टीका १५

एवमत्रश्रीगीताशास्त्रेयत्रतत्रमच्छब्दप्रयोगात्किमयंश्रीकृष्ण
मच्छब्दस्यवाच्यस्तु[illegible]: कश्चिदित्येवमर्जुनमिषेणानुग्राह्यजनस्य
संशयमाशंकमानोमच्छब्दाभिधेयविवरणायत्रयोदशमध्या
यंप्रस्तौतु श्रीभगवानुवाच हेकौंतेय इदंसर्वेषांप्रमाणविषयी
भूतमिदंतापदयतितंवाशरीरंदेह:क्षेत्रंनामकथ्यते कर्मबीज
प्ररोहभूमित्वात्कर्मफलनिहन्त्रेवीएतज्जडरूपंक्षेत्रंयोवेत्तिवेद
यति अन्तर्भावितण्यर्थोत्रविदि: अहन्तयावहममेतावचेतनम
पिचेतनीभावमापादयति तंक्षेत्रज्ञंजीवंप्राहु: कृषीवलवत्तत्फ
लभोक्तृत्वात् तद्विदस्तयोर्विवेकज्ञा: ॥१॥

पंवोलेटीका

सममाध्यायेईश्वरस्यजगन्निर्माणसाधनभूतेहेमहतीनिरित

अप्रकाशपराप्रष्टधाभिन्नात्रिगुणात्मिकाक्षेत्रलक्षणाया अपराजी-
वरूपचा क्षेत्रज्ञलक्षणा तयोरविवेकाज्जीवभावापन्नस्य चिदंशस्यायं
संसारः तदेव प्रकृतिद्वयं क्षेत्रक्षेत्रज्ञलक्षणापरस्परविविक्तं तत्त्वतो
निरूपयन् तेषामहं समुद्धर्तेति स्वभक्तस्य संसारान् समुद्धरणप्र-
तिपत्त्वं तत्त्वज्ञानमन्तरेण तदसंभावयन् प्रकृतिद्वयविवेकेन परमा-
र्थतत्त्वनिरूपणाय श्रीभगवानुवाच इदमिदं कौंतेयेदं परिदृश्य-
मानं शरीरं क्षेत्रं क्षत्रत्राणात् क्षयात् क्षरणात् क्षेत्रवद्वाक्षे-
त्रवदस्मिन् कर्मफलनिष्पत्तेः संभवात् क्षेत्रमित्यभिधीयते एतदा-
पादतलमस्तकं तेत्रे यो वेत्ति स्वभावत उपदेशेन वा तदिदं क्षेत्रज्ञं
विभागविदः तत् क्षेत्रज्ञमिति प्राहुः कथयंति १॥

।गणवीरसंमितबोधिनी।

श्रीकार्तवीर्यार्जुनाय नमः गदाधरं गदापदं प्रणम्य तत्प्र-
सादतः त्रयोदशोऽध्याये टिप्पणीं करोमि प्रासना[illegible]ः १ पूर्वो-
क्तानां स्वधर्मनिष्ठानां भक्तानां स्वधर्मानुष्ठानेन क्षपितकल्म-
षाणामात्यंतिकदुःखनिवृत्तये प्रकृतिपुरुषज्ञानमवश्यम-
पेक्ष्यते तत्र सप्तमाध्याये परापरत्वेन प्रकृतिद्वितयमुक्तं तत्रैष
रस्य प्रकृतिस्त्रिगुणात्मिकाष्टधाभिन्नापरा संसारहेतुत्वादप-
राजीवभूता क्षेत्रज्ञलक्षणा परात्मिका याभ्यां प्रकृतिभ्यामीश्व-
रो जगदुत्पत्तिस्थितिलयहेतुत्वं प्रतिपद्यते तत्र क्षेत्रक्षेत्रज्ञलक्ष-
णप्रकृतिद्वयनिरूपणद्वारेण तत्सहितेश्वरस्य तत्त्वनिर्धारणार्थं
त्रयोदशाध्याय आरभ्यते प्रकृतिश्च त्रिगुणात्मिका सर्वकार्यकारण-
विषयाकारपरिणता पुरुषस्य भोगापवर्गार्थं कर्तृत्वेन या देहें-
द्रियाद्याकारेण संहन्यते सोऽयं संघात इदं शरीरमित्यत्र भगवानु-
वाच इदमिति सर्वनाम्नोक्तं विभिनष्टि शरीरमिति कौंतेय
क्षतत्राणात् क्षयात् क्षरणात् क्षेत्रवदस्मिन् कर्मफलनिर्वृत्तेः क्षेत्र-
मिति इति पाठं पदं प्राहुः पदार्थकः क्षेत्रमित्येवमभिधीयते

कथ्यते एतच्छरीरं यो वेत्ति विजानाति अहं ममेत्यभिमन्यते तं क्षे
त्रज्ञ इति प्राहुः कथयंति तद्विद इति तौ क्षेत्रक्षेत्रज्ञौ विदंति ये ते
तद्विदः क्षेत्रक्षेत्रज्ञयोर्विवेकविद इति १॥

मधुभाष्य

पूर्वोक्तज्ञानज्ञेयद्वेधपुरुषान् पिंडीकृत्य विविच्य दर्शयत्य
नेनाध्यायेन षड्विकारविशेनविकारेण शरीरं एतस्य यत् यतो
याति प्रवर्त्तते स च प्रवर्त्तकः एतस्य यदित्यस्मात् प्रवर्तते क्षे
त्रमिति वचनं स च यश्चास्य स्वरूपमात्रं ब्रह्मसूत्राणि प्रागरीरके
च्छादयो विकाराः स च यत्प्रभावश्चेति वक्तृ तज्ज्ञानसाधना
न्याह १॥

भाषा अनुवाद टीका

अब इस तेरहें अध्याय मे तत्त्व ज्ञान वर्णन किया जाता है कि हे पापी मृत्युयुक्त संसार सागरसे सगुण उपासक अपने भक्तों को मै उद्धार करता हूं इत्यादि द्वादश अध्याय के सप्तम श्लोक मे भगवत अङ्गीकृत जो संसारोद्धरण सो ब्रह्म ज्ञान के विना असंभव है इ सहेतु तत्व ज्ञान उपदेश करणार्थ भगवान यह प्रकृति पुरुष विवेक अध्यायका आरम्भ करते हैं जो प्रकृति पुरुष विवेक सप्तम अध्यायके पञ्चम श्लोक मे परा अपरा प्रकृति द्वय रूप कहा है जिस प्रकृति के द्वारा अविवेक वशतें यह चेतन का अंश जीव भावको प्राप्त होय संसारी होताहैं और जिस प्रकृतिद्वय के जीव के से उपभोगार्थ परमेश्वर सृष्टि आदिमे प्रवृत होते हैं सोई क्षेत्र पदवाच्य परस्पर भिन्नस्वरूप द्वय प्रकृति को स्वरूप से निरूपण करनेके लिये भगवान श्रीकृष्ण कहतेहैं कि हेकौन्तेय क्षेत्रऔक्षेत्रज्ञ दोनोके विचार कारी लोग इसभोगायतन भोगसाधन शरीर को क्षेत्र कहते हैं क्यों कि यह शरीर संसारसस्य के अंकुर होने की भूमि है और जो इस शरीर को जानता अर्थात हम हमारा यह विचारता है उस को क्षेत्र औ क्षेत्रज्ञ विवेकी जन क्षेत्रज्ञ कहते हैं जिस हेतु क्षेत्रज्ञ किसान के समान इस देह रूप क्षेत्र का फल भोग करता है
॥ १ ॥

दोहा ॥

कुंतिसुत यहदेहको क्षेत्रकहोश्रुतिजोय जोयहजाने तिहकहैं
क्षेत्रज्ञ लषैसोय १॥

9

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम २

शांकरभाष्यं टीका १

एवं क्षेत्रक्षेत्रज्ञावुक्तौ किमेतावन्मात्रेण ज्ञानेन ज्ञातव्याविति नेत्यु
च्यते क्षेत्रज्ञमिति क्षेत्रज्ञं यथोक्तलक्षणञ्चापि मां परमेश्वरमसंसा
रिणं विद्धि जानीहि योऽसौ सर्वक्षेत्रेषु कः क्षेत्रज्ञो ब्रह्मादिस्तम्बप
र्य्यन्तानेकक्षेत्रोपाधिप्रविभक्तस्तं निरस्तसर्वोपाधिभेदं सदसदा
दिशब्दप्रत्ययागोचरं विद्धीत्यभिप्रायः हे भारत यस्मात् क्षेत्रक्षेत्रज्ञे
श्वरयाथात्म्यव्यतिरेकेण न ज्ञानगोचरमन्यदवशिष्टमस्ति तस्मात्
क्षेत्रक्षेत्रज्ञयोर्ज्ञेयभूतयोः यत् ज्ञानं क्षेत्रक्षेत्रज्ञौ येन ज्ञानेन वि
षयीक्रियेते तत् ज्ञानं सम्यक्ज्ञानमिति मतमभिप्रेतमित्यभिप्रा
यो मम ईश्वरस्य विष्णोः ॥ ननु सर्वक्षेत्रेष्वेक एव ईश्वरो नान्यस्त
द्व्यतिरिक्तो भोक्ता विद्यते चेत्तत ईश्वरस्य संसारित्वं प्राप्तं ईश्वरव्यति
रेकेण वा संसारिणोऽन्यस्याभावात् संसाराभावप्रसङ्गः तच्चोभयम
निष्टं बन्धमोक्षतद्धेतुशास्त्रानर्थक्यप्रसङ्गात् प्रत्यक्षादिप्रमाण
विरोधाच्च प्रत्यक्षेण तावत् सुखदुःखतद्धेतुलक्षणः संसार उपल
भ्यते जगद्वैचित्र्योपलब्धेश्च धर्माधर्मनिमित्तः संसारोऽनुमीयते स
र्वमेतदनुपपन्नमात्मेश्वरैकत्वे न ज्ञानाज्ञानयोरन्यत्वेनोपपत्तेः
दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञानाज्ञाने तथा
च तयोर्विद्याविद्याविषययोः फलभेदोऽपि विरुद्धो निर्दिष्टः श्रेय
श्च प्रेयश्चेति विद्याविषयः श्रेयः प्रेयस्त्वविद्याकार्य्यमिति तथा
च व्यासः द्वाविमावथ पन्थानावित्यादि इमौ द्वावेव पन्थानावित्या
दि चेह च बहु निष्ठे उक्ते अविद्या च सह कार्य्येण विद्यया हातव्ये
ति श्रुतिस्मृतिन्यायेभ्योऽवगम्यते श्रुतयस्तावदिह चेदवेदीदथ
सत्यमस्ति न चेदिहावेदीन्महती विनष्टिस्तमेवं विद्वानमृत इह
भवति नान्यः पन्था विद्यतेऽयनाय आनन्दं ब्रह्मणो विद्वान्न बि
भेति कुतश्चन अविदुषस्त्वथ तस्य भयं भवत्यविद्यायामन्तरे व

१३
श्री॰गी॰
टी॰

10

ऽमानाद्ब्रह्म वेद ब्रह्मैव भवति अन्योसावन्योहमस्मीति न स वेद यथा
था पशुरेवं स देवानामात्मविदः स इदं सर्वं भवति यदा चर्मवदि
त्याद्याः सहस्रशः स्मृतयश्च अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्त
वः इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः समं पश्यन् हि स
र्वत्र इत्याद्याः न्यायतश्च सर्पान् कुशाग्राणि तथोदपानं ज्ञात्वा मनु
ष्याः परिवर्जयन्ति अज्ञानतस्तत्र पतन्ति केचित् ज्ञाने फलं पश्य
यथा विशिष्टं तथा च देहादिष्वनात्मस्वात्मबुद्धिरविद्वान् रागद्वेषा
दिप्रयुक्तो धर्माधर्मानुष्ठा कृत् जायते म्रियते चेत्यवगम्यते देहादि
व्यतिरिक्तात्मदर्शिनो रागद्वेषादिप्रहाणापेक्षया धर्माधर्मप्रवृत्त्यु
पशमान्मुच्यन्त इति न केनचित् प्रत्याख्यातुं शक्यं न्यायतस्तत्रैवं
सति क्षेत्रज्ञस्येश्वरस्यैव सतोऽविद्याकृतोपाधिभेदतः संसारित्वमि
व भवति यथा देहाद्यात्मत्वमात्मनः सर्वजन्तूनां हि प्रसिद्धो देहा
दिष्वनात्मस्वात्मभावो निश्चितोऽविद्याकृतो यथा स्थाणौ पुरुषनि
श्चयो न चैतावता पुरुषधर्मः स्थाणोर्भवति स्थाणुधर्मो वा पुरुष
स्य तथा न चैतन्यधर्मो देहस्य देहधर्मो वा चेतनस्य एवं सुखदुः
खमोहात्मकत्वादिरात्मनो न युक्तोऽविद्याकृतत्वाविशेषाज्जरामृत्युव
त्वात्तत्त्वादिति चेत् स्थाणुपुरुषौ ज्ञेयावेव सन्तौ ज्ञात्रान्योन्यस्मि
न्नध्यस्तावविद्यया देहात्मनोस्तु ज्ञेयज्ञात्रोरेवेतराध्यास इति न स
मो दृष्टान्तोऽतो देहधर्मो ज्ञेयोऽपि ज्ञातुरात्मनो भवतीति चेन्नाचैतन्या
दिप्रसङ्गाद्यदि हि ज्ञेयस्य देहादेः क्षेत्रस्य धर्माः सुखदुःखमोहे
च्छादयोऽपि केन च ज्ञातुरात्मनो भवन्ति अविद्याध्यारोपिता जराम
रणादयस्तु न भवन्तीति विशेषहेतुर्वक्तव्यो न भवन्तीत्यस्त्वनुमा
नमविद्याध्यारोपितत्वाज्जरादिवदिति हेयत्वादुपादेयत्वाच्चेत्यादि
तत्रैवं सति कर्तृत्वभोक्तृत्वलक्षणः संसारो ज्ञेयस्थो ज्ञातर्यविद्य
याध्यारोपित इति न तेन ज्ञातुः किञ्चित् दुष्यति यथा बालैरध्या
रोपितेनाकाशस्य तलमलवत्त्वादिना एवञ्च सति सर्वक्षेत्रेष्व
पि सतो भगवतः क्षेत्रज्ञस्येश्वरस्य संसारित्वगन्धमात्रमपि न
शंक्यं न हि क्वचिदपि लोकेऽविद्याध्यस्तेन धर्मेण कस्यचिदुप-

कारोऽपकारो वा दृष्टोपलब्ध्या समोऽदृष्टान्त इति तदसत् कथमवि
द्यामात्रे हि दृष्टान्तदार्ष्टान्तिकयोः साधर्म्यं विवक्षितं तत्र व्य
भिचरति यत्तु ज्ञातरि व्यभिचरतीति मन्यसे तस्याप्यनैकान्तिकत्वं
दर्शितं जरादिभिरविद्यावत्त्वात् क्षेत्रज्ञस्य संसारित्वमिति चेन्न प्र
विद्यायास्तामसत्वात्तामसो हि प्रत्ययश्चावरणात्मकत्वादविद्या वि
पर्यासविपरीतग्राहकः संशयोपस्थापको वा अग्रहणात्मको वा विवे
कप्रकाशभावे तदभावात्तामसे चावरणात्मके तिमिरादिदोषे सति
अग्रहणादेरविद्यात्रयस्योपलब्धेः प्राहैवं तर्हि ज्ञातृधर्मोऽविद्या
न करणे चक्षुषि तैमिरिकत्वादिदोषोपलब्धेर्यत्तु मन्यसे ज्ञातृधर्मो
ऽविद्या तदेव चाविद्याधर्मवत्त्वं क्षेत्रज्ञस्य तत्संसारित्वं तत्र यदुक्तमी
श्वर एव क्षेत्रज्ञोन संसारीत्येतदयुक्तमिति तन्न यथा करणे चक्षु
षि विपरीतग्राहकादिदोषस्य दर्शनान्न विपरीतादिग्रहणं तन्निमि
त्तं वा तैमिरिकत्वादिदोषो गृहीतृधर्मः संस्कारेण तिमिरेऽपनीते
गृहीतुरदर्शनान्न गृहीतृधर्मो यथा तथा सर्वत्रैवाग्रहणविपरीत
संशयप्रत्ययास्तन्निमित्ताः करणस्यैव कस्यचित् भवितुमर्हन्ति न
ज्ञातुः क्षेत्रज्ञस्य संवेद्यत्वाच्च तेषां प्रदीपप्रकाशवन्न ज्ञातृधर्मत्वं
संवेद्यत्वादेव स्वात्मव्यतिरिक्तसंवेद्यत्वं सर्वकरणवियोगे च कैव
ल्ये सर्ववादिभिरविद्यादिदोषवत्त्वानभ्युपगमादात्मनो यदि क्षेत्र
ज्ञस्याग्न्युष्णवत् स्वो धर्मस्ततो न कदाचिदपि तेन वियोगः स्यादवि
क्रियस्य च व्योमवत् सर्वगतस्यामूर्तस्यात्मनः केनचित् संयो
गवियोगानुपपत्तेः सिद्धं क्षेत्रज्ञस्य नित्यमेवेश्वरत्वमनादित्वान्नि
र्गुणत्वादित्यादीश्वरवचनाच्च नन्वेवं सति संसारसंसारित्वाभावे
शास्त्रानर्थक्यादिदोषः स्यादिति न सर्वैरभ्युपगतत्वात् सर्वैरा
त्मवादिभिरभ्युपगतो दोषो नैकेन परिहर्तव्यो भवति कथमभ्यु
पगत इति मुक्तात्मनो संसारसंसारित्वव्यवहाराभावः सर्वैरेवा
त्मवादिभिरिष्यते न च तेषां शास्त्रानर्थक्यादिदोषप्राप्तिरभ्युप
गता तथा नः क्षेत्रज्ञानामीश्वरैकत्वे सति शास्त्रानर्थक्यं भव
तु अविद्याविषये चार्थवत्त्वं यथा द्वैतिनां सर्वेषां बन्धावस्थायां

मेव शास्त्रार्थवत्त्वं न मुक्तावस्थायामेवं शुद्धे तद्वादिनामपि ननु
आत्मनो बन्धमुक्तावस्थे परमार्थत एव वस्तुभूते द्वैतिनो नः सर्वे
षामात्मनो हेयोपादेयतत्साधनसद्भावे शास्त्रार्थवत्त्वं स्यादद्वैति
नो पुनर्द्वैतस्यापरमार्थत्वादविद्याकृतत्वात् बन्धावस्थायाश्चात्म
नोऽपरमार्थत्वे निर्विषयत्वात् शास्त्रस्यानर्थक्यमिति चेन्नात्मनो
ऽवस्थाभेदानुपपत्तेः यदि तावदात्मनो बन्धमुक्तावस्थे युगपत्
स्यातां क्रमेण वा युगपत्तावद्विरोधान्न सम्भवतः स्थितिगती इ
वैकस्मिन् क्रमभावित्वे च निर्निमित्तत्वे निर्मोक्षप्रसङ्गोऽन्यनिमि
त्तत्वे च स्वतोऽभावादपरमार्थत्वप्रसङ्गस्तथा च सत्यभ्युपगमहानिः
किञ्च बन्धमुक्तावस्थयोः पौर्वापर्यं निरूपणायां बन्धावस्थापू
र्वं प्रकल्प्यानादिमत्यन्तवती च तच्च प्रमाणविरुद्धं तथा मोक्षा
वस्थासादिमत्यनन्तवती च तावत् प्रमाणविरुद्धैवाभ्युपगम्यते
न चावस्थावतोऽवस्थान्तरं गच्छतो नित्यत्वमुपपादयितुं शक्यमथा
नित्यत्वदोषपरिहाराय बन्धमुक्तावस्थाभेदो न कल्प्यतेऽतो द्वैति
नामपि शास्त्रानर्थक्यदोषोऽपरिहार्य एवेति समानत्वान्नाद्वैतवा
दिना परिहर्तव्यो दोषः न च शास्त्रानर्थक्यं यथाप्रसिद्धाविद्वत्
पुरुषत्वात् शास्त्रस्य अविदुषो हि फलहेत्वोरनात्मनोरात्मदर्शने न
विदुषो विदुषो हि फलहेतुभ्यामात्मनोऽन्यत्वदर्शने सति तयोरह
मित्यात्मदर्शनानुपपत्तेः न ह्यत्यन्तमूढ उन्मत्तादिरपि जलाग्न्योः
छायाप्रकाशयोर्वैकात्म्यं पश्यति किमुत विवेकी तस्मान्न वि
धिप्रतिषेधशास्त्रं तावत् फलहेतुभ्यामात्मनोऽन्यत्वदर्शिनो भव
ति न हि देवदत्त त्वमिदं कुर्विति कस्मिंश्चित् कर्मणि नियुक्तो
विष्णुमित्रोऽहं नियुक्त इति तच्छ्रोतुर्नियोगं शृण्वन्नपि प्रतिपद्यते
नियोगविषयविवेकाग्रहणात्तूपपद्यते प्रतिपत्तिस्तथा फल
हेत्वोरपि ननु प्राकृतसम्बन्धापेक्षया युक्तैवाप्रतिपत्तिः शास्त्रार्थ
विषयफलहेतुभ्यामन्यात्मत्वदर्शनेऽपि सति इष्टफलहेतौ प्रव
र्त्तितोऽस्म्यनिष्टफलहेतोश्च निवर्त्तितोऽस्मीति यथा पितृपुत्रादीना
मितरेतरात्मान्यत्वदर्शने सत्यप्यन्योन्यनियोगप्रतिषेधार्थप्रति

विषय

पत्तिने व्यतिरिक्तात्मदर्शनप्रतिपत्तेः प्रागेव फलहेतोरात्माभिमान
स्य सिद्धत्वात् प्रतिपन्ननियोगप्रतिषेधार्थो हि फलहेतुभ्यामात्म
नोऽन्यत्वं प्रतिपद्यते न पूर्वं तस्माद्विधिप्रतिषेधशास्त्रमविद्वद्विषय
मिति सिद्धं ननु स्वर्गकामो यजेत कलञ्जन्न भक्षयेदित्यादावात्मव्य
तिरेकदर्शिनामप्रवृत्तौ केवलदेहाद्यात्मदृष्टीनाञ्चातः कर्त्तुरभा
वाच्छास्त्रानर्थक्यमिति चेन्न यथा प्रसिद्धित एव प्रवृत्तिनिवृत्त्युपप
त्तेः ईश्वरक्षेत्रज्ञैकत्वदर्शी ब्रह्मवित्तावन्न प्रवर्त्तते तथा नैरात्म्यवा
द्यपि नास्ति परलोक इति न प्रवर्त्तते यथा प्रसिद्धस्तु विधिप्रतिषे
धशास्त्रश्रवणान्यथानुपपत्त्यानुमितात्मास्तित्व आत्मविशेषानभि
ज्ञः कर्म्मफलसञ्जाततृष्णः श्रद्दधानतया च प्रवर्त्तत इति सर्वेषां
नः प्रत्यक्षमतो न शास्त्रानर्थक्यं विवेकिनामप्रवृत्तिदर्शनात्तद
नुगामिनामप्रवृत्तौ शास्त्रानर्थक्यमिति चेन्न कस्यचिदेव विवेकोपप
त्तेरनेकेषु हि प्राणिषु कश्चिदेव विवेकी स्याद्यथेदानीन्न च विवेकि
नमनुवर्त्तन्ते मूढा रागादिदोषतन्त्रत्वात् प्रवृत्तेरभिचरणादौ च प्रवृ
त्तिदर्शनात् स्वाभाव्याच्च प्रवृत्तेः स्वभावस्तु प्रवर्त्तत इति उक्तं तस्माद
विद्यामात्रं संसारो यथादृष्टविषय एव न क्षेत्रज्ञस्य केवलस्याविद्या
तत्कार्यञ्च न च मिथ्याज्ञानं परमार्थवस्तु दूषयितुं समर्थं न ह्यूष
रदेशं स्नेहेन पङ्कीकर्त्तुं शक्नोति मरीच्युदकं तथाविद्या क्षेत्रज्ञस्य
न किञ्चित् कर्त्तुं शक्नोत्यतश्चेदमुक्तं क्षेत्रज्ञञ्चापि मां विद्धि अज्ञा
नेनावृतं ज्ञानमिति च अथ किमिदं संसारिणामिवाहमेवं ममैवेद
मिति पण्डितानामपि शृणु इदं तत् पाण्डित्यं यत् क्षेत्र एवात्मदर्शनं
यदि पुनः क्षेत्रज्ञमविक्रियं पश्येयुस्ततो न भोगं कर्म वा कांक्षेर
न्मम स्यादिति विक्रियैव भोगकर्मणी अथैवं सति फलार्थित्वादवि
द्वान् प्रवर्त्तते विदुषः पुनरविक्रियात्मदर्शिनः फलार्थित्वाभावात्
प्रवृत्त्यनुपपत्तौ कार्यकारणसंघातव्यापारोपरमे निवृत्तिरुपचर्य्य
ते इदञ्चान्यत् पाण्डित्यं कस्यचिदस्तु क्षेत्रज्ञ ईश्वर एव क्षेत्रञ्चान्य
त् क्षेत्रज्ञस्य विषयः अहन्तु संसारी सुखी दुःखी मूढो जातो मृतो
विपक्वः क्षीणो हृष्टोऽहं ममैवेत्येवमादयः सर्वे आत्मनि अध्यारोप्य

12

ते संसारोपरमस्य मम कर्तव्यः क्षेत्रक्षेत्रज्ञविज्ञानेन ध्यानेन चेश्व
रं क्षेत्रज्ञं साक्षात् कृत्वा तत्स्वरूपावस्थानेनेति यश्चैवं बुध्यते
यश्च बोधयति नासौ क्षेत्रज्ञ इत्येवं मन्वानो यः स पण्डितापसदः
संसारमोक्षयोः शास्त्रस्य चार्थवत्त्वं करोमीत्यात्महा स्वयं मूढोऽन्यां
श्च व्यामोहयति शास्त्रार्थसम्प्रदायरहितत्वात् श्रुतहानिमश्रुतक
ल्पनाञ्च कुर्वंस्तस्मादसम्प्रदायवित् सर्वशास्त्रविदपि मूर्खवदेवो
पेक्षणीयः यत्तूक्तमीश्वरस्य क्षेत्रज्ञैकत्वे संसारित्वं प्राप्नोति क्षेत्रज्ञा
नाञ्चेश्वरैकत्वे संसारिणोऽभावात् संसाराभावप्रसङ्ग इत्येतौ दोषौ
प्रत्युक्तौ विद्याविद्ययोर्वैलक्षण्याभ्युपगमादिति कथमविद्यापरिकल्पि
तदोषेण तद्विषयं वस्तु पारमार्थिकं न दुष्यतीति तथा च दृष्टान्तो
दर्शितमरीच्यम्भसोषरदेशो न पङ्कीक्रियत इति संसारिणोऽभावात्
संसाराभावप्रसङ्गदोषोऽपि संसारसंसारिणोरविद्याकल्पितत्वोपप
त्त्या प्रत्युक्तो नन्वविद्यावत्त्वमेव क्षेत्रज्ञस्य संसारित्वदोषस्तत्
कृतञ्च दुःखित्वादि प्रत्यक्षमुपलभ्यते न ज्ञेयस्य क्षेत्रधर्मत्वात्
ज्ञातुः क्षेत्रज्ञस्य तत्कृतदोषानुपपत्तेः यावत् किञ्चित् क्षेत्रज्ञस्य
दोषजातमविद्यमानमासञ्जयति तस्य ज्ञेयत्वोपपत्तेः क्षेत्रधर्मत्व
मेव न क्षेत्रज्ञधर्मत्वं न च तेन क्षेत्रज्ञो दुष्यति ज्ञेयेन ज्ञातुः सं
सर्गानुपपत्तेः यदि हि संसर्गः स्यात् ज्ञेयत्वमेव नोपपद्येत यद्या
त्मनो धर्मोऽविद्यावत्त्वं दुःखित्वादि च कथम्भोः प्रत्यक्षमुपलभ्यते
कथम्वा क्षेत्रज्ञधर्मः ज्ञेयञ्च सर्वं क्षेत्रं ज्ञातैव क्षेत्रज्ञ इत्यवधा
रितेऽविद्यादुःखित्वादेः क्षेत्रज्ञविशेषणत्वे क्षेत्रज्ञधर्मत्वं तस्य च
प्रत्यक्षोपलभ्यत्वमिति विरुद्धमुच्यतेऽविद्यामात्रावष्टम्भात् केवलं
अत्राह साविद्या कस्येति यस्य दृश्यते तस्यैव कस्य दृश्यत इत्यत्रो
च्यतेऽविद्या कस्य दृश्यत इति प्रश्नो निरर्थकः कथं दृश्यते चेद
विद्या तद्वन्तमपि पश्यसि न च तद्वत्युपलभ्यमाने सा कस्येति
प्रश्नो युक्तो न हि गोमत्युपलभ्यमाने गावः कस्येति प्रश्नो युक्तोऽर्थ
वान् भवेत् ननु विषमो दृष्टान्तो गवां तद्वतश्च प्रत्यक्षत्वात् सम्ब
न्धोऽपि प्रत्यक्ष इति प्रश्नो निरर्थकः न तथा विद्या तद्वांश्च प्रत्यक्षौ

यतः प्रश्नो निरर्थकः स्यादप्रत्यक्षेणाविद्यावताविद्यासम्बन्धे ज्ञाते
किन्तव स्याद् विद्याया अनर्थहेतुत्वात् परिहर्तव्या स्याद्यस्याविद्या
सतो परिहरिष्यति ननु ममैवाविद्या जानासि तर्ह्यविद्यान्तद्वन्तञ्चा
त्मानं जानामि न तु प्रत्यक्षेणानुमानेन चेज्जानासि कथं सम्बन्ध
ग्रहणं न हि तव ज्ञातुर्ज्ञेयभूतयाविद्यया तत्काले सम्बन्धो ग्र
हीतुं शक्यते अविद्याया विषयत्वेनैव ज्ञातुरुपयुक्तत्वान्न च ज्ञातुर
विद्यायाश्च सम्बन्धस्य यो ग्रहीता ज्ञानञ्चान्यत् तद्विषयं सम्भव
त्यनवस्थाप्राप्तेर्यदि ज्ञात्रापि ज्ञेयसम्बन्धो ज्ञायेतान्यो ज्ञाता कल्प्यः
स्यात्तस्याप्यन्यस्तस्याप्यन्य इत्यनवस्थापरिहार्या यदि पुनरविद्या
ज्ञेयान्यद्वा ज्ञेयं ज्ञेयमेव तथा ज्ञातापि ज्ञातैव न ज्ञेयं भवति य
दा चैवमविद्या दुःखित्वाद्यैर्न ज्ञातुः क्षेत्रज्ञस्य किञ्चित् दुष्यति न
न्वयमेव दोषो यत् दोषवत् क्षेत्रविज्ञातृत्वं न विज्ञानस्वरूपस्यैवा
विक्रियस्य विज्ञातृत्वोपचारात् यथोष्णतामात्रेणाग्नेस्तप्तिक्रियो
पचारस्तद्वद्यथात्र भगवता क्रियाकारकफलात्मत्वाभाव आत्मनि
स्वत एव दर्शितः अविद्याध्यारोपितैरेव क्रियाकारकाद्यात्मन्युपच
र्यन्ते तथा तत्र तत्र य एनं वेत्ति हन्तारं प्रकृतेः क्रियमाणानि गु
णैः कर्माणि सर्वशः नादत्ते कस्यचित् पापमित्यादिप्रकरणेषु
दर्शितस्तथैव च व्याख्यातमस्माभिरुत्तरेषु च प्रकरणेषु दर्श
यिष्यामो हन्त तर्ह्यात्मनि क्रियाकारकफलात्मतायाः स्वतोऽभावेऽ
विद्यया चाध्यारोपितत्वे कर्माण्यविद्वत्कर्तव्यान्येव न विदुषामि
ति प्राप्तं सत्यमेवं प्राप्तमेतदेव च न हि देहभृता शक्यमित्यत्र
दर्शयिष्यामः सर्वशास्त्रार्थोपसंहारप्रकरणे च समासेनैव कौ
न्तेय निष्ठा ज्ञानस्य यापरेत्यत्र विशेषतो दर्शयिष्यामः अलमिह
बहुप्रपञ्चेनेत्युपसंह्रियते २ ॥

आनंदगिरिकृत टीका २

दृश्यानां दुःखादीनां भेदकानां यावद्देहभाविनामनात्मधर्मत्वमस्ति
हृदये दृढतरं देहात्मत्वमुक्ता सांख्यानामिव तावन्मात्रेण मुक्तिरिह
नये तस्य सर्वदेहेष्वेकत्वावेदके स्वेन परमार्थेनान्तरेणैकं ह

श्री॰
गी॰ टी॰
३॰

13

तमनूद्य प्रश्नद्वारा दर्शयति एवमित्यादिना यथोक्तलक्षणं दृश्या
द्देहाद्विलक्षणं द्रष्टारमित्यर्थः चापीति निपातौ जीवस्यान्तरत्वज्ञान
स्य देहादन्यत्वज्ञानेन समुच्चयार्थौ भिन्नक्रमौ तत्क्षेत्रज्ञं सोऽप्येव
दृश्याद्दन्यदेव विद्धि किन्तु मां चापि विद्धीति सम्बध्यते यः सर्व
क्षेत्रेषु एकः क्षेत्रज्ञः तं मामेव विद्धीति सम्बन्धं सूचयति
सर्वेति तत्तत्क्षेत्रोपाधिकभेदभाजः तत्तच्छरीरयोगीश्वरस्य कथं
तद्विपरीतब्रह्मत्वधीरित्याशंक्याह ब्रह्मादीति उत्तरार्द्धं विभज
ते यस्मादिति तदेव विशिनष्टि क्षेत्रेति तच्च भेदविषयमज्ञानं
सम्यग्ज्ञानं तदिति युक्तं तस्य विवेकज्ञानस्य वाक्यार्थज्ञानद्वा
रा मोक्षौपयिकत्वेन सम्यक्त्वसिद्धिरिति भावः ॥ जीवेश्वरयोरे
कत्वमुक्तमाक्षिपति नन्विति जीवेश्वरयोरेकत्वे जीवस्येश्वरे वा त
स्य जीवे वान्तर्भावो नाद्यो जीवस्य परस्मादन्यस्याभावे संसारस्य नि
रालम्बनत्वानुपपत्त्या परस्यैव तदाश्रयत्वप्रसङ्गादित्यर्थः अन
श्नन्नन्यो अभिचाकशीति श्रुतेर्न तस्य संसारित्वमित्याशंक्य द्वितीयं
दूषयति ईश्वरेति जीवे चेदीश्वरोऽन्तर्भवति तदापि ततोऽन्यसं
सार्यभावात्तस्य च संसारानिष्टेः संसारो जगत्यस्तं गच्छेदित्यर्थः
प्रसङ्गद्वयस्येष्टत्वं निराचष्टे नद्वेति संसाराभावे तयोरन्यः पिप
पलं स्वाद्वत्तीत्यादिबन्धशास्त्रस्य तद्धेतुकर्मविषयकर्मकाण्ड
स्य चानर्थक्यमीश्वरान्तर्भूते च संसारे तदभोक्तृत्वश्रुते च संसारे
तदभोक्तृत्वश्रुतेः ज्ञानकाण्डस्य मोक्षतद्धेतुज्ञानार्थस्यानर्थक्यम
तोऽन प्रसङ्गद्वयेरिष्टत्वेत्यर्थः संसाराभावप्रसङ्गस्यानिष्टत्वे हेत्वन्त
रमाह प्रत्यक्षादीति तत्र प्रत्यक्षविरोधं प्रकटयति प्रत्यक्षेणेति
आदिशब्दोपात्तमनुमानविरोधमाह जगदिति विमतं विचित्रहे
तुकं विचित्रकार्यत्वात् प्रसादादिवदित्यर्थः प्रत्यक्षानुमानाग
मविरोधादयुक्तमैकात्म्यमुपसंहरति सर्वथेति येकोऽपि संसा
रित्वमविद्यातो विद्यातोऽसंसारित्वमिति विभागान्नानुपपत्तिरित्यु
त्तरमाह नेत्यादिना तयोः स्वरूपतो विलक्षणत्वे श्रुतिमाह दूरमि
ति अविद्या या च विद्येति प्रसिद्धे यते विद्याविद्ये दूरं विपरीते अ

यन्न विरुद्धे इत्यर्थः विदूरी नानागती भिन्नफले इत्यर्थः स्वरूपेतो
विरोधवत् फलतोपि सोस्तीत्याह तथेति फलभेदोक्तिमेवव्यन
क्ति विद्येति तयोर्द्वयाविलक्षणत्वे वेदव्यासस्यापि सम्मतिमाह
तथाचेति उक्तेर्थे भगवतोपि सम्मतिमुदाहरति दूरमेते इयो
रपि निःश्रेयसत्वसमुपादेयत्वमिति शङ्कां शातयति अविद्या चेति
अविद्या सकार्य्याज्ञातत्वेनात्र श्रुतिमुदाहरति श्रुतयस्तावदिति
इहेति जीवदवस्थोच्यते चेद्वा विद्योदयदोलेभ्ययोतोअवेदीदह
वत्तेति विदितवानित्यर्थः अथ विद्यानन्तरमेव सत्यमवितथं
पुनरावृत्तिवर्जितं कैवल्यं स्यादित्याह अथेति अविद्याविषयेपि
श्रुतिमाह नचेदिति जन्ममरणादिरूपा संसृतिर्विनष्टिः तस्यामह
त्वे सम्यग् ज्ञाने विना निवर्तयितुमशक्यत्वं विद्याविषये श्रुत्यन्तर त्य
माह तमेवमिति परमात्मानं प्रत्यक्षेन यः साक्षात्कृतवान् सदेहे
जीवन्नेव मुक्तोभवतीत्यर्थः विद्यां विनापि देवन्तरतो मुक्तिमाशं
क्याह नेति भयहेतुमविद्यान्निराकुर्वन् तज्जभयमपि तिरस्यति वि
द्वानिति अत्र वाक्यान्तरमाह विद्वानिति अविद्याविषये वाक्यान्तर
माह अविद्युषइति प्रतीच्येकरसे स्वल्पमपि भेदं मन्यमानस्य भेद
दृष्ट्यानन्तरमेव संसारभीत्यमित्यर्थः तत्रैव श्रुत्यन्तरमाह अविद्या
यामिति तन्मध्ये तत्परवशतया स्थितास्ते तमज्ञानतोदेहाद्यभि
मानवन्तो मूढाः संसरन्तीत्यर्थः विद्याविषये श्रुत्यन्तरमाह ब्रह्मे
ति अविद्याविषये श्रुत्यन्तरमाह अन्यो ॥ सावित्ति भेददृष्टिमनूद्य
तद्विदानमविदुरित्याह नेति सच मनुष्याणां पशुवद्देवादीनां प्रेष्य
तो प्राप्नोतीत्याह यथेति विद्याविषये वाक्यान्तरमाह आत्मविदि
ति इदं सर्वं प्रत्यग्भूतं ब्रह्मेत्यर्थः ज्ञानादेव तु कैवल्यमित्यत्र
श्रुत्यन्तरमाह यदेति न खल्वाकाशं चर्मवन्मानवो वेष्टयितुमीष्टे
मा तथा परमात्मानं प्रत्यक्षं नानुभूय न मुच्यते इत्यर्थः आदिशब्देनाऽ
नुक्ता विद्याविद्याफलभेदार्थाः श्रुतयो गृह्यन्ते तासामभ्यूयत्वेन प्रामा
ण्यं सूचयति महस्वपाइति विद्याविद्याविषये स्मृतिमुदाहरति स्म
तयश्चेति तत्राविद्याविषये वाक्यमाह अज्ञानेनेति विद्याविषये

वाक्यद्वयं दर्शयति इहेत्यादिना विद्याफलमनर्थध्वस्तिरविद्याफल
मनर्थप्राप्तिरित्येतदन्वयव्यतिरेकाख्यन्यायादपि सिध्यतीत्याह न्याय
तश्चेति तच्चैव प्रमाणसम्मतिमाह सर्वानिति उदपाने कूपे यथात्म
ज्ञाने विशिष्टे फले स्यात्तथा पश्येति योजना न्यायतश्चेत्यन्वयव्य
तिरेकाख्ये न्यायमुक्तं विवृणोति तथाचेति तत्रादावन्वयमाचष्टे
देहादिष्विति स्वनाद्यनिर्वाच्याविद्याहतधीरात्मा देहादावनात्मन्या
त्मबुद्धिमादधाति तद्युक्तो रागादिना प्रेर्यते ततस्तद्युक्तस्य कर्मा॰
नुतिष्ठति ततः कर्ता च यथा कर्मनूतनं देहमादत्ते पुरातनं त्यज
तीत्येवमविद्यावतः संसारित्वं सिद्धमित्यर्थः व्यतिरेकमिदानीं द
र्शयति देहादीति श्रुतियुक्तिभ्यां भेदे ज्ञाते रागादिध्वस्त्या कर्मोपर
माद्दोषध्वंसात्संसारासिद्धिरित्यविद्याराहित्ये बन्धध्वस्तिरित्यर्थः उक्तान्व
यादेरन्यथासिद्धिं शिथिलयति इतीनेति उक्तमन्वयादिवादिना के
नचिदपि न्यायेनोतः शक्यं प्रत्याख्यातुं तदन्यथासिद्धिसाधकाभावा
दित्यर्थः अन्वयादेरनन्यथासिद्धत्वे बोधमपि प्राचीनं प्रति नीतमि
त्याह तच्चेति ज्ञानाज्ञानयोरुक्तन्यायेन स्वरूपभेदे कार्यभेदे च स्वा
रस्येन परापरयोरैक्योपि बुद्ध्याद्युपाधिभेदादाविद्यकमात्मनः संसा
रित्वं आभासरूपं प्रातिभासिकं सिद्धमित्यर्थः आत्मनो ब्रह्मता स्व
तश्चेदहमित्यात्मभावेन ब्रह्मतापि भावादित्याशंक्याह यथेति दे
हाद्यतिरिक्तस्यात्मनो वैदिकपक्षे स्वतस्त्वेपि तस्मिन्नहमिति भाते
व तदतिरिक्तत्वं न भाति किं त्वविद्यातो देहाद्यात्मत्वमेव विपरीतं
भासते तथात्मनो ब्रह्मत्वे स्वाभाविकेपि तस्मिन् ब्रह्मत्वं न भात्य
विद्यातोऽब्रह्मत्वमेव तस्य भातीत्यर्थः आत्मनो देहाद्यात्मत्वमावि
द्यकं भातीत्युक्तं अनुभवेन साधयति सर्वैरिति अतस्मिंस्तद्बुद्धिरवि
द्याकृतेत्यत्र दृष्टान्तमाह यथेति पुरःस्थिते वस्तुनि वस्तुनः स्था
णावविद्यया पुमानिति निश्चयो जायते तथा देहादावनात्मन्यात्म
धीरविद्यातो निश्चितेत्यर्थः देहात्मनोरैक्यज्ञाने देहधर्मस्य जरा
देरात्मन्यात्मधर्मस्य च चैतन्यस्य देहेपि नियमः स्यादित्याशंक्या
ह तचेति स्थाणौ पुरुषत्वं भ्रान्त्या भातीत्येतावता पुरुषधर्मः शि

रः पाण्यादिर्न स्थाणोर्भवति तद्धर्मो वा रूक्षत्वादिर्न पुंसो दृश्यते मि
थ्याध्यस्ततादात्म्याद्वस्तुनो धर्मो व्यतिकरादिति दृष्टान्तमुक्त्वा दार्ष्टा
न्तिकमाह तथेति जरादेरनात्मधर्मत्वेऽपि सुखादेरात्मधर्मत्वमिति
केचित्तान् प्रत्याह सुखेति कामसङ्कल्पादिश्रुतेरनात्मधर्मत्वज्ञाना
दित्यर्थः किञ्च विमतो नात्मधर्मोऽविद्याकृतत्वाज्जरादिवन्न च हे
त्वसिद्धिरतस्मिंस्तद्बुद्धिविषयत्वेन स्थाणौ पुरुषत्ववदविद्याकृत
त्वस्योक्तत्वादिति मत्वाह अविद्येति स्थाणौ पुरुषत्ववदाविद्यत्वे
देहादेरप्युक्ते दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यादिति शङ्कते नेति तदेव
प्रपञ्चयति स्थाण्वित्यादिना ज्ञेयस्य ज्ञेयान्तरेऽध्यासादत्र चोभयोर्ज्ञे
यत्वव्यापकव्याहत्या व्याप्याध्यासस्यापि व्याहतिरित्यर्थः देहात्म
बुद्धेर्भ्रमत्वाभावे फलितमाह अत इति उपाधिधर्माणां सुखादीनां
उपहिते जीवे वस्तुत्वमयुक्तमतिप्रसङ्गादिति परिहरति नेत्यादि
ना अतिप्रसङ्गमेव प्रकटयति यदीति सुखादिनामात्मधर्मत्वे चे
दुपाधिधर्मत्वादचेतनस्य जरादिकस्यात्मनो धर्मः स्यादित्यर्थः सुखा
देरात्मधर्मो नेति पक्षेऽपि नास्ति विशेषहेतुरित्याशंक्याह नेति त
देवानुमानेन स्मारयति अविद्येति विमतं नात्मधर्मः आगमापायि
त्वात् सम्मतवदित्यनुमानान्तरमाह हेयत्वादिति आदिशब्दाद्दृश्य
त्वजडत्वादिग्रहणं सुखादीनां जरादिवदात्मधर्मत्वाभावे तस्य वस्तु
तोऽसंसारित्वे फलितमाह तत्रेति आरोपितेनाधिष्ठानस्य वस्तुतोऽ
स्पर्शे दृष्टान्तमाह यथेति पराभिन्नस्यात्मनः संसारित्वमध्यस्तमिति
स्थिते परस्य संसारित्वापादनं तदयुक्तमित्याह एवञ्चेति आत्म
नि संसारस्यारोपितत्वात्तदभिन्ने परस्मिन्नाशङ्कैव तस्यायुक्तेत्येत
दुपपादयति न हीति स्थाणौ पुरुषनिश्चयवदात्मनो देहाद्यात्मत्व
निश्चयस्याध्यस्तत्वेऽप्युक्ते दृष्टान्तस्य ज्ञेयमात्रविषयत्वादितरस्य
ज्ञेयज्ञातृविषयत्वादित्युक्तमनुवदति यत्त्विति वैषम्यं दूषयति त
दसदिति नहि केन सममिति पृच्छति कथमिति अभीष्टसाधर्म्यं
दर्शयति अविद्येति तस्योभयत्रानुगतिमाह तत्रेति ज्ञेयान्तरे ज्ञे
यस्यारोपनियमात् ज्ञातरि नारोपः स्यादित्याशंक्याह यत्त्विति नायं

श्री॰
गी॰ टी॰
अ॰

15

नियमोऽज्ञातरि न चाध्यारोपस्योक्तत्वादित्याह तस्यापीति ज्ञे यस्यैव
ज्ञेयान्तरेऽध्यासनियमस्येति यावत् अतोऽज्ञातरि नारोपव्यभिचारश
ङ्केत्यर्थः आत्मन्यविद्याध्यासे तत्राविद्यायाः स्वाभाविकत्वात्तदधीन
त्वे संसारित्वमपि तथा स्यादिति शङ्कते अविद्यावत्त्वादिति काऽवि
द्याविपरीतग्रहादिर्वा अनाद्यनिर्वाच्याज्ञाने वा नाद्यो विपरीतग्र
हादेस्तमःशब्दितानिर्वाच्याज्ञानकार्यत्वात्तद्विशिष्टस्यात्मधर्मत्वायोगा
दित्याह नेत्यादिना तदेव प्रपञ्चयति तामसो हीति आवरणात्म
कत्वं वस्तुनि सम्यक् प्रकाशप्रतिबन्धकत्वं विपरीतग्रहणादेरवि
द्याकार्यत्वं विद्यापोह्यत्वेन साधयति विवेकेति न च कारणाविद्या
नाद्यनिर्वाच्यात्मधर्मः स्यादिति युक्तमनिर्वाच्यत्वादेव तस्यास्तद्धर्म
त्वस्य दुर्वचत्वादिति भावः किञ्च विपरीतग्रहादेरन्वयव्यतिरेका
भ्यां दोषजन्यत्वावगमादपि नात्मधर्मतेत्याह तामसे चेति तमःश
ब्दिताज्ञानेऽर्थगतप्रकाशप्रतिबन्धके तिमिरकाचादिदोषे तस्मिन्
सत्यज्ञाने मिथ्याधीः संशयश्चेति त्रयस्योपलम्भादसति तस्मिन्नप्र
तीतेरन्वयव्यतिरेकाभ्यां विपरीतज्ञानादेर्दोषाधीनत्वाधिगमान्न
केवलात्मधर्मतेत्यर्थः दोषस्य निमित्तत्वात् भावकार्यस्योपादान
नियमादनिर्वाच्याविद्यायाध्याससमानेरात्मैव विपर्ययादेरुपादान
मिति चोदयति अत्राहेति विपरीतग्रहादेर्दोषोत्थत्वं सममर्थः अ
ग्रहादित्रितयमविपर्ययादेः सत्योपादानत्वे सत्यत्वप्रसङ्गान्नात्मा
तदुपादाने किन्तु दोषस्य चक्षुरादिधर्मकत्वग्रहणाद्ग्रहणादेर
पि दोषत्वात् करणधर्मत्वं करणमविद्याख्यमन्तःकरणं न च तदे
तरविद्या सिद्धेति वाच्यमज्ञोऽहमित्यनुभवात् स्वापे च परामर्शात
दवगमात् कार्यलिङ्गकानुमानादागमाच्च तत्सिद्धेरिति परिह
रति नेत्यादिना संगृहीतन्यायपरिहारयोर्बोधं विवृणोति यदि
ति अविद्यावत्त्वेऽपि ज्ञातुरसंसारित्वादुक्तानन्दधारसवदविद्या किं क
रिष्यतीत्याशंक्याह तदेवेति मिथ्याज्ञानादित्वमेवात्मनः संसारित्व
मिति स्थिते फलितमाह तत्रेति न करणैव चक्षुरित्यादिनोक्तमे
व परिहारं प्रपञ्चयति तन्नेत्यादिना तिमिरादिदोषस्तत्कृतोवि

परीतग्रहादिश्चन गृहीतुरात्मनोऽस्तीत्यत्र हेतुमाह चक्षु इति न
ह्रतेनाञ्जनादिसंस्कारेण तिमिरादौ पराकृते देवदत्तस्य गृही
तृदोषाद्युपलम्भात् तस्य तद्धर्मत्वमतो विमते नद्वत्तो नात्म
धर्मो दोषवानकार्यत्वाद्वा सम्मतवदित्यर्थः किञ्च विपरीतग्र
हादिलक्षणतो नात्मधर्मो वेद्यत्वात् सम्प्रतिपन्नवदित्याह संवेद
नाच्चेति किञ्च यद्वेद्यं तत् स्वातिरिक्तवेद्यं यथा दीपादि इति
व्याप्तेर्विपरीतग्रहादीनामपि वेद्यत्वादतिरिक्तवेद्यत्वे संवेदिता
न संवेद्यधर्मत्वादृष्टेदित्वाद्यथा देवदत्तो न स्वसंवेद्यरूपादि
मानित्यनुमानान्तरमाह संवेद्यत्वादेवेति किञ्च विपरीतग्रहाद
यस्तत्त्वतो नात्मधर्मा व्यभिचारित्वात् कृशत्वादिवदित्याह सर्वेति
उक्तमेव विवृण्वन्नात्मनो विपरीतग्रहादिस्वाभाविको वागन्तुको
वेति विकल्प्याद्यं दूषयति आत्मन इति यतो निर्मोक्षोऽविद्यात
त्त्वस्तेरसत्त्वादिति भावः आगन्तुकोऽपि सनष्टेदमुक्तिः परत
स्तु तत्राह अविक्रियस्येति विभुत्वादविक्रियत्वादमूर्तत्वाच्चात्मा व्या
भवन्न केनचित् संयोगविभागावनुभवति नहि विक्रियाभावे
व्याप्ति वस्तुतः संयोगविभागावसङ्गत्वाच्चात्मनस्तदसंयोगान्न
परतोऽपि तत्रास्ति विपरीतग्रहादित्यर्थः तस्मात्तद्धर्मत्वाभावे फ
लितमाह सिद्धमिति आत्मनो निर्धर्मकत्वे भगवदनुमतिमाह ब्र
नादित्वादिति ईश्वरत्वे सत्यात्मनोऽसंसारित्वे विधिशास्त्रस्याप्रमा
देश्यानर्थक्यान्नात्विकमेव तस्य संसारित्वमिति शङ्कते नत्विति
विद्यावस्थायामविद्यावस्थायां वा शास्त्रानर्थक्यमिति विकल्प्या
द्यं प्रत्याह न सर्वैरिति विदुषो मुक्तस्य संसारतदाधारत्वयोर
भावस्य सर्ववादिसम्मतत्वात्तत्र शास्त्रानर्थक्यादिचोद्यं मयैव
न प्रतिविधेयमित्यर्थः संग्रहवाक्यं विवृणोति सर्वैरिति अभि
प्रायज्ञानात् प्रश्ने स्वाभिप्रायमाह कथमित्यादिना तर्हि मुक्तान्
प्रति विधिशास्त्रस्याप्रामाण्याद्देश्यानर्थक्यमित्याशङ्क्याह नचेति न
हि व्यवहारातीतेषु तेषु गुणदोषाशङ्केत्यर्थः हे जिना मते बु
कालमसि वासमत्यहेऽपि हे उक्तस्येश्वरत्वे ते प्रति च शास्त्राद्यान

16

र्थकं विद्यावस्थायामास्थितमिति फलितमाह तथेति द्वितीयं दृ
ष्टयेति अविद्येतितदेव दृष्टान्तेन विवृणोति यथेति पवमहेति
नामपि विद्योदयात् प्रागर्थवत्वं शाब्दादेरिति शेषः द्वैतिभिरद्वै
तिनाञ्चसाम्यमिति शङ्कते नन्विति अवस्थयोर्वस्तुत्वे तन्मते प्रा
माण्यार्थवत्वे फलितमाह अतइति सिद्धान्ते तु नावस्थयोर्वस्तुते
ति वैषम्यमाह अद्वैतिनामिति व्यावहारिकं द्वैतं तन्मतेपि
स्वीकृतमित्याशङ्क्याह अविद्येति कल्पितद्वैतेन व्यवहारान्न त
स्य वस्तुतेत्यर्थः बन्धावस्थायाः वस्तुत्वभावे दोषान्तरमाह बन्धे
ति आत्मनोस्तत्वतोवस्थाभेदो द्वैतिनामपि नास्तीति परिहरति
नेति अनुपपत्तिं दर्शयितुं विकल्पयति यदीति तत्राद्यं दूषयति
युगपदिति द्वितीयेपि क्रमभाविन्योरवस्थयोर्निर्भिन्नत्वे सति
भिन्नत्वं वेति विकल्पाद्ये सदा प्रसङ्गाद्बन्धमोक्षयोर्व्यवस्था स्या
दित्याह क्रमेति कल्पान्तरं निरस्यति अन्येति बन्धमोक्षावस्थे न
परमार्थे अस्वाभाविकत्वात् स्फटिकलौहित्यवदिति स्थिते फलि
तमाह तथा चेति अवस्थयोर्वस्तुतोपगमादित्यर्थः इतश्चाव
स्थयोर्न वस्तुत्वमित्याह किञ्चेति अवस्थयोर्वस्तुत्वमिच्छतानः
योर्योगपद्यायोगाद्धान्ध्ये क्रमे बन्धस्य पूर्वत्वं मोक्षस्य पाश्चात्यमि
ति स्थिते बन्धस्यादित्वकृते दोषमाह बन्धेति तस्याप्याकृताभ्या
गमकृतविनाशनिहत्तयेऽनादित्वमेष्टव्यमनन्तत्वञ्चमतमर्थ
मास्थेयं तच्च यदनादिभावरूपं तन्नित्यं यथात्मेति व्याप्तिविरु
द्धमित्यर्थः मोक्षस्य पाश्चात्यकृते दोषमाह तथेति साहि ज्ञाना
दिसाध्यत्वादादिमती पुनराहाप्यनङ्गीकारादनन्ता च तच्च य
त्सादिभावं रूपं तदनित्यं यथा पटादीति व्याप्त्यन्तरविरुद्धमित्यर्थः
किञ्च क्रमभाविनीभ्यामवस्थाभ्यामात्मा सम्बध्यते न वा प्रथमे
पूर्वावस्थया सहैवोत्तरावस्थां गच्छति चेदुत्तरावस्थामपि पूर्वा
वस्थावस्थानादनिर्मोक्षः यदि पूर्वावस्थां त्यक्त्वोत्तरावस्थां गच्छ
ति तदा पूर्वसंयोगोत्तरायोगात्मनः सातिशयत्वादनित्यत्वानुपप
त्तिरित्याह न चेति आत्मनोवस्थाद्वयसम्बन्धो नास्तीति द्वितीय

मनूद्य दूषयति अथेत्यादिना नहीति पक्षद्वयेपि दोषावशेषान्नाहे तमता
तद्रागो हेतुरित्याशंक्याविद्याविषये चेत्सकं विहन्यतेति नचेति तदेव
स्फुटयति अविदुषो हीति फले भोक्तृत्वे कर्तृत्वे हेतुः यद्वा फले देह
विशेषो हेतुरदृष्टं तयोरनात्मनो भोक्ताहं कर्ताहं मनुष्योहमित्यादा
वात्मदर्शनमधिकारकं तेनाविद्वद्विषयं विधिनिषेधशास्त्रमित्यर्थः
विदुषामपि मनुष्योहमित्यादिव्यवहारात्तद्विषयं शास्त्रं किं न स्यादि
त्याशंक्याह नेति भोक्तृत्वकर्तृत्वाभ्यां ब्राह्मणादिमतो देहधर्मायमा
भ्यामात्मनोन्यत्वं पश्यतो न विधिनिषेधाधिकारित्वमुक्तफलादावात्मा
त्मीयाभिमानासम्भवादित्यर्थः आत्मनो देहादेरन्यत्वदर्शिनो न देहादा
वात्मधीरित्येतदुपपादयति नहीति विदुषो न विधिनिषेधाधिकारि
तेत्युक्तमुपसंहरति तस्मादिति शास्त्रस्याविद्वद्विषयत्वमेव विद्वद्वि
षयत्वमपि मन्तव्यमुभयोरपि शास्त्रश्रवणाविशेषादित्याशंक्याह
नहीति तत्रस्थोयस्मिन् देशे देवदत्तः स्थितस्तत्रैव वर्तमानः सन्नि
त्यर्थः ननु देवदत्ते' विषयाभिज्ञोपि कदाचिन्नियुक्तोस्मीति प्रतिपद्यते स
' नियुक्ते
त्ये नियोगविषयानियोज्यादात्मनो विवेकाग्रहणान्नियोज्यत्वभ्रान्तेरि
त्याह नियोगेति अविवेकिनो नियोज्यधीर्भवतीति दृष्टान्तमुक्त्वा फले
हेतौ चात्मदृष्टिविशिष्टस्याविदुषः सम्भवत्येव विधिनिषेधाधिकारि
त्वमेवं दार्ष्टान्तिकमाह तथेति विधिनिषेधशास्त्रमविद्वद्विषयमिति
वदता शास्त्रानर्थक्ये समाहिते सम्प्रति शास्त्रस्य विद्वद्विषयत्वेनैवा
र्थवत्वं शक्यसमर्थनमिति शङ्कते नन्विति प्रकृतिरविद्या ततो जातो
यो देहादावभिमानात्मा सम्बन्धो विद्योदयात् प्रागनुभूतस्तद्रूपेण तया
विधिना प्रवर्तितो निषेधेन निवर्तितोस्मीति विधिनिषेधविषया स
त्यामपि विद्यायां योर्युक्तैवेत्यर्थः विदुषोपि सर्वमाविषयकं सम्बन्धम
पेक्ष्य विधिनिषेधविषयान्नियमक्रमेण व्यक्तीकरोति इहेति नन्ववि
दुषो मिथ्याभिमानवत्त्वं विदुषः सोनुवर्तते तथा चाविद्यासम्बन्धापे
त्या विदुषो यथोक्ता धीरिति तत्राह यथेति पितापुत्रो भ्रातेत्यादीनां
मिथोन्यत्वदृष्टावपि मोन्यनियोगार्थस्य निषेधार्थस्य च धीदृष्टा पि
तरमपि कृत्य विधौ निषेधे वा तस्य तदनुष्ठानाशक्तौ पुत्रस्य तद्विष

या धीरित्यास्थानः सम्प्रति यदा प्रैष्यन्मन्यतेऽथ पुत्रमाह त्वं ब्रह्म त्वं
यज्ञः त्वं लोक इत्यादि सम्प्रतिपत्त्याश्रुत्याशेषानुष्ठानस्य पुत्रकार्यताप्रति
पादनात् पुत्रस्याधिकृतत्व विधिनिषेधप्रवृत्तौ तस्य तदशक्तौ पितुस्तथा
धीरुपगता तथा श्राद्धादिष्वपि द्रष्टव्यं एवं विद्वान् हेतुफलाभ्यामस्य
तद्दर्शनेऽपि प्राक्कालीनाविद्यकदेहादिसम्बन्धादविरुद्धा विधिनिषे
धयोर्धीरित्यर्थः पुत्रादीनां मिथ्याभिमानान्मिथ्यो नियोगधीरुक्ता न
तत्त्वदर्शिनस्तु तदभावात्तु देहादिसम्बन्धाधीना नियोगधीरिति परि
हरति नेत्यादिना किञ्च सर्वापेक्षा यज्ञादिश्रुतेरश्ववदिति सर्वापे
क्षाधिकरणे सम्यग्ज्ञानस्य दृष्टसाध्यत्वोक्तेर्विधिनिषेधयोर्योनुष्ठानं
सम्यग्ज्ञानात् पूर्वमिति कुतो विद्वांस्तदनुष्ठानमित्याह प्रतिपन्नेति
सत्यदृष्टेः सम्यग्धीदृष्टेरसति बाधकबुद्धेस्तदभावादन्वयव्यतिरे
काभ्यां विविदिषावाक्याद्विधिवेधात्वनुष्ठानात् पूर्वं न सम्यग्धीरि
त्याह न पूर्वमिति विधिनिषेधयोर्विद्वद्विषयत्वायोगे फलितमाह
तस्मादिति शास्त्रस्याविद्वद्विषयत्वेनोक्तमर्थं वक्तुमाक्षेपसमाधिभ्यां
प्रपञ्चयितुमाक्षिपति नन्विति चकारादहं मप्रवृत्तिरिति सम्यग्ज्ञाने
आत्मनो देहाद्यतिरेकं पश्यतो देहाद्यभिमानरूपाधिकारहेत्वभावा
द्विधितो यागादावप्रवृत्तिर्निषेधाच्चाभक्ष्यभक्षणादेर्निवृत्तिरतस्तेषां
प्रवृत्तिनिवृत्त्योरभावे देहादावात्मत्वमतभवतामपि न ते मुक्ते ते
षां पारलौकिकमोक्षप्रतिपत्त्यभावादित्यर्थः विदुषामविदुषां त्वप्र
वृत्तिनिवृत्त्यभावे फलितमाह अतश्चेति आत्मनो देहाद्यतिरिक्तं परो
क्षमपरोक्षन्तु देहाद्यात्मत्वं पश्यतः शास्त्रानुरोधादेव प्रवृत्तिनिवृत्त्यु
पपत्तेर्न शास्त्रानर्थक्यमित्युत्तरमाह नेत्यादिना प्रसिद्धिरत्र शास्त्राभि
मता यतदेव विद्वान् ब्रह्मविदो वा नैरात्म्यवादिनो वा परोक्षज्ञान
वतो वा प्रवृत्तिनिवृत्ती इह वक्ष्यतीति विकल्प्याद्ये दूषयति ईश्वरे
ति न निवर्तते चेत्यपि द्रष्टव्यं द्वितीयं निरस्यति तथेति पूर्ववदत्रा
पि सम्बन्धः तृतीयमङ्गीकरोति यथेति विधिनिषेधाधीनौ प्रसिद्धि
मनुरुन्धानः सन्निति यावत् चकारान्निवर्तते चेत्यनुकृष्यते ब्रह्म
विदं नैरात्म्यवादिनञ्च त्यक्त्वा देहाद्यतिरिक्तमात्मानं परोक्षमपरोक्ष

न्व देहाद्यात्मत्वे पश्यतो विधिनिषेधाधिकारित्वे सिद्धे फलमाह प्र
नइति विधान्तरेण शास्त्रार्थानर्थक्यं द्योतयति विवेकिनामिति द
ष्टा हि तेषां विधिनिषेधयोरप्रवृत्तिर्न हि देहादिभ्यो निःकृष्टमा
त्मानं द्रष्टवतां तयोरधिकारस्तेन तान्प्रति शास्त्रं नार्थवन्न च दे
हाद्यात्मत्वदर्शनत्रापि क्रियन्ते तेषां यद्यदाचरतीति न्यायेन वि
वेकिनो नगच्छता विद्याद्यावत्प्रवृत्तेरतोऽधिकार्थ्यभावाद्विद्यादिशा
स्त्रस्य तदनुसारिशिष्टाचारस्य वानर्थक्यमित्यर्थः किं सर्वेषां वि
वेकित्वादधिकार्थ्यभावादानर्थक्यं शास्त्रस्योच्यते किम्बा कस्यचिदे
व विवेकित्वेपि तदनवगतित्वादन्येषामप्रवृत्तेरानर्थक्यं चोद्यते त
त्र प्रथमं प्रत्याह न कस्यचिदिति मनुष्याणां सहस्रेष्विति न्याये
नोक्तमेव स्फुटयति अनेकेष्विति तत्रानुभवानुरोधेन दृष्टान्तमाह
यद्येति द्वितीयं दूषयति न चेति किन्तु विवेकिनामप्रवृत्तावन्येषा
मप्यप्रवृत्तिरित्याशङ्क्य निरस्यति तेष्वनादौ तदप्रवृत्तावपि इतरप्रवृ
त्तेरित्याह अभिवरणादौ चेति अविवेकिनां रागादिद्वारा प्रवृत्तस्य
दे सर्वं संगृहीतमादिपदे इत्यस्य विवेकिनां प्रवृत्त्यभावेपि नान्य
स्याप्रवृत्तिरित्याह स्वाभाव्याच्चेति प्रवृत्तेः स्वभावाख्याज्ञानकार्यत्वे
भगवद्वाक्यमनुकूलयति स्वभावस्त्विति प्रवृत्तेरज्ञानजन्यत्वे वि
धिनिषेधाधीनप्रवृत्तिनिवृत्त्यात्मकबन्धस्याविद्यामात्रत्वादविद्व
द्विषयत्वं शास्त्रस्य सिद्धमिति फलितमाह तस्मादिति दृष्टमेवानु
सरन्नविद्वान्स्यादिष्टस्तद्विषयस्तदाश्रयः संसारस्तथा च प्रवृत्ति
निवृत्त्यात्मकसंसारस्याविद्वद्विषयत्वात्तद्धेतुविधिशास्त्रस्यापि त
द्विषयत्वमित्यर्थः ननु विद्या देवदत्तमाश्रयन्ती स्वकार्यं संसारम
पि तस्मिन्नाधत्ते तेनास्यैव शास्त्राधिकारित्वं नेत्याह नेति अविद्या
देः शुद्धे देवदत्ते वस्तुतोऽसम्बन्धोपि तत्तस्मिन्नारोपितं तमेव दुःखी
करोतीत्यत्राह न चेति तदेव दृष्टान्तेन दर्शयति नहीति देवदत्त
स्य वस्तुतोऽविद्यासम्बन्धे भगवद्वचोपि द्योतकमित्याह अत इति
देवदत्ते शबरयोरैक्यं किमित्यस्यावात्मानमहमिति वध्यमानोपि स्व
स्य शबरत्वमीश्वरोऽस्मीति न वध्यते तत्राह अज्ञानेनेति आत्मनोव

श्री॰
गी॰ टी॰
३॰

16

स्तुनः संसारासंस्पर्शे विद्वदनुभवविरोधः स्यादिति चोदयति अथे
ति एवमित्यभिजात्यादिविशिष्टमुक्तं इदमाह क्षेत्रज्ञत्वादि पण्डिता
नामपि प्रतीतं संसारित्वमितिशेषः किं पाण्डित्यं देहाद्यात्मदर्शनं
किम्वा कूटस्थात्मदृष्टिराहो संसारित्वादिधीरिति विकल्पाद्ये निरा
कुर्वन्नाह सुखिवितितच्च वस्तुनो संसारित्वाविरोपि प्रातिभासिकन्तु
संसारित्वमिष्टमितिशेषः द्वितीयं दूषयति यदीति न हि कूटस्था
त्मविषये संसारित्वं प्रतीयते येन वस्तुनो संसारित्वं विरुध्यते कू
टस्थात्मधीविरुद्धायाः संसारित्वबुद्धेरनवकाशित्वादित्यर्थः आत्मा
नमक्रियं प्रपद्यतोपि कुतो भोगकर्म्मणी न स्यातामित्याशंक्याह विक्रि
येति अविक्रियात्मबुद्धेर्भोगकर्म्माकाङ्क्षयोरभावे कस्य शास्त्रे प्रवृत्ति
रित्याशंक्याह अथेति फलार्थित्वाभावाद्विदुषो न कर्म्मणि प्रवृत्तिरि
त्येवं स्थिते सत्यनन्तरमविद्वान् फलार्थित्वात्तदुपाये कर्म्मणि प्रव
र्त्तते शास्त्रे धिकारीत्यर्थः विदुषो वैधप्रवृत्त्यभावेपि निषेधाधीनानु
वृत्तेरपि दुर्वचत्वात्तस्य निवृत्तिनिष्ठत्वासिद्धिरित्याशंक्याह विदुषर
ति तृतीयमुत्थापयति इदन्त्विति सिद्धान्तादविशेषमाशंक्य क्षेत्र
स्य क्षेत्रज्ञत्वात् वस्तुनोभिन्नत्वेन तद्विषयत्वाङ्गीकारान्मैवमित्याह
क्षेत्रज्ञेति ग्रहे धीवेद्यस्यात्मनो वस्तुनः संसारित्वस्वीकाराच्च सि
द्धान्ताद्भेदोस्तीत्याह अहन्त्विति संसारित्वमेव स्फोरयति सर्वेति
संसारित्वस्य वस्तुत्वे तदनिवृत्त्या पुमर्थासिद्धिरित्याशंक्याह संसा
रेति कथं तदुपरमस्य हेतुं विना कर्त्तव्यत्वमित्याशंक्याह क्षेत्रेति
क्षेत्रं ज्ञात्वा ततो निष्कृष्टस्य क्षेत्रज्ञस्य ज्ञाने कथं संसारोपरतिस्तथा
द्यादित्याशंक्याह ध्यानेनेति संसारित्वमात्मनो बुध्यमानस्य तद्
हितादीश्वरादन्यत्वं वक्तव्यमिति वक्तुमितिशेषः तदेवात्मत्वमुप
पादयति यस्येति मम संसारिणः संसारीश्वरत्वं कर्त्तव्यमित्येवं
यो बुध्यते यो वा तथाविधं ज्ञानं तत्र कर्त्तव्यमित्युपदिशति स
हि अज्ञादीश्वरादन्योज्ञे योन्यथोपदेशानर्थक्यादित्यर्थः आत्मा
संसारी परस्मादात्मनोन्यस्तस्य ध्यानाधीनाज्ज्ञानेनेश्वरत्वं कर्त्तव्य
मित्येतत् ज्ञानं पाण्डित्यमिति मते दूषयति एवमिति अयमात्मा

ब्रह्मेत्यात्मनोब्रह्मत्वश्रुतिविरोधादित्यर्थः ॥ ननु संसारस्यवस्तुता
ङ्गीकारात्तत्प्रतीत्यवस्थायां कर्मकाण्डस्यार्थवत्त्वं संसारित्वनि-
रासेनात्मनोब्रह्मत्वे ध्यानादिना साधिते मोक्षावस्थायां ज्ञान
काण्डस्यार्थवत्त्वं तत्कथं यथोक्तज्ञानवान् पण्डितापसदत्वे
नाक्षिप्यते तत्राह संसारेति करोमीति मन्यमानो यः स पण्डि
तापसद इति सर्वेण सम्बन्धः कर्मकाण्डे हि कल्पिते संसारि
त्वमधिकृत्य साध्यसाधनसम्बन्धबोधपदार्थवदिष्टं ज्ञानकाण्ड
मपि तथाविधं संसारित्वं पराकृत्याखण्डैकरसे प्रत्यग्ब्रह्मणि
पर्यवस्यदर्थवद्भवेदित्यर्थः किञ्चात्मनःशास्त्रसिद्धं ब्रह्मत्वं त्य
क्त्वा ब्रह्मत्वं कल्पयन्नात्महा भूत्वा लोकद्वयबहिर्भूतः स्यादित्या
ह आत्महेति ननु क्षेत्रज्ञञ्चापि मां विद्धीत्यनेन सर्वक्षेत्रान्तर्या
मी परो जीवादन्यो निरूप्यते न जीवस्येश्वरत्वमत्र प्रतिपाद्य
ते तत्कथमित्थमाक्षिप्यते तत्राहस्वयमिति किञ्च तत्त्वमसी
तिवत् प्रसिद्धस्ते वस्त्वनुवादेनाप्रसिद्धं तस्येश्वरत्वमिहोपदेश
तः श्रुते तस्य हानिमश्रुतस्य च जीवेश्वरयोस्तात्त्विकभेदस्य क
ल्पनां कुर्वन् कथं व्यामूढो न स्यादित्याह श्रुतेति ननु केचन
व्याख्यातारो यथोक्तं पाण्डित्यं परकृत्य क्षेत्रज्ञञ्चापीत्यादिश्लोके
व्याख्यातवन्तः तत् कथमुक्तं पाण्डित्यमास्थातव्यं मूढत्वं तत्रा
ह तस्मादिति क्षेत्रज्ञञ्चापीत्यत्र क्षेत्रज्ञेश्वरयोरैक्यं स्वाभीष्टं
स्पष्टयितुंप्रत्युक्तमेव बोध्यमनुवक्ष्यति यत्तूक्तमिति तात्त्विक
मेकत्वमतात्त्विकं संसारित्वमित्यङ्गीकृत्योक्तमेव समाधिंस्मा
रयति यतावितिईश्वरस्य संसारित्वे संसारभावेन संसारा
भावश्चेत्युक्तो दोषो विद्याविद्ययोर्वैलक्षण्येऽपि कथं प्रत्युक्ता
विति पृच्छति कथमिति कल्पितसंसारेण कल्पनाधिष्ठान

मद्वयं वस्तु वस्तुतो न सम्बन्धमिति परिहरति अविद्येति तद्विषये
कल्पनास्पदमधिष्ठानमिति यावत् कल्पितेनाधिष्ठानस्य वस्तुतोऽ
संस्पर्शे दृष्टान्तं स्मारयति तथा चेति ईश्वरस्य संसारित्वाप्रसङ्गं
प्रकटीकृत्य प्रसङ्गान्तरनिरासमनुस्मारयति संसारिणा इति तता
वदविद्या संसारं संसारिणञ्च कल्पयन्ती स्वतैवा तत्त्वव्याख्यानात्
पारतन्त्र्ये चास्य मान्तराभावात् क्षेत्रज्ञस्य तद्वत्वे संसारित्वमिति शा
ङ्कते न त्विति तथाविद्यावत्त्वमविद्याकृतमतत्वस्यानादिति भावः
यत्तु त्वानतदेङ्खोरगवदविद्या किं करिष्यतीति तत्राह तत्कृतञ्चेति
अविद्यातज्जयोर्ज्ञेयत्वात्त्वात्मधर्मतेत्यु तत्राह नेत्यादिना तदेव प्र
पञ्चयति यावदिति ज्ञेयस्य क्षेत्रधर्मत्वेपि क्षेत्रद्वारा क्षेत्रज्ञस्य तत्
कृतदोषवत्वे स्याशंक्याह न चेति क्षेत्रस्यापि ज्ञेयत्वान्तेन विता
वस्तुतः स्पर्शो लोम्रुपपादयति यदीति धर्मधर्मित्वेन संसर्गोपि
ज्ञेयत्वे का क्षतिरित्याशंक्याह यदीति आत्मधर्मस्यात्मना ज्ञेयत्वे
स्वस्यापि ज्ञेयत्वापत्त्या कर्त्तृकर्मविरोधः स्यादित्यर्थः किञ्च विमतं
न क्षेत्रज्ञाश्रितं तद्धेयत्वाद्रूपादिवदित्याह कथञ्चेति किञ्च महाभू
तानीत्यादिना ज्ञेयमात्रस्य क्षेत्रान्तर्भावान्नाविद्यादेर्ज्ञातृधर्मते
त्याह ज्ञेयं चेति किञ्चैतयोर्वैशेष्यकत्वात् क्षेत्रज्ञस्य ज्ञातृत्वानि
रूपणात्त्र तत्र ज्ञेयं किञ्चित् प्रविशतीत्याह ज्ञातैवेति क्षेत्रक्षेत्रज्ञ
योरेवं स्वाभाव्ये सिद्धे सिद्धं क्षेत्रधर्मत्वमविद्यादेरिति फलितमा
ह इत्यवधारितइति विरोधाच्च न क्षेत्रज्ञधर्मत्वे अविद्यादेरित्या
ह क्षेत्रज्ञेति विरुद्धवादित्वे मूलं दर्शयति अविद्येति मात्रपदस्य
व्यावर्त्यं मानं प्रकाशमवष्टभ्यान्तरमिति वक्तुं केवलपदं यया
विद्यया विरुद्धमपि निर्वोढुं शक्यते तस्याः स्वातन्त्र्याभावाच्चितोन्य
स्याविद्यकत्वेन तदाश्रयत्वात्तस्याविद्यास्वभावतया तदाश्रयत्वस्या

वातंदाश्रयजिज्ञासयाहच्छति यत्राहेति आश्रयमात्रं इच्छते तद्विशे
षो वा प्रथमे प्रश्नस्यानवकाशित्वं मत्वाह यस्येति अविद्या दृश्यादृ
श्या वा दृश्यत्वेपारतन्त्र्यात् किञ्चित्विशिष्टत्वेनैव तदृष्टेनाश्रयमात्रं
प्रश्नमदृश्यत्वे वा अप्रकाशनादसिद्धिरेव स्यादित्यर्थः द्वितीयमा
लम्बते कस्येति अविद्याया दृश्यमानत्वादाश्रयविशेषस्यात्मनोपि
स्वानुभवसिद्धत्वात् प्रश्नस्य निरवकाशत्वेनोत्तरमाह यत्रेति प्रश्ना
नर्थक्यं प्रश्नद्वारा स्फोरयति कथमित्यादिना तथापि कथं प्रश्नासि
द्धिरत्राह न चेति तदेव दृष्टान्तेन स्पष्टयति नहीति दृष्टान्तदा
र्ष्टान्तिकयोर्वैषम्यमाशङ्क्योदयति नन्विति अज्ञानाश्रयस्य परोक्षत्वेपि
प्रश्नानर्थक्यमित्याह अप्रत्यक्षेणेति अविद्यावतोऽप्रत्यक्षत्वेपितेना
विद्यासम्बन्धे सिद्धे प्रष्टुरेव प्रश्नानर्थक्यसमाधिर्न कश्चिदित्यर्थः अ
बुद्धपराभिसन्धिः शङ्कते अविद्यायाइति अविद्यावत्त्वस्यपरिहाराय य
त्नेन प्रयतितव्यमित्याह यस्येति ममैवाविद्यावत्त्वात्तत्परिहारे मया
प्रयतितव्यमिति शङ्कते नन्विति तर्हि प्रश्नानर्थक्यमिति सिद्धान्ती
स्वाभिसन्धिमाह जानासीति आत्मानमविद्यावन्तं जानन्नपि तद्विष
याध्यक्षाभावात् इच्छामीति शङ्कते जानामीति अविद्यावतोऽप्रत्यक्ष
त्वे वदतः तस्याहमविद्यावानविद्याकार्यवत्त्वाद्व्यतिरेकेण मुक्तात्मव
दित्यनुमेयत्वमिष्टमित्युपेत्य दूषयति अनुमानेनेति आत्मनोविद्या
सम्बन्धग्रहे कानुपपत्तिरित्याशङ्क्य ज्ञातैवात्मा स्वस्याविद्यासम्बन्ध
त्रुट्यतेऽन्यो वा ज्ञातेति विकल्पाद्यं दूषयति नहीति तत्काले स्वस्या
विद्यां प्रति ज्ञातृत्वावस्थायामिति यावत् अविद्याविषयत्वेन घटो
नवागतत् ज्ञातृत्वेनैवोपयुक्तस्यात्मनस्तस्याः स्वात्मनि कृत्र सम्बन्ध
ज्ञातृत्वमेकस्य कर्मकर्तृत्वविरोधादित्याह अविषयेति द्वितीयं निर
स्यति न चेति योगरहीना सन सम्भवतीति सम्बन्धः तद्विषयमिति
ज्ञातृ रविषयाश्च सम्बन्धलक्षणार्थः अनवस्थामेव प्रपञ्चयति
परीति आत्मनः स्वपरज्ञेयत्वायोगात्तस्मिन् विद्यासम्बन्धस्याप्रा
माणिकत्वान्नित्यानुभवगम्यत्वे स्थिते फलितमाह यदि पुनरि
ति यदा चैवं तदैतदप्याहार्यं ज्ञातुरात्मनो न किञ्चित् दूषयतीत्ये

तद्वक्ष्यमाणः शङ्कते नन्विति किं ज्ञातृत्वं ज्ञानक्रियाकर्तृत्वं ज्ञा
नस्वरूपत्वं वा नाद्यस्तदनभ्युपगमात्तत्प्रयुक्तदोषाभावात् द्विती
ये ज्ञातृत्वस्यौपचारिकत्वान्न तत्कृतो दोषोऽस्तीत्याह नेत्यादिना
असत्यामपि क्रियायां क्रियोपचारे दृष्टान्तेन स्फुटयति यथेति
आत्मनि वस्तुतो विक्रियाभावे भगवदनुमतिं दर्शयति यथात्रे
ति गीताशास्त्रे समन्वयार्थः स्वतएवात्मनि क्रियाद्यात्मताभावो
भगवता शास्त्रे यथोक्तस्तथैव व्याख्यातमस्माभिरिति सम्ब
न्धः कथं तर्हि क्रियादिरात्मनि भाति तत्राह अविद्येति यथा
वस्तुतो नास्त्यात्मनि क्रियादि रुपचारान्तु भाति तथा [illegible] न
ह्यतीतप्रकरणेषु आहो भगवता कृतो यत्न इत्याह तथेति
न केवलमतीतेष्वेव प्रकरणेषु वास्तवक्रियाद्यभावादात्म
न्याध्यासिकीतत् धीरुक्ता किन्तु वक्ष्यमाणप्रकरणेष्वपि
तथैव भगवदभिप्रायदर्शनं भविष्यतीत्याह उत्तरेष्वेति
आत्मनि वास्तवक्रियाद्यभावेऽध्यासाच्च तत्सिद्धौ कर्म्मका
ण्डस्याविद्वदधिकारित्वप्राप्तौ विहायात्रजेत ज्ञाता कर्म्मार
भेनेत्यादि शास्त्राविरोधः स्यादिति शङ्कते हन्तेति शास्त्र
स्य देहव्यतिरेकविज्ञानाभिप्रायत्वादर्शना[illegible] दतीतात्म
धीविधुरस्यैव कर्म्मकाण्डाधिकारित्वमङ्गीकरोति सत्य
मिति कथमतस्यैव कर्म्माधिकारित्वमुपपन्नमित्याश
ङ्क्याह एतदेव चेति ज्ञानिनो ज्ञाननिष्ठायामेवाधिकारो
निष्ठान्तरे तत्तस्यैवेत्युपसंहारप्रकरणे विशेषतो भवि-
ष्यतीत्याह सर्वेति तदेवानुक्रामति समासेनेति जीवब्र
ह्मणोरैक्याभ्युपगमेनाकिञ्चिदवद्यमि-त्युपसंहरति अ
लमिति २ ॥ ॥

स्वामिकृतटीका १

नचैवं संसारित्वरूपमुक्तं इदानीं तस्यैव पारमार्थिकमसंसारिस्व
रूपमाह क्षेत्रज्ञमिति नच क्षेत्रज्ञः संसारिणोवस्तुतः सर्वेषु क्षेत्रे
षु व्रतगं तं मामेव विद्धि तत्वमसीति श्रुत्यालक्षितेन विदंशेन म
द्रूपस्योक्तत्वात् आदर्शमेव तत्तज्ज्ञानं स्तौति क्षेत्रक्षेत्रज्ञयोर्य
देवं वैलक्षण्येनज्ञानं तदेव मोक्षहेतुत्वात् मम ज्ञानं मतं अन्य
त्तु वृथा योडिंस्यं बंधहेतुत्वादित्यर्थः तदुक्तं तत्कर्म यन्नबंधाय
सा विद्या या विमुक्तये आयासायाऽपरं कर्म विद्याऽन्या शिल्पनै
पुणमिति २ ॥

पिशाचभाष्ये टीका ४

स्पष्टार्थं ३ ॥

रामानुजभाष्ये टीका ५

क्षेत्रज्ञ इति देवमनुष्यादिसर्वक्षेत्रेषु वेदितृत्वैकाकारं क्षेत्रज्ञं च मां
विद्धि मदात्मकं विद्धि क्षेत्रज्ञं चापि इति अपि शब्दात् क्षेत्रमपि मां वि
द्धीत्युक्तमित्यवगम्यते यथा क्षेत्रं क्षेत्रज्ञैकविशेषणतास्वभावतया
तदपृथक्सिद्धेः तत्सामानाधिकरण्येनैव निर्दिष्टं तथा क्षेत्रं क्षे
त्रज्ञं च मद्विशेषणैकस्वभावतया तदपृथक्सिद्धेर्मत्सामानाधि
करण्येनैव निर्देश्याविति हि वदति क्षेत्रज्ञवद्ब्रह्मणोभयावस्था
न्तरात्मरशाहनिर्दिष्टादर्थान्तरत्वं परस्य ब्रह्मणो वासुदेवस्यो
तमश्रुरूपस्वलक्षणस्य इति पृथिव्यादिसंघातरूपस्य भगवच्छरीरै
कस्वभावतया भगवदात्मकत्वं श्रुतयो वदंति यः पृथिव्यां तिष्ठन् पृ
थिव्या अंतरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमंतरो
यमयति स त आत्मांतर्याम्यमृत इत्यारभ्य आत्मनि तिष्ठन्नात्मनोंत
रो यमात्मा न वेद यस्यात्मा शरीरं य आत्मनो अंतरो यमयति स त
आत्मांतर्याम्यमृत इत्याद्याः इदमेवांतर्यामितया सर्वक्षेत्रज्ञाना
मवस्थानं भगवतस्तैः सामानाधिकरण्येन व्यपदेशः अहमात्मा
गुडाकेश सर्वभूताशयस्थितः न तदस्ति विना यत्स्यान्मया भूतं च
राचरं विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति पुरस्तादु
परिष्टाच्चाभिधाय मध्ये सामानाधिकरण्येन व्यपदिशति आदित्या

नामहंविस्मृतिमादिनाऽहंदेहेचदेहेज्ञतयोर्विवेकविषयेनयोर्मस्वा
त्मकत्वविषयेचज्ञानमज्ञकेनदेवोपादेयंज्ञानमितिमेमतेकेवि
दाऽहः देहेत्रत्तेचापिमांविद्धीतिसामानाधिकरण्येनैकत्वमवगम्य
तेतदाचेश्वरस्यैवसतोऽज्ञानात्तदेहेज्ञत्वमिवभवतीत्यभ्युपगंत
व्यंतन्निहृत्यर्थंन्यायमेकत्वोपदेशःअनेनामतनमभगवडुपदेशो
नरज्जुरियंनसर्पइत्याप्तोपदेशेनसर्पत्वभ्रमनिवृत्तिवत्देहे
ज्ञत्वभ्रमोनिवर्ततइति तेषामप्याःअयमुपदेष्टाभगवान्वासुदे
वापरमेश्वरःकिमात्मयाथात्म्यसाक्षात्कारेणनिहताज्ञानउत
नेतीतिनिहताज्ञानश्चेत्निर्विशेषचिन्मात्रस्वरूपे आत्मन्यनहं
पाध्यासासंभावनेयाकोनेयादिभेददर्शनेनात्रमुपदेशादिव्या
पाराश्चनसंभवंति अथात्मसाक्षात्काराभावात्निहताज्ञानानहि
तस्माज्जवादेवात्मज्ञानोपदेशारंभोनसंभवतिउपदेसंतिनेज्ञानं
ज्ञानिनस्तत्वदर्शिनइत्युक्तंअनपवमादिवाराश्नाकलितञ्जते
तिहासपुराणसदाचारविधिभिःपरज्ञानिभिःस्ववचनस्यापनउ
राग्रहैर्जगन्मोहनायप्रवर्तिताइत्यनादरणीयः अत्रेदंतत्वेअवि
दस्तुनश्चिद्धस्तनःपरस्यचब्रह्मणोभोग्यत्वेनईशितव्येनचस्वरू
पविवेकमाहकाश्चनश्रुतयः अस्मान्मायीसृजतेविश्वमेतत्तस्मिं
श्चान्योमाययासंनिरुद्धःमायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वर
मिति क्षरंप्रधानममृताक्षरंहरःक्षरात्मानावीशतेदेवएकः अ
मृताक्षरंहरइतिभोक्तानिर्दिश्यतेप्रधानंभोग्यत्वेनहरतीतिहरः
सकारणंकरणाधिपाधिपोनचास्यकश्चिज्जनितानचाधिपः अथा
नदेहेज्ञत्वपदेगुणेशःपतिंविश्वस्यात्मेश्वरंशाश्वतंशिवमच्युतं
ज्ञाज्ञौद्वावजावीशा[illegible]नित्योनित्यानांचेतनश्चेतनानामेकोब
हूनांयोविदधातिकामान्भोक्ताभोग्यंप्रेरितारंचमत्वापृथगात्मा
नंप्रेरितारंचमत्वाजुष्टस्ततस्तेनामृतत्वमेतितिनयोरन्यःपिप्पलं
स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतिअजामेनांभुक्तभोगामजोन्यः
गौरवाद्यंतवतीसाजनत्रीभूतभाविनिसमानेवृक्षेपुरुषोनिमग्नो
नीशयाशोचतिमुह्यमानःजुष्टंयदापश्यत्यन्यमीशमित्याद्याःअ

क्ष

मे ४

न्नापिअहंकारइतीयंभिन्नाप्रकृतिरष्टधा अपरेयमितस्त्वन्यांप्रकृतिंवि
द्धिमेपरां जीवभूतांमहाबाहोययेदंधार्यतेजगत् सर्वभूतानिकौंते
यप्रकृतिंयांतिमामिकांकल्पक्षयेपुनस्तानिकल्पादौविसृजाम्यहं
प्रकृतिंस्वामवष्टभ्यविसृजामिपुनःपुनःभूतग्राममिमंकृत्स्नमवा
शंप्रकृतेर्वशात् मयाध्यक्षेणप्रकृतिःसूयतेसचराचरं हेतुनानेन
कौंतेयजगद्विपरिवर्तते प्रकृतिंपुरुषंचैवविध्यनादीउभावपिम
मयोनिर्महद्ब्रह्मतस्मिन्गर्भंदधाम्यहं संभवःसर्वभूतानांततोभवति
भारतेतिकृत्स्नजगद्योनिभूतंमहद्ब्रह्ममदीयप्रकृत्याख्यंभूतसूक्ष्म
मविकृतरूपंतस्मिन्क्षेत्रनाख्येगर्भंसंयोजयामि ततोमत्संकल्पकृ
ताच्चिदचित्संसर्गाद्देवदेवादिस्थावरांतानांविचित्राणांसर्वभूता
नांसंभवोभवतीत्यर्थः श्रुतावपि भूतादिसूक्ष्मंब्रह्मेतिनिर्दिष्टंतस्मा
देतद्ब्रह्मनामरूपमन्नंचजायतइतिएवंभोग्यभोक्तृरूपेणावस्थि
तयोःसर्वावस्थावस्थितयोश्चिदचितोःपरमपुरुषशरीरतयातन्निया
म्यत्वेनतदपृथक्स्थितिःपरमपुरुषस्यचात्मत्वमाहुःकाश्रुत
यः यःपृथिव्यामंतरोयंपृथिवीनवेदयस्यपृथिवीशरीरंयःपृथिवीमं
तरोयमयतीत्यारभ्ययआत्मनितिष्ठन्नात्मनोंतरोयमात्मानवेदय
स्यात्माशरीरंयआत्मानमंतरोयमयतिसतआत्मांतर्याम्यमृतइति
तथायःपृथिवीमंतरेसंचरन्यस्यपृथिवीशरीरंयंपृथिवीनवेदेत्यार
भ्ययोक्षरमंतरेसंचरतियस्याक्षरंशरीरंयमक्षरंनवेदयोमृत्युमंतः
संचरन्यस्यमृत्युःशरीरंयंमृत्युर्नवेदयःसर्वभूतांतरात्माअपहत
पाप्मादिव्योदेवएकोनारायणः अंतःप्रविष्टःशास्ताजनानांसर्वात्माइ
ति एवंसर्वावस्थावस्थितचिदचिद्वस्तुशरीरतयातत्प्रकारःपरमपु
रुषःकार्यावस्थजगद्रूपेणावस्थितइतीममर्थंज्ञापयितुंकाश्चन
श्रुतयःकार्यावस्थंकारणावस्थंजगत्सएवेत्याहुः सदेवसोम्येदमग्र
आसीदेकमेवाद्वितीयंब्रह्मसप्रेदंतनबहुस्यांप्रजायेयेतितत्तेजोसृज
त्पुराहेतनमःशाद्ववाच्यसूक्ष्मावस्थमविकृतमभिधीयतेअस्यामेवो
पनिषदिसुषुप्तेतमक्षरेलीयतेअक्षरंतमसिलीयतइतिवचनात्
अंतःप्रविष्टःशास्ताजनानांसर्वात्मेत्यारभ्यसन्मूलाःसोम्येमाःसर्वाःप्रजाःसदाय

श्री॰
गी॰ टी॰
३॰
२२

तनाः सत्प्रतिष्ठा एतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि
श्वेतकेतो इति तथा सोऽकामयत बहु स्यां प्रजायेयेति स तपोऽतप्यत
स तपस्तप्त्वा इदं सर्वमसृजत इत्यारभ्य सत्यं चानृतं च सत्यमभवत्
इत्यत्रापि श्रुत्यन्तरसिद्धं चिदचितोः परमपुरुषस्य च स्वरूपविवेकं
स्फुटयितुं हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य
नामरूपे व्याकरवाणीति तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्र
विश्य सच्च त्यच्चाभवत् विज्ञानं चाविज्ञानं च सत्यं चानृतं च सत्यमभ
वदित्येवंभूतं यन्नामरूपव्याकरणं तद्धीदं तर्ह्यव्याकृतमासीत्तन्
नामरूपाभ्यां व्याक्रियतेत्यत्र चोक्तम् अतः कार्यावस्थः कारणावस्थश्च स्थू
लसूक्ष्मचिदचिद्वस्तुशरीरः परमपुरुष एवेति कारणात् कार्यस्या
नन्यत्वेन कारणविज्ञानेन सर्वविज्ञानं च समभिहितमुपपन्नत
रं अहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्या
करवाणीति तिस्रो देवता इति सर्वमचिद्वस्तु निर्दिश्य तत्र स्वात्मक
जीवानुप्रवेशेन नामरूपव्याकरणवचनात् सर्वे वाचकशब्दाः चि
ज्जीवविशिष्टपरमात्मवाचका इति कारणावस्थपरमात्मवाचिना
शब्देन कार्यशब्दस्य सामानाधिकरण्यं मुख्यवृत्तं अतः स्थूलसूक्ष्मचि
दचित्प्रकारं ब्रह्मैव कार्यं कारणं चेति ब्रह्मोपादानं जगत् जगतो
६४ ब्रह्मोपादानत्वेऽपि संघातस्योपादानत्वेन चिदचितोर्ब्रह्मणश्च स्वभावा
संकरोऽप्युपपन्नतरः यथा शुक्लकृष्णरक्ततन्तुसंघातोपादानत्वेऽपि वि
चित्रपटस्य तत्तत्तन्तुप्रदेश एव शौक्ल्यादिसंयोग इति कार्यावस्थाया
मपि कारणावत् सर्वत्र चासंकरः तथा चिदचिदीश्वरसंघातोपादान
त्वेऽपि जगतः कार्यावस्थायामपि भोक्तृत्वभोग्यत्वनियन्तृ
त्वाद्यसंकरः तन्तूनां पृथक्स्थितियोग्यानामेव पुरुषेच्छया कदाचि
त्संगतानां कारणत्वं कार्यत्वं च इह तु चिदचितोः सर्वावस्थयोः परमपु
रुषशरीरत्वेन तत्प्रकारतयैव पदार्थत्वात् तत्प्रकारः परमपुरुष
एव कारणं कार्यं च स एव सर्वदा सर्वशब्दवाच्य इत्ययं विशेषः
स्वभावभेदः स्वरूपभेदश्च तत्र चात्र च तुल्यः एवं च सति परस्य ब्रह्म
णः कार्यानुप्रवेशेऽपि स्वरूपान्यथाभावादविकृतत्वमुपपन्नं स्थू

लावस्थस्य नामरूपविभागविभक्तस्य चिदचिद्वस्तुनः आत्मतयावस्था
नात् कार्यत्वमप्युपपन्नं अवस्थान्तरोपपत्तेरेव कार्यता निर्गुणवाद
स्य परस्य ब्रह्मणो हेयगुणसंबंधाभावादुपपद्यते अपहतपाप्मा वि
जरो विमृत्युर्विशोको विजघत्सोऽपिपासः इति हेयगुणान् प्रतिषिध्य
सत्यकामः सत्यसंकल्प इति कल्याणगुणान् विदधतीयं श्रुतिरेव सा
मान्येनावगतगुणनिषेधं हेयगुणविषयं व्यवस्थापयति ज्ञानस्वरूपं
ब्रह्मेति वादस्तु सर्वज्ञस्य सर्वशक्तेर्निखिलहेयप्रत्यनीककल्याणगु
णाकरस्य परस्य ब्रह्मणः स्वरूपं ज्ञानैकनिरूपणीयं स्वप्रकाशतया ज्ञा
नस्वरूपं चेत्यभ्युपगमादुपपन्नतरः यः सर्वज्ञः सर्ववित् परास्य शक्तिर्वि
विधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च विज्ञातारमरे केन विजानी
यादित्यादिका ज्ञातृत्वमावेदयन्ते सत्यं ज्ञानमनन्तमित्यादिकाश्च
ज्ञानैकनिरूपणीयतया ज्ञानस्वरूपत्वं सोऽकामयत बहु स्यां प्रजायेये
ति तदैक्षत बहु स्यां तन्नामरूपाभ्यां व्याक्रियते आत्मन्यरे दृष्टे श्रुते म
ते विज्ञाते इति सर्वं विदितं भवतीति सर्वं परादाद्योऽन्यत्रात्मनः सर्वं वे
द तस्य वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेद इति ब्रह्मैव
वस्त्वेकस्माद्विविधस्थिरचरस्वरूपतया नानाप्रकारमवस्थितमिति
तत्प्रत्यनीकाब्रह्मात्मकवस्तुनानात्वमतत्त्वमिति तत्प्रतिषिध्यते मृत्योः
स मृत्युमाप्नोति य इह नानेव पश्यति नेह नानास्ति किंचन यत्र हि द्वै
तमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्के
न कं पश्येदित्यादिना न पुनर्बहु स्यां प्रजायेयेति श्रुतिसिद्धं स्वसंकल्प
कृतं ब्रह्मणो नानानामरूपभाक्त्वेन नानाप्रकारत्वमपि निषिध्यते य
त्र त्वस्य सर्वमात्मैवाभूदिति निषेधवाक्यारंभ एव तत्स्थापितं तस्य वा
एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेद इत्यादिना एवं चिदचि
दीश्वराणां स्वरूपभेदं स्वभावभेदं च वदन्तीनां कार्यकारणयोरन
न्यत्वं वदन्तीनां च सर्वासां श्रुतीनामविरोधः श्रुतिभिरेव ज्ञायत इति ब्र
ह्माज्ञानवादस्य उपाधिगतब्रह्मभेदस्यान्यायमूलस्य सकलस्य सक
लश्रुतिविरुद्धस्य न कथंचिदवकाशो विद्यत इत्यलमतिविस्तरेण २
श्रभिनवयमकृत टीका ९

पूर्वोक्तार्थम्

श्री॰
गी॰ टी॰
त्र॰

स्पष्टार्थं २ ॥

परमार्थप्रपा टीका ७

अथ विशेषतः क्षेत्रज्ञं निरूपयति क्षेत्रज्ञमिति च परं देहाभिमा
नित्वेन शारीरभोगाभिज्ञानेन क्षेत्रज्ञमपि वस्तुतः सर्वक्षेत्रेषु स्वत्रवद
नुगतं मां विद्धि तत्त्वमसीति श्रुतिलक्षणेन विदेशेन मद्रूपस्याक
त्वात् तदुक्तं कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः कार्यका
रणतां हित्वा पूर्णबोधोऽवशिष्यत इति एवमुपाधिद्वयपरित्या
गे पूर्णबोधस्वरूपमेव मद्रूपं तत्पदलक्ष्यस्य त्वंपदलक्ष्येणाभेदे
कत्वमित्यर्थः अथ ज्ञानस्वरूपं दर्शयति क्षेत्रक्षेत्रज्ञयोर्वैलक्षण्यं
ण्येन यज्ज्ञानं तन्मज्ज्ञानमि [illegible] ति मतमभिमतं तस्मादात्माना

त्मविवेकोऽज्ञानमित्युक्तं भवति ॥ २ ॥

वनमाली टीका ८

यद्यपि यत् किंचित् क्षेत्रं जीवो जानाति तथापि सर्वज्ञोऽहमेवेति स्वस्य
निरतिशयसर्वज्ञत्वं व्यवस्थापयति क्षेत्रज्ञं चेति यद्यपि जीवोऽपि क्षे
त्रज्ञस्तथापि सर्वक्षेत्रेषु क्षेत्रज्ञं सर्वक्षेत्रज्ञातारं निरतिशयसर्वज्ञ
वशात्त्वमय्यासक्तमनाः पार्थ मय्यावेश्य मनो ये मामित्युक्तं मत्स्व
ज्ञेयं मयि सर्वमिदं प्रोतमित्याद्युक्त सर्वान्तर्यामिणा मतः सर्वं च वर्त
त इत्याद्युक्त विश्वोदयादिकर्त्तारं ज्ञातुं द्रष्टुं तत्त्वेन प्रवेष्टुमित्याद्युक्त
मत्कृपायां तेषामहं समुद्धर्तेत्याद्युक्तसंसारमोचकं च मामेव सर्वं च
रमचटचटनापटीयोऽनन्तशक्तिमन्तं विद्धि अपि रवधारणे क्षेत्रक्षेत्र
ज्ञयोर्ज्ञानं क्षेत्रज्ञत्वेन जीवेश्वरयोः संग्रहः सर्वक्षेत्रेष्विति च सर्वप
दसमभिव्याहारात् किंचित् क्षेत्रे जीवस्यापि क्षेत्रज्ञत्वलाभात् जड
स्य सविकारस्य क्षररूपस्य तथा हेयतया च ज्ञानं जीवस्य चिदानन्द
स्वरूपस्य स्वरूपतः सदैकाकारस्य जडविलक्षणत्वेन ईश्वराधीनत्वेन
च ज्ञानं परमेश्वरस्य जीवजडनियामकत्वेन विश्वोदयादिकर्तृत्वेन
निरतिशयसर्वज्ञत्वादिसदनन्तगुणालयत्वेन च ज्ञानं यत् तदेव
मम मतं मोक्षहेतुत्वेन मम सर्वज्ञस्य संमतमित्यर्थः इष्यतामात्मा
ने प्रविताने च मनसा जुषस्ततस्तेनामृतत्वमेति जुष्टं यदा पश्यत्य मा
नीशमस्य महिमानमेति तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः
शाश्वती नेतरेषामित्यादिश्रुतिभिः यदात्मममन्यते मोऽहं न्यपथ्य इति

त्य^

ति^

हिज तदा स केवलीभूतः षड्भिः समनुपश्यतीत्यादिस्मृतिभिश्च स्वभि
न्नेश्वरज्ञानादेव मुक्तिरुक्ता न च नाहमीश्वर इति प्रत्यक्षेणैव जीवेश्व
रेशाभेदस्यासिद्धत्वेन भेदबोधकं वाक्यमपि हि मस्याभेदजमित्यादि
वदनुवादकत्वान्न स्वार्थपरमिति वाच्यं प्रत्यक्षेण वर्तमानतयाभे
दबोधकत्वेन ग्राहेन त्रिकालसाधारण्येन तयाभेदबोधकत्वेन भिन्न
विषयत्वेनाननुवादकत्वात् प्रत्यक्षमात्रप्रामाण्येन तन्न एव भेदसिद्धे
रप्रामाण्येन तद्गृहीतमात्रग्राहित्वेन ज्ञानेरप्रामाण्यापत्तेः किंच भेद
स्य प्रत्यक्षसिद्धत्वेपि न शास्त्रवैयर्थ्यं न हि भेदमात्रबोधनार्थं शास्त्र
प्रवृत्तेन ज्ञानमात्रादेव वा मोक्षः किंतु सदनंतगुणालयस्य भग
वतोपरोक्षे मोक्षहेतुः न च अपरोक्षस्वभावस्यापि प्राकृपरोक्षस्यापि
षड्गुणत्वादेर्गोपदेशाश्रवणादपरोक्षत्ववद्वेदांतस्य श्रवणमनननि
दिध्यासनादिनापरोक्षं भवतीति तदर्थं शास्त्रारंभः सार्थकः परस्पर
भेदबोधकत्वाभिमतैर्वाक्यैर्वैयर्थ्यमेव तथा हि किं जीवेशयोरैक्यस्व
रूपभिन्नस्वरूपलक्षणतया विशेषणतया वा बोधनेन वाक्यार्थे वेदांता
नांत्वदभिमताखंडार्थकत्वहानिरद्वैतमतहानिश्च न च मिथ्याभू
तमैक्यं बोध्यते श्रुतिबोधितस्य बाधासंभवेन मिथ्यात्वासंभवात्
प्रभेदस्य मिथ्यात्वे भेदस्य तात्विकत्वापत्तेश्च द्वितीये स्वरूपस्याध्यस्ता
धिष्ठानतया सत्वादिसाक्षितया सदाभानात्छास्त्रवैयर्थ्यं स्वरूपाभाने
संदेहभ्रमाद्यनादिकं न स्याज्जगदध्यासोपपत्तिश्च न ह्यधिष्ठानभानं विना
ध्यस्तस्य भानं संभवति सर्वप्रत्ययवेद्ये परं ब्रह्मणि अवस्थिते इति
वदतात्वया ब्रह्मणः सर्वज्ञानविषयत्वमंगीकृतं न च विशिष्टं ब्रह्म
वाच्यघटादिज्ञानविषयेन शुद्धं शुद्धबोधनाय शास्त्रं सार्थकमिति वा
च्यं घटादिधीविषयघटाद्यधिष्ठानशुद्धमेव हि ब्रह्म वाच्यमपि
ष्ठानस्याध्य[illegible]यिकसत्ताकत्वनियमात् घटाधिष्ठानस्य चाब्रह्मत्वे
विना च घटस्यापि वाच्यघटत्वं न स्यादतः शुद्धं ब्रह्मावश्यं घटादिधी
विषयत्वेनांगीकार्यं किंच विशिष्टभाने विशेष्यभानमप्यावश्यकं न
हि दंडिनि पुरुषे भाते पुरुषो न भायते यत्र सर्वत्वेन शुद्धप्रक
ाशे तत्र तेनिन्नो विभुः स्वप्रकाशश्च न मा वि यारोपितकर्तृत्वभोक्तृत्वा

श्री॰
गी॰टी॰
३॰

दिसंसारधर्मैःक्षेत्रज्ञमाविद्यकरूपपरित्यागेन मामीश्वरमसंसा
रिणमद्वितीयं ब्रह्मानंदरूपं विद्धि एवं क्षेत्रे मायाकल्पिते मिथ्या
क्षेत्रज्ञस्य परमार्थसत्यस्तद्भूमाधिष्ठानमिति क्षेत्रक्षेत्रज्ञयोर्ज्ञाने
मोक्षहेतुत्वाज्ज्ञानमविरोधिप्रकाशरूपं मम मतमिति व्याख्याने
तद्ब्रह्मशुद्धस्य परब्रह्मण एव संसारित्वे नित्यमुक्तत्वबोधकश्रुते
र्निरर्थकत्वापत्तेः न चैवं बंधस्य कल्पितत्वेन मुक्तेः स्वरूपात्मिका
या वास्तवत्वेन न तदभिप्राया नित्यमुक्तत्वश्रुतिरिति वाच्यं तन्
मते वास्तवबंधस्याभावेन कल्पितबंधस्यैव नित्यमुक्तिश्रु
तेर्विषयस्यैकत्वात् यादृशो बंधः प्रसिद्धस्तादृशबंधाभावो
यत्र स एव हि मुक्त इति व्यवह्रियते शुद्धस्य बद्धत्वे उपदेशकसर्व
ज्ञगुरोरभावेन ब्रह्मज्ञानासंभवात् कर्तृत्वस्यारोपितत्वे कर्तृशा
स्त्रार्थवत्वादित्यादिशास्त्रस्याप्रामाण्यापत्तेः अविद्याद्युपाधिविनि
र्मुक्तस्य त्वन्मतेनेश्वरत्वासंभवात् मायाकल्पितेश्वरादेर्मायामोहवि
तेश्वरस्य दर्शनासंभवेन पालनीयदेशाद्यसंभवात् मायामोहि
तस्येश्वरत्वे मानाभावः निःसामान्यनिर्विशेषब्रह्मणः सामान्यतो
ज्ञातत्वे सत्यज्ञातविशेषवत्त्वरूपाधिष्ठानत्वासंभवात् स्वरूपमा
त्रविषयकज्ञाने हि न भ्रमविरोधि तस्य त्वन्मते सदासत्वात् किं तु भ्र
मादिष्टरहितस्य विरुद्धाकारस्य तत्वस्य ज्ञानं भ्रमविरोधि तच्च नेति
विशेषवादिनो संभवि किं चाज्ञानोपादेयेनान्तःकरणवृत्तिरूपेण
ज्ञानेनाज्ञानस्य स्वोपादानस्य निवृत्तिर्न संभवति नहि पटादिना
तंत्वादेर्नाशः संभवति मोक्षस्य नित्यसिद्धस्वरूपात्मिकस्य त्वन्म
ते भावेन तदर्थं यत्नोपि व्यर्थः न च विस्मृतकंठस्थमणिलाभव
दुपपत्तिः मणिज्ञानजन्यसुखदुःखाभावयोर्मणिभिन्नयोः पुरु
षार्थत्ववत्त्वत्कृते ब्रह्मभिन्नस्य लब्धव्यस्याभावात् अज्ञानाद्युपाधिष्ठान
तया ब्रह्मस्वरूपस्य त्वन्मते सदाभासमानत्वेन विस्मरणासंभवा
त् किं च सुखित्वमेव पुरुषार्थं न तु सुखस्वरूपत्वं अहं सुखी स्यामि
त्येव हीच्छा न त्वहं सुखं स्यामिति पुरुषार्थत्वस्येच्छानियम्यत्वादन्य
थावोहमनमिश्रात्मनाशायं मोक्षः स्यात् यत्तु जीवेशादिभेदाय मा

तिरिक्तो न तिरिक्तो वा येन तद्भेदोपि भिन्न एव न तद्भेदोपीत्यनवस्थास्या
त् द्वितीयभेदासिद्ध्यापत्तेरिति तत्र प्रामाणिकत्वेनानवस्थाया अ
दोषत्वात् सत्यात्तन्मेदस्य त्वयापि स्वीकाराच्च नच ममापि मिथ्या
त्वेनुपपत्तिरलंकारः ममापि तत्केहतस्य परमार्थसतो चिन्त्येश
क्त्या घटघटनापटीयसोपपन्नत्वात् सत्यात्तयोर्भेदस्याभि
प्यात्वेन तयोरभेदस्य तात्त्विकत्वापत्तेश्च न चैन्द्रजालिकस्य स्वभाव
त्वेनो घटघटनादृष्टा न सत्यस्य कापि तथा घटघटनादृष्टेति वा
च्ये तत्र परमार्थसतो भेदो घपादेरेवाघटघटनायदीयत्वात् भे
दस्याधिकरणात्मत्वेपि नानुपपत्तिः नच सापेक्षत्वनिरपेक्षत्वयोः क
थमभेदः घटत्वादिना निरपेक्षत्वेपि भेदत्वादिना सापेक्षत्वात् प्र
तियोगिकभेदस्याविगुणमोहे विनाभावासंभवेनोपदेशासंभवात्
नहि नित्यसर्वतस्य वापि तेनानुहस्यापि भानं संभवति २ ॥

कुसुमवैजयन्ती टीका ४

एवं देहानां जीवात्माभिस्सह सामानाधिकरण्यमुक्त्वेदानीं चेतना
चेतनयोः परमेश्वरेण सह सामानाधिकरण्यमाह क्षेत्रज्ञं चापी
ति हे भारतेत्यनेन मद्भक्तस्यातित्वानिनो महायोगिनो राजर्षेर्भ
रतस्य कुले त्वमुत्पन्नो मद्भक्तो ज्ञानाधिकारी वा स्यनन्तरमेव ज्ञानं
वदामीति सूचितम् सर्वदेहेषु सर्वेषु ब्रह्मेशशेषहरेशादिस्था
वरान्तेषु देहेषु प्राकृतमाप्राकृतेषु देहेषु वर्त्तमानं क्षेत्रज्ञं जातिवा
देकवचनेन सर्वान् क्षेत्रज्ञान् बद्धान् मुक्तांश्च जीवान् मां परमेश्व
रं विद्धि मदात्मकान् जानीहि च शब्दात् सर्वदेहानि प्राकृतान्यप्रा
कृतानि देवमनुष्यादिशरीराण्यपि मां विद्धि मदात्मकानि विद्धि
अपि शब्दात्कालमपि मदात्मकं विद्धि मां विद्धीत्युक्तेरयमाशयः य
थेन चेतनाचेतनात्मजगद्भिन्नाभिन्नस्वभावं सर्वे वेदान्ताः प्रतिपादयन्ति श्री
भगवता बादरायणेनापि जिज्ञासाविषयतया सूत्रितं यदुपनि
षत्प्रतिपाद्यमनन्तनिष्ठानां सिद्धान्तरूपेण देवाद्वितीयानेन कर्मप
देन भगवता स्वात्मानं मामिति निर्दिष्टं न तु स्वाभाविकभेदाभेदवा
देवलक्षणस्वतन्त्रपञ्चजीवभावाभ्युपगमात्तद्गुणवदोषाश्च स्वाभावि

श्री॰
गी॰ टी॰
३॰
25

काभवेप्युक्तलक्षणत्वेनिर्दोषब्रह्मतादात्म्योपदेशाविरुद्धाप्रवेतिचेन्न
स्वरूपतोजीवेश्वरयोरैक्यानभ्युपगमात् तथाहि चेतनस्याणुरू
पत्वेन अचेतनस्यस्थूलरूपत्वेनब्रह्मणश्चास्थूलमनण्वमदीर्घ
मह्रस्वमलोहितमच्छायमित्यादिश्रुतेस्तयोर्वैलक्षण्येनचेतनस्य
तयोश्चेतरेतराभ्यांविलक्षणत्वात्स्वरूपेणाभेदः एवमेवतस्य
तयोश्चसर्वात्मत्वसर्वनियन्तृत्वसर्वव्यापकत्वसर्वाधारत्वस्वतं
त्रसत्त्वादियोगेनब्रह्मात्मकत्वनियम्यत्वव्याप्यत्वतदाधेय
त्वपरतंत्रसत्त्वादियोगेनचाभेद इतियत्तादात्म्यंकथंचिन्नियम्यब्रह्मा
प्यंतदाधेयंपरतंत्रसत्ताकंचतन्न दभिन्नत्वनिर्देशार्हं पृथिवीघ
टादिवत् जीवशरीरवत् अग्निक्षमवत् श्रोत्रेंद्रियवत् भूतभौ
तिकवच्च एवंसर्वभूतानामात्मान्तःप्रविष्टःशास्ताजनानां य
च्चकिंचिज्जगत्यस्मिन् दृश्यतेश्रूयतेपिवा अंतर्बहिश्चतत्सर्वंव्या
प्यनारायणःस्थितः तस्मिंल्लोकाःश्रिताःसर्वे इत्याभिःश्रुतिभ्यःकिं
चयथाघटोद्रव्यंपृथिवीद्रव्यमित्यत्र द्रव्यत्वावच्छिन्नस्यघटत्वा
वच्छिन्नपृथिवीत्वावच्छिन्नयोश्चसामानाधिकरण्यंसख्येविशेष
ण्यसामान्याभिन्नत्वनियमात् तथैवसार्वज्ञाद्यनंतविशेषगुणाव
च्छिन्नस्यापरिच्छिन्नशक्तिवैभवस्यपरब्रह्मणः स्वात्मकेचेतना
नाचेतनवस्त्ववच्छिन्नतदंतरात्माभिन्नत्वमपितद्द्योतकेपतदर्थ
कानितत्वमस्यादिवाक्यान्यपिविदधति तोब्रह्मात्मकत्वेनब्रह्माप
न स्थितिप्रवृत्तिकत्वेनब्रह्मव्याप्यत्वेनचब्रह्मतादात्म्यत्वमुपदि
शंतितस्मात्स्वभावतोमास्तुसमस्तदोषमनंताचिंत्ययावदात्मवृ
त्तिस्वाभाविककल्याणगुणशक्तिवैभवाश्रयंजगज्जन्मादिहेतुम
खिलक्षणसैवैधंपरब्रह्मभगवदादिशब्दाभिधेयंचिदचित्पदार्थ भिन्ना
भिन्नंसर्वेषामाश्रयंपुरुषोत्तमंमन्मांविद्धीतिसिद्धांतः ननुपरब्रह्म
णस्तत्पदार्थमस्तुश्रौतत्वात् परंतुजीवांतर्यामिणस्त्वंपदार्थत्वं
कथंत्वंपदस्यजीवविषयकत्वातिप्रसिद्धत्वादितिचेन्नविश्वात्म
त्वेनसर्वशब्दवाच्यत्वादेवेति ब्रूमः तथाहि यथा गौरित्यश्वादिश
ब्दाःकारणकार्यावच्छिन्नात्मविकाभिशब्दपरः अश्वौजहातीति

नत्वत्वमस्येवाग्निशब्दोदहनप्रकाशनादिधर्मावच्छिन्नपदार्थाय
स्याभिधानपरः एवमुभयार्थप्रतिपादकत्वशक्यत्वादयोप्यस्मिन्नेवेति
शाह्निकानोराद्धान्तः यथैवात्रापिसर्वेषांवेदानांचेतनवस्तुमात्रवा
चकानांतत्तत्पदार्थवाचकत्वेपितत्तत्पदार्थात्मभूतब्रह्मपरत्वम
विरुद्धम् सर्वात्मत्वात् यथाचचतुर्मुखादिशरीराणितदवच्छिन्ना
त्मचेतनयितारमृतुर्मुखादिशब्दवाच्यास्तेषांशक्यास्यैवस्वशक्तिभि
स्तैरभिधीयन्तेतथैवतेषांचतुर्मुखादिपिण्डवत्तदवच्छिन्नचेतना
भिधानपरत्वेपितस्यतत्तत्पदार्थान्तरात्मत्वाद्ब्रह्माभिधानपरत्वंप्र
धानमेवेतिसर्वशाखैकवाक्यमितिभावः भोक्ताभोग्यंप्रेरितारंचमत्वास
र्वंप्रोक्तंत्रिविधंब्रह्ममेतत् नारायणःपरोध्याताध्यानंनारायणःप
रः नामानिसर्वाणियमाविशंतिसर्वेवेदायत्पदमामनंतीति नमामि॰
सर्ववचसांप्रतिष्ठायत्रशाश्वतीत्यादिश्रुतिभ्यः एवंस्वरूपेणाभि
न्नयोर्ब्रह्मात्मकत्वादिनाब्रह्मणःपृथक्स्वरूपस्थितिप्रवृत्तिकत्वेन
ब्रह्माभिन्नयोःचेतनाचेतनयोःचेतनस्यप्रकृतिकार्यत्वेनकार्यकार
णयोरभेदादचेतनशब्देनप्रकृतिरुच्यते कार्यावस्थयोःकारणा ह्म
वस्थयोःप्रकृतिपुरुषयोर्यत् ज्ञानंब्रह्मभिन्नत्व[illegible]रूपंतज्ज्ञानंतदे
वतत्त्वज्ञानमिममसर्वेश्वरस्यब्रह्मणःपुरुषोत्तमस्यपार्थसारथेःश्रीकृ
ष्णस्यमतंसम्मतम्नात्मपादित्यर्थः केचित्तुसदेवसोम्येदमग्रआसीदे
कमेवाद्वितीयंआत्मावाइदमेकएवाग्रआसीत् एकोहवैनारायण
आसीदित्यादिश्रुतिभ्यःस्वरूपतएकमेवब्रह्माभेदाश्रयभूतं अना॰
द्युपाधिनाचभेदस्तत्त्वमस्यादिवाक्यजन्यज्ञानान्निवृत्तिरितिब्रह्म
त्वप्रक्रिमत् विकल्पासहत्वात् तथाहि नतावदुपाधिनावच्छिन्नोब्र
ह्मखण्डोजीवात्माब्रह्मणोऽच्छेद्यत्वात्जीवस्यसावयवत्वापत्तेश्चनाप्य
च्छिन्नएवाणुरूपोपाधिसंयुक्तोब्रह्मप्रदेशविशेषोजीवः ब्रह्मैकप्र
देशोपाधिसंबंधात्सर्वेदोषाब्रह्मण्येवस्युः उपाधौगच्छतिसति
उपाधिनाब्रह्मप्रदेशाकर्षणानर्हत्वेनानुक्षणमनुपहितब्रह्मप्र
देशभेदेनक्षणेक्षणेबंधमोक्षौचभवेताम् आकर्षणेपत्ताभ्युपग
मेवाच्छिन्नत्वानुकृतस्यब्रह्मणआकर्षणेस्यात्तदसम्भवाभ्युप

श्री॰
गी॰ टी॰
३
२६

गमेस्सर्वैकदेशस्यानादवच्छे अच्छिन्नब्रह्मप्रदेशेषु सर्वोपाधिसंस
र्गेण सर्वजीवानां ब्रह्मणापदप्रदेशत्वेनैकत्वप्रतिसंधानेस्यात् प्र
देशाभेदादप्रतिसंधाने चैकस्यापि स्वोपाध्यौ गच्छति सति प्रतिसंधा
नेन स्यात् नाप्युपाधिसंयुक्तं ब्रह्मस्वरूपमेव जीवः ब्रह्मस्वरूप
स्यैवोपाधिसंबंधेन जीवत्वापत्तेः तदतिरिक्तानुपहितब्रह्मासिद्धेः
न चोपाधिसंयुक्तस्यैव तन्नानात्वमेव जीवस्य इति चेन्न तेन तदनभ्युपग
मात् अभ्युपगमे च भेदस्योपाधिकत्वसिद्धांतभंगात् परपक्षापाति
त्वापत्तेश्च नाप्युपाधिरेव जीवः बाह्यमतप्रवेशसंगात् तस्मादुपे
क्षणीयोऽयमौपाधिकभेदाभेदपक्षो विद्वद्भिः अन्ये तु तत्त्वतस्त्वना
भिन्नं सजातीयविजातीयस्वगतनाख्यभेदत्रयशून्यं सर्वविशेषवि
निर्मुक्तमनुभूतिमात्रं ब्रह्म सर्ववेदान्तप्रतिपाद्यमित्याहुः तदप्यसु
क्तं तं भेदविषयकवाक्यसहस्रविरोधात् ननु वेदान्तशास्त्रे भेदा
भेदविषयकानामुभयविधवाक्यानां श्रवणादपि जीवेश्वरभेदस्याप्र
त्यक्षसिद्धत्वेन भेदप्रतिपादकवाक्यानां स्वरूपभेदानुवादपरत्वेन
दौर्बल्यात् अभेदपराणां तु वाक्यानामन्यविषयाभावेनास्वार्थ एव
प्रामाण्यावसरे उपक्रमादिषड्लिंगोपेतत्वाच्च तस्मात् स्यादत्यंताभिन्न
ब्रह्म सर्ववेदान्तार्थभूतमिति चेन्न उभयविधवाक्यानामपि तुल्यो
गक्षेमत्वात् तथा हि न तावत् प्रत्यक्षगोचरो जीवेश्वरभेदः तयोरती
न्द्रियत्वेन प्रत्यक्षाविषयत्वात् नैन्द्रियाणि नानुमानमिति श्रुतेः प्रतियो
गिप्रत्यक्षानिरूप्यत्वाद्भेदस्य एवं भेदस्य प्रत्यक्षगोचरत्वासिद्धेः न वि
षयकवाक्यानामनुवादपरत्वानर्हतया स्वार्थ एव स्वप्रामाण्यम्
नापि तात्पर्यनिर्णायकोपक्रमादिकषड्लिंगोपेताभेदवाक्यप्रतिपाद्यं ब्रह्म
सर्वधर्मविनिर्मुक्तस्य निर्विशेषस्य ब्रह्मणो वाच्यत्वानभ्युपगमात्
वाक्यमात्रस्य किंचिद्धर्मावच्छिन्नवस्तुप्रतिपादनपरत्वनियमात् एवं
सर्वप्रमाणाविषयत्वेन गगनकुसुमायमानत्वप्रसंगाच्च वाच्यत्वे वा
स्याप्रत्यक्षाभ्युपगमप्रसंगात् अस्मन्मतप्रवेशाच्च नापि षड्लिंगो
पेतत्वेनाभेदवाक्यानां प्राबल्यं शक्यं तेन वक्तुं भेदवाक्यानामपि तथा
त्वश्रवणात् तथा तत्रत्वार्थतेऽन्तर्यामिब्राह्मणे भेदस्य षड्लिंगोपे

नवाक्यवाच्यत्वं बृहदारण्यकेष्वपि त्वं कृत्स्ने तर्यामिणमि ह्युपक्रमः
एषत आत्मान्तर्याम्यमृत उपसंहारः १ एषत आत्मेत्येकविंशतिकृत्वोऽ
भ्यासः २ अन्तर्यामितया आत्मत्वदर्शिमपूर्वता ३ सर्वेवलं विदित्वा
दिफलम् ४ न त्वं वेत्थ याज्ञवल्क्य सूत्रमविद्वांस्तं चान्तर्यामिणं ब्रह्मग
वीरुदजं समूर्द्धा ते पतिष्यतीति निन्दारूपोऽर्थवादः ५ यस्य पृथि
वी शरीरं यं पृथिवी न वेद इत्याद्युपपत्तिरिति ६ तस्यैवात्मत्वाच्चाप्यत्व
म् तस्माद्वेदवाक्यानामपि प्राबल्यात् जीवेशयोर्नात्यन्ताभेदः संभ
वति न च ज्ञानादीश्वर एव जीवत्वेनात्मस्वविहितनये हेतुत्वं तत्त्वेवापि
मो विष्णुरीति सामानाधिकरण्येनैक्यं ज्ञाने भगवतोपदिष्टं यथा रज्ज
र्ययं न सर्पोऽयमस्मोपदेशेन सर्पे न भ्रमनिवृत्तिः स्यान्तथा देवज्ञान
भ्रमोऽपि निवर्त्तते इति चेन्न अस्माभिर्न इष्टत्वात् अयमज्ञेनोपदेष्टा
परमेश्वरो भगवान् किमात्मयाथात्म्यसाक्षात्कारेण निहतज्ञान
उत न निहतज्ञानः श्चेत् विनाऽऽत्मस्वरूपे आत्मन्यनहूपाध्यासासं
भावनयाऽकौन्तेयादिभेददर्शनेनात्मन्युपदेशादिव्यापारा अनसंभ
वेति अथात्मसाक्षात्काराभावान्निहतज्ञानत्वाहितस्याज्ञत्वादे
वात्मज्ञानोपदेश[illegible]ऽपि न संभवति व्यापारा अनसंभवेति उप
देष्टेति ते ज्ञानं ज्ञानिनस्तत्वदर्शिन इत्युक्तेः अत एवमादिवादाः
अनाकलितश्रुतिस्मृतीतिहासपुराणसदाचारविरोधिभिस्त्वद्व
चस्यापनडुराग्रहैः ज्ञानिभिर्मायावादिभिर्जगन्मोहनायैव प्रवर्ति
ता अनादरणीयाः अपि तु केवलभेदवाक्यान्येवाङ्गीकृत्य चेतना
चेतनाभिन्नं ब्रह्मेति प्राहुस्तदपि न शोभनं अभेदश्रुतीनां सर्वस्यार्थ
त्यागेनात्यन्तबाधप्रसङ्गात् केवलभेदवादिनो वाच्येतभिन्नयोर्जीवेश
योः केनापि प्रकारेणैक्यासंभवादेव ब्रह्मात्मभावोपदेशो न संभव
तीति सर्ववेदान्तपरित्यागः स्यात् किंच सर्वेषां पराद्यचोऽन्यत्रात्मनो
ऽन्यत्र सर्वं वेदेत्यादिश्रुत्याभेदनिन्दाश्रवणात् तस्मान्नात्यन्तभेदः
संभवतीत्यर्थः अपरे तु चेतनाचेतनवस्तुमात्रस्य ब्रह्मविशेषणत्वा
त् चेतनाचेतनविशिष्टं ब्रह्म सर्ववेदान्तप्रतिपाद्यमिति प्राहुस्ते
तदपि नैव चारु तत्त्वं स्वारस्याभावात् तथाहि व्यावर्तकत्वेनावि

शेषणत्वमिति सर्वपदसामानाधे एवं चिदचिद्ब्रह्मणां वस्तुविशेषणा
त्वाभ्युपगमे किं वा वस्तुताभ्यां व्यावर्तकाभ्यां व्यावर्त्यं विवक्षितमि
ति विवेचनीयं न तावच्चेतनाचेतनभूताभ्यामेव ताभ्यां व्यावर्तनेन इ
ति वा [illegible]चे असंभवात् एकस्यैव वस्तुनः कर्मकर्तृत्वव्याव
र्त्यव्यावर्तकत्वाद्यनुपपन्नत्वात् नाद्यः नापि वस्त्वन्तरं व्यावर्त्यमि
ति वाच्यम् तत्त्वत्रयभिन्नपदार्थान्तराभावादनभ्युपगमाच्च कि
ञ्च चेतनाचेतनविशिष्टब्रह्मैक्येनाभ्युपगमेऽपि ब्रह्मणश्चेतनाचेतना
भ्यां भेदस्तयोश्च परस्परं भेदः स्वाभाविकोऽभ्युपगम्यते एवमवद्भिः
अन्यथा स्वभावलोकयोरसङ्गतेः एवं भेदमङ्गीकृत्य पुनर्विशिष्टै
क्याकारात्मकगौरवाहरीयत्वं स्वाभाविकभेदमतस्यैव लाघवात्
एतदुक्तं भवति श्रुतेस्तावत्सदेव सोम्येदमग्र आसीदेकमेवाद्वि
तीयं आत्मा वा इदमेकमेवाग्र आसीत् [illegible] एको ह वै नारायण आ
सीत् न च मत्स्यपमात्मा ब्रह्मप्रात्मैवेदं सर्वं सर्वं खल्विदं ब्रह्म तेवा अ
हमस्मि भगवन्ने देवते अहं वै त्वमसि देवते तदात्मानमेवावेदहं
ब्रह्मास्मीति तदनन्यत्वमारम्भणशब्दादिभ्यः इत्यादीनामभेदवाक्या
नां नित्यो नित्यानां चेतनश्चेतनानां ज्ञाज्ञौ द्वावजावीशनीशौ अजो
ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः जुष्टं यदा
पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः पृथगात्मानं प्रेरिता
रं च मत्वा प्रधानक्षेत्रज्ञपतिर्गुणेशः अक्षरात्परतः परः तस्मिंल्लो
काः श्रिताः सर्वे भीषास्माद्वातः पवते नेह नानास्ति योनिश्च वदन्ति धीराः
पृथग्योनिः सर्वस्य स्थावरस्य चरस्य च सर्वांल्लोकानीशत ईशनी
भिः सर्वस्य प्रभुमीशानं तमीश्वराणां परमं महेश्वरं न तत्समश्चा
भ्यधिकश्च दृश्यते परास्य शक्तिर्विविधैव श्रूयते सर्वस्य वशी स
र्वस्येशानः विवृत्तिनिर्गुणोपपत्तेश्च सर्वधर्मोपपत्तेश्च सर्वोपेता
च सा भेदव्यपदेशाच्चान्यः अधिकं तु भेदनिर्देशात् इत्यादिभेदप
राणां सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद इत्यादि भेदनिषेधप
राणां अथात आदेशो नेति नेति अस्यैमनन्नियम्यादिनिषेधवि
षयकानां च श्रवणात् न नेह नानास्ति नेदं यदिदं व्याप्यव्यापकभावो वक्तव्यः शा

कालसंबलनात्सर्वेषामपि स्वार्थप्रामाण्यसिद्धये जगद्भिन्नाभिन्नब्र
ह्मसूत्रकाद्भिर्निर्णीतेनेनाभिप्रायेण तद्धटकसूत्राणि प्रणीतवान् श्रे
शोनानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एकेऽभ
यव्यपदेशात्त्वहिकुंडलवत् शारीरश्चोभयेऽपि भेदेनैनमधीयत इत्या
दीनि तस्मात्स्वाभाविकभेदाभेदात्मकमेव ब्रह्म सर्ववेदान्तप्रतिपा
द्यं तदेवास्मिन् श्लोके ज्ञानमर्जुनाय भगवतोपदिष्टमित्यलं विस्त
रेण २ ॥

+एवं देहेंद्रियादिभ्यो विलक्षणं स्व **मधुसूदनी टीका ॥** प्रकाशं क्षेत्रज्ञमभिधाय तस्य पारमार्थिकं तत्त्वमसंसारि

परमात्मैकत्व+ माह ॥

+सर्वक्षेत्रेष्वेक: क्षेत्रज्ञ: स्वप्रकाशचैतन्यरूप: नित्यो विभुश्चत्वं^
मविद्याध्यारोपितकर्तृत्वभोक्तृत्वादिसंसारधर्मं क्षेत्रज्ञमाविद्यक
रूपपरित्यागेन मामीश्वरमसंसारिणमद्वितीयं ब्रह्मानंदरूपं वि
द्धि जानीहि हे भारत एवं च क्षेत्रं मायाकल्पितं मिथ्या क्षेत्रज्ञश्च पर
मार्थसत्यस्तद्भ्रमाधिष्ठानमिति क्षेत्रक्षेत्रज्ञयोर्यत् ज्ञानं तदेव मोक्ष
साधनत्वात् ज्ञानं अविद्याविरोधिप्रकाशरूपं मम मतं अन्यत्त्वऽज्ञा
द नमेव तदविरोधित्वादित्यभिप्राय: अत्र जीवेश्वरयोराविद्यको भेद:
पारमार्थिकस्त्वभेद इत्यत्र श्रुतयो भाष्यकृद्भिर्वर्णिता: अस्माभिस्तु
ग्रंथविस्तरभयात्प्रागेव बहुधोक्तत्वाच्च नोपन्यस्ता: २ [illegible]
[illegible] ॥

सदानंदी टीका ॥

एवं देहेंद्रियादिभ्यस्तत्पदार्थो विलक्षण: क्षेत्रज्ञ: स्वप्रकाशोऽस्तीत्य
भिधायाक्षतेमितं १ तस्य यदात्मवेतत्त्वमहावाक्यार्थमद्वयं ब्रह्मा
त्मैकं स्वयं प्राह भगवान्करुणानिधि: २ ब्रह्मादिस्थावरांतेषु सर्व
क्षेत्रेषु विहृत: क्षेत्रज्ञ एक एवास्ति स्वप्रकाशोऽद्वयो विभु: ३ तमि
त्रविद्ययाध्यस्तकर्तृत्वाद्यखिलभ्रमं परित्यज्य तमात्मानं क्षेत्रज्ञं
मामवेहि भो: ४ अहमेवाद्वयानंद: प्रत्यगात्माक्षरोऽचल: सर्वक्षे
त्रेषु मध्येवकल्पितेषु घटेष्विव ५ जीवांतर्यामिसाक्ष्यात्मतयात्र
स्थित: स्वयं मायया कल्पितो भेद: क्षेत्रक्षेत्रमयि चिद्घने ६ विद्ययाऽतो
वनत्कार्यभेदस्य कात्मगोचरं निर्विकारं सदाम्नकं मामखंडं विदह

श्री॰
गी॰ टी॰
३॰

२८

ये ७ विद्धिवंप्रत्यगात्मानंक्षेत्रज्ञंब्रह्मादरात् यतोमायाकृतोवेषः
क्षेत्रज्ञेनतुवस्तुतः ८ नित्यमुक्तस्वभावोतःक्षेत्रज्ञोहंमहेश्वरः
परात्मनोप्यनेनस्यक्षेत्रज्ञत्वमविद्यया क्षेत्रज्ञेचाप्यमीविहीनत्वेवस
स्तुपपद्यते सर्वज्ञत्वादयोधर्मामाययापरमेश्वरे ९ कल्पितास्तेन
सन्त्येस्मिन्कल्पस्तुःस्वात्मनीश्वरे तथाल्पज्ञत्वमुख्यामेधर्मामायाप्र
कल्पिताः नैवनैरात्मनःसंगाःकूटस्थस्यामलात्मनः तेनजीवग
तोवेयोनप्रसज्यतईश्वरे १३ नसार्वज्ञ्यादयोधर्माजीवेवासंप्रसंक
रात् यजडोपाधिकोभेदःपरमेश्वरजीवयोः व्यवहारस्थलेस्वाभिः
स्वीकृतस्तत्पतयोः धर्माणांसंकरोनास्तिननत्राभेदइष्यते १४
ननुस्वाभाविकोभेदःप्रसिद्धोस्तीशजीवयोः प्रत्यक्षेणानुमानेन
वेदान्तैःस्मृतिभिस्तथा १५ प्रत्यक्षेणावदस्यात्रभेदेजीवेशयोःस्फुटं
नाहंसर्वज्ञइत्याद्यनुभवोनिर्विवादतः नचार्थ्यप्रत्तभावत्वाद्दस्य
णःपरमात्मनः तद्भिदापिनचाप्यस्तास्तीतिवाच्यंकदाचन यस्मात्व
तर्कितेयत्रानुपलब्धिविरोधिच तदभावःसदाप्यक्षगोचरस्तत्र
संमतः १८ यस्मादभावप्रत्यक्षेप्रत्यक्षंप्रतियोगिनः अन्वयव्यतिरे
काभ्यांव्यभिचारान्नकारणं पृथिवीत्वाद्यभावस्यजलादौनैवदृश्य
ते प्रत्यक्षत्वमतोनास्तितवेत्रैवस्यचान्वयः २० स्तंभःपिशाचोना
स्तीतिप्रत्यक्षस्यदर्शनात् यस्माद्व्यतिरेकेपिव्यभिचारस्तयोर्द्व
योः २१ प्रतोभानानुसारेणकल्प्यसद्भिःप्रयोजके अन्यथाजीवपर॰
योरभेदस्फातिसद्भिरा २२ यप्रसक्तनिषेधस्यकर्तव्यंभवतामते किं
चजीवेशभेदोपिवेदगिरास्वतः २३ प्रमाणत्वान्नशंकास्याद
नुवादकतान्वया तत्रैववेदतात्पर्येणत्वेकोनचसंमते २४ ननु
बुद्धिविशिष्टस्यभेदईशात्प्रतीयते सममापीशपवास्तिव्यवहार
स्थलेकिल २५ यथनेक्षोविशुद्धस्यपरस्मात्प्रत्यगात्मनः भेदःसो
त्रनभातीत्याशंकायामभिधीयते २६ समष्ट्यज्ञानाश्रयस्यैवभेदईशा
त्प्रतीयते समष्ट्यज्ञानाश्रयस्तत्रिप्रत्यगात्माहिविस्मयः २७ योप्यु
नाज्ञाहमस्वाभ्यंयस्यमेज्ञानमीदृशं संसारीसोहमानंदस्वरूपात्पर
मेश्वरात् २८ भिन्नोस्मीत्याहतेभ्रांतिःसंसारस्याश्रयोहियः सजीवो

भिन्न एवास्ति परस्मान्नित्यमुक्ततः २९ ईश्वरस्यापि भेदोस्ति जीवात्तस्मा
दिर्णोक्ततः ममैवांशो जीवलोके इत्यादिनुदीरणात् ३० तेनैवानु
मितेनस्य प्रत्यक्षमपि साधकं दुःखानुभवितृत्वादभोक्तृत्वात्स्व
त्वतः ३१ असंसारितया ब्रह्मजीवाद्भिन्नं विनिश्चितं असर्वज्ञतयास
र्वशक्तित्वाज्ज्ञानभावतः ३२ अस्वतंत्रतयाजीवो ब्रह्मणो भिन्न ईर्यते
इत्यप्यत्रानुमानाभ्यां सिद्धो भेदस्तयोर्द्वयोः ३३ द्वासुपर्णेति मंत्रो
स्ति श्रुतिर्भेदैकतत्परा शारीरश्चोभयेपीह भेदेनैनमधीयते ३४
इत्यादीन्यपि सूत्राणि भेदनिष्ठानि संति च नच प्रत्यक्षमानस्यानुवा
दोयं श्रुतेः स्मृतेः ३५ प्रत्यक्षस्य प्रमाणत्वे भेदसिद्धिस्ततोपि च आग
मस्यानुवादत्वेपीष्टसिद्धिर्भवेन्मम भेदप्रत्यक्षदार्ढ्यस्य हेतुत्वादेव
नक्षतिः अनभ्यस्तजलेष्वस्तत्त्वं स्यादिति संशये ३७ प्रवृत्तमानदा
र्ढ्यायमानो नरप्रवृत्तिवत् अग्नेरौष्ण्यमध्यक्षप्रामाण्यान्निश्चये सति
३८ अग्निर्हिमस्य वेत्येवमनुवादोपि साधकः भेदप्रत्यक्षदार्ढ्याय
तथात्रापि समीक्ष्यतां ३९ किंच भेदश्रुतेर्मानं मूर्धन्याया स्वतोयतः
भेदाध्यक्षानपेक्षत्वान्न सापेक्षानुवादता ४० निरपेक्षानुवादत्वे नाप्र
माण्यस्य साधकं धारावाहिकबुद्धेर्हि यथा प्रामाण्यमिष्यते ४१ निर
पेक्षानुवादत्वेन तथात्रापीष्यतो श्रुतेः अपि वंशस्य पर्णानि संख्यायाः
श्रुतिसत्क्रियः ४२ अस्त्यनुवादमात्रत्वे विचारोत्तरमप्यथ निरर्थका
नुवादस्यायोगादेवाविचारणा ४३ विधित्वं तत्परं मध्वान्यविधाना
ष्यमेव वा अनुवाद्यनिषेधायानुवादो विधीयते श्रुतेः ४४ नायास्ति वा
युः श्रेयो विष्णुर्भावादिवत्सतत्ययेमतः विधेकवाक्यतानास्ति नार्थवादत्व
मस्यतः ४५ द्वितीयत्वविधानायानुवादत्वेन संमतं तात्त्विकत्वम
नूद्यस्य वक्तव्ये स्याद्विचारतः ४६ मानेनान्यविधानायानूदितस्य चट
ष्यते नियमस्तात्त्विकत्वस्य यद्वादभावहोत्रापि ४७ नानुवाद्यनिषे
धायानुवादोस्तीह वच्छ्रुतेः वाक्ये स्मिन्नेह नानास्ति किंचनेति निषेधके
४८ भेदस्य किंचनेत्यत्रानूदितत्वात्प्रतीयतां अनुवादो मतोन्यत्र हा
सुपर्णेति वच्छ्रुतौ ४९ द्वासुपर्णेति वाक्यस्याज्ञातज्ञापकलक्षणे अ
स्येव विधिशेषत्वमन आस्तीति मद्धियैः ५० जीवसंघात्परो भिन्नो वि

त्यङ्ग्यादिकश्रुतेः नान्योतोस्तीतिवाक्यस्यात्रस्तुनैकान्त्यवादकं ५१
अनादिवादिसंसिद्धाभेदश्रामिर्यतःतितो तत्त्वमस्यादिवाक्यं तु नैव
भेदविरोध्यपि ५२ तदाश्रयतयायद्धानजन्यत्वेन तस्य च तद्धपदे
शङ्क्यत्वेन तत्त्वमित्यत्रनिर्णयः ५३ दौर्बल्ये विदितार्थत्वा यदि भेदश्रु
तेर्मतं किन्त्वहार्थतया नहि दौर्बल्यमभिदाश्रुतेः ५४ यच्चाप्यत्वावि
रुद्धैकपरावैकाश्रुतिर्मता नहि भेदश्रुतिर्लोकसिद्धभेदपरत्वभोः
५५ यदिषड्विधयतात्पर्यलिंगवत्वेन सर्वतः प्रबलैकाश्रुतिस्तर्हि त
त्वमस्यादिदाश्रुतेः ५६ उपक्रमोपसंहारावभ्यासोऽपूर्वता फलं अ
र्थवादोपपत्तीव लिंगं तात्पर्यनिर्णये पतञ्च षड्विधलिंगं भेदे तात्प
र्यनिर्णये अस्त्येवतत्कथं चेत्याकांक्षायामभिधीयते ५७ अथर्वण
श्रुतौ भेदे ह्यासुपर्णोत्युपक्रमः परं साम्यमुपैतीत्युपसंहार इष्य
ते ५८ भिन्नाश्रयतयालोकेसाटश्यस्यचदर्शने अनेनात्युत्रापसंहा
रो भेदमात्रैकगोचरः ६० तयोरन्यस्तया नश्चन्नन्यइत्यादिकश्रुतौ
अभ्यासोऽस्ति तथात्वत्रभिदासत्यमिति श्रुतौ ६१ शास्त्रैकगम्यो यो भे
दःश्रुत्वप्रतियोगिकः कालत्रयेप्यबाध्योऽस्ति तथा नहि मिकोऽपियः ६
विना धर्मादिदिव्यत्वामभेदज्ञानेन जायते धर्मिणः परमेशस्य यदिवा
प्रतियोगिनः ६३ मानान्तरागोचरत्वात्रदेदोषिनयेष्यते अतःशा
स्त्रविनाप्राप्तमेरपूर्वत्वमपीष्यते ६४ पुण्यपापेविपर्ययेतिफलं सम्य
गुदाहृतं अस्य महिमानमिति वीतशोक इति श्रुतौ ६५ स्तुति रूपो
र्थवादोऽस्ति नफलेयत नईप्रितः महिमायः सजीवस्य नैव संभवती
त्यपि ६६ अनश्नन्नन्यइत्येवमुपपत्तिरपीरिता इत्थंहि षड्विधं लिंगं
भेदे तात्पर्यनिर्णये ६७ निषेधवाक्यत्नमूर्त्वाच्चबलैक्यश्रुतिर्यदि
असतहेत्यादिवाक्यस्या प्रबलेन हि वैदिके ६८ अतोऽप्यैक्यश्रुति धेयात्मा
भेदपर्वश्रुतेर्मतः किंच भेदश्रुतिष्वेव प्रबलैक्यश्रुतेर्भवेत् ६९
अन्यथा हि दिकसंवादादन्यथानिरवकाशिका यतए ऐक्यश्रुतिर्बलपद
वाचपरेश्वरे ७० तन्यता नहि लोकेस्मिन्सजातीयः परेशितुः नहि भे
दश्रुतिस्तहद्भेदाभावेवकाशगा ७१ व्यावहारिकोयं च भेदोऽस्तु
ता वपि श्रुतेः सकामानश्रुते सर्वीच्चत्स्तोति भिदाश्रुता ७२ नहि

सार्वात्मभक्तिमिच्छेयं हरिणो विना इदं ज्ञानमुपाश्रित्य मम साधर्म्यमा
गताः ७३ सर्गेपि नोपजायंते प्रलयेन व्यथंति च इति सर्गाद्यभावो
क्तेः परमात्मभक्तिरेव सा ७४ भूमविद्याफले प्रोक्तं छांदोग्येपि नश्चैव
च तस्य सर्वेषु लोकेषु कामचारो भवत्यथ ७५ एकधा भवतीत्यत्र
भेदस्योक्तिः कृताः कृतो परंज्योतिरूपेत्यादौ स्वेन रूपेण नच्छिदः ७६
आविर्भावोक्तितो मुक्तिस्तत्र भेदः कृतः स्फुटं मुण्डपापे विध्येति स
र्वकर्मत्यक्तितः ७७ मुक्तिः सा परमात्मेयानानातः सार्वात्मभवेत्
प्रेरितारं यद्यजुर्ष्वेप एष त्वम्येम महेश्वरं ७८ तेनात्मतत्वमेतीति भेद
धीर्मुक्तिसाधने प्रत्युतैकोप्रमाणांतो किंचिदस्तीह साधकं ७९ आ
त्मत्वात्रैव भिद्यंते जीवा वै परमात्मनः परमात्मवदेवैत्यनुमानेन मा
नमत्र चेत् ८० मैवं प्रत्यक्षमानेनापहृतो विषयोस्य भोः विज्ञात्वा
दिरूपस्य स्वात्मत्वस्य मतेन च ८१ हेतोरसिद्धस्तद्वन्मेयत्वादेरसि
द्धतानवाप्यैकोक्तिर्मानेनतस्माच्छ्रत्यपरत्वतः ८२ प्रमत्तादिकसे
सिद्धभेदकृतिविरोधतः तस्माच्छ्रुत्यादिसिद्धत्वाज्जीवेश्वरभिदास्य
तः ८३ परमार्थस्वरूपास्तीत्येवं भेदनयो जयी अतः स्वाभाविके भेदे
सत्यत्रेश्वरजीवयोः ८४ क्षेत्रज्ञत्वलक्षणैरैक्यं कथं भगवतो मतं सं
मतेस्यायतो वादित्वयैक्यं ब्रह्मजीवयोः ८५ तस्मात्क्षेत्रज्ञमित्यादे
रयमर्थो हरेर्मतः सर्वक्षेत्रेषु देवादिदेहेषु फलशालिषु ८६ आ
त्मैवैक्यान्यमात्मानं क्षेत्रज्ञं मामसत्मके विद्धि चापीत्ययं मौत्वं विद्धि
क्षेत्रमपीश्वरं ८७ क्षेत्रज्ञपरयोर्देहदेहिभावनिवेधने सामाना
धिकरण्यं मां क्षेत्रज्ञमिति युज्यते ८८ जीवरूपशरीरेणायुक्तं ता
यामिणाश्चितः त्वमर्थस्य तदर्थेन सर्वज्ञेन परात्मना ८९ अभेद
बोधने श्रीमद्धरिणैव निरूप्यते जीवस्य च शरीरत्वाच्छरीरी परमेश्व
रः ९० तयोरैक्यं स्वरूपेण प्रतिषिद्धं प्ररैव च तज्जन्यत्वेन वा तस्य
तद्व्यपदेश इष्यते ९१ तदाश्रयतया वापि क्षेत्रज्ञं विद्धि मामिति आ
त्मत्वे जीववत् क्षेत्रज्ञत्व शाद्धानाहानियंतरि ९२ सर्वांतर्यामिणो श्रोति
शक्तिरागमसंमता अंतर्यामिपरंमानं कृति वाक्यसहस्रशः ९३
अतश्चाह स्म भगवान् क्षेत्रज्ञं विद्धि मामिति क्षेत्रक्षेत्रज्ञयोरैक्यं वि

श्री॰
गी॰टी॰
३॰

30

वेकविषयं तयोः ५४ मदात्मकत्वविषयं ज्ञानमुक्तमिहोत्तमे नदेवा
देयमादत्यज्ञानमित्येवमेमते ५५ इत्येस्वाभाविके भेदे सत्येवेश्वर
जीवयोः उक्तरीत्या स भेदोक्तिर्नोत्पत्यातिविरोधतः ५६ सार्वज्ञ्यादि
गुणानेन शक्तैश्वर्यादिशालिना ब्रह्मैश्वर्यादिरूपस्याभेदो नैवास्ति
मुक्तिभाक् ५७ उपदेशोपदेशादिव्यवहारोपि दुर्घटः ऐक्यवादेन
तोप्येष भेदपक्षोतियुक्तिमान् ५८ एवं विदं विदीशानां स्वरूपेण
स्वभावतः भेदे सम्यग्वदन्तीनां श्रुतीनामविरोधतः ५९ भिन्नोवि
ष्णोर्महेशाः स्थिरचरगणतः सेश्वरविन्देन देहः शोध्यं तर्यामिगीर्भिः
स्मृतिभिरपि भिदा यस्य बीजात्मदेहा प्रत्यक्षादिप्रमाणैरहमनुभव
तः सिद्धभेदो वरिष्ठः कृत्स्नः कृत्स्नाल्लिजीवो भ्रमश्रान्तवलिनो भेदसि
द्धिमित्येवं १० अत्राभिधीयते श्रौतसिद्धान्तो हरिसंमतः स्यादेवं य
दि तत्सिद्धो भेदो जीवेशयोर्दृढः १ मानशून्यतया नास्ति परमार्थाभि
दानयोः नान्योतोस्तीति सद्वाक्यैर्भेदमेनं प्रबाधते २ जीवेशयोरभेदे
तु [illegible] प्रमाणोक्तनयोखिलाः सूत्राणि स्मरतयो विहत्त्रिणि
तानुभवोनयः पारमार्थिकताभेदे जातिर्गोत्वादिवत् नहि सत्तातिरि
क्ताया जातेः सत्ताव्याप्यत्वसंभवात् परार्थमात्रे नैवास्ति जातिः काच
न संमता सामान्यादीयतो जातिर्नैवांगीक्रियते बुधैः ५ पराभिमत
सत्ताख्यजातेर्द्रव्यादिकत्रये वृत्तित्वान्नैव साभेदे भावधर्मतयेष्यते ६
नवाप्रामाणिकत्वं स्याद्भेदस्य श्रुतिबाधनात् प्रत्यक्षाबाध्यभेदस्याबा
धिका यान्नशः श्रुतिः ७ प्रत्यक्षाबाध्यमात्रेण न हि सत्यात्मभेदता भवेत्
वेदेशादेशिकत्वं च प्रत्यक्षाबाध्यमस्त्यपि ८ शास्त्रतोबाध्यमस्त्येवत
स्याभेदोपिबाध्यते नान्योतोस्तीशतो द्रष्टा न श्रोतातोविलक्षणः ९
इत्यादिभेदबाधेन ब्रह्मात्मैक्यपराः श्रुतिः नत्वन्यपरतात्मस्याः श्रुते
रत्यविरोधतः १० भिन्नो विष्णो जीवसंघादित्यस्याः सानुवादिकामेवं
श्रुतित्वमेवाप्यद्वभेदावचसायतः ११ नयुक्तिसिद्धास्तु शास्त्रवाक्यपादैः
उक्तापि दर्श्यते श्रुतित्वेप्यस्यनाभेदप्रतिषेधकता भवेत् १२ प्रत्य
क्षाद्येव वाक्यस्य भेदबोधकतेष्यते जीवसंघान्न भिन्नोयं विष्णुरित्य
र्थतः स्फुटं शब्दतो वार्थतो वाक्ये नाभेदप्रतिषेधकं किंचार्थे प्रति

३५

बोधोपिकस्याभेदस्य बाधकः १४ प्रातीतिकस्याभेदस्य किंव्यावहा-
रिकस्यवा उताहोवास्तवस्याद्यिनाद्यःसंगच्छते सृणु १५ शुक्तिरू-
प्यादिवन्नायमपरोक्षप्रतीतिभाक् भेदभ्रमाविरोधात्तु नायंप्राती-
तिकोभवेत् १६ नद्वितीयोनयोर्यस्मात्तत्वस्समानकयोर्द्वयोः विरो-
धादेकदैकत्रविभेदाभेदयोःस्वतः १७ वास्तवस्याप्यभेदस्यनिषेधो
नोपपद्यते नव्यावहारिकोभेदोस्तुभेदंपारमार्थिकं १८ बाधते नो-
प्यबाध्योस्तित्वभेदःश्रुतिसंमतः एतेनभेदवाक्येनजीवतादात्म्य-
मीश्वरे प्रतिषिध्यतइत्येवप्रत्युक्तेनस्वरूपतः नजीवस्यावच्छिन्नस्य
यद्रूपंव्यावहारिकं तदेवब्रह्मणोरूपंवेदान्तिभिरितीष्यते नात्यन्तो
लीनिवाक्यार्थोप्यभेदःपरमार्थतः २१ ननुभेदोपिमानेनसिद्धोस्ति
श्रुतिवाक्यतः सत्यश्चात्मासत्योजीवःसत्यंभिदासतीतिचेत् २२ मैवं
प्रसिद्धयात्वासहनेदंवाक्यंप्रदर्श्यते श्रुतिर्वेद्यस्यभेदापवादश्रुतिः
विरोधतः २३ नस्यात्स्वार्थपरत्वेनद्वास्थभेदपरंवचः सत्यश्चात्मेति
विहायतोसिकालावाध्यनेदिता नन्वात्मनोहिसत्यत्वेजीवत्वमपिवा
स्तवे किंतुस्यादितिशंकायामसत्योजीवउच्यते विशिष्टप्रतिषेधस्य
सेऽक्रमःस्याद्विशेषणे विशेष्यबाधेसत्येवंजीवत्वेनैववास्तवं २४ व
दृष्टत्वतुरोपेनच्छेदोसत्यइतिश्रुतेः अनेनेहभिदासत्यासजातीया
निराकृता २७ सत्यंभिदासत्यमितिविजातीयनिराकृतिः एवमना-
त्मकेविश्वेसत्यशाहेनकीर्तिते २८ सद्वयत्वाभावतस्त्वभिदाभिधात
एवतत् इत्यसत्यमतिवीचेनद्वाभ्यीयपुनर्वचः भिदासत्यंभिदेत्ये
वेकाकाहित्यायतोभवेत् उभयत्रान्वयीत्येवंद्वाक्यंभेदबाधकं ३०
विभेदजनकेज्ञानेनाशमात्यंतिकंगते आत्मनोब्रह्मणोभेदमसंते
कःकरिष्यति ३१ इत्येवंभेदमाहत्यस्तनिषेधानिषेधयति आत्मनितत्
पराक्रमितियाहृयन्तिचसज्जनाः ३२ इत्यादीन्यपिसूत्राणिभेदबाधपरं
त्वल अभेदश्रुतिरेवंहितत्परत्वेनहेतुना ३३ सतोबलवतीज्ञेयाप्य
ज्ञानज्ञापकत्वतः नदात्मानमेव वेदहंब्रह्मास्मीतिवाक्यतः ३४ अ-
लात्मैकाधिपमोहः सर्वात्मत्वाभिलक्षणः प्रतिवेदान्तमप्येवलिंगा-
मात्मैक्यनिर्णये ३५ अतःस्वार्थपराभेदश्रुतिर्बलवतीभवेत् नचभे

श्री॰
गी॰ टी॰
३॰

31

देहितात्पर्यकस्याप्यपेक्षतेः स्मृतेः ३६ ननूक्तं द्वा सुपर्णेति श्रुतेर्भेद
परत्वकं मैवं तस्या हि भेदानुवादात् न स्वनिषेधतः ३७ अभेद एव ता
त्पर्येण भेदेन कांच्यश्रुता ब्रह्मात्मैवेदममृतं पुरस्तादिति वाक्यतः ३८
सर्वात्मत्वे विनिर्दिष्टे ब्रह्मणः परमात्मनः भोक्तृभेदाच्च भोक्तुः स्याद्ब्रह्मा
पि न हि तत्त्वतः ३९ युक्तं तस्मान्न सर्वात्म ब्रह्मेत्याशंक्य पठ्यते मंत्रो
ये द्वा सुपर्णेति तस्यार्थोऽयमुदीर्यते ४० यौ द्वौ जीवेश्वरौ बिंबप्रतिबिं
बत्वरूपिणौ अस्मिन् शरीरे वर्तेते तयोर्मध्ये महेश्वरः ४१ यः प्रतिबिंब
भूतस्तद्भेदाध्यासतोऽधमी स तद्धर्माभिमानी सन् भुंक्ते कर्मफलेन नः
४२ स एवान्यः स्वयं बिंबभूतः साक्षी चिदद्वयः बुद्धितादात्म्यशून्यः सं
श्चिदानंदघनात्मना ४३ अनश्नन् भोगशून्यः सन्नुदासीनः प्रकाशते अ
नश्नन्निति भोक्तृत्वनिषेधः प्रत्यगात्मनः सर्वथा न तु जीवस्य साक्षाद्भो
गनिषेधतः कस्मा स्यान्न हि भोक्तृत्वमित्याशंक्याह वेदगीः ४४ स ए
वाध्यस्तया बुद्ध्या तादात्म्याध्यासतः फले भुंक्त इत्यत्र भोक्तृत्वयोर्विरो
योऽपि विहन्यते ४५ अतः पैंगरहस्यस्य व्याख्यानेऽस्फुटसत्त्वयोः सत्त्वं विद्धा
यया पुरुषमंतःकरणमुच्यते ४६ क्षेत्रज्ञः शुद्धमात्मा विहितः साक्षी
तयोरितः सत्त्वे भोक्तृत्वमापाद्य शुद्धे तच्च निषिध्यते ४७ भेदानुवा
दश्चैवं मंत्रोऽयं श्रुतिविहन्यते तत्परो न तु जीवेशाभेदमप्यवगाहते ४८
अतस्त्वाविद्यके भोक्तृभावमेवमनूद्य सः द्वा सुपर्णेति निर्दिष्टो वेदनत्वा
त्मैक्यतत्परः ४९ ब्रह्मात्मनो हि जीवस्य नित्यमुक्तस्य वस्तुतः बुद्धिता
दात्म्यभावेन संसारित्वं न वस्तुतः ५० उपक्रमादिना तात्पर्यलिंगाभावा
द्भिदाश्रुतेः न भेदपरता सिद्धा दृष्यात्तत्स्थापनश्रमः ५१ तन्मते चेत
योर्मध्ये एको ज्ञानीत्युदीरिते अर्थादीशो न वा ज्ञानीत्येवं सिद्धेऽप्य
र्वचः ५२ तथा स्यादनवादस्य गतो सत्यो न संभवः पश्यत्ययं देवद
त्तो वामेनाक्ष्णेत्युदीरणात् ५३ न पश्यतीतरेणेति निषेधोऽर्थाद्धि सि
ध्यति द्वा सुपर्णेति मंत्रोऽयं स्फुटब्रह्मात्मतत्परः ५४ अज्ञानायादिरा
हित्यं वस्तुतः प्रत्यगात्मनः भोगस्य कल्पितत्वान्न दृष्टिहानेः संगता
५५ यदा भुंक्ते तदा वायं न भुंक्ते परमार्थतः भासमानेऽपि वर्णित्वे न त्वेव
र्णीति वस्तुतः ५६ जीवेश्वरावत्र देहे समाने पुरुषोऽप्ययं निमग्नो वि

द्यथाभातिकर्तृत्वाद्यभिमानतः ७८ मोहाहंतत्स्वरूपत्वाच्छोचतीव
भवस्तुतः अतोब्रह्मात्मनोरैक्यसाक्षात्कारोदयादयं ७९ देहत्रया
त्मस्यभूतंदेहत्रितयसाक्षिणं कार्यकरणसंघातैःसविनेतृसृष्टम
च्यते ८० शोधितत्वंपदार्थंवासंतमीशंचपश्यति साक्षात्करोतिसा
त्मानंब्रह्मभूतमकल्मषं ८१ तदास्यमहिमानंस्वमपरिछिन्नमस्त
ये एत्यानंदस्वरूपंवीतशोकस्तत्स्थिकाश्रुतिः स्वातात्पर्यंवतीभेदे
कथंब्रह्मैक्यगोचराय ह्यत्रोक्तविवेकाद्यैःशोधिताशयकिल्बिषैः ८३
स्तनकायैसदासेव्यमानमात्मतयांतरं अन्यंदेहत्रयाछिन्नमीदृ
शंयदिहिपश्यति ८४ ततस्तंजीवतोभिन्नंपश्यतीत्यपदिश्यते तथा
क्तानाविकल्पानांनाश्यतःसावकाशता ८५ नहेत्वभेदधीर्मुक्तेःसा
क्षाच्छ्रुतिविरोधतः तेजसावाम्यमत्येतिनाम्यःपंथाविमुक्तये भेद
स्यमहिमानंस यातीत्यत हिरुहके नान्योन्यदीपशमोतिमहि
मानामिहौजसा ८७ नतत्स्वभजतीत्येवंकल्पनापिनयुज्यते नापि
स्तुतिपरत्वेनव्याख्येयंमुख्यसंभवात् ८८ ब्रह्मवेदसब्रह्मैवभवा
तीतिश्रुतेरपि निरंजनपदंनानाविद्यारहित्यमुच्यते ८९ परमंसा
म्यमित्यैक्यमाहाद्वैतात्मतःपरं यस्मादयंतसादृश्यमेकत्वेपर्यवस्य
ति ९० अल्पमप्यंतरंकुर्वन्भयंयातीतिरोधनः स्वस्याःसमस्त्वमाप्नो
तियद्वत्तानेवपश्यति ९१ अन्योसावन्यएवाहमितिदेवपशुश्रुतः
नात्रकाचिद्भिदस्तीत्येवंभेदनिराश्रुतिर्वदत् ९२ तत्रकोमोहःकःशोक
एकत्वमनुपश्यतः यत्सर्वत्रवास्तीहनंकस्मान्नविभेम्यहं ९३
यएवंवेदब्रह्माहमितिसर्वंभवत्ययं इत्यभेदधियामोक्षाभयप्रा
प्तिप्रदर्शनात् ९४ यत्रमुक्तौभिदासत्वात्परमार्थानदप्यसत् स
र्वात्मत्वावबोधेनविद्वद्ब्रह्मताश्रुतेः ९५ विरोधात्प्राप्तिभेदस्य
गेयोपिपरजीवयोः इदंज्ञानमुपाश्रित्यममसाधर्म्यमागताः ९६
इत्यभेदपरेवाक्येवैधर्म्यप्रतिषेधतः देवत्वेवापिमोविद्धिज्ञानी
त्वात्मैवमेमतं ९७ अविभक्तंचभूतेषुसमंसर्वेषुतिष्ठति स्फुटं साक्षा
जगाहकृतःश्रीशःप्राहाभेदस्वजीवयोः ९८ नामरूपाद्यमुक्तःसन्नि
तिमुक्तोश्रुतिःस्वयं नामरूपादिराहित्यंप्रतिपादयतिस्फुटं ९९

स्याद्दृष्टायोग्यतः साम्यं सर्वात्मत्वमितीष्यते तस्मात्तत्सर्वसंभवादि॰
स्यादिकृतिदर्शनात् ८० एतेनात्मस्वरूपाणां देहभेदे यस्तु पराहतया उ
पक्रमादिहृदिष्टः स च सम्यङ् निराकृतः ८१ उपक्रमादिके लिंगे ब्र
ह्मैकोऽसर्वतः श्रुतौ निर्णीते न च वेदान्तभाष्यादौ सूरिभिर्नवैः ८२
यच्छ्रुतेः सकलान्कामानश्नुते ब्रह्मणा सह सहत्वे ब्रह्मणो भेदं वि
नानेति तदप्यसत् ८३ कामभोगे हि विज्ञेयः सहत्वे ब्रह्मणा कथं
किं पुत्रेण सहायातः पितेत्यत्र यथा भवेत् ८४ पितुर्गात्यनुकूलं
हि पुत्रेऽपि गमने तथा ब्रह्मण्यपि भवेद्भोगो विद्वद्भोगानुकूलतः
८५ तथा च तित्यत्समत्वविरोधः स्यात्तेनैव भोगोऽनुज्ञातस्तेनाऽस्य
सर्वज्ञस्य विशेषतः सहैव विशेषनिर्देशाद्वैयर्थ्यं न च सर्वथा कि
च राजा स्वभृत्येन सह भुंक्ते यथा तथा ८७ भुंक्ते विद्वद्ब्रह्मणा तत्स्वप्रा
यान्ये ब्रह्मणो भवेत् ब्रह्मणः सर्वशेषित्वमपि भज्येत नेष्यते ८८
नन्वस्वामी यथा दासी बालकस्यापि पोषकः न तेऽच्छेषस्य शेषोऽपि
भुक्तभोगानुकूलतः ८९ मैवं स्वामित्वमानुष्ठभावाद्विमस्योपकार
वत् ईश्वरेणाप्तकामेनोपकारः कोऽपि तत्कृतः ९० तस्माद्ब्रह्मण ई
शस्य सहत्वायोगतो नहि सहयोगात्तृतीयास्ति न चास्मृत्कोऽभिदा एव
पि ९१ किं त्विष्टजननाद्यत्र सर्वस्याकामभोगजं क्रमेण तद्धि मुक्तो
ये पुरापत्त्वमश्नुते सर्वानेव लवानो हि ब्रह्मानन्दार्णवे लयः आ
प्तकामो भवेद्धि हानित्यभिप्रायश्रुतागमे सोऽश्नुते सकलान्कामानक्र
मेण सर्वशः विदितब्रह्मरूपेण जीवन्मुक्तो न संशयः ९४ इत्येवं
ब्रह्मगीतायामेतस्यार्थ ईरितः सर्वं खल्विदमादिवाक्येष्वस्मत्प्रकर
णेरिते तस्मादेव परं ब्रह्मा निर्गुणोपासनास्तुतिः ततश्चैतत्पुरेय
स्यान्निंदितात्तत्र भेदधीः ९६ यदल्पं भिन्नमस्तीति तन्मर्त्यमिति वाक्य
तः तस्माद्वास्तिकानि भेदे प्रमाणमिति साधितं नाप्यप्रत्यक्षतः सिद्धि
सत्तामात्रैकगोचरं सा चापि ज्ञानविरोधमन्नतोव्यतिरिच्यते ९८
प्रत्यक्षमस्तु दासीनं भेदसत्ताप्रसाधने अन्यस्य भेदसत्तायां प्रमाण
स्याप्यभावतः ९९ ननु प्रतीयमानाया भेदनिष्ठतया हि सा सत्ताक
थं भवेदात्मसत्तेत्यत्र श्रूयतां तरं १०० अपि ज्ञानात्मसत्तानोऽप्यसत्ता

न भिद्यते तदात्मानं स्वयं ब्रह्माकृतेति प्रमाणतः १ परब्रह्मविव
र्तेस्य जगतो ब्रह्मतो न हि सत्ताभिन्नातनोप्यंतं ब्रह्मसत्तैकगोचरं २
कार्यकारणभावोपि जगतो ब्रह्मणोखिलः कल्पितोयनतत्रात्मायं
नकार्यं नापि कारणं ३ इतोपि भेदसत्तायां नाहि प्रत्यक्षमात्रके ज
लादौ गगनप्रत्यक्षवदन्यविषयं भवेत् ४ ममैवांश इतीशस्य वाक्य
मद्वैतबोधकं नांशांशिपरमद्वैतपरागमविरोधतः ५ प्रत्यक्षप
व भेदोत्र ब्रह्मात्मैकत्वविलक्षणैः नान्योतोस्तीति वाक्येन तस्मादे
कानयोजयी ६ नाध्यक्षविषयो भेदः परमार्थो न च श्रुतेः कल्पितो
यो न तेनास्ति सतिरद्वैतवादिनो ७ तस्मादद्वैतसिद्धांतविजयैंडु
भिः श्रुतिः नान्योतोस्तीति जयति भेदवादिमृगावहा ८ किंचाध्य
क्षेण भेदोपि गृह्यते न विदात्मनः शुद्धस्य किंतु जीवस्य धीतादात्म्य
गतस्य च ९ शुद्धमित्यनुभूतिर्हि भेदमत्रावगाहते सा धीतादात्म्य
मापन्नमात्मानं जीवेशाहिते १० विषयीकुरुते नेशशुद्धमात्मने दृशा
द्विणं नतु संसारिणा ज्ञानाद्याश्रयस्यात्मनः किल ११ साक्षिसेवंमि
नो भेदो हि विज्ञानेनानुभूयते कथं बुद्ध्यावच्छिन्नस्यैवेशभेदोनुभूय
ते १२ मैवमज्ञानकाले यो हमित्यनुभवेन्नृणां भातितस्याहि भि
न्नोस्ति साक्षी प्रत्यक्चिदात्मकः १३ यदज्ञानकृतादेहादिष्वहंधीः
ईदृगन्तरणां भवेत्तत्पेशभेदादिर्भ्रांतिधीरपि तद्वशा १४ तद्विज्ञान
वशाद्योतनेशभेदोनुभूयते ईश्वरात्साक्षिणो भेदः केन विज्ञानुभू
यते १५ बुद्धाधिष्ठानविद्यांतः स्वसारादेरपि धर्मिता आत्मनेनह
तितोस्ति शुद्धस्यासंगिनो विभोः १६ केवलाज्ञानदोषेण भात्यसौ
हमिति भ्रमः नाहमीश इति भ्रांतिः सम्यग्ज्ञाने स्फुटत्यपि १७ न
त्विहध्यानसाधांतिर्हेयते विदुषः क्वचित् किंत्वहं ब्रह्मवित्त्वोम
स्वभावोस्मीति धीरुदेत् १८ ननु विरोधः यदमाजनानेम्यादि वेद
गीः अज्ञानहेतुकं भेदं वदतीश्वरजीवयोः १९ अज्ञानेनाहंतां ज्ञाने
तेन नष्टेति जीनवः इति मोहो विनिर्दिष्टो हरिणाज्ञानहेतुकः २०
सार्वज्ञाल्पज्ञतादेस्तु मायया कल्पितत्वतः न भेदस्तत्कृतः सत्यः
परमेश्वरजीवयोः २१ व्यावहारिकभेदोस्तु परमेश्वरजीवयोः

श्री·
गी·टी·
३·

33

व्यवहारस्थले स्याभिरपि स्वीक्रियते सत्व २२ व्यवहारे तु सर्वज्ञ उपा
स्यः परमेश्वरः उपासको ऽस्तु जीवोयं श्रुतिस्मृतिप्रमाणतः २३
अतः सार्वज्ञ्यमूढत्वे तिष्ठतापि विरुद्धये मायया कल्पिते तत्र लोहि
ते स्फटिके यथा २४ भेदधीश्च यथार्थास्यात्तदा भेददृशो भयं नैव
तु याश्रुतिस्तस्माद्भेदधीर्विभ्रमात्मिका २५ अभेदो यदि नेष्टः स्या
न्मोदं तन्न ज्ञानतो न सा तु या ह्युतेन तत्रोविज्ञो भेदः श्रुतिसंमतः २६
ननु भेदेन तत्त्वमस्यत्र व्याख्यातं परजीवयोः नास्त्येवं किं तु जीवस्य श
रीरत्वात्परेशितुः २७ तद्व्यपदेश इत्यादि तत्र सूत्रेन कथ्यते यत् तद्व्य
पदेश इत्यत्र किमभिप्रेतमस्ति ते २८ किं तदायत्तता वस्तुतः ह्यथा
वा कल्पिताथवा नाद्यो जीवपराभेदः श्रुतिस्मृतिशतैर्न यात् २९
सिद्धोस्ति वस्तुतो जीवेन परायत्तता भवेत् नहि जीवो यत् तत्स्याः
कल्पिता यावदविद्यया ३० तत्वावेदकवेदांतप्रमेयत्वेन संभवेत्
अहं ब्रह्मास्मि तत्त्वमसीत्यत्रैवमेव तु ३१ आत्मा ब्रह्मैव ब्रह्मात्मै
वेत्यत्रात्मश्रुतिभिः विचिकित्स्यते नहीत्यादि महावाक्यैश्च पिण्ड
त्वङ्मांसकल्पनायोगात् भेदोस्ति मनागपि किं चात्र जीवत्वे तु तच्छ
क्तो हि नियंतरि ३३ लक्षणानेमतो किं वा स्वव्याप्यत्वमथेश्वरे
नाद्यो नपपद्यभावादीश्वरलक्षणं विना ३४ नहि नीपायतो जीवो
न शरीरे परेशितुः नहि जीवः परस्यास्ति भोगायतनमंजसा ३५
जीवस्यापि शरीरत्वे न ह्यात्मकपदस्य च प्रवृत्तिः स्याद्भावसाम्य
केपि शरीरिणि ३६ नैवमस्ति यतो जीवे न शरीरस्य लक्षणं ननु
सा[illegible]तासुपत्ते नजन्यव्यापारवाचकं ३७ शरीरलक्षणं न च जी
वेप्यस्ति तच्छ्रुयते साक्षात्स्वस्य शायत्तस्यापि चेष्टयत्वाद्दिहेति चेत्
अंगुल्यादेरपीष्टस्यात्मा साक्षायत्ताश्रयत्वतः शरीरत्वेन तद्युक्तं स
र्वलोकविरोधतः ३९ सत्यं त्यावत्वविनिवेदेव शरीरत्वेन तद्ग्राह्यो
जीवेन्यापि व्यवस्थितत्वस्याप्यभावान्नैव संभवेत् ४० ब्रह्मणोपि श्रयत्वस्या
भावाद्धेतत्र संभवेत् वेदांतवेद्यविज्ञानो ब्रह्मणः क्रियमात्मनि ४१
प्रतिनियम्याप्यानियम्य प्रयत्तस्याप्यपायोगता अतो जीवस्य नातस्येत
यत्नापिष्टयता किल ४२ किं चैषरेश्वरीरिवेव तु मेवं न शक्यते म

३२

३८

शरीरस्यनाशेवप्रियाप्रियनिवारणे ४३ निष्कलस्यातिशुद्धस्यसतेत्रस्य
महेशितुः नसंभवेच्छरीरित्वंवाङ्मनोतिगतस्यच शरीरत्वंप्रपंचेपिंड
वेदंतस्येवले अविद्याकल्पितंविश्वंतेनरूपंपरेयदि ४५ कथंवातं
छरीरस्याङ्गायतनमीशितुः मोक्षत्वमपिनास्तीशेनित्यमुक्तेनिरा
मये ४६ मोक्षत्वंवशरीरत्वंमाययाप्रत्यगात्मनि कल्पितेनेनसंशरी
प्रत्यगात्मावभासते ४७ तद्विशेषेनशुद्धत्वेप्रत्यगात्मनिविद्यते प्रभो
र्मदेहत्वमसंसारित्वमिष्यते ४८ कथंवेदांतवेद्येस्मिन्शरीरित्वंत
थेरितं येनयामिब्राह्मणेनसर्वंविश्वंचराचरं ४९ ब्राह्मणाद्याभि
धेतत्वेनान्यद्रन्तमरं विनशाम्योजगत्सर्वंब्राह्मणेनसमन्यथा न
वस्मान्नस्करैन्नैवचेष्टेनान्तनमिष्यापि श्रुत्वाप्रदर्शितेचांतर्यामिब्रा
ह्मणेद्युत्तमे ५१ नजीवपरयोर्देहदेहिभावनिवेधने सामानाधिकर
ण्येमोक्षेत्रत्वमित्यतःस्फुटे ५२ ब्राह्मणस्यतुत्वमासीदितिवजीवज
न्मच अस्येवेहेश्वरोदेहविशिष्टत्वेनतनतः ५३ तेनत्वेवापिमाविद्धि
त्वाहविष्णुःकिलेतिचेत् मैवंनास्तीश्वराजन्मकेवलस्यात्मनोजनेः ५
अनादित्वाद्विशुद्धत्वान्नित्यत्वाच्चिद्धनत्वतः शरीरेणविशिष्टस्यदृष्य
केशुद्धजीवतः ५५ अयमितिदेहमात्रस्यश्रुतौप्रोक्तानचात्मनः अन्य
थासर्ववेदांतविरोधंकोनिवारयेत् ५६ सर्वभूतेषुगूढोयमात्मैको
देवउत्तमः सएवोत्रप्रविष्टोस्मिन्सृष्ट्वासर्वंचराचरं ५७ सर्वेप्रविष्टः
सर्वेषुमाययावपुषाधृक् अमूर्तोमूर्तवल्लोकंव्यवहर्तास्तसाग्र
हात् इत्यत्रानुप्रविष्टस्यमत्वव्यवहर्तने रूपेणेनेनजीवेनप्रवि
ष्टइतिचश्रुतेः स्वप्रकाशस्यसत्वस्यशुद्धस्यपरमात्मनः जीवरूपे
णदेहेषुप्रवेशःस्यात्श्रुतौ ६० वेदाविनाशिनंनित्यंयएनमजम
व्ययं नित्यःसर्वगतःस्थाणुरचलोयंसनातनः ६१ अव्यक्तोयमविं
त्योयमविकार्योयमुच्यते अत्यन्तसंभवादित्येसरतिस्तत्रगाणोष्वपि
श्रीविष्णोःपरिहर्णस्येतेनत्वंहरेमंते अतएवाहहरिःसान्तात्तेव
नेविद्धिमामिति ६३ श्रीविष्णोर्नेदृश्याजीवोविभुर्मोक्षेनेमध्यमः किं
त्वात्मासर्वभूतानांविष्णुरेवनचापरः ६४ तेनत्वंतेत्वंमायया
ध्यातमीश्वरे ईश्वरात्मावबोधेनशिष्यतेविष्णुरव्ययः ६५ उपदेशो

त्वं

त्वं

६२

त्वं

पदेशादिव्यवहारस्तु कल्पितः ब्रह्मात्मैक्यमते सम्यक्किंत्विच्छयैव निरंकु
शो ६६ स्ववशीकृतमायत्वाज्जगतां जगतो गुरुः उपदेष्टास्ति सर्वज्ञा
चार्यदेहेष्वपि स्वयं ६७ स्ववर्णाश्रमसद्धर्मैर्नानाजन्मसमनुष्ठितैः आ
राधितो हरिस्तुष्टो विद्यामुपदिशत्यजः ६८ स तत्वसिद्धान्तविज्ञानः स्व
सात्त्वात्मोपदेशस्थितः जीवाज्ञानानुसारेण तेभ्योप्युपदिशत्यसौ ६९ उ
पदेश्योपदेशादिर्यावदज्ञानभाव्ययं भेदोधस्तु महामोहज्ञाने ना
स्ति मनागपि ७० तत्वज्ञानात्पुरैवायं व्यवहारोप्यपेक्षते नत्विद्धोमा
स्तु सर्वेयं व्यवहारपरंपरा ७१ यमेवैष वृणुते भेदेवः स्वयमेतेन चापरः
द्वासिद्धिमार्गं तेषेन मामुपयांति ते ७२ इत्यादिमानसिद्धेयं न
विवादोस्ति धीमतां कल्पितेनापि भेदेनाप्युपदेशपरंपरा ७३ स्वमा
पदिष्टमेवाद्यावर्थसिद्धिर्विवध्यते यथावर्णोञ्छ्रदीर्घवादयोथमी
धनेरपि ७४ आरोपिताच्चापिह्येतेनेव सिद्धिपत्तिहेतवः तथारोपित
भेदोपि तत्वविज्ञानकारणं ७५ संभवत्येव वेदांताः प्रमाणं सर्वथा
त्रतः पतेन स्वर्गनरकौ बंधमोक्षौ भवाभवौ ७६ व्याख्यातौ मातृनिष्ठ
त्वाज्ञते संति परे पदे निर्दिष्टापि मते दोषोज्ञावतें भेदवृहुयः ७७ क
र्वेतिपदिक्कुर्वेत तेन कान्न निरर्थिनः नहि भेदापि यो वेदसिद्धांतो
हाटते स्वयं ७८ सामर्थ्ये किंतु गोविंदकृपापांगनिरीक्षणात् तत्प्रस
न्न निर्णीतमार्गे श्रद्धावतो भवेत् ७९ तत्त्वबोधे हेय कालक्षेपकगाति
स्तन्हितुर्द्विषो यतोति दृष्टमालोच्य मतेयात्संक्षनेहरेः ८० तेन तंत्रसं
मदीयं चं विहीनादियदर्थतः व्याख्यानमसमीचीनतयेतस्वंडितं
वद् [illegible] तद्युक्तं बंधमोक्षादेरप्यसंभवतो नयैः ८२ भेदाभेदम
तेनत्वे पदार्थौ ब्रह्मजीवको डुनिरूपोनयेस्तत्र कस्तावत्वपदार्थ
कः ८३ जीवस्ते संमतः किं सभेदाभेदो भयात्मकः भिदाभिदाभ्यामं
शाभ्यामंशी किंवानवाग्रिमः ८४ जीवस्यावस्तुतादोषान्नहि जीवो भि
दाभिदे तयोस्तु परतंत्रत्वात्समुदायो न संभवेत् ८५ द्वितीये पक्षभे
दांशो ब्रह्मत्वत्वविस्तृतस्य च जीवांशस्त्वं हि जीवस्य सावयवत्वमापद्य
त ८६ नाभेदांशो यदि ब्रह्म तर्हि तत्वं तभिदा तयोः तथा च ज्ञानमोक्षा
दिव्यवहारो न संभवेत् ८७ शास्त्रोपदेशः कस्यायं नाभेदांशस्य संभवे

न ब्रह्मरूपतयानस्यनोपदेशाय्यपेक्षिता ८८ भेदांशस्योपदेशोना
द्वेष्वब्रह्मास्मीत्ययोगतः सोंऽशोपि न भिदांशस्य स्यादभेदाविरोधतः ८९
न वाविद्यादिदोषोस्याभेदांशस्यापि संभवेत् ब्रह्मण्यपि प्रसंगेन
नापि भेदांशगः सच ९० उपाधिजननाशस्त्वं भेदाभावादथापि च
उपाधिमनपेक्ष्यैव भिन्नोंऽशोजीवउच्यते ९१ तदेशनाशोजीवस्य ना
शात्कस्यविमुक्तता ब्रह्मणस्त्वभिदांशस्य नित्यमुक्तत्वमेव हि ९२
सोंऽशोपि भिन्नाभिन्नश्चेन्न हि ब्रह्मैव न त्वविनत् इत्येवकारस्वारस्येन
स्यात्सोंऽशोपि संस्मृतेः ९३ अनेकदोषदुष्टत्वाद्भेदाभेदमतेस्वतः वि
दितेसर्वथाहेयतयोपेक्षमिनीरिते ९४ शांकरैर्दिग्जयेस्माभिर्वे
दृप्येतु परस्यते अतत्राविद्यकोभेदः परमेश्वरजीवयोः ९५ ता
त्विकेनैक्यमेवास्ति वेदान्तैः सिद्धमित्यलंविस्तरेणेतिजयतिब्रह्मा
द्वैतपराश्रुतिः ९६ श्रुतिरपिपरमार्थं ब्रह्मभावं विशुद्धं वदति जडविका
रान्तेष्वदस्यजीवः विमलमथवचैनेक्यं तत्त्वमस्यादिवाक्यैः स्मृतिर
पि शतशश्च प्राहतत्त्वैक्यनिष्ठा ९७ नवायंसंसारीभवति हरितोभि
न्नउदितः सएवादोरक्षांप्रविशति हरिर्जीववपुषा नवान्योस्मा
द्दृष्टेत्यपवदति भेदंश्रुतिशिरः प्रवेशः संवेद्योभ्रमकलितएवास्य
नियतः ९८ अहंकर्तेत्याद्याभ्रमवशात एवास्यकलना भ्रमेनष्टेन
ष्टपश्यन्नहमितिममेत्याद्यकलना अतः त्वेशत्वं मामितिवदतिजीवात्म
परयोर्हरिः शुद्धेनं त्वनिरवधिसविवेकोमस्तते ९९ अतः सर्वोक्त्य
बाधैः श्रीहरेः संमतः श्रुतेः नतत्रभेदकलनानभेदाभेदविभ्रमः १००
जीवत्वं मायया शुद्धेकल्पितं बोधतः त्वते शुद्धमैक्यं तयोः सिद्धं भेद
स्त्वाविद्यकोनयोः १ नत्वविद्याकृतोभेदः परमार्थपदंस्पृशेत् अथ
स्वगुणदोषाभ्यां नाधिष्ठानस्यसंगता २ आकाशे कल्पितैनैल्यमूषरे
वाजलंभ्रमात् नरूपवत्कृतंव्योमनैल्येनेहमनागपि ३ नवायंकी
दृक्तोदेशः कल्पितेनामसोधरः तथाविद्याकृतेब्रह्माधिष्ठानंनस्पृ
शत्मलैः ४ संसारितामहेशोवाजीवेसर्वज्ञताथवा नशक्योपाधि
भेदेनतयोर्भेदोयतोमः ५ एकमेवाद्वितीयंयद्ब्रह्मब्रह्माजरामरं
स्वाविद्ययातदेवेहद्विधाभिन्नमुपाधितः ६ अविद्यापित्रिधाभिन्ना

श्री॰
गी॰ टी॰
त्र॰

35

गुणत्रयविभागतः विशुद्धसत्वंमायेतिसर्वशक्तिनियामिका ७
रजस्तमोभ्यांमलिनमविद्येत्युच्यतेबुधैः नमःप्रधानाप्रकृतिरुक्ती
याभूतकारिणी ८ मायाशक्त्याश्रयोब्रह्मपरमेशइतीरितः सस
र्वज्ञःसर्वशक्तिर्जगज्जन्मादिकारणं ९ ततस्यावृत्तिविक्षेपौकर्तुं
शक्तामहेश्वरी सत्वप्रकाशविम्बोत्थमविद्यालिंगितोयतः १०
नित्यमुक्तस्वभावत्वात्स्वमहिम्न्येवतिष्ठति सृष्ट्यादिकरणेप्यस्यत
श्रमःसर्वशक्तितः ११ यदाविद्याश्रयोब्रह्मसदैवज्ञइतीरितः
तस्यावृतस्वरूपत्वात्संसारित्वमितीरितं १२ सोविद्याध्यस्तकर्तृत्व
भोक्तृत्वाद्यभिमानतः वस्तुतःशुद्धरूपत्वात्सोप्येवंपुरुषोत्तमः १३
नमःप्रधानयाशक्त्याब्रह्माण्डेकल्पितेपरे समष्टिव्यष्टिभेदेनद्विवि
धेनइदीरिते १४ जीवेश्वरवाच्यार्थौव्यष्ट्यांविततयकल्पिते ईशो
तत्पदवाच्यार्थःसमष्ट्यांतप्रकल्पितः १५ तद्वयंक्षेत्रशब्देनसमष्टि
व्यष्टिसंज्ञकं उक्तंभगवतातत्रक्षेत्रज्ञोभगवानसौ १६ तद्वयंभेदकं
क्षेत्रत्वमायामयंजडं शुद्धक्षेत्रज्ञमात्मानंप्रपंचंब्रह्मवेत्तियः
ससम्यग्ज्ञानवान्धीरोमतोभगवतोहरेः तदेवमन्यतेक्षेत्रंमायया

७

कल्पितेपरे सत्यःक्षेत्रज्ञएवैतद्भ्रमाधिष्ठानमद्वयः क्षेत्रक्षेत्रज्ञयो
रेवंयज्ज्ञानेवेदमानजे १९ तदेवमोक्षहेतुत्वाज्ज्ञानमज्ञानवाधकं
ममश्रीवासुदेवस्यमतंनान्यद्भ्रमात्मकं २० स्वत्रायमाशयोविद्या
रागमस्यापिसंमतः वस्तुतोब्रह्मविन्मात्रमेकमेवाद्वयंपरं २१ प्र
संगोदासीनेकर्तृभोक्तृभावादिवर्जिते तदेवाविद्ययास्वस्मिन्त्त
साविविप्रकल्प्यच २२ जीवेश्वरभिदानद्वयस्याहृत्वाविकृतः वि
स्मृत्यात्मपदंशुद्धंजीवोहमितिमन्यते २३ सजीवोप्ययत्नमसि
तिमग्नोलिंगसंहतः जन्ममृत्युमयीघोरांसंसृतिंभजतेभ्रमात्
२४ उपाधेस्तेत्रहृपेस्मिन्नहमित्यभिमानवान् क्षेत्रज्ञोजनुरज्ञोसौ
जीवरूपभिशाहितः २५ पापपुण्यमयींसंविद्धूत्वाध्यस्टवानरा
अविद्याकामकर्मादिमलैरावृतिरोतनरः पुनर्जन्मपुनर्मृत्युप्रया
त्याकल्पमानरः कदाचित्पुण्यसंपत्त्यानष्टपापमलोनरः २७ ईश्व
राभिमुखविवेकहेतुभक्तिपराहरौ कृत्वाशुद्धिंततश्राप्यवैराग्यादि

पुनःसृष्टीः २८ उपरम्य पुहेतस्माडुतावेदांतसङ्घवः तत्वमस्या
दितजन्यबोधेनात्मानमद्वयं २९ साक्षात्कृत्य स्वयं साक्षात्स्वरूपोत
मपवत्सः स्रतश्राहहरिःसाक्षात्क्षेत्रज्ञंविद्धिमामिति ३० ॥ २ ॥

नीलकंठी टीका १३

तमेवं लक्षणमुपाधितोऽभिहितं क्षेत्रज्ञं चानादेत्वमपि मां परमेश्वर
मेवउभयरूपेण संतं विद्धि तत्वमस्यहं ब्रह्मास्मि ब्रह्मैवेदं सर्वं सर्वं ख
ल्विदं ब्रह्मेति श्रुतिभ्यः यस्मादुभयात्माहं तस्मात्क्षेत्रक्षेत्रज्ञयोः यत्
ज्ञानं क्षेत्रस्य बाध्यत्वेन क्षेत्रज्ञस्य सर्वबाधावधिभूतत्वेन च यत्ज्ञा
नं मायापरोक्षेगतत्वनिश्चयस्तदेव ज्ञानं मम महिषयं सम्यग्ज्ञानं प्र
तयोरेवज्ञानं ब्रह्मज्ञानमिति मतं निश्चितं ब्रह्मविद्भिः नेहनानाऽ
स्तिकिंचनेति क्षेत्रस्य बाधात् नान्योतोऽस्ति द्रष्टेति क्षेत्रज्ञादन्यस्य द्र
ष्टुर्निषेधाच्च यद्यपि सर्वस्य ब्रह्माभिन्नत्वात् यत्किंचिदपि ज्ञानं तत्स
र्वं ब्रह्मविषयमेव भवति तथापि रज्जुसर्पात्मना यथा प्रतीतान्तरज्जु
विषयं सर्पविषयं वा सम्यग्ज्ञानमस्ति नापितस्य ज्ञानस्य रज्जुव्यति
रेकेणाविषयांतरं वास्तवमस्ति किंतु यदा सर्पबाधेन रज्जुतत्वमा
पिगच्छति तदेव सर्पो मिथ्यायमिति सम्यग्जानाति रज्जुं च तद्वदि
हाप्युभयविदेव सम्यग्ज्ञानीत्यर्थः नहि स्वप्नतरस्य तत्वेज्ञाते कृत
कृत्यतास्ति नहि मोक्षो निर्विशेषात्मविदपि प्रपंचमबाधमानः
सत्यवादी वा प्रपंचं तत्वेन पश्यन्नधिष्ठानं ब्रह्म नास्तीति ब्रुवाणः
कृतकृत्यो भवतीति वक्तुं प्रभुत्वमतो द्वयोरपि तत्वं बोध्यमेव २ ॥

आनंदी टीका १३

क्षेत्रज्ञईश्वरादभिन्नो वा भिन्नो वेत्याह ममैवांशो जीवलोके इति व
क्ष्यमाणनीत्या सर्वेषु क्षेत्रेषु ये क्षेत्रज्ञास्ते ममैवांशा इत्यर्थः क्षेत्रक्षेत्र
ज्ञयोर्ज्ञानमात्मानात्मविचारः २ ॥

+ ननु परमार्थैकत्वपकपवस्रमाताप्रतिपा

रामकंठी टीका १४

दितःप्रतिक्षेत्रं च पृथक्पृथग्वेदकप्रतीतिर्बा
धिताबवाधितेतिस्वसिद्धा
न्तविरोधभ्रांतिं परिहरन्नमा
ह ॥

+ इहवेदकमात्रमेकमव्यभिचारित्वसाधारणमात्मनोलक्षणमु
क्तमतः परस्परभिन्नानां क्षणिकनानावस्थाजुषां वेद्यानां शरीरा
णामेव भिन्नरूपत्वव्यवस्थितं न तु वेदकत्वमात्रतयैव तदधिष्ठा

त्वकत्वेन व्यवस्थितस्य पारमार्थिकस्यैकस्य वेदकस्यात्मनो नानात्व
मस्ति सर्वदेहगतत्वेपि वेदककलक्षणाव्यभिचारात् यावत्ति
शरीरं जात्मवच्छेदेन पृथक्प्रतिपत्तिस्तदचिंत्येश्वरमायाशक्ति
विलसितमेव तत्त्वबुद्ध्यर्थमेव चायमुपदेशः प्रबुद्धानम
र्जुनमुद्दिश्योच्यते सर्वक्षेत्रेषु चतुर्दशविधभूतसर्गभेदेनावस्थि
तेष्वपि संस्थितं येषु शरीरेष्वेकमेव मां क्षेत्रज्ञं परमात्मानं जानीहि
यथैकक्षेत्रगतनानावयववदेकत्वेनैकक्षेत्रज्ञत्वप्रतीतिर्माया
दशायामवस्थिता तथा समस्तशरीरवेदकत्वेनैकः पारमा
र्थिकोहमेव क्षेत्रज्ञः ततश्चैवंविधयोः क्षेत्रक्षेत्रज्ञयोर्यज्ज्ञानं स
म्यक्प्रतिपत्तिस्तदेव मम ज्ञानत्वेनाभिप्रेतं नतु सांख्यादिप्र
तिपादितयोः शरीरशरीरिणोर्विवेकज्ञानमात्रं तात्विकज्ञा
नमिति तात्पर्यम् [illegible]

[illegible] ॥ २ ॥

नन्वेवमपि शास्त्रार्थो न विवेचित इत्याशंक्याह—

[illegible] टीका १५

चोवधारणे अपि भिन्नक्रमः तं क्षेत्रज्ञं जीवात्मानमेव मां गौणं
मच्छब्दाभिधेयं सर्वक्षेत्रेष्वपि चतुर्दशविधभूतविशेषभिन्नेषु
विद्धि जानीहि हे भारत नानाविधेष्वपि क्षेत्रेष्वहमात्मैक एवानु
स्यूत इत्याशयेनैकवचनवज्ञवचननिर्देशः मुख्यमस्मच्छब्दाभि
धेयमशेषवदन्ति तेषां यत्तदित्यत्र एतदेव प्रतिपत्तिदार्ढ्यायानु
वदति क्षेत्रक्षेत्रज्ञयोर्विवेकेन यज्ज्ञानं सम्यक्प्रतिपत्त्याप्रत्यभि
ज्ञानं तन्मम मच्छब्दाभिधेयस्य ज्ञानं मतं अधुना क्षेत्रक्षेत्रज्ञयोः
स्वरूपं विविच्य प्रतिपादयितुं प्रतिजानीते ॥ २ ॥

पंचोलीटीका

इदानीं तस्यैव पारमार्थिकमसंसारिस्वरूपमाह क्षेत्रज्ञमिति हे भारत

सर्वक्षेत्रेषु ब्रह्मादिस्तंबपर्यंतेषु देहेषु शरीरेषु तद्वत्क्षेत्रं संसारिण
मिव प्रतिभासमानं क्षेत्रज्ञं जीवात्मानं मामसंसारिणं सर्वोपाधि
रहितं विद्धि जानीहि यत् क्षेत्रक्षेत्रज्ञयोर्ज्ञानं क्षेत्रक्षेत्रज्ञौ येन ज्ञानेन विष
यीक्रियेते तज्ज्ञानं सम्यक् ज्ञानमिति मोक्षसाधनत्वात् मम ईश्वरस्य मत
मभिप्रेतं २॥

रसावीरसंबोधिनी

एवं देहेंद्रियादिभ्यो विलक्षणं स्वप्रकाशं क्षेत्रज्ञमभिधाय त
स्य पारमार्थिकं तत्त्वमसंसारिपरमात्मना मदैक्यमाह क्षेत्रज्ञ
इति सर्वक्षेत्रेषु एकः क्षेत्रज्ञः स्वप्रकाशचैतन्यरूपो नित्यो वि
भुस्तत्र अविद्यारोपितकर्तृत्वभोक्तृत्वादिसंसारधर्मं क्षेत्रज्ञमा
विधकरूपपरित्यागेन मामीश्वरं विद्धि जानीहि भारत एवं च क्षे
त्रं मायाकल्पितं मिथ्या क्षेत्रज्ञश्च परमार्थसत्यस्तद्रूपमधिष्ठान
मिति क्षेत्रक्षेत्रज्ञयोर्यज्ज्ञानं तदेव मोक्षसाधनत्वाज्ज्ञानमविद्या
विरोधिप्रकाशरूपं मम मतमन्यत्त्वज्ञानमेव तद्विरोधित्वादिति
अयमभिप्रायः क्षेत्रक्षेत्रज्ञौ विविच्य क्षेत्रज्ञस्य स्वात्मार्थमेक
प्रतिपादनेनाहमीश्वरः सर्वदेहिदेहस्थः कृतानि तानि कर्माणि
तत्तद्देहिरूपेण कुर्वन्नस्मीति फलितं तथा च हिंसाबहुलयुद्ध
कर्मकर्तृकः कथमहं समर्थो भवेयमिति यत्सर्वं पापमेवाश्रेयस्क
स्मान्मन्वीतानात्मनापि नरः इत्यादिभिर्वाक्यैस्त्वया शंकितं तन्ना
शंकनीयं ममैव सर्वकर्मकर्तृत्वात् नहि मम कर्मभिर्लेपोऽव
तिष्ठते तस्मात्त्वदाज्ञया स्वधर्मस्याश्रेयसः श्रेयसो वा परिपाल
नाय न वयो हृदयमिति क्षेत्रक्षेत्रज्ञविवेकाख्यापाभिप्रायः २

मधुभाष्य

२॥

37

भाषा अनुवाद टीका

क्षेत्रज्ञका व्यावहारिक स्वरूप कहा अब पारमार्थिक असंसारि स्व रूप कहते हैं कि हे भारत अर्जुन सोई क्षेत्रज्ञ संसारी जो जीव तिसे यावत् क्षेत्र का आधार रूप हम को जानो क्यों कि साम वेदके तत्त्वमसि महावाक्य का लक्ष्य अर्थ विदेशाकरके मेरेही रूप का प्रतिपादन कियाहै और क्षेत्र तथा क्षेत्रज्ञ इनदोनो का जो पृथक रूप ज्ञान सोई मेरे मतसे मुक्तिका हेतु है और सव ज्ञान प्रतिवन्धके कारण हैं तथाहि सोई कर्म जो वन्धका हेतु नहो और सोई विद्या जो मुक्तिकी हेतु होय वाकी कर्म सव परिश्रम के हेतु और विद्या सकल शिल्प नैपुण्य मात्र अर्थात् कारीगरी की चातुरी यह जानो हैं २ ॥

दोहा

सर्वक्षेत्रमे भारत क्षेत्रज्ञ मोकोजान क्षेत्रक्षेत्रज्ञज्ञानजो मैंतसो ज्ञान २॥

38

तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च य
त् स च यो यत्प्रभावश्च तत्समासेन मे शृणु ३

शांकरभाष्य टीका ३

इदं शरीरमित्यादिश्लोकोपदिष्टस्य क्षेत्राध्यायार्थस्य संग्रहश्लोको
यमुपन्यस्यते तत् क्षेत्रं यदित्यादिर्व्याचिख्यासितस्य ह्यर्थस्य संग्र
होपन्यासो न्याय्य इति यन्निर्दिष्टमिदं शरीरं इति तत् क्षेत्रमिति त
च्छब्देन परामृशति यच्चेदं निर्दिष्टं क्षेत्रं तद्यादृक् यादृशं स्वकी
यैर्धर्मैश्चशब्दः समुच्चयार्थो यद्विकारि यो विकारो यस्य तद्यद्विका
रि यतो यस्माच्च यत्कार्यमुत्पद्यते इति वाक्यशेषः सच यः क्षेत्र
ज्ञो निर्दिष्टः स यत्प्रभावः ये प्रभावा उपाधिकृताः शक्तयो यस्य
स यत्प्रभावश्च तत् क्षेत्रक्षेत्रज्ञयोर्याथात्म्यं यथाविशेषितं तत्
समासेन संक्षेपेण मे मम वाक्यतः शृणु श्रुत्वावधारयेत्यर्थः ३

आनंदगिरिकृत टीका ३

एवं श्लोकद्वयं व्याख्याय श्लोकान्तरमवतारयति इदमिति कुत्र
संग्रहोक्तिरुपयुज्यते तत्राह व्याचिख्यासितस्येति प्रतिपत्तिसौक
र्यार्थं संग्रहोक्तिरर्थवतीत्यर्थः वक्ष्यमाणेऽर्थे श्रोतृमनःसमाधाना
र्थं सूत्रितो वाक्यार्थोपायविवरणप्रतिज्ञामभिप्रेत्याह यन्निर्दिष्ट
मिति इदं शरीरमिति यन्निर्दिष्टं तच्छरीरं तच्छब्देन परामृशति
प्रकृतार्थत्वात्तस्येति योजना तत्क्षेत्रं ज्ञातव्यमित्यध्याहारः य
च्चेति येन रूपेण रूपवदिति तदेव क्षेत्रं विशेष्यते तस्य क्षेत्र
स्य स्वकीयाद्धर्मा जन्मादयस्तैर्विशिष्टस्य ज्ञेयत्वे हेयत्वे फलिते
चशब्दः पञ्चकस्येतरेतरसमुच्चयार्थत्वमाह चशब्द इति विका
रित्वेनापि हेयत्वं सूचयति यद्विकारीति यत् कार्यं तत्संबंधं यस्मा
दुत्पद्यते तत्कारणत्वात् ज्ञातव्यमित्याह यत इति क्षेत्रमिव क्षे
त्रज्ञं ज्ञातव्यं दर्शयति सचेति ज्ञातव्यमिति सम्बन्धः बुद्ध्याद्यु
पाधिकृतदृष्ट्यादिशक्तिवशात्तस्य ज्ञातव्यत्वं सूचयति यत् प्रभाव
इति तेनोक्तेन प्रभावेन तस्य ज्ञातव्यतेति शेषः कथं यथा विशे

भिन्ने ते ते से त्रशैवा शक्यो ज्ञातुमित्याशंक्य भगवान्वाक्यादित्याह तदिति

स्वामिकृतटीका ३ ॥ ३ ॥

यद्यपि तत्र चतुर्विंशतिभेदैर्भिन्ना प्रकृतिः क्षेत्रमित्यभिप्रेतं तथापि देहद्वये
ण परिणतायामेव तस्यामहंभावेनाविवेकः स्फुट इति तद्विवेकार्थ
मिदं शरीरमित्याद्युक्तं तदेतत्प्रपंचयिष्यन् प्रतिजानीते तत्क्षे
त्रमिति यदुक्तं मया क्षेत्रं तत्क्षेत्रं यत्स्वरूपतो जडदृश्यादिस्वभावं
यादृक् यादृशं च इच्छादिधर्मकं यद्विकारि यैरिंद्रियादिविकारैर्यु
क्तं यतश्च प्रकृतिपुरुषसंयोगात् भवति यदिति यैः स्थावरजंगमा
दिभेदैर्भिन्नमित्यर्थः स च क्षेत्रज्ञो यो यत्स्वरूपतः यत्प्रभावश्च प्र
चिंत्यैश्वर्ययोगेन यैः प्रभावैः संपन्नः तत्सर्वं संक्षेपतो मत्तः शृणु ३

क्षेत्र

39

पिशाचभाष्ये टीका ४

यदा यदात्मकं च शरीरं स्वस्वरूपेण यादृक् यादृशं स्वकीयैर्धर्मैः वशादिः
हर्षवत् यद्विकारि विकारोऽस्यास्तीति विकारि येन योगविभागा
त्समासः यथा यत्कार्यमुपपद्यत इति वाक्यशेषः वशादिः हर्षवत्
त्समासेन शृणु ३ ॥

ति

रामानुजभाष्ये टीका ५

तदिति तत्क्षेत्रं यच्च यद्द्रव्यं यादृक् येषामाश्रयभूतं यद्विकारि ये
वास्य विकाराः यतश्च यतो हेतोरिदमुत्पन्नं यस्मै प्रयोजनायोत्पन्नमि
त्यर्थः यत् यत्स्वरूपं स च यः यत्स्वरूपः यत्प्रभावः ये चास्य प्रभावाः
तत्समासेन संक्षेपेण मत्तः शृणु ३ ॥

स्वविज्ञो कार्यम्
[illegible]र्थः ३

अभिनवगुप्तकृत टीका ६

॥

परमार्थप्रपाटीका ७

तदेतत्प्रपंचयिष्यन् प्रतिजानीते तत्क्षेत्रमिति तत्क्षेत्रं
यत्स्वरूपतो जडदृश्यादिस्वभावं यादृक् यादृशं च इच्छा
दिधर्मकं यद्विकारि इंद्रियादिविकारैर्युक्तं यतश्च प्रकृ
तिपुरुषसंयोगाद्भवति यदिति यैः स्थावरजंगमादिभे
दैर्भिन्नमित्यर्थः स च क्षेत्रज्ञो यः स्वरूपतः प्रभाववतश्च।

रितैश्वर्ययोगेन यैः प्रभावैः संपन्नस्तत्सर्वं मे मतः ।
समासेन संक्षेपतः शृणु ३ ॥

वनमाली टीका ८

क्षेत्रादिस्वरूपं वक्तुं प्रतिजानीते तत्क्षेत्रमिति तत् क्षेत्रं तत्पथाना
दिजडवर्गरूपं क्षेत्रं यत् स्वरूपं यादृक् यत्प्रकारं यद्विकारि यच्चा
सौ विकारश्च यद्विकारः सोऽस्यास्तीति यद्विकारि येन विकारेण युक्त
मित्यर्थः यतश्च यत् यतः यादृशप्रहमप्रकृतलयमेव ततः प्रकृष्यात्
प्रतिगच्छति प्रवर्तत इति यत इत्यनाविष्यस्य क्षेत्रस्य स्वरूपे सः
प्रवर्तकोऽपि यः यत्स्वरूपः यत्प्रभावश्च प्रहमप्रकृतलयादृशासा
मर्थ्यवानित्यर्थः तत्सर्वं मे मत्तः समासेन संक्षेपेण शृणु ३ ॥

कुसुमवैजयन्ती टीका ९

एवं चेतनाचेतनयोर्विलक्षणयोस्तादात्म्यसंबंधेन सामानाधिकरण्यमु
क्त्वा तयोः क्षेत्रक्षेत्रज्ञयोः संक्षेपेणोक्तं स्वरूपं विशदयितुमाह द्वाभ्याम्
तत्क्षेत्रमिति यत् अचेतनं संघातरूपं क्षेत्रं शरीरं भवति तत्किमित्यपे
क्षायां तस्य विशेषणमाह यच्च सद्व्यसमस्तकलेश्वरसद्रूपायाः प्र
कृतेः कार्यत्वात् इत्यनेनास्य मिथ्यात्वावस्तुत्वादिवादा निरस्ताः यादृ
क् येषामिन्द्रियादीनामाश्रयभूतं यद्विकारि ये जन्मादिभिः षड्विका
रैरुपेतं यतश्च यस्मै प्रयोजनाय यान्नेयतयं यदस्य स्वरूपं प्रज्ञानिय
मेन चकारप्रयोगस्तत्सर्वं समुच्चयार्थः एष्टव्यः स च यः क्षेत्रज्ञो जीवलक्ष
णः परेशलक्षणश्च यत्स्वरूपः यत्प्रभावः येवास्य प्रभावाः गुणाश्व
र्यादिलक्षणास्तत्सर्वं समासेन संक्षेपेण मे मत्तः सकाशात् शृ
णु श्रवाहितमना स्वश्रवणं कुरु ३ ॥

मधुसूदनी टीका ९

संक्षेपेणोक्तमर्थं विपरीतमारभ्य ते

तदिदं शरीरमिति प्रागुक्तं जडवर्गरूपं क्षेत्रं यच्च स्वरूपेण जडदृ
श्यपरिच्छिन्नादिस्वभावं यादृक् इच्छादिधर्मकं यद्विकारि यैर्विंदि
यादिविकारैर्युक्तं यतश्च कारणात् यत्कार्यमुत्पद्यत इति शेषः स

यत्वायतः प्रकृतिपुरुषसंयोगाद्भवति यदितियैः स्थावरादिजंगमा
दिभेदैर्भिन्नमित्यर्थः प्रज्ञातियमेन चकारप्रयोगात्सर्वसमुच्चयोद्र
ष्टव्यः सचक्षेत्रज्ञोयः स्वरूपतः स्वप्रकाशचैतन्यानंदस्वभावः यस्य
भावस्तु ये प्रभावाउपाधिकृताः शक्तयोयस्य तत् क्षेत्रक्षेत्रज्ञयाथा
त्म्यं सर्वविशेषणविशिष्टं समासेन संक्षेपेण मे मम वचनाच्छृण
श्रुत्वावधारयेत्यर्थः

[illegible] ३ ॥

सदानंदी टीका ११

पंचवाक्यवाक्यार्थमभिपायसमासतः विस्तरेणैतमेवार्थं वक्त
मारभते हरिः १ जडवर्गात्मके क्षेत्रे तच्छरीरमितीरिते जडं दृश्यं
परिच्छिन्नं यच्च यद्वत्स्वरूपतः २ इच्छादिधर्मकं याहृग्यै विकारैः
समन्विते यतश्चोत्पद्यते हेतोर्यत्कार्यं सचराचरं ३ सक्षेत्रज्ञः स्वरूपे
णायश्चिदानंदमहाप्रभुः यउपाधिकृतायस्य प्रभावाः शक्तयोर्थिनः ४
क्षेत्रक्षेत्रज्ञयाथात्म्यं प्रतं सर्वैर्विशेषणैः शृणुसंक्षेपतस्त्वं मे वाक्या
च्छ्रुत्वावधारय ५ चकारपंचकेनात्रत्तेयः सर्वसमुच्चयः ३ ॥

नीलकंठी टीका १२

क्षेत्रक्षेत्रज्ञपदे विवरीतुमारभते तदिति यच्चेदं क्षेत्रमिति निर्दिष्टं तत्या
दृक्च याहृशं स्वकीयैर्धर्मैरस्ति यद्विकारियेवतस्य विकाराः यतश्च
यत्यस्माद्विकाराद्यज्जायत इति प्रोवचः तत्सर्वात्मके क्षेत्रे यच्च यत्स्वरू
पेया दृक्च यत्प्रकारकं यद्विकारियेवतस्य विकाराः यतश्च क्षेत्रा
वयवात् यज्जायते तत् शृणु तथा सच क्षेत्रज्ञः यो यत्स्वरूपः यत्प्र
भावश्च तदपि मत्तः शृणु ३ ॥

आनंदीटीका १३

यच्च यत्स्वरूपं याहृक्च यत्प्रकारं यद्विकारियैर्विकारा रागद्वेषा
दयः क्षेत्राश्रयेणसंतीति यतश्च यदाश्रयाश्च यतत्स्माभाप्रभक
र्मक्रियते च पुनः सः स क्षेत्रज्ञः योयत्स्वभावः यत्प्रभावोयद
स्य सामर्थ्यम् तदेतत्सर्वं संक्षेपेण मत्सकाशात् शृण [illegible]

[illegible] ३ ॥

+ इदानींनानादर्शनभेदेनव्यवस्थापितनानारूपस्यापिक्षेत्रस्यवेद्यत्वमात्रसामान्यलक्षणाद्वैदान्तिकांचिदेव
दर्शनक्रियामाश्रित्यतत्स्वरूपंप्रतिपादयितुंवेदाद्यागमप्रसिद्धसांख्यप्रक्रियासमाश्रयणेनप्रतिपाद
यिष्यमाणक्षेत्रस्यस्वरूपमुपक्षेपमाह ॥

रामकलीटीका १४

+ तत्क्षेत्रंतत्वद्विकारसंयुक्तंतदपिमृणु तथायतश्चविकारिणो
यद्विकारभूतंवस्तूपपद्यतेतदपिमृणु तथाचक्षेत्रंतदेवमे
वयोयत्पर्यायः यत्स्वभावः यादृशाश्चतत्सर्वंसंग्रहेणोच्य
मानमवधारय तस्यवस्तुनः श्रुतिस्मृतिप्रसिद्धत्वप्रतिपाद
नार्थमाह ॥ ३ ॥

लासिकी[illegible]टीका १५

तत्क्षेत्रंयत्स्वरूपतोजडदृश्यादिस्वभावंयादृक्चेच्छादियम
कम् यद्विकारियैरिन्द्रियादिविकारैर्युक्तम् यतश्चप्रकृति
पुरुषसंयोगाद्भवति यदितियैःस्थावरजंगमादिभेदैर्भि
न्नमित्यर्थः सचक्षेत्रज्ञोयःस्वरूपतः यत्प्रभावश्चाचिन्त्यैश्व
र्ययोगेनयैःप्रभवैःसंपन्नःतत्सर्वंसामस्त्येनवस्तुनाभा
वेनसंक्षेपेणमत्तःमृणु [illegible]
[illegible] ३ ॥

पंचोलीटीका

अहंयाभिन्नात्रिगुणात्मिकाप्रकृतिःपुरुषस्यभोगापवर्गार्थंसर्व
देहेन्द्रियविषयतयापरिणतासंहन्यमानादेहशरीरमित्यवक्षेत्रश
ब्देनोक्तंतस्यपंचविधत्वंमत्तिज्जानीते तत्क्षेत्रमितितत्कशरीरंयच्च
यद्रूपंयादृक्धारणंस्वकीयैःधर्मैर्युक्तंयद्विकारियैरिन्द्रियादिवि
कारैर्युक्तंयतश्चप्रकृतिपुरुषसंयोगात्भवति यच्चयत्कारस्थाव
रजंगमादिभेदभिन्नंसचक्षेत्रज्ञोयःयत्स्वरूपःयावत् यत्प्रभावःअ
चिंत्यैश्वर्ययोगेनयैःप्रभावैःसंपन्नःतत्समासेनसंक्षेपतोमेमत्तःमृ
ण ३

संक्षेपेणोक्तमर्थं विवृणोति तत्क्षेत्रमिति तदिदं शरीरमिति प्राग
क्तं जडवर्गरूपं क्षेत्रं यच्च स्वरूपेणाजडं दृश्यपरिच्छिन्नादिस्वभावं
यादृक् च इच्छादिधर्मकं यद्विकारि यैरिंद्रियादिविकारैर्युक्तं यतश्च
कारणाद्यत्कार्यमुत्पद्यते श्रुतिवाक्यघोषः प्रभवाद्यतःप्रकृतिपुरु
षसंयोगाद्भवति यैः स्थावरादिजंगमादिभेदैर्भिन्नमित्यर्थः प्रभ
नियमेवकारप्रयोगात्सर्वसमत्वयोरुद्दिष्टेभ्यः [illegible] निर्दि
ष्टः सच यत्प्रभावो येप्रभावाउपाधिकृताः [illegible] तत्क्षे
त्रक्षेत्रज्ञयाथात्म्यं सर्वविशेषणविशिष्टं समासेन संक्षेपेण मे
मम वचनात् शृणु श्रुत्वावधारयेत्यर्थः ३॥

मधुभाष्य

३॥

भाषा अनुवाद टीका

यद्यपि यहां चौविस प्रकार की प्रकृति को क्षेत्र कहते हैं तोभी देहरूप परिणाम कहे रूपान्तर प्राप्ति को प्राप्त भई वही प्रकृति मे अहंरूप अविवेक हेतु से सोई प्रकृतिके विवेकके अर्थ इस शरीर को क्षेत्रमात्र कहा उसीके विस्तार की इच्छासे प्रतिज्ञा करते हैं कि मेरा कियाहुआ जो उक्त स्वरूप जड दृश्य आदि स्वभाव और यादृश इच्छादि धर्म्मयुक्त और जैसे इन्द्रियादिविकार मे युक्त और जैसे प्रकृतिपुरुष के संयोग से जन्मे और जिस प्रकार स्थावर जङ्गम भेदसे नानारूप होय सोई जो क्षेत्रज्ञ स्वरूप से जो है और अचिन्त्य ऐश्वर्य्यके द्वारा जो जो प्रभावसे सम्पन्न होय है सो सब से संक्षेप से समसे श्रवण करो यह भगवान अर्ज्जुन से कहा ३ ॥

दोहा

जोहि विकारी याहिसें क्षेत्रकहें तिह कोय जोहिप्रभावसो क्षेत्र
ज्ञ मो संक्षेप सुरण सोय ३ ॥

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ४ ॥

शांकरभाष्यं टीका १

तत् क्षेत्र क्षेत्रज्ञयोर्याथात्म्यं विवक्षितं स्तौति श्रोतृबुद्धिप्ररोचनार्थं ऋषिभिरिति ऋषिभिर्वशिष्ठादिभिर्बहुधा बहुप्रकारं गीतं कथितं छन्दोभिः छन्दांसि ऋगादीनि तैश्छन्दोभिर्विविधैर्नानाप्रकारैः पृथक् विवेकतो गीतं किञ्च ब्रह्मसूत्रपदैश्च एव ब्रह्मणः सूचकानि वाक्यानि ब्रह्मसूत्राणि तैः पद्यते गम्यते ज्ञायते ब्रह्मेति तानि ब्रह्मसूत्रपदेन उच्यन्ते तैरेव च क्षेत्र क्षेत्रज्ञयोर्याथात्म्यं गीतमित्यनुवर्तते आत्मेत्येवोपासीतेत्यादिभिर्हि ब्रह्मसूत्रपदैरात्मा ज्ञायते हेतुमद्भिर्युक्तियुक्तैर्विनिश्चितैर्नैसंशयरूपैर्निश्चितप्रत्ययोत्पादकैरित्यर्थः ४ ॥

आनंदगिरिकृत टीका २

श्लोकान्तरस्य तात्पर्यमाह तदित्यादिना विवक्षितं जिज्ञासितमित्यर्थः स्तुतिफलमाह श्रोत्रिति न केवलमाप्तोक्तेरेव क्षेत्रादियाथात्म्यं सम्भावितं किन्तु वेदवाक्यादपीत्याह छन्दोभिश्चेति ऋगादीनां चतुर्णामपि वेदानां नाना प्रकारत्वं शाखाभेदादिष्टं न केवलं श्रुतिस्मृतिसिद्धमुक्तं याथात्म्यं किन्तु यौक्तिकञ्चेत्याह किञ्चेति कानि तानि सूत्राणीत्याशंक्याह आत्मेत्येवेति आदिपदेन ब्रह्मविदाप्नोति परमथ योऽन्यां देवतामित्यादीनि विद्याविद्यासूत्राणि गृह्यन्ते आत्मे ति ह्येतच्छब्दोपादानं तत्त्वहेतूपलक्षणं अथातो ब्रह्मजिज्ञासेत्यादीन्यपि सूत्राणि अत्र गृहीतान्यन्यथा छन्दोभिरित्यादिना पौनरुक्त्यादिति मत्वा विशिनष्टि हेतुमद्भिरिति ४ ॥

स्वामिकृत टीका ३

कैर्विस्तरेणोक्तमित्यपेक्षायामाह ऋषिभिरिति ऋषिभिर्वसिष्ठादिभिर्योगशास्त्रेषु ध्यानधारणादिविषयत्वेन वैराजादिरूपेण बहुधा गीतं निरूपितं विविधैश्छन्दोभिर्नित्यनैमित्तिककाम्य

श्री॰
गी॰ टी॰
त्र॰

स्यविषयैः छंदोभिर्वेदैर्नानायजनीयदेवतादिरूपेणगीतं ब्रह्मणःसू
त्रैःपदैश्चब्रह्मसूत्रपदैस्सूच्यतेप्रमिविरिति ब्रह्मसूत्राणियतोवाइमानिभू
तानिइत्यादीनि तटस्थलक्षणपराण्युपनिषद्वाक्यानि तथाचब्रह्म
पद्यतेगम्यतेसाक्षात्तत्स्वरूपमेभिरितिपदानिस्वरूपलक्षणपराणि
सत्यंज्ञानमनंतंब्रह्मेत्यादीनितैश्चबहुधागीतं किंचहेतुमद्भिःसदे
वसौम्येदमग्रआसीत् कथम सतःसज्जायेतेति तथाकोह्येवान्यात्कः
प्राण्यात्यदेषआकाशआनंदोनस्यात् एषह्येवानंदयतीत्यादि यु
क्तिमद्भिःविनिश्चितैरुपक्रमोपसंहारैकवाक्यतयासंदिग्धार्थप्र
तिपादकैरित्यर्थः तदेवमनेनविस्तरेणोक्तं इःसंग्रहं संक्षेपतःवृ
क्ष्येकथयिष्यामिश्रृणुइत्यर्थः यद्वाअथातोब्रह्मजिज्ञासेत्यादीनि
ब्रह्मसूत्राणिगद्यतेतान्येवब्रह्मपद्यतेनिश्चीयतेएभिरितिपदानि
तैर्हेतुमद्भिःईक्षतेर्नाशब्दमानंदमयोऽभ्यासादित्यादिभिर्युक्तिमद्भि
विनिश्चितार्थैः शेषंसमानं ४ ॥

पिशाचभाष्यटीका ४

पि

ऋषिभिर्वसिष्ठादिभिर्गीयआदीतिछंदोभिस्तन्मंत्रैर्विविधैर्नानाप्रका
रैःपृथग्विवेकाज्ञीनेदर्शितंकिंचब्रह्मणःप्रतिपादकानिसूत्राणि
पदानिपद्यंतेराभिरिति ४ ॥

रामानुजभाष्यटीका ५

ऋषिभिरिति नदिदंदेवदेवत्तपाख्यानत्मस्पषिभिःपराशरादिभिःव
हुप्रकारेगीतं अहंत्वंचतथान्येचभूतैरुह्यामपार्थिव गुणप्रवाह
पतितोभूतवर्गोपियात्ययं कर्मवश्यागुणाह्येतेसत्वाद्याःपृथिवी
पते अविद्यासंचितंकर्मतच्चाशेषेषुजंतुषु आत्माशुद्धोऽक्षरःशांतो
निर्गुणःप्रकृतेःपरःतथापिंडःपृथक्पतःपुंसःशिरःपाण्यादिल
क्षणः ततोहमितिकुत्राहंसंज्ञांराजन्करोम्यहं तथाचकिंत्वमेत
च्छिरः किंवाशिरस्तवतथोदरं किमुपादादिकंत्वंवैतवैतत्किमुपही
पते समस्तावयवेभ्यस्त्वंपृथग्भूयव्यवस्थितःकोहमित्येवनिपु
णोभूत्वापार्थिवचिंतयेति एवंविवेककयोराशियोवासुदेवात्मक
त्वेचाहः इंद्रियाणिमनोबुद्धिःसत्वंतेजोबलंधृतिःवासुदेवात्मकान्या

ष्टः क्षेत्रक्षेत्रज्ञतत्त्वमेव चेति छंदोभिर्विविधैः पृथक् [illegible] विविधैः छंदोभिः
ऋग्यजुःसामाथर्वभिः देहात्मनोः स्वरूपं पृथक् गीतं तस्माद्वा ए
तस्मादात्मन आकाशः संभूतः आकाशाद्वायुः वायोरग्निः अग्नेरा
पः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधीभ्योऽन्नं अन्नात्पुरुषः स
वा एष पुरुषोऽन्नरसमयः इति शरीरस्वरूपमभिधाय तस्मादंतरं
प्राणमयं तस्मादंतरं मनोमयमभिधाय तस्माद्वा एतस्मादात्म
नोमयमन्योन्तर आत्मा विज्ञानमय इति क्षेत्रज्ञस्वरूपमभिधाय
तस्माद्वा एतस्माद्विज्ञानमयात् अन्योन्तर आत्मानंदमय इति क्षे
त्रज्ञस्यांतरात्मतया आनंदमया परमात्माभिहितः एवमृक्सामा
थर्वसु च तत्क्षेत्रक्षेत्रज्ञयोः पृथग्भावस्तयोर्ब्रह्मात्मकत्वं च स्प
ष्टं गीतं ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ब्रह्मप्रतिपा
दनसूत्राख्यपदैः शारीरकसूत्रैर्हेतुरूपैः विनिश्चितैर्निर्णीयोते
नैवियदश्रुतेरित्यारभ्य क्षेत्रप्रकारनिर्णय उक्तः नात्माश्रुतेर्नित्य
त्वाच्च ताभ्य इत्यारभ्य ज्ञोत एव इत्यादिभिः क्षेत्रज्ञयाथात्म्यनिर्णय उ
क्तः परात्तु तच्छ्रुतेरिति च भगवत्प्रवर्त्यत्वेन भगवदात्मकत्वमु
क्तं एवं बहुधा गीतं क्षेत्रक्षेत्रज्ञयाथात्म्यं मया संक्षेपेणास्पष्टमु
च्यमानं शृणु इत्यर्थः ४ ॥

मि॰

अभिनवयमकृत टीका ६

आदिश्रोकऽक्तार्थहू

सदार्थ ४ ॥ ॥

परमार्थप्रपा टीका ७

अथ केचिद्विस्तरेण कस्यायं संक्षेप इत्याह ऋषिभिरिति ऋषिभि
र्याज्ञवल्क्यवसिष्ठादिभिरष्टांगयोगधारणावैराग्यनित्यनैमित्तिककर्म
व्रतोपवासादिभिः पदार्थे बहुधा गीतं निरूपितं छंदोभिर्वेदैर्विविधैर्मंत्रब्राह्म
णादिरूपैर्नानाप्रजननोपदेवतादिरूपेण गीतं ब्रह्मणः सूत्रैः पदैश्च
ब्रह्मसूत्रपदैः विज्ञानमानंदं ब्रह्म सत्यं ज्ञानमनंतं ब्रह्म यतो वा इमानि भू
तानि जायंते इत्यादिभिरुपनिषद्विभागैः हेतुमद्भिः सदेव सोम्येदमग्र आ
सीत् कथमसतः सज्जायेत इत्यादियुक्तिमद्भिर्विनिश्चितार्थैः ४ ॥

वनमाली टीका ८

विषयमायप्रामाणिकत्वमाह ऋषिभिरिति बहुविधैः ऋषिभि

श्री॰
गी॰ टी॰
३॰

44

गीतं बहुधा गीतं पुनः पुनरभ्यस्तं वा विविधैः छंदोभिर्वेदैः पृथग्वि
विधैः सूत्रैः हेतुमद्भिः निर्णयानुकूलन्यायवद्भिः विनिश्चितैः इदमदो
नेति संदेहं परिहृत्य निश्चयवत्तानन्न केवलं सूत्रै रथातो ब्रह्मजि
ज्ञासेत्यादि शारीरकमीमांसासूत्राणां पदैश्च निर्णीतं यत्तत्क्षेत्र
पदं ब्रह्म सूत्र्यते सूच्यते किंचिद्व्यवधानेन प्रतिपा[illegible]तं पदैरिति
ब्रह्मसूत्राणि यतो वा इमानि जायंते इ[illegible]त्यादीनि तटस्थलक्षणपरा
णि वाक्यानि तथा पद्यते साक्षात्प्रतिपाद्यते पदैरिति पदानि स्व
रूपलक्षणपराणि सत्यं ज्ञानमित्यादीनि तैर्ब्रह्मणः सूत्रैः पदै
श्च हेतुमद्भिः सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्युपक्रम्य
तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायेतेति
नास्तिकमतमुपन्यस्य कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथ
मसतः सज्जायेतेत्यादियुक्तिः प्रतिपादयद्भिर्विनिश्चितैः उपक्र
मोपसंहारैकवाक्यतया निःसंदिग्धार्थप्रतिपादकैर्बहुधा गीतं
चेति तत्क्षेत्र सूत्रपदस्य र्षिवा[illegible]प्रयोगारूढस्य कष्टकल्पनया क्षे
त्रपरत्ववर्णनस्याप्रामाणिकत्वात् सत्यज्ञानत्वादेर्ब्रह्माभिन्न
त्वे मिथ्यात्वेन कर्तृत्ववत्तस्यापि स्वरूपलक्षणत्वासंभवात् मिथ्या
भूतस्यापि स्वरूपत्वे कर्तृत्वादेरपि स्वरूपलक्षणत्वापत्तेः ब्रह्माभि
न्नत्वे लक्षणत्वासंभवात् नहि घटो घटस्य लक्षणं वेदे शाखाय
स्याप्यप्रकृष्टप्रकाशवकर्तृत्वाद्युपस्थापकस्य ब्रह्मणि धर्मस्याभा
वेन तटस्थत्वासंभवात् शाखयानाटश यमीत्युपस्थापकत्वेनादि
व्याहततयाचेदर्वोयोनस्मात् ४ ॥

उत्तमवैजयन्ती टीका ५

नन्विदं देवदेवज्ञत्वं यथा तस्य विस्तरेणाकैः[illegible]कं यत्समासेन त्वं ब्रूभेर
तिचेत्तत्राह ऋषिभिरिति ऋषिभिः पराशरव्यासादिभिः बहुधा
गीतं बहुप्रकारेण कथितं प्रहेवं वत त्थान्ये च भूते[illegible]मपाप्मि
वग्रणप्रवाहपतितो भूतवर्गोपियात्पर्यकमेव ग्रणागुणसंगेन स
माया: पृथिवीपते प्रविद्यासेविनेकमतमाशेषेषु जन्तुषु आत्मा
शुद्धोऽक्षरः शान्तो निर्गुणः प्रकृतेः परः नष्टापिऽदृश्य कृ[illegible]र्मतः श्रि

र:पाणिपादिलक्षण:सतोऽहमिति कुत्रैवं संज्ञां राजन्करोम्यहम् तथा
वत्किं त्वमेतच्छिर: किं नु शिरस्तव तथोदरम् किं नु पादादिकं त्वं वै तवै
तत्किं महीपते समस्तावयवेभ्यस्त्वं पृथग्भूय व्यवस्थित: कोऽहमित्यत्र
निपुणो भूत्वा विचिंतयेति एवं विविक्तकाये महर्षयो वासुदेवात्म
कत्वं वाहु: इंद्रियाणि मनो बुद्धि: सत्त्वं तेजो बलं धृति: वासुदेवात्मका
न्याहु: क्षेत्रं क्षेत्रज्ञमेव चेति श्रुतेर्वोक्ते छंदो[illegible]भिर्विविधै: पृथक्वि
विधै: सर्वै: छंदोभि: ऋग्यजु:सामाथर्वभिर्वेदै: देहात्मनो: स्वरूपेण पृथ
कृष्णगीतं तस्मादात्मन: आकाश: सम्भूत: आकाशाद्वायुर्वायोर
ग्नेरग्नेराप: अद्भ्य: पृथिवी पृथिव्या ओषधय: ओषधीभ्योऽन्नं अन्ना
त्पुरुष: स वा एष: पुरुषोऽन्नरसमय: इति शारीरस्वरूपमभिधाय तस्मा
देतस्मात्प्राणमयेन तस्मादेतस्मान्मनोमयमभिधाय तस्माद्वा एतस्मान्म
नोमयादन्योऽन्तर आत्मा विज्ञानमय इति तेन तस्यान्तर आत्मतया आनंद
मय: परमात्माभिहित: एवमन्नमयाद्येवं सर्वतत्र क्षेत्रक्षेत्रज्ञयो:
पृथग्भाव स्वरूपोद्देशात्मकत्वेन वस्तुस्पष्टं गीतं ब्रह्मसूत्रपदै: ब्रह्मप्र
तिपादनसूत्राख्यपदै: शारीरकसूत्रै: यद्वा ब्रह्मसूत्रं अनेन यावदात्मान
प्रतिपादनेनाभिमतानि ब्रह्मसूत्राणि प्रस्तुतेन ब्रह्मप्राप्यते प्रभि[illegible]ता
नि पदानि ब्रह्मसूत्राणि च पदानि च तु यथा तानि तै: शारीरकसूत्रै: सा
ध्यसाधनसाधकस्वरूपप्रतिपादके उपनिषद्वाक्यैश्च त्यर्थै: हेतुमद्भि:
हेतुप्रयुक्तै: विनिश्चितै: निर्णयात्मकै: न वियदश्रुतेरित्यारभ्य तेत्र प्रकारनि
र्णीय उक्त: नात्मा श्रुतेर्नित्यत्वाच्च ताभ्य इत्यारभ्य ज्ञोऽत एवमित्यादिभि: द्वे
त्रत्र याख्यात्मैव ब्रह्मप्रया गीतं तच्चापदै रूपनिषद्वा[illegible]क्यैस्तत्र योऽयी
प्यात्मैव ब्रह्म प्रकारे गीतं मया तु संक्षेपेण स्पष्टमुच्यते तेऽनेन च इतीव
त्यर्थ: ४ ॥

इत्यपेक्षायां श्रोतृबुद्धिप्ररोचनार्थं स्तव
केर्विस्तरेणोक्तस्यायं संक्षेप
त्राह – ऋषिभिर्वसिष्ठादिभिर्योगशास्त्रेषु धारणाध्यानविषयत्वेन बहुधा
गीतं निरूपितं एतेन धर्मशास्त्रप्रतिपाद्यत्वमुक्तं विविधैर्नित्यनै
मित्तिककाम्यकर्मादिविषयै: छंदोभिर्ऋगादिमंत्रैर्भिन्नै: पृथ
क्विवेकतो गीतं एतेन कर्मकांडप्रतिपाद्यत्वमुक्तं ब्रह्मसूत्रपदैश्चै

पा

स्माद्वै

च ब्रह्मसूत्रपदैरुच्यते किं विद्या व्याख्यानेन प्रतिपाद्यते पदैरिति ब्रह्मसू
त्राणि यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभि
संविशंतीत्यादीनि तटस्थलक्षणपराण्युपनिषद्वाक्यानि तैर्व्यापद्य
ते ब्रह्म साक्षात्प्रतिपाद्यते पदैरिति पदानि स्वरूपलक्षणपराणि स
त्यं ज्ञानमनंतं ब्रह्मेत्यादीनि तैर्लक्षणैः पदैश्च हेतुमद्भिः सदेव
सोम्येदमग्र आसीदेकमेवाद्वितीयमित्युपक्रम्य तद्धैक आहुरसद
वेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायेतेति नास्तिक
मतमुपन्यस्य कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथमसतः सज्जा
येतेत्यादियुक्तिः प्रतिपादयद्भिर्विनिश्चितैरुपक्रमोपसंहारैकवाक्य
तया संदेहशून्यार्थप्रतिपादकैर्बहुधा गीतं च यत्नेन ज्ञानकांडप्रति
पादकमस्तु एवमेतैरतिविस्तरेणोक्तं क्षेत्रक्षेत्रज्ञयाथात्म्यं संक्षेप
णाहं कथयिष्यामि न ह्युक्तिविस्तरार्थः अथवा ब्रह्मसूत्राणि तानि पदा
नि चेति कर्मधारयः तत्र विद्यासूत्राणि आत्मेत्येवोपासीतेत्यादीनि अ
विद्यासूत्राणि न स वेद यथा पशुरित्यादीनि तैर्गीतमिति [illegible]
[illegible] ४ ॥

सदानंदी टीका ॥

केचिदेव विस्तरेणोक्तं यथा संक्षेपेणोच्यते इत्यत्राह स्वबुद्धीशः श्रोतृधीरो
चनाय नन १ ऋषिभिः सर्वधर्मज्ञैर्वसिष्ठादिभिरादरात् बहुधा तत्त्व
शुद्ध्यर्थं मोक्षोपायेन निरूपितं २ छंदादिमंत्रैर्हि केयज्ञात्मनोष्वविवे
कतः पृथक्कैः सूच्यते ब्रह्म गम्यते युक्तिसंयुतैः ३ उपक्रमोपसंहारा
द्येकवाक्यतयादरात् निश्चयोत्पादकैः सम्यग्गीतमद्वैततत्परैः ४
सदेवेत्यादिवाक्यौघैर्हेतुमद्भिर्विनिश्चितैः कुतस्तु खलु सोम्यैवं स्या
दित्यादिकहेतुभिः ५ नास्तिकादेर्निरासाय बहुधा गीतमित्यपि प
तैर्यद्विस्तरेणोक्तं तत्संक्षेपेण तं ब्रुवे ६ ॥ ४

नीलकंठी टीका १२

वक्ष्यमाणेर्थे प्रमाणमाह ऋषिभिरिति ऋषिभिर्वसिष्ठाद्यैर्बहुधा गी
तं योगवासिष्ठादौ प्रतिपादितं छंदोभिर्वेदैर्मंत्रैर्वा पृथक्पृथक् प्रतिशा
खं अनेकप्रकारं गीतं ब्रह्मसूत्रपदैः ब्रह्मणः सूचकानि पदानि सू

त्तिस्यवाक्यभावमापन्नानि तैर्ब्रह्मसूत्रकैर्ब्राह्मणवाक्यैस्तत्त्वमसी
त्याद्यैरित्यर्थः हेतुमद्भिः अन्नेन सोम्य शुंगेनापो मूलमन्विच्छाद्भिः
सोम्य शुंगेन तेजो मूलमन्विच्छ तेजसा सोम्य शुंगेन सन्मूलमन्विच्छ
सन्मूलाः सोम्येमाः प्रजा इत्यादिना कार्यलिंगानुमानानि ब्रह्मा
धिगमाय प्रदर्शयंतो हेतुवच्छब्दाद्भिः विनिश्चितैः असकृदभ्यासेन
सकलशंकापंकप्रक्षालनेन निश्चितार्थैः तेच ते च तयोः स्वरूपं पदैः
सर्वैः पंक्तीनेन तत्सूत्रणं इति सर्वैर्णसंक्षेपः ४ ॥

आनंदटीका १३

अत्रश्रद्धां जनयति ॥

ऋषिभिः याज्ञवल्क्यादिभिः बहुधा नानास्मृतिवाक्यैः छंदोभि
र्वेदैर्नाना मंत्रब्राह्मणोपनिषत्प्रकारैः ब्रह्मसूत्रं वेदांतसूत्रस्य
पादैः कीदृशैर्हेतुमद्भिः पदप्रतिपदहेतुसिद्धांतादिवाक्यार्थवा
क्यार्थयुक्तैः [illegible] ॥ ४ ॥

रामकंठटीका १४

ऋषिभिः स्मृतिभिर्बहुधा बहुप्रकारं तत्र तत्र स्मृतिशास्त्रेषु गी
तं तथा छंदोभिर्विविधैर्वेदशाखाभेदेन नानारूपैरन्तः पृथ
क् पृथक् प्रकरणभेदेन गीतं ब्रह्मसूत्रपदैश्च नरहस्यभागो वेदस्य
वेदांत उच्यते तस्य यानि पदानि वाक्यानि तैर्हेतुमद्भिरुप
पत्तिसंयुक्तैर्विनिश्चितं विशेषेण क्रमनिश्चयमेवं वेदांतस्मृति
प्रसिद्धत्वमनेन वक्ष्यमाणस्य क्षेत्रादिप्रतिपादकस्यार्थस्य प्रोक्तं
[illegible]
[illegible]
[illegible] ॥ ४ ॥ लासिकी [illegible]टीका १५

नन्वेवं चेद् [illegible] तर्हि विस्तरेण एवं वक्तव्यमित्यत आह ॥

ऋषिभिः श्रीवसिष्ठादिभिर्बहुधा बहुभिः प्रकारैरन्नमयवे
दांतसांख्ययोगन्यायादिशास्त्रेषु स्फुटं गीतमुपलालितं तथा विवि
धैर्नानाप्रकारैश्छंदोभिर्वेदैरुपनिषदाद्यैश्च गीतं ब्रह्मणः स्

दैः पदैश्च ब्रह्मसूत्रैस्तत्सूच्यते एभिरिति ब्रह्मसूत्राणि यतो वा
इमानि भूतानि जायन्ते इत्यादीनि तटस्थलक्षणपराणि तथा
च ब्रह्म पद्यते गम्यते साक्षाज्ज्ञायते एभिरिति पदानि स्वरूपल
क्षणपराणि सत्यं ज्ञानमनन्तं ब्रह्मेत्यादीनि तैश्च बहुधा गी
तम् किंच हेतुमद्भिः सदेव सोम्येदमग्र आसीत् कथमसतः
सज्जायेतेति तथा को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आन
न्दो न स्यात् एष ह्येवानन्दयातीत्यादियुक्तिमद्भिर्विनिश्चितैरुपक्र
मोपसंहारवाक्यैकवाक्यतया संदिग्धार्थप्रतिपादकैरित्यर्थः
यद्वा अथातो ब्रह्मजिज्ञासेत्यादीनि ब्रह्मसूत्राणि गृह्यन्ते तान्ये
व ब्रह्म संपद्यते निश्चीयते एभिरिति पदानि तैर्हेतुमद्भिः ईक्ष
तेर्नाशब्दम् आनन्दमयोऽभ्यासादित्यादिभिर्युक्तिमद्भिर्विनि
श्चितार्थैः अतस्तेषां विस्तरतउक्त्वा प्रसिद्धमेव तथाप्यहं समा
सेन व्याचक्षे इति [illegible] ४ ॥

पंचोलीटीका

क्षेत्रक्षेत्रज्ञस्य याथात्म्यस्यात्र संक्षिप्तस्य प्रपञ्चविस्तरेणोक्तिस्थानं
दर्शयन् तद्याथात्म्यं विवक्षितं श्रोतुः बुद्धिप्ररोचनाय स्तौति ऋषिभि
र्वसिष्ठादिभिः विविधैः नानाप्रकारैः छन्दोभिः उष्णिगादिभिः हेतुमद्भि
र्युक्तियुक्तैः विनिश्चितैः निःसंदिग्धैः ब्रह्मसूत्रवाचकैः पदैः वेदवाक्यैः
क्षेत्रक्षेत्रज्ञयाथात्म्यं बहुधा पृथक् विवेकेन गीतं ४ ॥

रामवीरसमिद्धोयिनी

इदानीं क्षेत्रक्षेत्रज्ञयाथात्म्यं श्रोतृबुद्धिप्ररोचनार्थमाह ऋषि
भिरिति ऋषिभिर्वसिष्ठादिभिर्योगशास्त्रेषु ध्यानधारणाविषु
येषु नवैराज्यादिरूपेण बहुधा गीतं निरूपितं विविधैश्च नित्यनै
मित्तिककाम्यविषयैश्छन्दोभिर्वेदैः नानाप्रमेयनीयदेवतादिरूपे
ण गीतं ब्रह्मसूत्रपदैश्च ब्रह्म सूच्यते सूच्यते एभिरिति ब्रह्मसूत्रा
णि तटस्थलक्षणपराणि यतो वा इमानीत्यादीन्युपनिषद्वाक्या

नितथाब्रह्मपद्यतेसाक्षाज्ञायते पभिरिति पदानिस्वरूपलक्ष
णपराणिवाक्यानिसत्यंज्ञानमित्यादीनितेषुब्रह्मणीतं
किंचद्वैतमद्विः सदेवसौम्येदमग्रआसीत्कथमसतःसज्जाय
ते इत्यादिश्रुतिभिर्निर्विनिश्चितैर्निश्चितत्वप्रत्ययोत्पादकैरित्य
र्थः ४ ॥

मधुभाष्य

८ ॥

भाषा अनुवाद टीका

किसके कहे विस्तार वचन का यह संक्षेप है इसपर कहते हैं कि जो अवशिष्टादिकों ने योग शास्त्रमे ध्यान धारणादि का विषय परमेश्वर का विषय परमेश्वर का विराटरूप नाना प्रकार से निरूपण किया है और जो वशिष्ठादिकों ने नित्यनैमित्तिक काम्यकर्म आदि विविध प्रकार से वेदके द्वारा भिन्न भिन्न अनेक इज्जनीय देवतारूप से प्रगट किया है और ब्रह्मसूत्र अर्थात् जिससे ब्रह्मका निरूपण होता है तात्पर्य यह कि जिससे समस्त भूत जन्मते हैं इत्यादि तटस्थ लक्षणरूप उपनिषद वाक्य जो ब्रह्मसूत्र और जिसके द्वारा ब्रह्मका साक्षात्कार ज्ञान किया जाता है एता वता स्वरूप लक्षण अर्थात् सोई ब्रह्म सत्य ऐसा ज्ञान औरआनन्दरूप इत्यादि श्रुतियों ने हेतु प्रमाण पद कहा अर्थात् हे सोम्य इस सृष्टिके पूर्व यह जगत् सतमात्र था असत से सत कैसे जन्मे जो इस हृदय आकाशमे आनन्दरूप आत्मा न होता तो अपान औ प्राण वायु की चेष्टाको करता इससे यह आत्माही प्राणियोंको आनन्द युक्त करे है इन सब श्रुति विशिष्ट ब्रह्म सूत्रादिकों से कहा है सोई संक्षेपसे सुनो अथवा नित्यनैमित्तिक प्रायश्चित्त उपासनारूप साधनचतुष्टय से सम्पन्न होनेके वादि ब्रह्म जिज्ञासा करे इत्यादि वेदव्यास प्रणीत को ब्रह्मसूत्र कहते हैं परमेश्वरके ईक्षित्व हेतु से प्रकृतिको जगतका कारण नहीं कहि सकते और सब श्रुतियोंमे आत्माको आनन्दमयत्व कहा है इससे ये आनन्दमय है इत्यादि युक्तियोंसे निश्चित है अर्थ जिन सूत्रोंका सोई कहा है तमद्भिर्विनिश्चितैः ४ ॥

दोहा

बहु विध ऋषिहुं कह्यो भात विविध भिन वेद ब्रह्मसूत्र पद हेतुमत करी विनिश्चित भेद ४ ॥

महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च । इं
द्रियाणि दशैकं च पञ्च चेंद्रियगोचराः ५

शांकरभाष्य टीका १

स्तत्याभिमतवीभूतानान्येनाराह भगवान् महाभूतानि महान्ति च
तानि भूतानि सर्वविकारव्यापकत्वाद्भूतानि च सूक्ष्माणि न स्थूला
नि इंद्रियगोचरशब्देनाभिधायिष्यंतेऽहंकारो महाभूतकारणमहं
प्रत्ययलक्षणोऽहंकारणं बुद्धिरध्यवसायलक्षणा तत्कारणमव्यक्त
मेव च न व्यक्तमव्यक्तमव्याकृतमीश्वरशक्तिः मम माया दुरत्यये
त्युक्तं एवशब्दः प्रकृत्यवधारणार्थः एतावत्येवाष्टधाभिन्ना प्रकृतिः
चशब्दो भेदसमुच्चयार्थः इंद्रियाणि दश श्रोत्रादीनि पञ्च बुद्ध्युत्पा
दकत्वात् बुद्धींद्रियाणि वाक्पाण्यादीनि पञ्च कर्मनिर्वर्तकत्वात्
कर्मेंद्रियाणि तानि दशैकञ्च किं तत् मन एकादशं संकल्पाद्यात्म
कं पञ्च चेंद्रियगोचराः शब्दादयो विषयास्तान्येतानि सांख्याश्चतु
र्विंशतितत्त्वानि आचक्षते ५ ॥

आनंदगिरिकृत टीका २

क्षेत्रादि यथात्म्यश्रुत्या श्लोकमिताय किं तदिति जिज्ञासवे यथोदेश
क्षेत्रं निर्दिशति तत्रेति महत्त्वे हेतुमाह सर्वेति भूतशब्दे न स्थू
लानामपि विशेषाभावाद्ग्रहे का हानिरित्याशंक्याह स्थूलानी
ति अहंकारो हेतुप्रत्ययलक्षणइति संबन्धः भूतानां शारीरिकत्वे
नाभिमानमात्रात्मत्वे मत्वाहंकारं विशिनष्टि महाभूतेति महतः
परस्मिन्नादेशे प्रसिद्धे महत्त्वहार्थमहंकारहेतुमाह अहंकारेति ई
श्वरशक्तिरित्युक्ते वै तन्यमपि शङ्कते तदर्थमाह ममेति अवधार
णरूपमर्थमेव स्फुटयति एतावत्येवेति पञ्चतन्मात्राण्यहंकारो
महदव्याकृतमित्यष्टधाभिन्नत्वं मूलप्रकृत्या सह तन्मात्रादिभेदा
नां समुच्चयश्चकारार्थः दशेन्द्रियाण्येव विभज्य श्रुत्पादयति श्रोत्रे
त्यादिना तदेव प्रश्नद्वारा स्फुटयति किं तदिति शब्दादिविषयशब्दे
न स्थूलानि भूतानि गृह्यन्ते उक्तेषु तन्मात्रादिषु तत्त्वान्तरीयसम्म
तिमाह तानीति ५ ॥

श्री· गी· टी· त्र·

चतुर्विंशति तत्त्वान्युक्तानि

स्वामिकृत टीका ३

तत्र क्षेत्रस्वरूपमाह महाभूतानीति द्वाभ्यां महाभूतानि भूम्यादीनि
अहंकारस्तत्कारणभूतः बुद्धिः विज्ञानात्मकं महत्तत्त्वं अव्यक्तं मूल
प्रकृतिः इंद्रियाणि बाह्यानि दश एकं च मनः इंद्रियगोचराश्च पंच
तन्मात्ररूपाः शब्दादयः आकाशादिगुणा विशेषतया व्यक्ताः संतः
इंद्रियविषयाः पंच ५ ॥

पैशाचभाष्ये टीका ४

अहंकारो महाभूतकारणं तत्कारणं महाभूतकारणमव्यक्तमीश्व
रशक्तिः मम माया इत्यपेक्षितं पंच बुद्धिप्रसादकत्वात् त्रिवर्तकत्वात्
पंच बुद्धींद्रियाणि मनश्च पंचेंद्रियगोचराः शब्दस्पर्शरूपरसगंधा
स्तान्येतानि सांख्योक्तचतुर्विंशतितत्त्वान्याचक्षते ५ ॥

रामानुजभाष्य टीका ५

महाभूतानीति द्वाभ्यां महाभूतानि क्षेत्रारंभकद्रव्याणि पृथिव्यप्तेजोवा
य्वाकाश महाभूतानि अहंकारो भूतादिः बुद्धिर्महान् अव्यक्तं प्रकृतिः
दे· इंद्रियाणि दशैकं चेति ज्ञानेंद्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणा
नि पंच ज्ञानेंद्रियाणि क्षेत्रविकारा उच्यंते यद्यपीच्छाद्वेषसुखदुःखान्या
त्मधर्मभूतानि तथाप्यात्मनः क्षेत्रसंबंधप्रयुक्तानीति क्षेत्रकार्यतया
क्षेत्रविकारानीत्युच्यंते तेषां प्रकृष्टपर्मत्वं पुरुषः सुखदुःखानां भोक्तृत्वे
हेतुरिति वक्ष्यते संघातश्चेतनाधृतिः आधृतिराधारः सुखदुःखे विभं
ज्ञानस्य भोगापवर्गोपायप्रवृत्तस्याधारतया उत्पन्नो भूतसंघात
प्रकृत्यादिपृथिव्यंतेन तद्वचनमिंद्रियाश्रयमुक्तं ५ ॥

शब्दादयो विषयाः

अभिनवगुप्तकृत टीका ८

स्पष्टार्थं ५

॥

परमार्थप्रपा टीका ७

तत्र प्रथमं क्षेत्रस्वरूपमाह महाभूतानीति द्वाभ्यां महाभूतानि भूम्या
दीत्यत्र भवगोचरत्वात्प्रथममुपन्यस्तानि अहंकारस्तत्कारणभूतः
स त्रिविधः सात्त्विकादिभेदेन स च क्रमेण अहंकारः ज्ञानशक्तिः क्रिया
शक्तिर्द्रव्यशक्त्युत्पादकस्तत्र तामसादहंकारादाकाशादिद्रव्यप्रा

क्षीनां शब्दादितन्मात्ररूपाणामुत्पत्तिः अनेन तन्मात्ररूपा एव
शब्दादयो बुद्धिर्विज्ञानात्मकं महत्तत्त्वमव्यक्तं मूलप्रकृतिः इंद्रिया
णि बाह्यानि एकं मनः इंद्रियगोचराश्च पंच तन्मात्रारूपा एव शब्दा
दय आकाशादिविशेषगुणतया व्यक्ताः संत इंद्रियविषयाः पंच ।
तदेवं चतुर्विंशतितत्त्वान्युक्तानि ५ ॥

वनमाली टीका ८

प्रतिज्ञातमाह महाभूतानीति महाभूतान्याकाशादीनि पंच अहंका
रो भूतादिकारणं त्रिविधो बुद्धिर्महत्तत्त्वं अव्यक्तं त्रिगुणात्मकं प्रधा
नं पंच ज्ञानेंद्रियाणि त्वक्चक्षुःश्रोत्रघ्राणरसनानि पंच कर्मेंद्रियाणि
वाक्पाणिपादगुदोपस्थानि एकं मनः ज्ञानेंद्रियविषयाः शब्दस्पर्शर
परसगंधाः एवं चतुर्विंशतितत्त्वात्मकं क्षेत्रं ५ ॥

ज्रमसमवैजयंती टीका ९

तत्क्षेत्रमित्यर्द्धपद्येन यदुक्तं प्रतिज्ञातं तत्क्षेत्रस्वरूपमाह द्वाभ्याम्
महाभूतानीति महाभूतानि क्षेत्रारंभकाणि पंच पृथिव्यप्तेजोवाय्वा आ
काशात्मकानि द्रव्याणि अहंकारो महाभूतकारणभूतोऽभिमानल
क्षणः बुद्धिरहंकारकारणमध्यवसायलक्षणं महत्तत्त्वं अव्यक्तं मह
त्तत्त्वकारणं सत्त्वरजस्तमोगुणत्रयात्मकं प्रधानं एवकारेण सर्वस्य
कारणमेवेदं न कस्यापि कार्यमिति सूचितम् चशब्देनास्य भगवच्छ
क्तित्वेन न मिथ्यात्वेनाप्यनिर्वचनीयत्वं च किंतु सत्यमेवेति द्योतित
म् इंद्रियाणि दशैकं च श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानि पंच ज्ञाने
द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि पंच कर्मेंद्रियाणि एकं च
संकल्पविकल्पात्मकं मनः पंच चेंद्रियगोचराः शब्दस्पर्शरूपरस
गंधाः तदेवं चतुर्विंशतितत्त्वात्मकं क्षेत्रमित्यर्थः ५ ॥

एवं प्ररोचितायार्जुनाय क्षेत्रस्व मधुसूदनी टीका ९ रूपं तावदाह द्वाभ्यां ॥

महाभूतानि भूम्यादीनि पंच अहंकारस्तत्कारणभूतोऽभिमान
लक्षणः बुद्धिरहंकारकारणं महत्तत्त्वमध्यवसायलक्षणं अव्य
क्तं तत्कारणं सत्त्वरजस्तमोगुणात्मकं प्रधानं सर्वकारणं न कस्यापि
कार्यं एवकारः प्रकृत्यवधारणार्थः एतावत्येवाष्टधा प्रकृतिः चश
ब्दो भेदसमुच्चयार्थः तदेवं सांख्यमतेन व्याख्यातं औपनिषदानां तु

अव्यक्तमव्याकृतमनिर्वचनीयंमायाख्यांपारमेश्वरीशक्तिंममामाया
दुरत्ययेत्युक्तं बुद्धिःसर्गादौतद्विषयमीक्षणमहंकारईक्षणानंतर
महंबहुस्यामितिसंकल्पः ततआकाशादिक्रमेणपंचभूतोत्पत्तिरि
तितदव्यक्तमहदहंकाराःसांख्यसिद्धांतेप्रतिषेदेरूपगम्यंते अथा
ह्वादिहेतुभिरितिस्थितेमायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरं
तेध्यानयोगानुगताअपश्यन्देवात्मशक्तिंस्वगुणैर्निगूढामितिश्रु
तिप्रतिपादितमव्यक्तंतदैक्षततेनात्ररूपाबुद्धिःबहुस्यांप्रजायेये
तिबहुभवनसंकल्परूपोहंकारः तस्माद्वाएतस्मादात्मनआका
शःसंभूतआकाशाद्वायुर्वायोरग्निरग्नेरापःअद्भ्यःपृथिवीतिपंचभू
तानिश्रौतानित्रयमेवप्रत्नःसाधीयान् इंद्रियाणिदशैकंचश्रोत्रत्व
क्चक्षूरसनघ्राणाख्यानिपंचबुद्धींद्रियाणि वाक्पाणिपादपायूपस्था
ख्यानिपंचकर्मेंद्रियाणीतितानिएकंचमनःसंकल्पविकल्पात्म
कं पंचचेंद्रियगोचराःशब्दस्पर्शरूपरसगंधाख्याःबुद्धींद्रियाणांग्राह्य
त्वेनविषयाःकर्मेंद्रियाणांतुकार्यत्वेन तान्येतानिसांख्याश्चतुर्विंश
तितत्वान्याचक्षते ५ ॥

सदानंदी टीका ॥

एवंप्रश्नेविज्ञायाहभगवानर्जुनायच क्षेत्रंदेहंत्रस्वरूपंतत्सर्वानर्था
श्रयत्वतः १ भूम्यादिपंचभूतानिमहांतिव्यापकत्वतः तत्कारणम
हंकारोबुद्धिस्तत्कारणंमहत् तत्कारणंप्रधानंस्यादव्यक्तंत्रिगुणा
त्मकं इत्यंसांख्यमतेनैतद्व्याख्यातंस्वमतेनतु २ अव्यक्तशब्दितामा
याशक्तिर्यापारमेश्वरी ३ प्रतिबिंबितिसर्गादौतद्विषयेयदीक्षणं ४
साबुद्धिःस्यादहंकारस्त्वीक्षणानंतरंह्ययं बहुस्यामितिसंकल्पस्त
तोव्योमादिपंचकं ५ इत्येवमष्टधाभिन्नायाप्रोक्ताप्रकृतिःपुरा श्रोत्रा
दिपंचकंचैवंमनोवागादिपंचकंशब्दादिविषयाःपंचतान्येतानिहि
कापिलाःचतुर्विंशतितत्वानिप्राहुस्तान्यत्रसूच्यते १ । ५ ॥

नीलकंठी टीका ॥

तत्रपंचपादात्कचयद्विकारविवेकेनआचष्टे महाभूतानीति चकारो
भिन्नक्रमोबुद्धिश्चेतिबुद्धिपदादुपरिद्रष्टव्यः यत्क्षेत्रंशरीरारंभकं

तदव्यक्तमेव शरीरं रथमेव विनिश्रुतौ अव्यक्तपदेन तस्यैव ग्रहणा
त् क्षेत्रस्वरूपमुक्त्वा तत्प्रकारमाह महाभूतान्यहंकारो बुद्धिश्चेतिस
मप्रकारैरंकुरिते महाभूतशब्देन पंचतन्मात्राण्युच्यंते अहंकारः बुद्धि
रिति महत्तत्त्वमुच्यते स्वमेहि एतान्येव करणानि भासेते न प्रकारक
एवभूतगणा इति तावत्प्रकारकमेव क्षेत्रमित्युक्तं षड्विकारीत्यस्योत
रमाह इंद्रियाणीति इंद्रियाणि दशैकं च एकादश पंचज्ञानेंद्रियाणि
श्रोत्रत्वक्चक्षूरसनघ्राणानि पंचकर्मेंद्रियाणि वाक्पाणिपादपायूप
स्थाख्यानि मनश्चेत्येकादश इंद्रियाणां गोचरा विषयाः स्थूला विषया
दयः पंच अयं षोडशको विकार एव एतान्येव सांख्यैश्चतुर्विंशतित
त्त्वानि गण्यंते एतावांस्त्वस्माकं विशेषः तैः स्वतंत्रा सत्या च प्रकृतिरु
च्यते अस्माभिर्मायारूपा मिथ्या ईश्वराधीना चोच्यत इति तथा च श्रुतिः
मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति तस्मात्सांख्यप्रक्रिया
त्र भगवताश्रितेति न भ्रमितव्यं ५ ॥

आनंदीटीका १२

तत्र क्षेत्रं लक्ष
यति- अत्र प्रथमार्धेन कारणपर्यायाः प्रकृतयो दर्शिताः इंद्रियाणीत्या
दिद्वितीयार्धेन यादृक्च शब्दार्थः कार्यवर्गः ५ ॥

तत्र यत्क्षेत्रं यच्च क्षेत्रज्ञ इति यदुक्तं रामकंठीटीका १४ तत्र क्षेत्रं शरीरं तज्ज्ञः क्षेत्रज्ञ इति प्रागेवोक्तं स्वरू
पं तयोर्मन्यमानो यादृगि
त्यादिना शिष्टं वक्तुमाह ।

एतन्महाभूतादिवस्तुसमुदायात्मकं क्षेत्रं विकारसंयुक्तं विकार
ग्रहणाद्विकृतिकृतसंयुक्तमपि संक्षेपेण कथितम् तत्र महा
भूतशब्देन व्यापकत्वादि महत्त्वे सति तन्मात्राण्येवोक्तानि वेदित
व्यानि यतः श्लोकार्धेन कारणभूतपदार्थवर्गस्त्वयं संगृहीतः तत्रा
हंकारोऽस्मीति प्रत्ययः अस्मिताशब्देन कश्चिदुक्तः बुद्धिर्निश्चया
त्मकं ज्ञानं महत्तत्त्वमिति प्रसिद्धं तथाव्यक्तं गुणत्रयात्मिका प्रकृ
तिरेतानि च तत्त्वविकारणभूतानि स्थूलादिक्रमेण निर्दिष्टानि ।
तानि च पृथिव्यादीनां भूतानां तन्मात्राणि कारणं अहंकारस्तैज
सवैकारिकभूतात्मभेदेन त्रिविधः तत्र तैजसस्तेन मनसः का
रणं वैकारिकस्त्वेन इंद्रियाणां भूतात्मत्वेन तन्मात्राणामित्यहंकार

स्यत्रिविधगुणात्मकस्यकारणत्वंकेचित्त्वहंकारतन्मात्रलक्षणस्य
षट्कस्यमहत्तत्त्वंकारणमाहुः केचिदहंकारस्यैवेतिबुद्धिःकार
णत्वं बुद्धेस्त्रिगुणत्रयरूपाप्रकृतिरव्यक्तशब्देनोक्ताकारणमिति
कारणभूतवस्तुचतुष्टयप्रतिपादनेनयद्विकारीतिप्रक्रांतोर्थो
निर्णीतः अत्रएवव्यक्तस्याधिकारादेतयामूलकारणमहंकार
स्त्रबुद्धिकार्यः सत्रिंद्रियकारणं तन्मात्राण्यहंकारकार्याणि
वा पृथिव्यादिकारणमितिचतुर्णामपिकारणत्वाद्विकारित्व
मर्थकार्यवर्गप्रतिपादयितुमाह इंद्रियाणिपंचबुद्धींद्रिया
णिश्रोत्रादीनिप्रसिद्धानि पंचवागादीनिकर्मेंद्रियाण्यपि तु
त्वमनश्चैकादशकंसंकल्पविकल्पात्मकं पंचेंद्रियगोचराइंती
द्रियगोचरशब्देनयद्यपिशब्दादयोभूतगुणाउच्यंते तथापिम
हाभूतानांतत्तद्गुणोपलब्धिद्वारेणस्वरूपोपलब्धेरितींद्रियगो
चरशब्देनस्थूलान्येवभूतान्युक्तानि यतःषोडशकोसौविका
रवर्गएषचकार्यएवनकारणमेवंसांख्यदर्शनप्रसिद्धानितत्त्वचतु
र्विंशतिरेषाशरीरभावेनव्यवस्थितात्क्षेत्रमित्यु
क्ता [illegible]
[illegible]
[illegible] ५ ॥

ल्लासिकी [illegible]टीका १५ ॥

तत्क्षेत्रस्वरूपमाह — महाभूतानिभूम्यादीन्यहंकारस्तत्कारणभूतः बुद्धिर्विज्ञा
नात्मकंमहत्तत्त्वम् अव्यक्तंमूलप्रकृतिः इंद्रियाणिदशैकंच
मनः पंचतन्मात्ररूपाएवशब्दादयआकाशादिविशेषगुण
तयाव्यक्ताः सत्तइंद्रियविषयाः पंच एवंचतुर्विंशतितत्त्वा
निक्षेत्रमित्युच्यते [illegible]
[illegible] ५ ॥

पंचोलेटीका

स्त्रतामिमृत्वीकृत्यार्जुनायतावत् क्षेत्रस्वरूपमाह महेति महाभू

तानिमहाभूतारंभकाणिपंचतन्मात्राणिपृथ्वीतन्मात्रादीमहंकारो
अहंभावः बुद्धिर्महत्तत्वं अव्यक्तमव्याकृतं इंद्रियाणि दश पंचज्ञाने
द्रियाणि पंचकर्मेंद्रियाणि एकंच मनः पंचइंद्रियगोचराः पृथिव्यादयः
पंचमहाभूतलक्षणागंधादियमीपेनाविषयाः ५

रत्नवीरसमिद्धोधिनी॥

महाभूतानीति महाभूतानि महांतिचतानिभूतानि भूम्यादी।
नि पंच अहंकारो महाभूतकारणमहंप्रत्ययलक्षणो बुद्धिरः
ध्यवसायलक्षणाहंकारकारणं महत्तत्वमव्यक्तं महत्तत्वका
रणं त्रिगुणात्मकं प्रधानं सर्वस्य कारणं न कस्यापि कार्यमेवमष्ट
याभिन्नाप्रकृतिरित्येषा सांख्यमतेन व्याख्या उपनिषदानांचाव्य
क्तमव्याकृतं मायाख्या शक्तिः बुद्धिः सर्गादौ तत विषयमीक्षण।
महंकारो बहुधा स्यामिति संकल्पः तस्माद्वा एतस्मादात्मन आ
काशः संभूत आकाशाद्वायुर्वायोरग्निरग्नेरापो अद्भ्यः पृथिवीति पं
चभूतानि श्रोतानि इंद्रियाणि दश श्रोत्रादीनि एकं च मन एका
दशं पंचतन्मात्र रूपापवशाह्लादय आकाशादिविशेषणतया
व्यक्ताः सेतइंद्रियविषयाः पंचतान्येतानि चतुर्विंशतितत्वान्या
चक्षते सांख्या इति ५॥

मधुभाष्य

५॥

5b

भाषा अनुवाद टीका

और क्षेत्र स्वरूप दो श्लोक से कहते हैं कि महाभूत कहे क्षिति ज
ल अग्नि वायु आकाश और इनका कारणरूप अहङ्कार और विज्ञा
नात्मिका बुद्धि अर्थात् महत्तत्व और अव्यक्त कहे मूल प्रकृति औ
र पांच ज्ञान इन्द्री तथा एक सङ्कल्पविकल्पात्मक मन और पां
व इन्द्रिय गोचर कहे शब्द आदि तन्मात्रा विशेषरूप से इन्द्रिय
ग्राह्य विषय येई क्षेत्र स्वरूप चौविस तत्व कहे है ५ ॥

है ॥

दोहा ॥

महाभूत अहंकार जो बुद्धि महतत्व पद इंद्रिय दश अक मन दि
पुन इंद्रिय पंच विषेद ५ ॥

59

इछाद्वेषः सुखंदुःखं संघातश्चेतनाधृतिः ए
तत्क्षेत्रंसमासेन सविकारमुदाहृतं ६

शांकरभाष्यं टीका १

अथेदानीं आत्मगुणा इति यानाचक्षते वैशेषिकास्तेपि क्षेत्रधर्मा एव
न तु क्षेत्रज्ञस्येत्याह भगवान् इछाद्वेष इति इछा यज्जातीयं सु
खहेतुमर्थमुपलब्धवान् पूर्वं पुनस्तज्जातीयमुपलभमानस्तमादातु
मिछति सुखहेतुरिति सेयमिछान्तःकरणधर्मो ज्ञेयत्वात् क्षेत्रं
तथा द्वेषो यज्जातीयमर्थं दुःखहेतुत्वेनानुभूतवान् पूर्वं पुनस्तज्जाती
यमुपलभमानस्तं द्वेष्टि सोयं द्वेषो ज्ञेयत्वात् क्षेत्रमेव तथा सुख
मनुकूलं प्रसन्नं सत्वात्मकं ज्ञेयत्वात् क्षेत्रमेव दुःखं प्रतिकूलात्म
कं ज्ञेयत्वात्तदपि क्षेत्रं संघातो देहेन्द्रियाणां संहतिस्तस्यामभिव्यक्ता
न्तःकरणवृत्तिः तप्त इव लोहपिण्डेग्निरात्मचैतन्याभासरसविद्धा चे
तना सा च क्षेत्रं ज्ञेयत्वात् धृतिर्ययावसादं प्राप्तानि देहेन्द्रियाणि
ध्रियन्ते सा च ज्ञेयत्वात् क्षेत्रं सर्वान्तःकरणधर्मोपलक्षणार्थमिछा
दिग्रहणं यदुक्तं तदुपसंहरति एतत् क्षेत्रं समासेन सविकारं
सह विकारेण महदादिनोदाहृतमुक्तं यस्य क्षेत्रभेदजातस्य संह
तिरिदं शरीरं क्षेत्रं इत्युक्तं तत् क्षेत्रं व्याख्यातं महाभूतादिभेदभिन्नं
धृत्यन्तं ६ ॥

आनंदगिरिकृत टीका २

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु
विकार इति पठन्ति अव्यक्ताहङ्कारादीनां त्रिगुणाभिमानादिधर्मकु
त्वे प्रसिद्धमिति शब्दादीनामेव ग्रहणे कर्मेन्द्रियाणां विषयानुक्तेश्च
रूपप्रसङ्गात् क्षेत्रे निरूपणस्य च प्रकृतत्वात् स्वरूपनिर्देशेनैव
तत्क्षेत्रं पञ्च पादकं चेति व्याख्यानमिदानीमिछादीनामात्मविका
रत्वनिवृत्तये क्षेत्रविकारत्वनिरूपणेन प्राधिकारीन्यतन्निरूपयन्न
नान्तरनिवृत्तिपरत्वेन श्लोकमवतारयति अथेति सर्वलोकविरोधा
द्धेयं वैशेषिकमतमिति मत्वोक्तं भगवानिति उपलब्धजातीयमो

श्री॰
गी॰ टी॰
३॰
53

पलभ्यमानत्वादिच्छायां हेतुमाह सुखेति इतिशब्दो हेत्वर्थः सुख
हेतुत्वात्तस्मिन्निच्छेत्यर्थः इच्छा सुखतद्धेतुविषयत्वेन व्याख्यायाम
धर्मत्वे तस्याश्चुदस्याति सेयमिति तथापि कथं क्षेत्रान्तर्भूतत्वे ता-
त्राह ते धर्मादिति इच्छावत् द्वेषोपि धर्मो बुद्धेरित्याह तथेति को
सौ द्वेषो यस्य बुद्धिधर्मत्वं तत्राह धर्मजातीयमिति तस्यापीच्छावत्
क्षेत्रान्तर्भावमाह सोयमिति इच्छाद्वेषबुद्धिधर्माः सुखमपीत्याह त
थेति तस्यापि स्वरूपोक्त्या क्षेत्रान्तःपातित्वमाह अनुकूलमिति दुः
खस्यापि स्वरूपोक्त्या क्षेत्र मध्यवर्तित्वमाह दुःखमिति देहेन्द्रिया
मवादौ मुदसितं क्षेत्रान्तर्भूतमेव संघातं विभजते देहेति विश्वा
नवादं धत्याह तस्यामिति तप्ते लोहपिण्डे वह्नेरभिव्यक्तिवदकस्मि
न्नौ बुद्धिवृत्तिरभिव्यज्यते तत्र चाग्निरभिव्यक्तो लोहपिण्डमेवाग्नि
बुद्ध्या ग्राहयति तथात्मचैतन्यं बुद्धिसमावभिव्यक्तं तामेवात्मतया
बोधयत्यनलतादाभासात्तु विद्धा सैव चेतनेत्युच्यते सा च सत्त्वे च न
ने धृतिश्चे धर्मादतद्रूपत्वात् क्षेत्रमेवेत्यर्थः धृतिस्वरूपोक्त्या क्षेत्र
त्वं तस्या दर्शयति धृतिरित्यादिना तत्त्वमेपि संकल्पादयोपि मनोध
र्माः सन्ति नैकमिप्यत्र क्षेत्रत्वेन नोक्तास्तत्राह सर्वेति तस्योप
लक्षणार्थत्वे हेतुमाह यत इति इच्छादिवदस्मिन्नवसरे संकल्पा
दीनामपि दर्शितत्वं सिद्धवत्कृत्य प्रकरणविभागार्थं यतो भगवदु
क्ते क्षेत्र उपसंहरत्यतो प्रकृतमिच्छादिग्रहस्य सबीजकबुद्धिधर्मोप
लक्षणार्थत्वमित्यर्थः विकारस्य ज्ञानाधिकाराय वै राग्यार्थं क्षे
वे व्याख्यानमित्यनुवदति यस्येति क्षेत्रभेदज्ञानस्य व्याप्तिदेहवि
भागस्य सर्वस्येत्यर्थः संहतिः समष्टिः शरीरे ६ ॥

स्वामिकृतटीका २

तदेवं चतुर्विंशतितत्त्वानि उक्तानि इच्छादयः प्रसिद्धाः संघातः श
रीरं चेतना ज्ञानात्मिका मनोवृत्तिः धृतिर्धैर्यमेते इच्छादयोपिधव
नात्मधर्मा अपि तु मनोधर्माः अतः क्षेत्रान्तःपातिन एव उपलक्ष
णं चैतत् संकल्पादीनां तथा च श्रुतिः कामः संकल्पो विचिकित्सा
श्रद्धा अश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति अनेनच

याहमितिप्रतिज्ञाताः क्षेत्रधर्माः दर्शिताः एतत्क्षेत्रं सविकारमिंद्रिया
दिविकारसहितं संक्षेपेण तुभ्यं मयोक्तमिति क्षेत्रोपसंहारः ६ ॥

पैशाचभाष्ये टीका ४

अथेदानीमात्मगुणा इतियानावस्थते वैशेषिकास्तेपि क्षेत्रधर्मा एव
नतु क्षेत्रज्ञस्येत्याह भगवान् संघातः कार्यकारणसंघातात्मकं शरी
रं चेतना शरीरस्य नित्यसिद्धात्मचैतन्यप्रकाशः धृतिरुत्साहः एत
दिति सर्वान्तःकरणधर्मोपलक्षणार्थं सविकारं विकारसहितं [उक्तम्]
चेंद्रियाणि ६ ॥

रामानुजभाष्ये टीका ५

इच्छाद्वेषसुखदुःखविकाराविभूतसंघातरूपे चेतनसुखदुःखोपभो
गाधारत्वप्रयोजने क्षेत्रमित्युक्तं भवति एतत्क्षेत्रं समासेन संक्षेपे
ण सविकारं सकार्यमुदाहृतं अथ क्षेत्रकार्येष्वात्मज्ञानसाधनत
योपादेया गुणाः प्रोच्यंते ६ ॥

अभिनवगुप्तकृत टीका ६

आदिश्लोकस्यार्थम्
[illegible] ६ ॥ ॥

परमार्थप्रपा टीका ७

इच्छेति इच्छादयः प्रसिद्धाः संघातः शरीरं चेतनात्मिका मनो
वृत्तिर्धृतिर्धैर्यं एते चेच्छादयो दृश्यत्वान्नात्मधर्मा अपितु मनो
धर्मा अतः क्षेत्रान्तःपातिन एव उपलक्षणं चैतत् संकल्पा
दीनां श्रुतिरपि कामः संकल्पो विचिकित्सा श्रद्धा अश्र
द्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति अनेन चया
हमिति एवं प्रतिज्ञाताः क्षेत्रधर्मा दर्शिताः एतत्क्षेत्रं स
विकारं महदादिविकारसहितं संक्षेपेण तुभ्यं मयोक्त
मिति क्षेत्रोपसंहारः ६ ॥ ॥ ॥ ॥

वनमाली टीका ८

यद्विकारीत्यस्योत्तरमाह इच्छेति इच्छा सुखेन तत्साधने चेदं मे भूयादि
ति चित्तवृत्तिः कामरागमदादयोप्यनेनैव द्वेषः दुःखेन तत्साधने चेदं मा

सुखपादित्सेच्छाविरोधिनी चित्तवृत्तिः क्रोधेर्ष्यापदाभ्यां वोच्यते सुखं
निरुपाधीच्छाविषयीभूता धर्मासाधारणहेतुका चित्तवृत्तिः दुःखं नि
रुपाधिद्वेषभूता चित्तवृत्तिरसाधारणपापहेतुका संघातः पंचमहाभू
तपरिणामः सेंद्रियशरीरं चेतना प्रमाणासाधारणहेतुका ज्ञाना
ख्या चित्तवृत्तिः धृतिरवसन्नानां देहेंद्रियाणामवष्टंभहेतुः प्रयत्ना
ख्या चित्तवृत्तिरुपलक्षणमेतदिच्छादिग्रहणं सर्वांतःकरणधर्माणां
तथा च श्रुतिः कामः संकल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिर्ह्री
र्धीर्भीरित्येतत्सर्वं मन एवेति मृद्घट इतिवदुपादानाभेदेन कार्या
णां कामादीनां मनोधर्मत्वमाह न तु शरीरेंद्रियसंघात एव चेतनतः
हेतुत्वमिति लोकायतिकाः चेतनं तु क्षणिकं ज्ञानमेवात्मेति सौगताः
इच्छाद्वेषप्रयत्नसुखदुःखज्ञानादिकमात्मसमवायिहेतुकमिति
तार्किकानां तत्कथं क्षेत्रमेवैतत्सर्वमिति तत्राह सविकारमिति
विकारो जन्मादिर्नाशांतः परिणामस्तत्सहितं सविकारमिदं महा
भूतादिषु तेन न विकारसाक्षि सोऽपि जन्मविनाशयोः स्वेनैव द्रष्टुमशक्य
त्वात् निःसाक्षिकोऽयमित्यादौ मानाभावादतो नित्यः साक्षी स्वीकार्यः त
स्य समवायिकारणत्वे विकारित्वापत्तेः विशेषगुणानां प्रविपासह
हतत्वासिमत्वादिसंबंधेन परमार्थसतोऽस्य सुखदुःखादीनां जीवे विद्य
मानत्वात्सुखदुःखी संसारीति व्यवह्रियते जीवश्चोत्पत्तिविनाशा
वस्थान्तरापत्तिरूपविकारः सुखदुःखधर्माणामस्य च स्वयमेव सा
ती न च कर्मकृता सौ नष्टत्वादिरूपसाक्षित्वानुपपत्तिः लोके वि
श्वासायोदासीन्यस्योपयोगोऽपि प्रकृतेनेन तदनुपयोगात् विश्वासास्य
दातो वादिनामपि पितृपितामहादीनां साक्षित्वाप्रसिद्धेश्च व्यवहेतव्य
भावात् यद्यव्यवहर्तैव हि साक्षित्वं स्वीकार्यं न च कर्तुः कर्मविरोधान्न
सविषयत्वे प्रमातृत्वेन ज्ञानरूपेऽस्य तद्रूपेण वनस्मिन्नविरोधाभावात्
प्रवस्थान्तरापत्तिरूपविकारित्वमेव तद्वत्त्वविकृतिं न तु परिणामनमा
वरूपकमित्यर्थः ६ ॥

ॐ श्रीमद्वैजयन्ती टीका ५

किंच इच्छेति इच्छा सुखे सुखसाधने च स्पृहा द्वेषः दुःखे दुःखसाधने

चमेमाभूदितिनिःस्पृहतासुखदुःखेप्रसिद्धेसंघातःपृथिव्यादिपं
चमहाभूतपरिणामोदेहःचेतनाधृतिःचेतनस्याधृतिराधारःसुख
दुःखेभुंजानस्यभोगापवर्गौसाधयतश्चेतनस्यजीवस्याधारस्तयोमत्व
इत्यर्थःएतत्क्षेत्रंप्रधाना दिदृष्ट्यवंतद्व्यारव्यंवाह्याभ्यंतःकरणा
श्रयभूतमिच्छाद्वेषसुखदुःखविकारिभूतसंघातरूपंचेतनसुखदुः
खभोगापादनप्रयोजनमित्येतत्त्वेद्वेंसविकारंसकार्यंसमासेनसं
क्षेपेणमयोदाहृतंकथितं अत्रप्रधानादिद्वयाणितैरारंभकाणीति
पंचैतस्यशरीरेंद्रियाणितैरारब्धानीतियाद्दशिनस्यइच्छादीनिते
त्रकार्याणीतियद्विकारीत्यस्यचेतनाधृतिरितिपदत्रयेणतस्यसंघातस्य
तिपदस्यचोत्तरमुक्तं इच्छादयश्चत्वारोमनोधर्माःसंकल्पादीना
मुपलक्षणं कामःसंकल्पोविचिकित्साश्रद्धाधृतिरधृतिर्धीर्ह्रीर्भीरि
त्येतत्सर्वंमनएवेतिश्रुतेःयद्यपीच्छादयश्चात्मधर्माःसत्यकामःस
त्यसंकल्पइतिश्रुतेःपद्मयइच्छेत् तद्वइतिसहस्रनामस्तोत्रात् सु
खदुःखानांमोक्षत्वेहेतुत्वमुच्यते इतिवक्ष्यमाणात्तथापितेषां
मनोद्वाराभिव्यक्तत्वान्मनोधर्मत्वमुच्यतइत्यर्थः ६ ॥

मधुसूदनी टीका ९

इच्छासुखतत्साधनेचेदंमेभूयादितिस्पृहात्माचित्तवृत्तिःकामइतिराग
इतिचोच्यते द्वेषोदुःखतत्साधनेचेदंमेमाभूयादितिस्पृहाविरोधिनीचि
त्तवृत्तिःक्रोधइतीर्ष्येतिचोच्यते सुखंनिरुपाधीच्छाविषयीभूताधर्मासा
धारणकारणिकाचित्तवृत्तिःपरमात्मसुखव्यंजिका दुःखंनिरुपाधिद्वे
षविषयीभूताचित्तवृत्तिरधर्मासाधारणकारणिका संघातःपंचम
हाभूतपरिणामःसेंद्रियंशरीरं चेतनास्वरूपसत्ताव्यंजिकाप्रमाणा
साधारणकारणिकाचित्तवृत्तिर्ज्ञानाख्या धृतिरवसन्नानांदेहेंद्रियाणा
मवष्टंभहेतुःप्रयत्नःउपलक्षणमेतदिच्छादिग्रहणंसर्वांतःकरणध
र्माणांतथाचश्रुतिः कामःसंकल्पोविचिकित्साश्रद्धाऽश्रद्धाधृतिरधृ
तिर्ह्रीर्धीर्भीरित्येतत्सर्वंमनएवेति स्वह्वइतिवह्वपादानाभेदेनका
र्याणांकामादीनांमनोधर्मत्वमाह एतत्परिदृश्यमानंसर्वंमहाभूता
दिधृत्यंतंजडंक्षेत्रंतेनसाक्षिणाऽवभास्यमानत्वात्तदनात्मकंक्षेत्रं

भास्यमचेतनंसमासेनोदाहृतमुक्तं ननु शरीरेंद्रियसंघातएवचेत
नःक्षेत्रज्ञइतिलोकायतिकाः चेतनात्मिकंज्ञानमेवात्माइतिसौग
ताः इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनोलिंगमितिनैयायिकाः
तत्कथंक्षेत्रमेवैतत्सर्वमितितत्राह सविकारमिति विकारोजन्मादि
नाशांतःपरिणामोनेकैःपठितःतत्सहितंसविकारमिदंमहाभूता
दिरूपंतेन प्रतीतोविकारसाक्षितयापिविनाशयोःक्षेत्रज्ञस्यमशक्य
त्वात् प्रत्येकमपिस्वधर्मभाणांस्वदर्शनमंतरेणादर्शनादुपपत्तेःक्षेत्रे
स्वस्वदर्शनेनचकर्तृकर्मविरोधात् निर्विकारएव सर्वविकारसाक्षी
तदुक्तं नर्ते स्याद्विक्रियांदुःखीसाक्षिताकाविकारिणः धीविक्रियास
हस्राणांसाक्षितोहमविक्रियइति तेन विकारित्वमेवक्षेत्रचिह्नं नतु
परिगणनमित्यर्थः ६ [illegible] ॥

सदानंदी टीका ॥

अथेदानींचप्राचाःकाणादाःआत्मनोगुणान् क्षेत्रधर्मत्वेनतद्वा
हेतीषोनतद्गुणाः १ सुखंतन्मायनेचेदंभूयात्मे इतियास्पृहा चित्तवृत्ति
र्भवेत्सेच्छाकामरागापराभिधा २ दुःखंतन्मायनेवेदंमाभूदितिवचि
तगा वृत्तिःसाद्वेषइत्याहुःक्रोधद्वेषापराभिधा परप्रेमैकविषयाय
र्मीसाधारणोत्त्वाःचित्तवृत्तिःसुखंतस्मात्सुखाभिव्यंजिकात्मनः ४ त
येवद्वेषविषयाःधर्मीसाधारणोद्भवा चित्तवृत्तिर्हिसादुःखमित्याहुर्मो
यिकोशजं ५ पंचभूतविकारात्मसंघातःसेंद्रियंवपुः चेतनाचित्तवृ
त्तिर्याचेदनादिप्रमाणजा ६ ज्ञानात्मेयासास्वरूपस्यज्ञानाभिव्यंजिकाम
ता धृतिर्देहेंद्रियादेर्याचसंत्रस्यापिधारिणी ७ इच्छादिग्रहणंचात्रसर्वे
षामुपलक्षणं अंतःकरणधर्माणांसर्वेषांतत्क्षेत्रमुच्यते जन्मनाशादिष्
केयत्नविकारंतदुच्यते महाभूतादिरूपंतंसविकारंसमासतः एतत्क्षे
त्रमिति प्रोक्तंक्षेत्रज्ञस्ततःपृथक् निर्विकारःसएवास्यसाक्षीक्षेत्रप्र
भासकः १० क्षेत्रचिह्नंविकारित्वंनिर्विकारस्ततःपरं नर्तेस्याद्विक्रियांदुःखी
सीसाक्षिता काविकारिणः ११ धीविक्रियासहस्राणांसाक्ष्यतोहमविक्रि
यः १२ ६ ॥

नीलकंठी १२

यतश्चविकारायमात्मायत इत्युक्तं तदाह इच्छेति इच्छाद्वेषचेतनत्वायने
वास्पृहारूपा चित्तवृत्तिरिदं मे भूयादिति सा काम इति रागइति चोच्य
ते हेषोदुःखेतत्साधने च इदं मे माभूदिति स्पृहाविरोधिनी चेतोवृत्तिः
सुखदुःखे प्रसिद्धे संघातः शरीरेंद्रियमनोबुद्ध्यादीनां भोक्तृत्वमनीषिणा
इति श्रुतेर्देहेंद्रियमनश्चिदात्मनामेकलोलीभावरूपो भोक्ता चेतना
इति श्रुतेर्देहेंद्रियमनश्चिदात्मनामेकलीभाव
याहवीकाबुद्धिः सेव शुद्धात्मत्वमयता हि मलादर्शवश्चिद्व्याप्ता इति विव
ग्राहिणीतमायः पिंडेवह्निवमिवस्वयमचेतनापि चेतनात्वंशमा
यथा व्याप्तः स्थूलपिंडोपि चेतन एव प्रतीयते सैव चेतना मनः संदि
नासैव इच्छादिरूपा परिणमते तथा च श्रुतिः कामः संकल्पो विचि
कित्सा श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति का
मादीनां मनोवृत्तित्वमाह एतत्क्षेत्रमव्यक्ताद्यं सविकारं विकारेण
महदादिना तद्विकारेण चेच्छादिना सहितं उदाहृतमुक्तं तत्त्विच्छा
दयो हि प्रत्यग्विषयत्वात्मनो धर्मा इति काणादा वदंति तन्मतमेव
वदंतितेपरंतु सांख्या केवलमात्मैव न भवतीति स्पष्टमेवेच्छाया वि
प्रभेदेनाध्यस्तत्वादित्यागमोक्तं यतः देहान्तर्गतस्याहमर्थस्य
दृष्टत्वात् तथा एवदृष्टत्वात् इच्छादयो धर्माः संततनः किंचिच्छि
आत्मनो संगत्वमहंकारस्यान्तःकरणवृत्तित्वमेवतु भवति इति श्रुतौ अयं तु
दनः असंगोह्ययं पुरुष इति श्रुत्यन्तरेण हि प्रत्यक्षात्मत इति ६ ॥

आनंदटीका १३

इच्छाद्वेषसाधारणं यदि कर्तृत्वम् इत्यर्थः संघातो भूतानामैक्यकारे
ण शरीरापत्तिः चेतना रूपादिविषयाणां ज्ञानम् धृतिः यया
प्राणवायूनां हत्या शरीरं धार्यते एतत्सर्वं कार्यकारणात्मकम्
चेतनं क्षेत्रमुदाहृतम् [illegible] ६ ॥

रामकंठटीका १४

+ इच्छेत्यादि केचिदिच्छाद्वेषसुखदुःखादय आत्मधर्मत्वेनाभ्यु
पगतास्ते क्षेत्रत्वात्क्षेत्रमेव तथा शरीरेंद्रियादिसमुदायः संघातः

यथायथापदार्थसंग्रहः कृतो
+ इदानीं तद्दर्शनांतरेषु तत्तत्क्रियाविशेषसमाश्रयणेन तत्त्वमेवेति प्रतिपादयितुमाह ॥
भवति तस्य सर्वस्य प्रमेयत्वानतिक्रमात् सत्यत्वे

चेतनाचेत्यतेनयेतिकृत्वाज्ञानंबुद्धिवृत्तिः धृतिःप्राणादिधार
णानिबंधनमहंप्रत्ययः एतत्सर्वंवेद्यत्वानतिक्रमात्क्षेत्रमेव
नस्वप्रकाशकार्थस्यनात्मधर्मम् अत्रतुप्रमात्रैकस्वभावस्यात्मनः
कथंप्रमेयत्वं कथंवा सर्वव्यवहारानुपपत्तिसिद्धान्तसंधारा
लक्षणस्वरूपस्यतस्यसद्भावः कथंवादेशकालाद्यनवच्छि
न्नमहिम्नोयावज्जीवमाविलमित्यादिनानाप्रवादप्रतिबोधाय
बुद्धिवहवोविपश्चितः कृतपरिश्रमाः साचननवस्य साधनमा
नावस्था संदिग्धबुद्धित्वदशानुत्तीर्णपुरुषविशेषविषया
यतोयस्यांसिद्धान्तकथायामीश्वरानुग्रहाविर्भूतविमृष्टप्र
ज्ञिस्फुटादिगुणगणोपप्लुतिनसंशयादिदोषाभावतोनिर्म
लप्रज्ञोपदेष्टपुरुषविशेषविषयायामुपन्यस्तायामपि
कालुष्यात्तेनकिंविप्रयोजनं नहिस्वसिद्धस्वरसमाहार
विशेषमास्वादयेतंपुरुषप्रतितत्साधनावस्थाप्रतिपादने
नप्रस्तुनाहारवैरस्यजननमात्रातिरिक्तः कश्चिदुपकारः सं
भवतीत्यकाण्डपातिततत्प्रकटनताण्डवाडंबरविडंबिता
नोमार्गेतुमत्तश्चइति तदेवंयथोपक्रांतेक्षेत्रलक्षणाना
वच्छिणीनसिद्धान्तीसचयोयतस्वभावस्थस्यपक्रांतक्षेत्रल
लक्षणंनिर्णीनमत्तयाविशिष्टमने सचक्षेत्रज्ञंचापिमावि
द्धिसर्वक्षेत्रेषुभारतेतिमुख्यएवैकः क्षेत्रज्ञोविवक्षितः न
स्वज्ञेयंयत्तत्प्रवक्ष्यामीत्यादित्यादिनावितत्यलक्षणंवक्ष्यति
संप्रतितुतादृशस्यक्षेत्रज्ञस्याकस्यचक्षेत्रस्ययज्ज्ञानंसम्यक्
संवेदनं मुख्यज्ञानंतयाप्रागुक्तंयाहृगगुणहारेणाभिव्यञ्ज
नेसाभिव्यक्तिगुणगणएवज्ञानमितिप्रतिपादयितुमाह ६

अथ दर्शनांतनरेच्छादीनामात्म
धर्मत्वमुक्तं तन्निराकर्तुंप्रमेयतया
तेषांक्षेत्रधर्मत्वमाह ॥

लासिकी [illegible] टीका १५

इच्छादयःप्रसिद्धाः क्षेत्रधर्माएवनात्मधर्माः संघातःशरीरं
चेतनाज्ञानात्मिकामनोवृत्तिः धृतिरन्तःकरणत्रयस्याधार
णासंघातधारणरूपाप्राणादिलक्षणावृत्तिःसामान्यकरण

वृत्तिः प्राणाद्यवयवाः पंचेति एतत्क्षेत्रं सविकारमिंद्रियादिविका
रसहितं संक्षेपेणानुपमयोक्तम् इति क्षेत्रोपसंहारः [illegible]
[illegible]
[illegible] ॥६॥

पंचोलेटीका

किंच इच्छेति अनुभूतपूर्वजातीये सुखे तत्साधने वा योऽभिलाषः सा
इच्छा अनिष्टविषयविरागः द्वेषः सुखमाह्लादः दुःखं परितापः संघातः
देहेंद्रियादिसंहतिः तस्यां संहतौ अभिव्यक्ता अंतःकरणवृत्तिः तप्ते
लोहपिंडे अग्निरिव चैतन्याभासरसविद्धा सति चेतनोच्यते धृतिः यया
अवसादनप्राप्तानि देहेंद्रियाणि ध्रियंते सा धृतिः एते इच्छादयो
ज्ञेयत्वात् क्षेत्रधर्माः प्रकृतिधर्मा एव नात्मनो धर्मा यया एतत्क्षेत्रं स
विकारं समासेन संक्षेपेण उदाहृतं कथितं ६

रणवीसमसिद्धोधिनी

अथेदानीमात्मगुणानिति यानाचक्षते वैशेषिकास्तेऽपि क्षेत्रस्य
धर्मा एव न तु क्षेत्रज्ञस्येत्याह भगवानिच्छेति इच्छा सुखसाधने
इदं मे भूयादित्येवंरूपा कामः इति रागः इति च नामांतराणि द्वेषो दुः
खसाधने इदं मे मा भूदित्येवंरूपः तथा सुखमनुकूलं प्रसन्नस
त्वात्मकं दुःखं प्रतिकूलात्मको रजःपरिणामः संघातो देहें
द्रियाणां संहतिः चेतना ज्ञानात्मिका मनोवृत्तिः धृतिरवसन्न
देहेंद्रियावष्टंभकहेतुः प्रयत्नः सर्वे चैते इच्छादयो दृश्यत्वाज्ज्ञे
यत्वाच्चनात्मधर्मा अपि तु मनोधर्मा उपलक्षणं चैतत् संकल्पा
दीनां कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्ये
तत्सर्वं मन एवेति एतन्महाभूतादि धृत्यंतं सविकारमिंद्रिय
विकारसहितं संक्षेपेण यथोक्तमिति क्षेत्रोपसंहारः ६॥

मधुभाष्य

६॥

57

भाषा अनुवाद टीका

और इच्छा द्वेष सुख दुख औरसंघात कहे शरीर औरचेतना कहे ज्ञानात्मक अन्तःकरणकी वृत्ति जो बुद्धि औरधैर्य्य ये सब दृश्य हैं इससे आत्माके धर्म नहीं हैं अन्तःकरणही के धर्म हैं तो शरीर धर्महीं इनको कहा चाहिये सो श्रुति मे कहा है कि कामना संकल्प संशय श्रद्धा अश्रद्धा धैर्य अधैर्य लज्जा बुद्धि भय ये सब अन्तःकरणके व्यापार हैं इस वचन से यही अध्यायके तीसरे श्लोक मे जो कहा क्षेत्रधर्म सो देखाया है और इन्द्रिय आदि विकार सहित क्षेत्र मैंने संक्षेपरूपत्वम से कहा ६ ॥

दोहा

इच्छा द्वेष सुखदुख धृति संघात चेतनारोप ऐसा क्षेत्र संक्षेप सें सविकार द्दि कह्यो सोप ६ ॥

58

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवं
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ७

शांकरभाष्यं टीका १

क्षेत्रज्ञो वक्ष्यमाणविशेषणोपेतस्य सप्रभावस्य क्षेत्रज्ञस्य परिज्ञा
नादमृतत्वं भवति तं ज्ञेयं यत्तत्प्रवक्ष्यामीत्यादिना सविशेषणं
स्वयमेव वक्ष्यति भगवानधुना तु तत्ज्ञानसाधनगणममानित्वा
दिलक्षणं यस्मिन् सति तत् ज्ञेयविज्ञानयोग्योऽधिकृतो भवति यत्प
रः संन्यासी ज्ञाननिष्ठ उच्यते तममानित्वादिगणं ज्ञानसाधनत्वात् ज्ञा
नशब्दवाच्यं विदधाति भगवान् अमानित्वमिति अमानित्वं मानिनो भावो
मानित्वमात्मनः श्लाघनं तदभावोऽमानित्वमदम्भित्वं स्वधर्मप्रकटी
करणं दम्भित्वं तदभावोऽदम्भित्वमहिंसा अहिंसनं प्राणिनामपीडनं
क्षान्तिः परापराधप्राप्तावविक्रियार्जवमृजुभावोऽवक्रत्वमाचार्योपा
सनं मोक्षसाधनोपदेष्टुराचार्यस्य शुश्रूषादिप्रयोगेण सेवनं शौचं
कायमलानां मृज्जलाभ्यां प्रक्षालनमन्तश्च मनसः प्रतिपक्षभावन
या रागादिमलानामपनयनं शौचं स्थैर्यं स्थिरभावो मोक्षमार्ग एव कृता
ध्यवसायित्वमात्मविनिग्रह आत्मनोऽपकारकस्यात्मशब्दवाच्यस्य का
र्यकरणसंघातस्य विनिग्रहः स्वभावेन सर्वतः प्रवृत्तस्य सन्मार्ग ए
व निरोध आत्मविनिग्रहः ७ ॥

आनंदगिरिकृतटीका २

ननूक्ते क्षेत्रे क्षेत्रज्ञो वक्तव्ये हित्वा किमित्यन्यदुच्यते तत्राह क्षेत्र
ज्ञ इति अनादिमदित्यादिना वक्ष्यमाणविशेषणं क्षेत्रज्ञं स्वयमेव भ
गवान् विवक्षितविशेषणसहितं ज्ञेयं यत्तदित्यादिना वक्ष्यतीति
सम्बन्धः किमिति ज्ञेयो वक्ष्यते तत्राह यज्ज्ञात्वेति ज्ञेयं यत्तदित्यतः
प्राक्तनग्रन्थस्य तात्पर्यमाह अधुनेति अमानित्वादिलक्षणं विदधाती
त्युत्तरत्र सम्बन्धः ज्ञानसाधनसमुदायबोधने कुत्रोपयुज्यते तत्राह
यस्मिन्निति योग्यमधिकृतमेव विशिनष्टि यत्पर इति एतत् ज्ञान
मिति वचनात् कथमिदं ज्ञानसाधनमित्याशंक्याह तमिति तद्विधा

तस्य वक्तव्यताद्वार्थं लक्षयति भगवानिति अमानित्वादिनिष्ठस्यान्त
र्थियोज्ञानमिति नियमार्थमाह अमानित्वमिति मानस्तिरोहितोविले
पः सत्तात्मस्य तत्कर्षारोपहेतुः सोऽस्येति मानी न मान्यमानी तस्य भा
वोऽमानित्वमिति व्याकरोति अमानित्वमित्यादिना प्रतियोगिमुखेनाद
म्भित्वं विवृणोति अदम्भित्वमिति वाङ्मनोदेहैः परपीडनं प्राणिनाम
हिंसनं तदेवाहिंसेत्याह अहिंसेति परापराधस्य चित्तविकारकारण
स्य आभावेवाविकृतचित्तत्वेनापकारसहिष्णुत्वं क्षान्तिरित्याह क्षान्ति
रिति अवक्रत्वमकौटिल्यं यथा हृदयव्यवहारः सदेकरूपत्वहति
निमित्तत्वं चेत्यर्थः उपनीयत्र यः शिक्षमित्यादिनोक्तमाचार्यं व्यवच्छि
नत्ति मोहेति शुश्रूषादिरित्यादिपदं नमस्कारादिविषयं बाह्यमाभ्यन्त
रञ्च द्विःप्रकारं शौचं क्रमेण विभजते शौचमित्यादिना मनसो रागा
द्विमलानामिति सम्बन्धः तदपनयोपायमुपदिशति प्रतिपक्षेति
रागादिप्रतिकूलस्य भावना विषयेषु दोषदृष्ट्या प्रवृत्तिस्थैर्यमिति या
वत् स्थिरभावमेव विशदयति मोहेति आत्मनो नित्यसिद्धस्यानाथे
यातिशयस्य कुतो विनिग्रहस्तत्राह आत्मन इति ७ ॥

स्वामिकृत टीका ३

इदानीमुक्तलक्षणात्क्षेत्राद्विविक्ततयात्तेयंस्तुहंदेवसंविस्तरेणवर्णि
यिष्यन् तज्ज्ञानसाधनान्याह अमानित्वमितिपंचभिः अमानित्वस्वगुणो
श्लाघाराहित्यमदंभित्वंदंभराहित्यं अहिंसापरपीडावर्जनं क्षान्तिःसहि
ष्णुत्वं आर्जवमवक्रता आचार्योपासनं सद्गुरुसेवा शौचंबाह्यमाभ्यन्तरंच
तत्रबाह्यंमृज्जलादिना आभ्यन्तरंचरागादिमलक्षालनं तथाचस्मृतिः
शौचंचद्विविधंप्रोक्तंबाह्यमाभ्यन्तरंतथा मृज्जलाभ्यांस्मृतंबाह्यंभावशु
द्धिस्तथान्तरं स्थैर्यंसन्मार्गप्रवृत्तस्यतदेकनिष्ठता आत्मविनिग्रहः शा
रीरसंयमः एतज्ज्ञानमितिप्रोक्तमितिपंचमेनान्वयः ७ ॥

पिशाचभाष्य टीका ४

मानः आत्मश्लाघित्वंतदभावोऽमानित्वं दंभोयशोविकरणंतदभावोऽद
म्भित्वं क्षान्तिःक्षमा आर्जवंऋजुभावः शुचित्वंशौचंशारीरमलक्षालनं
स्थैर्यंस्थिरत्वमात्मविनिग्रहः शारीरस्यप्रकृतिनियमः ७ ॥

रामानुजभाष्यटी॰
अमानित्वमिति अमानित्वमुत्कृष्टजनेष्ववधीरणारहितत्वम् अ
दंभित्वं धार्मिकत्वयशःप्रयोजनतया धर्मानुष्ठाने दंभस्तद्र
हितत्वं अहिंसा वाक्मनःकायैः परपीडारहितत्वं क्षान्तिः प
रैः पीड्यमानस्यापि तान्प्रत्यविकृतचित्तत्वं आर्जवं परापवादे
मनःकायवृत्तीनामेकरूपता आचार्योपासनं आत्मज्ञानप्र
दायिन्याचार्ये प्रणिपातपरिप्रश्नसेवानिरतत्वं शौचमात्म
ज्ञानतत्साधनयोग्यता मनोवाक्कायगता शास्त्रसिद्धा स्थैर्य
मध्यात्मशास्त्रोदितेष्वर्थेषु निश्चलत्वं आत्मस्वरूपव्यतिरिक्त
विषयेभ्यो मनसो निवर्तनं ७ ॥

अभिनवगुप्तकृतटी॰
अनन्ययोगेनेति परमात्मनो महेशादन्यदपरं किंचिन्नास्ती
त्यनन्यरूपो निश्चयः स एव योगस्तेन निश्चयेन मयि भक्तिर
नपवसानकदाविद्यभिचारति अभिचारहेतुत्वाभिमतानां
कामनानामभावात् तासामपि वाचितदहत्त्वेन तद्रूपाणां त
देकमयत्वात् एवं सर्वत्रानुसंधेयम् एतद्विपरीतमज्ञानं
यथामानित्वादीनि ७ ॥

परमार्थप्रपाटी॰
इदानीमुक्तलक्षणात्क्षेत्राद्विविक्तया वेद्यं ज्ञेयं क्षेत्रज्ञं विस्तरे
ण वर्णयिष्यन् तज्ज्ञानसाधनान्याह अमानित्वमिति पञ्च
भिः अमानित्वं स्वगुणश्लाघाराहित्यं तदुक्तं मा मोपमानेन
ऽवीस्याञ्चैव साधारणो जनः अतोऽवज्ञां त्वनिदानत्वान्मानयो
गोऽपरित्यजेत् तथा अदंभित्वं दंभराहित्यं तदुक्तं कृतदंभा
द्दंभाद्वा कर्म तत्स्यादसंभवेत् अमैकफलमार्येस्याद्वि
तीयं स्वर्गसाधनमिति तथा अहिंसा परपीडानिवृत्तिः तदु
क्तं स्वयं बिभेति हिंसेभ्यस्तानुपापान् विवर्जितेहैतैः स्वाबीस्या
मिति विज्ञाय परपीडां विवर्जयेत् क्षान्तिः सहनता आर्जव॰

मवक्रता आचार्योपासनं सद्गुरुसेवा आचार्यवान्पुरुषो वेदे
तिश्रुतेः तदुक्तं शतश्लोके यद्यपुह्यमबुद्धिः पठनपरिणमहे
दशास्त्रान्नरार्थो नह्याचार्यं विना सान्तदपि परिविनोत्पत तदुक्तं
रहस्यं सूतेनामानि यद्यपाजिरनिवसतामनूवक्त्राद्युतानि
शायत्तेते पदार्थेन हि कथकमस्तेवत्सो गोपगायीति शौ
चं तद्द्विविधं शाक्तं वाह्यभावशुद्धिस्तथान्तरमिति स्थैर्यं तदे
कनिष्ठता आत्मनिग्रहः शरीरसंयमः ७ ॥

वनमाली टीका

तेनप्रकारेण तत्र ज्ञेयाद्विविक्ततया वक्तुं ज्ञानयोग्यतायामा
नित्वादिसाधनान्याह ज्ञेयं यत्तदित्यतः प्राक्तनैः पंचभिः विष
मानैरविषमानैर्वा गुणैरात्मनः श्लाघ्यत्वमानित्वं लाभपूजा
ख्यात्यर्थं स्वधर्माविष्करणं दंभित्वं कायवाङ्मनोभिः प्राणिना
पीडनं हिंसा तेषां वर्जनममानित्वमदंभित्वमहिंसेत्युक्तं परा
पराधे चित्तविकारहेतौ प्राप्तेपि निर्विकाररचितनया तदपरा॰
धसहनं क्षान्तिः राज्ञं वमकौटिल्यं आचार्यो मोक्षसाधनोपदेष्टा
शुश्रूषानमस्कारादिना तत्सेवनं शौचं बाह्यं कायमलानां॰
मृज्जलाभ्यां क्षालनमाभ्यंतराणां मनोमलानां रागादीनां वै
राग्यादिनापनयनं स्थैर्यं मोक्षसाधनप्रवृत्तस्यानीकविघ्न
प्राप्तावपि तदपरित्यागेन पुनर्यत्नाधिक्यं आत्मविनिग्रहः
आत्मनो देहेन्द्रियसंघातस्य स्वभावप्राप्तो मोक्षप्रतिकूले
प्रवृत्तिं निरुध्य मोक्षसाधनएव व्यवस्थापनं ७ ॥

उत्तमवैजयन्ती टी॰

एवं क्षेत्रस्वरूपमुक्त्वेदानीं क्षेत्राद्भिलक्षणत्वेन ज्ञेयं क्षेत्रज्ञ
तद्यन्निरूपयिष्यंस्तज्ज्ञानसाधनानि विंशतिसंख्याकान्यमा
नित्वादीन्याह पंचभिः अमानित्वमिति अमानित्वं स्वस्योत्
त्कर्षप्रजनेन स्वसत्कारानपेक्षत्वं अदंभित्वं धार्मिकत्वख्या॰
पनतया धर्मानुष्ठानेनदंभस्तद्रहितत्वं अहिंसाम॰
नोवाक्कायैः परपीडारहितत्वं क्षान्तिः परैः ॥

\+ एवं क्षेत्रं प्रतिपाद्य तत्साक्षिणं क्षेत्रज्ञं क्षेत्राद्विवेकेन विस्तरात्प्रतिपादयिष्यंस्तज्ज्ञानयोग्यत्वा
यअमानित्वादिसाधनान्याह ज्ञेयं यत्तत्प्रवक्ष्यामीत्यतो वक्ष्यमाणात्प्राक् पंचभिः श्लोकैः ॥

पीड्यमानोऽप्यपमानसहिष्णुता आर्जवं परान्प्रति मनोवाक्कायवक्री
नामेकरूपता आचार्योपासनं आत्मज्ञानप्रदायिन आचार्यस्य प्रणिपा
तपरिप्रश्नसेवानिरतत्वं शौचं बाह्याभ्यंतरं चाद्विविधं शौचं बहिर्विधं श्रो
केवाह्यमाभ्यंतरं तथा मृज्जलाभ्यां स्मृतं वा तेभावशुद्धिस्तथान्तरमि
ति स्मृतेः स्थैर्य्यं सिद्धं धर्म्मैकनिष्ठत्वमध्यात्मशास्त्रोदितेष्वर्थेषु चापल
वात्मविनिग्रहः आत्मानं सेपि प्रतीपा[illegible]ननसोनिवर्त्तनम् ७

मधुसूदनी टीका ।

\+ विद्यमानैरविद्यमानैर्वा गुणैरात्मनः श्लाघनं मानित्वं लाभपूजा
ख्यात्यर्थं स्वधर्मप्रकटीकरणं दंभित्वं कायवाङ्मनोभिः प्राणिनां पी
डनं हिंसा तेषां वर्जनममानित्वमदंभित्वमहिंसा इत्युक्ते परापरा
धेपि चित्तविकाररहितो प्राप्तेपि निर्विकारचित्तता तदपराधसहने
क्षांतिः आर्जवमकौटिल्यं यथाहृदयं व्यवहरणं परप्रतारणाराहि
त्यमिति यावत् आचार्यो मोक्षसाधनस्योपदेष्टा श्रुतिविवक्षितो न तु
मनूक्तः उपनीयाध्यापकः तस्योपासनं शुश्रूषानमस्कारादिप्रयो
गेन सेवनमाचार्योपासनं शौचं बाह्यं कायमलानां मृज्जलाभ्यां क्षा
लनं आभ्यंतरं च मनोमलानां रागादीनां विषयदोषदर्शनरूपप्र
तिपक्षभावनयापनयनं स्थैर्यं मोक्षसाधने प्रवृत्तस्यानेकविध
विघ्नप्राप्तावपि तदपरित्यागेन पुनः पुनर्यत्नाधिक्यं आत्मविनिग्र
हः आत्मनो देहेंद्रियसंघातस्य स्वभावप्राप्तां मोक्षप्रतिकूले प्रवृत्तिं नि
रुध्य मोक्षसाधन एव व्यवस्थापनं ७ ॥

सदानंदी टीका ॥

एवं क्षेत्रमसदाख्यमदेवं चेतनस्य साक्षिणं क्षेत्राद्विवेकतो वक्ष्ये विस्त
रेण हरिर्विभुः १ तज्ज्ञानयोग्यतासिद्ध्यै साधनान्याह सर्ववित् वि
द्यमानैर्गुणैर्वाप्यविद्यमानैः स्वतात्मनः २ श्लाघनं किल मानित्वं स्व
ख्यात्यभिमानिना स्वधर्मख्यापनं लाभपूजार्थं हि दंभिता ३ प्रा
णिनां पीडनं हिंसा कायेन मनसा गिरा एतेषां वर्जनं ज्ञानसा
धनभावतः ४ परापराधे प्राप्तेपि चेतो विकृतिकारणे बुद्धेरवि
क्रियाक्षांतिरकौटिल्यं तथार्जवं ५ परप्रतारणाभावं व्यवहारेऽप्य

क्षिते मोक्षमार्गोपदेष्टा सद्गुरुराचार्य ईरितः तस्य शुश्रूषणं भक्त्या ज्ञा
नसाधनमुत्तमं मृज्जलाभ्यां वहिः शौचं शरीरमलशोधनं । शुद्ध
भावनया त्यागो रागादेरांतरं स्मृतं मोक्षमार्गे प्रवृत्तस्य स्थैर्यं विघ्नेऽप्यचा
लता य देहेंद्रियादिवर्गस्य प्रवृत्तिर्या स्वभावतः तोन्निरुध्यात्मस
न्मार्गे स्थापनं ज्ञानसाधनं ९ ७ ॥

नीलकंठी टीका १२

इदानीं ज्ञानसाधनानि विधत्ते अमानित्वमिति अमानित्वादयो पि
चेमोहन्तिविशेषा दशघनाद्वनत्वे उ विकाराएव सन्तः सत्त्वगुणका
र्यत्वात् ज्ञानस्य साधनभूता अपि उपचाराज्ज्ञानपदवाच्या भवंति
एतज्ज्ञानमिति प्रोक्तमिति उपसंहारात् तत्र विद्यमानैरविद्यमानै
र्वा गुणैरात्मनः श्लाघित्वं मानित्वं लाभपूजाख्यात्यर्थं स्वधर्मस्य प्रक
टीकरणं दंभित्वं कायवाङ्मनोभिः प्राणिनां पीडनं हिंसा तेषां वर्ज
नम् अमानित्वमदंभित्वमहिंसा च परेणापकृतेपि चित्तस्य निर्विका
रत्वं क्षांतिः आर्जवमकौटिल्यं आचार्योपासनं स्पष्टं शौचं मृज्जला
भ्यां बाह्यं भावशुद्ध्यांतरं स्थैर्यं मोक्षसाधने प्रवृत्तस्य विघ्नसद्भावे
पि तद्गणने आत्मविनिग्रहः देहेंद्रियादिप्रचारसंकोचः ७ ॥

^एवं तावत्क्षेत्रं लक्षयित्वा
क्षेत्रज्ञस्य ज्ञातृत्वेनाम यल्लक्षणमुक्तं तत्र ज्ञान
लक्षणं विस्तरयति ॥

आनंदी टीका १३

^अमानित्वं विद्यायदहंकाराभावः अदंभित्वं लाभपूजाख्यातिकामे
न विहितकर्मानुष्ठानं दंभः स्तत्राहित्यम् अहिंसा परेषामपीडनं
क्षांतिः परैः पीड्यमानस्यापि सहतिसामर्थ्ये क्रोधाभावः मनस्य
स्य च सन्न्यस्तकर्मणएन्यदिति क्रूटिलता तदभाव आर्जवम् शौचं
वहिरंतः शुद्धिः स्थैर्यं अन्तरायेपि स्वकर्मणः स्खलनाभावः आ
त्मनो मनसो विनिग्रहो विषयेभ्यो निवर्तनम् ७ ॥

रामकंठी टीका १४

संघर्षादिदोषप्रसक्तस्य प्रसिद्धगुरुकृपान्तरानुष्ठीयमानसदाचा
रानुकरणेन मकल्पमानस्य चयेन सर्वानुष्ठितस्यापि सदाचार
मात्रस्य संसारश्वभ्रपातनफलतामावहन्नासुरसर्गभाग्जनविष

यो महान्दोष स्तथा चोक्तं भारते मानाग्निहोत्रमुत मानमौनं मानेना
धीतमुत मानयज्ञः चत्वार्येतान्यभयंकराणि भयं प्रयच्छंत्ययथा
कृतानि इति चत्वार्यग्निहोत्रादीनि वस्तून्याश्रमधर्मरूपाणि शा
स्त्रचोदितत्वादनुष्ठीयमानान्यभयं तावत्कुर्वंति मानादिदोषदू
षितचित्तेन कृतानि प्रत्युत महद्भयमनुष्ठातुः फलंतीत्यपि अस्य
श्लोकस्यार्थः एवं विधो मानो विद्यते यस्य स मानी तस्य भावो मानि
त्वं स्वद्गुणसंकल्पत्वं नाम गुणेज्ञानाभिव्यक्तिहेतुत्वादज्ञानमित्युक्तं
एवमेवाःदंभित्वं दंभो हि नाम मानादिदोषदूषितसंकल्पत्वेन स
तिइष्टमात्रफलतया सदाचारानुष्ठानं व्याजेन धर्माचरणमित्यर्थः
स विद्यते यस्यासौ सदंभी मिथ्याचारस्तस्य भावो दंभित्वं तदभावोऽ
दंभित्वं सम्यक्क्रियानुष्ठानमित्यर्थः तदपि पूर्ववज्ज्ञानमेव न
न्वहिंसाक्षांत्यादिज्ञानत्वं तत्कथं तत्वज्ञानोपदेशविषयत्वेनप
रिगृहीतस्यार्जुनस्य यज्ञसंग्रामादिक्रियानुष्ठाने नियुज्यमानस्य
तद्गताहिंसाःक्षांत्यभ्यासो नाम शास्त्रीयानियमः तथा हिंसा
हि शास्त्रीयनियमनिरपेक्षेण द्वेषलोभादिप्रयुक्तस्य प्राणिनां
जिघांसा तदभावोऽहिंसा निसर्गतः सर्वभूतेषु करुणा वि
नत्वादनभिद्रोहस्तदपि ज्ञानं तथा क्षांतिः परैरभिहन्यमानस्य
सत्यपि प्रतीकारसामर्थ्ये स्वभावतः प्रशांतचित्तत्वाद्वाङ्मनःक
र्मभिरविकारित्वं सापि ज्ञानमनुष्ठेयत्वेनोपदिश्यते यथो
क्तज्ञाननिष्ठस्यावश्यानुष्ठेयस्य कर्मभावेनावस्थिता हिंसाक्षांति
श्चाहिंसैव न भवति न चाक्षांतिरित्युक्तमेव प्राक् आर्जवमसुतेय
थाहृदयं वाङ्मनः प्रवृत्तिहेतुरकुटिलता यदेवं प्रशंसंति सर्वं
जिह्मं मृत्युपदमार्जवं ब्रह्मणः पदमिति तदपि ज्ञानमेवं पंचै
ते धर्माः परमेश्वरानुग्रहसूचकदैवसर्गभाजो नान्यस्य प्रती
यमानासदसत्कर्मसंतानस्य संसारस्वरूपप्रत्यवेक्षायोगप
यत्नस्य महत्स्वेव जायंते ते च तद्रूपदयकृतप्रतिष्ठस्य ज्ञानतरो

मानित्वं तद्भावो

मे

१३ श्री॰
गी॰ टी॰

62

मूलसन्ततिस्थानीयो धर्मः षडन्तरीयकाः शाखाः प्रतानकल्पाश्च
मी धर्माः प्रादुर्भवन्ति तद्यथा शास्त्राधिगमउरः स्मरः संस्कारविशे
षस्तथा हेयोपादेयवस्तुविषयो विवेको विज्ञाततत्स्वरूपस्य हेया
पवर्जनपूर्वमुपादेयानुष्ठानेनानुगतमाचार्योपासनादेवंविध
धर्मोदये सति पल्लवपुष्पस्थानीयाः शौचादयो जन्मादिदोषानु
दर्शनपर्यन्ता धर्मविशेषाः समुन्मिषन्ति तत्र विशिष्टक्रियानु
ष्ठानेन सामायिकारस्य कल्याणैहतसूतासतास्तु क्रियास्ताः सूक्ष्म
चित्तस्य तद्गुणैः संवध्यमानस्य प्रथमः शौचो नाम गुणः सर्वक्रि
याणां तत्पूर्वकत्वात्तत्त्वद्विविधं बाह्यमाभ्यन्तरं च तत्र बाह्यम
धिकारिदेशकालाद्यपेक्षयोपदत्तया नियतेन मृज्जलादिना कर्तव्य
तया दृष्टदृष्टगन्धलेपापाययासनपर्यन्ता मृजा आभ्यन्तरं बाह्यनि
र्हीनैस्मसंज्ञासुहृत्सीतिनिर्विकल्पवा प्रतिपत्तिर्या भावशुद्धिरिमा
ऊः एतच्च शौचं कायवाङ्मनोनिर्वर्त्यानां तपःस्वाध्यायध्याना
दीनां गुणान्तराणामुपलक्षणं वेदितव्यम् अथ स्थैर्यं संशया
दिदोषनिर्हृत्यानुष्ठेयेष्वर्थेष्वचंचलता तस्मिंश्च सति श्रयात्मवि
निग्रह आत्मनोऽन्तःकरणस्य निषिद्धविषयाद्विनिग्रहो नियम
नम् ॥ ७ ॥

^ अथेदानीं क्षेत्रज्ञस्य सविस्तरं वर्णयिष्यमाणस्य लासिकी [illegible]टीका १५
स्यादेर्ज्ञानसाधनान्याह पंचभिः॥

^ अमानित्वं स्वगुणश्लाघाराहित्यम् अदंभित्वं लाभाद्यर्थं स्वध
र्मप्रकटीकरणाभावः अहिंसा परपीडावर्जनम् क्षान्तिः स
हिष्णुता आर्जवमवक्रता आचार्योपासनं तत्त्वज्ञानोपदेष्टु
र्गुरोः शुश्रूषा शौचं बाह्याभ्यन्तरम् बाह्यं मृज्जलादिना आ
भ्यन्तरं रागादिमलक्षालनम् तथा च स्मृतिः शौचं तु द्विविधं
प्रोक्तं बाह्यमाभ्यन्तरं तथा मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्त
थान्तरम् इति स्थैर्यं सन्मार्गे प्रवृत्तस्य तदेकनिष्ठता आत्मविनि
ग्रहः शरीरसंयमः एतज्ज्ञानमिति प्रोक्तमिति पंचमेनान्वयः [illegible] ७

पंचोली टीका

इदानीमुक्तलक्षणात्क्षेत्रात् विविक्ततया ज्ञेयं स्पष्टं तेन वक्तुं
विस्तरेण वर्णयिष्यन् तत्साधनान्येव ज्ञानशब्देन स्तुवन्निरू
पयति अमानित्वमिति पंचभिः अमानित्वमात्मश्लाघाया वि
रहः अदंभित्वं स्वधर्मप्रकटीकरणाभावः अहिंसा प्राणि
नां अपीडनं क्षान्तिः परापराधप्राप्तौ अविक्रियः आर्जवं ऋ
जुभावः मोक्षसाधनोपदेशेषु आचार्यशुश्रूषादिप्रयोगे
न सेवनमाचार्योपासनं शौचं द्विविधं देहस्य उदकादिना
अन्तःकरणस्य सद्वासनया रागादिमलानां क्षालनं द्विविधं
शौचं मोक्षमार्गे प्रवृत्तस्य निश्चयत्वं स्थैर्यमात्मविनिग्रहः आ
त्मापकारिणया आत्मशब्दवाच्यस्य देहेन्द्रियसंघातस्य वि
निग्रहः सन्मार्गे स्थापनम् ७ ॥

भगवीरमसिद्धोधिनी

इदानीमुक्तलक्षणात्क्षेत्राद्धि विविक्ततया ज्ञेयं स्फुटं वक्तुं तत्स वि
स्तरं वर्णयिष्यन् प्रथमं तज्ज्ञानसाधनान्याह अमानित्वमिति अ
मानित्वं स्वगुणश्लाघाराहित्यम् अदंभित्वं स्वधर्मप्रकटीकरणं तद्र
हितत्वं अहिंसा प्राणिनामपीडनं क्षान्तिः परापराधप्राप्तावविक्रि
या आर्जवमृजुभावो वक्रत्वं मोक्षसाधनोपदेष्टुराचार्यस्य शुश्रू
षादि प्रयोगेन सेवनं शौचं कायमलानां मृज्जलाभ्यां प्रक्षालनं स्थै
र्यं स्थिरभावः सन्मार्गे आत्मविनिग्रहः शरीरसंयमः शुद्ध्यर्थममा
नित्वयोर्हेतुः स्वश्लाघाकरणमदंभित्वं निर्धर्मस्य मिथ्याव कववा
दिप्रकरणमदंभित्वं तदभावः अहिंसा निषिद्धहिंसापरित्यागो वीरस्य
स्त्रीवधादेः प्रतिषेधात् क्षान्तिः दुष्टापतितदुःखसहिष्णुता आर्जवं कु
टिलमार्गगमनग्रहस्याकरणमाचार्योपासनं यस्त्वैदोपदेष्टुः संसे

63

वनं शौचं शास्त्रकवचादिमार्जनं स्थैर्यं शुद्धे सन्मार्गे स्थितस्य तदेकनिष्ठता
त्मविनिग्रहः शरीरसंघमयतज्ज्ञानमिति प्रोक्तमिति पंचमेनान्वयः ७॥

मधुभाष्य

अमानित्वमित्यादिना आत्मश्लाघ्यत्वं ज्ञात्वापि मदत्वप्रदर्शनं
दंभः ज्ञात्वापि स्वात्मनोल्पत्वं भोगार्हत्वस्य भावनमित्यभि
धानम् आर्जवं मनोवाक्कायकर्मणामवैपरीत्यं सक्तिः स्नेहः
सपत्नातिपक्कोऽभिष्वंगः स्नेहः सक्तिः सपत्नातिपक्कोऽभिष्व
ंगः उच्यतइत्यभिधानम् तत्त्वज्ञानार्थदर्शनमपरोक्षज्ञानार्थं
ज्ञानस्य दर्शनं पंचमस्येति सर्वपञ्चतिप्रतिज्ञातमुच्यते अन्यथायत्य
भवइति आदिमद्देहादिवर्जितं अनादिमत् सर्वेंद्रियाणि गु
णांश्चाभासयतीति सर्वेंद्रियाणि गुणांश्चाभासयतीति सर्वे
ंद्रियगुणाभासं इंद्रियवर्जितत्वाद्यर्थउक्तः उपरस्मात् विकारं
नभोवाह्ननसाधनप्रथममतउक्तं बहुत्वात्साधनत्वाद्गुणपयो
गात्मभावः यतस्त्वयदितिवक्तं प्रकृतिविकारपुरुषान्सं
क्षिप्याह गुणाः सत्वादयः तेषामत्यल्पोविशेषो लयसर्गे
विकाराइति दृष्टयुक्ताः कार्याकार्यगुणाक्तिस्तोयतः स्वल्पो
भवाजनाइति मधुकैटभ प्रारब्धायां कार्यमारीनं शरीरंका
र्यमुच्यतइत्यभिधानं कारणानींद्रियाणि भोगो वभवः स
क्षिविद्रूपत्वादनुभवइति प्रकृतिस्थ नउत्वात्परिणामिनी
कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः भोक्तृत्वे सुखदुःखा
नां पुरुषः प्रकृतेः परमिति भागवते यदित्याह ७॥

भाषा अनुवाद टीका

अब उक्त क्षेत्रसे पृथक जो ज्ञेय क्षेत्रज्ञ तिसको विस्ताररूप व
र्णन की इच्छा करि क्षेत्रज्ञके ज्ञान होनेके साधन पांच श्लोकसे क
हते हैं कि अमानित्व अदम्भित्व अहिंसा कहे मान कपट परपीडा
राहित्य औरक्षान्ति कहे क्षमा औरआर्जव जो सीधापन औरआचार्यो
पासन जो गुरु सेवन और शौच कहे बाह्य अन्तर शुद्धि औ भाव
शुद्धसे अन्तःशुद्धि जानो और स्थैर्य कहे सत् मार्ग मे प्रवृत्त और
उसी एक मे तत्परता तथा आत्मविनिग्रह कहे शरीर संयम ७

दोहा

अमान अदंभ अहिंसता क्षांति सरलता होय आचार्य सेवा शौच
स्थिर आत्म विनिग्रह सोय ७॥

64

इन्द्रियार्थेषु वैराग्यमनहंकार एव च जन्म
मृत्युजराव्याधिदुःखदोषानुदर्शनं ८ ॥

शांकरभाष्य टीका १

किञ्च इन्द्रियेति इन्द्रियार्थेषु शब्दादिषु दृष्टादृष्टेषु भोगेषु विरागभा
वो वैराग्यमनहंकारोऽहंकाराभाव एव च जन्ममृत्युजराव्याधिदुःखदो
षानुदर्शनं जन्म च मृत्युश्च जरा च व्याधयश्च दुःखानि च तेषु जन्मा
दिदुःखान्तेषु प्रत्येकं दोषानुदर्शनं आलोचनं जन्मनि गर्भवासयो
निद्वारा निःसरणं दोषस्तस्यानुदर्शनं आलोचनं तथा मृतौ दोषानु
दर्शनं तथा जरायां प्रज्ञाशक्तितेजोनिरोधदोषानुदर्शनं आलोचनं
परिभूतता चेति तथा व्याधिषु शिरोरोगादिषु दोषानुदर्शनं तथा दुः
खेष्वध्यात्माधिभूताधिदैवनिमित्तेष्वथ वा दुःखान्येव दोषो दुःखदोष
स्तस्य जन्मादिषु पूर्ववदनुदर्शनं दुःखं जन्म दुःखं जरा दुःखं मृत्युर्दुः
खं व्याधयो दुःखनिमित्तत्वाज्जन्मादयो दुःखं दुःखानि न पुनः स्वरूपेणै
व दुःखमित्येवं जरादिषु दुःखदोषानुदर्शनात् देहेन्द्रियविषयभोगे
षु वैराग्यमुपजायते ततः प्रत्यगात्मनि प्रवृत्तिः करणानामात्मद
र्शनाय एवं ज्ञानहेतुत्वात् ज्ञानमुच्यते जन्मादिदुःखदोषानुदर्शनं ८

आनंदगिरिकृत टीका २

न केवलममानित्वादीन्येव ज्ञानस्यान्तरङ्गसाधनानि किन्तु वैराग्यादी
न्यपि तथाविधानि सन्तीत्याह किञ्चेति दृष्टादृष्टेष्वनेकार्थेषु रागे
तस्मिन्निवर्त्ये ज्ञानं नोदयतेऽत इति मत्वा व्याकरोति इन्द्रियेति आविर्भूतो
गर्वोऽहंकारस्तदभावोऽपि ज्ञानहेतुरित्याह अनहंकार इति इन्द्रियार्थे
षु वैराग्यमुक्तमुपपादयति जन्मेति प्रत्येकं दोषानुदर्शनमित्युक्तं
तत्र जन्मनि दोषानुदर्शनं विशदयति जन्मनीति यथा जन्मनि दो
षानुसन्धानं तथा मृत्यौ दोषस्य सर्वमर्मनिकृन्तनादेरालोचनं का
र्यमित्याह तथेति जन्मनि मृत्यौ च दोषानुसन्धानवज्जरादिष्वपि
दोषानुसन्धानं कर्तव्यमित्याह तथेति व्याधिषु दोषस्यासह्यतारू
पस्यानुसन्धानं दुःखेषु त्रिविधेष्वपि दोषानुसन्धानं प्रसिद्धं व्याख्या

नान्तरमाह अथवेति यथा जन्मादिषु दुःखान्तेषु दोषदर्शनमुक्तं त
था तेष्वेव दुःखाख्यदोषस्य दर्शनं स्फुटयति दुःखमित्यादिना कथं
जन्मादीनां वास्तवेन्द्रियग्राह्याणां दुःखत्वं तत्राह दुःखेति जन्मादिषु दो
षानुदर्शनकृते फलमाह एवमिति वैराग्ये सत्यात्मदृष्ट्यर्थं करणा
नां तदाभिमुख्येन प्रवृत्तिरिति वैराग्यफलमाह तत इति जन्मादिदुः
खदोषानुदर्शनं ज्ञानहेतुषु किमित्युपसंख्यानमित्याशंक्य वैराग्यपा
दापीहेतुत्वादित्याह एवमिति ८ ॥

स्वामिकृत टीका ३

किंचेन्द्रियार्थेष्विति जन्मादिषु दुःखदोषयोरनुदर्शनं पुनःपुनरालोच
नं दुःखरूपस्य दोषस्यानुदर्शनमिति वा स्पष्टमन्यत् ८ ॥

पिशाचभाष्य टीका ४

वैराग्यं शब्दादिविषयेषु अनहंकारः अहंकाराभावः एवं च जन्मादिदो
षदर्शनं ८ ॥

रामानुजभाष्य टीका ५

इन्द्रियार्थेष्विति इन्द्रियार्थेषु वैराग्यं आत्मव्यतिरिक्तेषु विषयेषु दोषानु
संधानेन तेषूद्वेजनं अनहंकारः अनात्मनि देहे आत्माभिमानरहितत्वं
प्रदर्शनार्थमिदं अनात्मीयेष्वात्मीयाभिमानरहितत्वं चापि विवक्षितं
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं सशरीरत्वे जन्ममृत्युजराव्या
धिदुःखरूपस्य दोषस्यावर्जनीयत्वानुसंधानं [illegible] ८

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् ८ ॥

परमार्थप्रपा टीका ७

एतत् ज्ञानमिति प्रोक्तमिति पंचमेनान्वयः किंच
तदुक्तं आरंभाद्युपरामयेरूपकृते ज्ञात्वापि नोपेक्ष
से कश्चिद्वोपद्रुताश्रवेषु मनिस्त्रुवे स्यात्तचिरं वोक्षु
सि त्यक्तसेवक्षुनाथहीदमससक्रदाक्रोशमाणः त्वां
इन्द्रियार्थेषु रूपरसादिविषयेषु वैराग्यं वैतृष्ण्यं तथा

एतावानहमस्मीत्यहंकाराभावः जन्मादिषु दुःखदोषयोरनुपदं दर्शनं पुनः पुनरालोचनम् ॥ ८

८ ॥ ८ ॥ ८ ॥ ८

वनमाली टीका ८

इंद्रियार्थेषु शब्दादिषु दृष्टेष्वानुश्रविकेषु च रागविरोधित्वस्य हातुमुपायित्वनुक्तेर्वैराग्यं प्राप्तं श्लाघनाभावेऽपि मनसि प्रादुर्भूतो हं सर्वोत्कृष्ट इति गर्वो ऽहंकारस्तदभावो नहंकारः जन्मनो गर्भवासयोनिद्वारनिःसरणरूपस्य मृत्योः सर्वमर्मच्छेदनरूपस्य जरायाः प्रज्ञाबलवीर्यादिनाशिकायाः व्याधीनां ज्वरादीनामिष्टवियोगजानामध्यात्माधिभूताधिदैवनिमित्तानां दोषस्य वातपित्तश्लेष्ममलमूत्रादिपूर्णत्वेन कायजुगुप्सितत्वस्य चानुदर्शने पुनः पुनरालोचने ८ ॥

ऊहमवैनयनी टीका ९

किंच इंद्रियार्थेषु प्राकृतेष्वैहिकामुष्मिकशब्दादिविषयभोगेष्वात्मज्ञानप्रतीपेषु वैराग्यं प्रीत्यभावः अहंकारः अनात्मनि देहेन्द्रियादावात्माभिमानरहितत्वमेवकारस्य सर्वैर्विशेषणैस्सह संबंधः चशब्देनानात्मीयेषु पुत्रकलत्रगृहादिष्वात्मीयत्वाभिमानरहितत्वं [illegible] हितम् जन्ममृत्युजराव्याधिदुःखदोषानुदर्शने जन्म गर्भवासयोनिद्वारनिःसरणरूपं मृत्युः सर्वदेहादिविस्मरणरूपप्रमादः प्रमादो वै मृत्युरहं ब्रवीमीति स्मृतेः जरा देहेन्द्रियादिशैथिल्येन बुद्धिबलरूपतेजोगुणपराक्रमादिनिरोधनता व्याधिः ज्वरातिसारादिलक्षणः एतेषु दुःखरूपस्य दोषस्यानुदर्शनं मर्जनीयत्वानुसंधानं ८ ॥

मधुसूदनी टीका १०

किंच - इंद्रियार्थेषु शब्दादिषु दृष्टेष्वानुश्रविकेषु वा भोगेषु रागविरोधिनी
ग्रस्य हार्दिका चित्तवृत्तिर्वैराग्यं आत्मश्लाघनाभावेपि मनसि श्राड
म्बरेणोहं सर्वोत्कृष्ट इति गर्वग्रहोहंकारः तदभावो नहंकारः प्रयोगव्य
वच्छेदार्थ एवकारः समुच्चयार्थः चकारः तेनामानित्वादीनां विंश
तिसंख्याकानां समुच्चितो योग एव तत्ज्ञानमिति श्लोकेन तदुपकरणाप्य
भावइत्यर्थः जन्मनः गर्भवासयोनिद्वारनिःसरणरूपस्य मृत्योर्म
र्मच्छेदनरूपस्य जरायाः प्रज्ञाशक्तितेजोनिरोधपरपरिभवा
दिरूपायाः व्याधीनां ज्वरातीसारादिरूपाणां दुःखानामिष्टवियो
गानिष्टसंयोगजातानामध्यात्माधिभूताधिदैवनिमित्तानां दोष
स्य वातपित्तश्लेष्ममलमूत्रादिपरिणामित्वेन कायकुत्सितत्व
स्यानुदर्शने पुनः पुनरालोचने जन्मादिदुःखांतेषु दोषस्यानुद
र्शने जन्मादिव्याध्यंतेषु दुःखरूपदोषस्यानुदर्शने जन्मादिव्या
ध्यंतेषु दुःखरूपदोषस्यानुदर्शनमिति वा इदं चाविषयवैराग्यहे
तुत्वेनात्मदर्शनस्योपकरोति ८ ॥

सदानंदी टीका ॥

दृष्टादृष्टेषु भोगेषु वर्तमाना रागविरोधिनी यात्मस्पृहा हार्दिका तस्या हेरा
ग्यं ज्ञानसाधनं १ वैराग्यादिगुणत्वेन सर्वोत्कृष्टोस्म्यहं बुधः इति ग
र्वोस्यहंकारस्तदभावो नहंकृतिः २ प्रयोगव्यवच्छेदार्थ एवकारश्
हेतिः समुच्चयार्थश्च तत्वत्तेनोक्तानां समुच्चितः ३ विंशतेसाध
नानां वियोग एवात्र साधने ज्ञानमित्युक्तमेकस्याप्यभावेनैव संभ
तः ४ जन्मनो गर्भवासादियोनिद्वारेणानिःसृतेः मर्मच्छेदनरूपस्य
मृत्योर्दुःखाकरस्य च ५ प्रज्ञाशक्तिनिरोधादिरूपाया जरसस्तथा
व्याधीनां ज्वरमुख्यानां दुःखानां चतुरूपिणां ६ आध्यात्मिकादिरूपा
णामिष्टानिष्टप्रजातया दोषस्य वातपित्तासृक्श्लेष्ममूत्रमलादि
भिः ७ परिणामित्वेन वपुर्निंदितत्वस्यालोचने पुनः व्याध्यंतेषु वा दुः
खरूपदोषानुदर्शने ८ इदं च भोगवैराग्यहेतुत्वेनात्मदर्शने सम्य
गुपकरोत्येवं भूयोनुदर्शने ९ ॥ ८

नीलकंठी टीका १२

इंद्रियार्थेषु दृष्टेष्वानुश्रविकेषु वा शब्दादिषु वैराग्यं रागाभावः अनहं
कारः दर्पराहित्यं अयोगव्यवच्छेदार्थ एवकारः समुच्चयार्थश्चकारः
जन्मादिषु यज्जायमाने दुःखं परस्य व्याधादोषाश्च दैन्यादयस्तेषामनुद
र्शनं ८ ॥

आनंदीटीका १३

वैराग्यं वैतृष्ण्यं अनहंकारः शरीरादावस्मीति प्रत्ययाभावः जन्मा
दिभिः कृतं गर्भवासादिकं क्रियमाणं वा नरकपातादि दुःखं स एव
दोषस्तस्य दर्शनं पर्यालोचनम् तथा चापरार्के ॥ ८ ॥

रामकंठी टीका १४

ततश्चेंद्रियार्थेषु विषयेषु दृष्टानुश्रविकेषु तद्यातिशयादिदोषद
र्शनाद्वैराग्यं रागदोषरहितत्वं तत्त्वकषसमासादनात्सत्वांतरेष
गुणेष्वपि पर्यवस्यति तस्मिंश्च ताद्दशे गुणे सत्यनहंकारः ईद्दशो
स्मीति दुरभिमानाभावः यद्वा शरीरादावहमस्मीति प्रत्ययनि
वृत्तिः ततश्च जन्मादिदोषप्रभवस्यैव दुःखस्य महादोषस्यानु
दर्शनं पुनः पुनस्तो निरूपणं तद्यथा गर्भवासादिनिरतिशयक्लेशा
नुभवादिकं जन्मनो दुःखं प्राप्तशरीरग्रहस्य बाल्यवृद्धभावविम
रणं दुःखं तथा सति शरीरे बाधकरोगादि दुःखमिति शरीरित्वं
नामादिमध्यान्तावस्थासु दुःखमयमेवेति विवेकहर्म्यादि रूढः
स्वपरविषयत्वेन विवेकेनुद्दतमः यथोक्तं वासिष्ठे प्रज्ञाप्रासादमा
रूढस्त्वशोच्यः शोचतो जनान् भूमिष्ठानिव शैलस्थः सर्वान्
प्राज्ञोनुपश्यतीति ॥ ८ ॥

लासिकी नीटीका १५

किंच इंद्रियार्थेषु दृष्टानुश्रविकेषु विषयेषु वैतृष्ण्यम् अनहंकारः
अहं सर्वोत्कृष्ट इति गर्वाभावः जन्मादिषु दुःखदोषयोरनुद
र्शनं पुनः पुनरालोचनम् दुःखरूपस्य दोषस्यानुदर्शनमि
ति वा किंच ८ ॥

इंद्रियार्थेषु विषयेषु वैराग्यं वैतृष्ण्यं अनहंकारः अहंकाराभावः
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शने जन्मनि योनियंत्रान्नि
सरणं दोषः मृत्यौ जरणवेदनादिदुःखं दोषः जरायां प्रज्ञाशक्तितेजसेंद्रियबलहानिरिति दोषः व्याधौ शिरोरोगज्वरा
दिपीडा दोषः तथा दुःखेषु आदिव्याध्यादिषु दोषः तेषां सर्वे
षां अनुदर्शनमालोचनं ८ ॥

रणवीरसमिद्धोधिनी॥

किंच इंद्रियार्थेषु शब्दादिषु दृष्टादृष्टेषु भोगेषु रागराहित्यं अन
हंकारोऽहंकाराभावस्तथा जन्मादिदुःखांतेषु प्रत्येकं दोषानु
दर्शनं जन्मनि गर्भवासाधोनिष्क्रान्तिस्मरणं दोषस्तस्यालो
चनं मृत्यौ दोषानुदर्शनं तथा जरायां प्रज्ञाशक्तितेजोनिरोध
दोषालोचनं तथा व्याधिषु रोगेषु आध्यात्मादिषु दुःखेषु दोषा
नुदर्शनमिति प्रथमरभावः अस्मिन्विषमे संसारे स्वात्मनिज

न्मादिदोषसंभवपर्यालोचनादिंद्रियार्थेष्ववैराग्यमाश्रित्य
स्ववर्णाश्रमोचितेधर्मेवमपनापाोदेहः हेयत्वीयइति ८॥

मधुभाष्य

८॥

भाषा अनुवाद टीका

और इन्द्रियार्थ जो रूप आदि विषय तिनमे वैराग्य और अनहंका
रता तथा जन्म मृत्यु जरा व्याधि दुख दोष इनको वार वार देख
ना चाहिये ८ ॥

दोहा

इंद्रियविषय विरागताबिन हंकारहि होय जन्ममरण हय
रोग दुखदोष निदर्शन सोय ८॥

68

असक्तिरनभिष्वंगः पुत्रदारगृहादिषु नि
त्यंच समचित्तत्वमिष्टानिष्टोपपत्तिषु ९

शांकरभाष्य टीका १

किञ्च असक्तिरिति असक्तिः सक्तिः सङ्गनिमित्तेषु विषयेषु प्रीति
मात्रं तदभावोऽसक्तिरनभिष्वङ्गोऽभिष्वङ्गाभावोऽभिष्वङ्गोनाम शक्ति
विशेषएवानन्यात्मभावनालक्षणोयथा अन्यस्मिन् सुखिनि दुःखिनि
वाहमेव सुखी दुःखी च जीवति मृते वाहमेव जीवामि मरिष्यामि
चेति क्वेत्याह पुत्रदारगृहादिषु पुत्रेषुदारेषु गृहेषु आदिग्रहणादन्ये ष्व
प्यत्यन्तेष्टेषु दासवर्गादिषु तच्चोभयं ज्ञानार्थत्वात् ज्ञानमुच्यते
नित्यञ्च समचित्तत्वं तुल्यचित्तता क्व इष्टानिष्टोपपत्तिषु इष्टानाम
निष्टानां चोपपत्तयः संप्राप्तयस्तास्विष्टानिष्टोपपत्तिषुनित्यमेव
तुल्यचित्तता इष्टोपपत्तिषु न हृष्यति न कुप्यति चानिष्टोपपत्ति
षु तच्चैतन्नित्यं समचित्तत्वं ज्ञानं ९ ॥

आनंदगिरिकृतटीका २

ज्ञानस्यान्तरङ्गमेव हेत्वन्तरमाह किञ्चेति ननु शक्तेरेवाभिष्वङ्गा
भावत्वात्पुनरुक्तिरित्याशंक्याभिष्वङ्गोशक्तिद्वारा निरस्यति अभि
ष्वङ्गोनामेति अन्यस्मिन्नेव पुत्रादावनन्यत्वधिया तद्गते सुखादावात्म
नितद्भावनाख्ये शक्तिविशेषस्तमेवोदाहरति यथेति उक्तविशेषणयो
राकाङ्क्षाद्वारा विषयमाह क्वेत्यादिना उक्तविशेषणयोर्ज्ञानशब्दो
पपत्तिमाह तच्चेति सदा हर्षविषादशून्यमनस्त्वमपि ज्ञानहेतुरि
त्याह नित्यञ्चेति तदेव विभजते इष्टेति तस्य ज्ञानहेतुत्वन्निगमय
ति तच्चैतदिति ९ ॥

स्वामिकृतटीका ३

किंचासक्तिरिति असक्तिःपुत्रादिपदार्थेप्रीतित्यागः अनभिष्वंगः पु
त्रादीनांसुखेदुःखेचाहमेवसुखीदुःखीचेत्यध्यासातिरेकाभावः इ
ष्टानिष्टयोरुपपत्तिषुप्राप्तिषुनित्यंसर्वदासमचित्तत्वं ९ ॥

पैशाचभाष्य टीका ४

श्री·
गी·टी·
त्र·

69

असक्तिःसंगाभावःअनभिष्वंगःअभिष्वंगोन्यस्मिन हेबुद्धिः ९ ॥

रामानुजभाष्यटीका ५

असक्तिरिति असक्तिः आत्मव्यतिरिक्तविषयेषु संगरहितत्वं अनभिष्वंगः पुत्रदा
रगृहादिषु शास्त्रीयकर्मोपकरणत्वातिरेकेणाश्लेषरहितत्वं नि
त्यंच समचित्तत्वमिष्टानिष्टोपपत्तिषु संकल्पप्रभवेष्विष्टानिष्टो
पनिपातेषु हर्षोद्वेगरहितत्वं ९ ॥

अभिनवगुप्तकृतटीका ८

स्पष्टार्थम् ९ ॥

परमार्थप्रपाटीका ७

असक्तिरिति पुत्रादिषु असक्तिः प्रीतित्यागः अनभिष्वंगः पुत्रदार
गृहादेरात्मत्वबुद्धिः तयोः आत्मन्यारोपणं श्रुतिरपि शातपथी आत्मै
वेदमग्र आसीदेक एव सोऽकामयत जाया मे स्यादथ प्रजायेयाथ वि
त्तं मे स्यादथ कर्म कुर्वीयेत्येतावान्वै कामो नेच्छंश्च नातो भूयो विन्देदि
ति भाष्ये अग्रे विवाहात् पूर्वं इदं मयं आत्मदेहमात्रत्वेन एवासीत्
सः जाया मे स्यादिति अकामयत अभिलषितवान् अनन्तरं प्रजायेय
प्रजारूपेण स्यामिति अथ तन्निर्वाहार्थं मे वित्तं स्यादित्यकामयत
दर्थं कर्म कुर्वीयेति एवमेतावानेव कामोऽभिलाभिलाषः तत्सत्तत्सव
भवति परिणामे दुःखस्वरूपत्वात् तथापि अतः जायादिरूपं वा इत्य
भूयो महत्तरं न विन्देत न जानाति वाऽयं गार्हस्थ्येन मोहितत्वात् अथैत
त्तदेपतानं याहदृश्येयायइत्याह श्रुतिः मन एवास्यात्मा वाग्जा
या प्राणः प्रजेत्यादि तथा इष्टानिष्टोपपत्तिषु प्राप्तिषु सर्वदा सम
चित्तत्वंच ९ ॥

वनमाली टीका

सक्तिर्म
मदभिमतेनानेन मात्रेण प्रीतिः अस्मिन् सति हर्षितः दुःखितेत्यहमेव
दुःखी सुखी चेत्येवं प्रीतिरभिष्वंगः तद्रहितत्वम् असक्तिरनभिष्वंगः पुत्र
दारगृहादिषु पश्वादि सर्वेषु लोके हविषयेष्वित्यर्थः नित्यंच
सर्वदा समचित्तत्वं हर्षविषादशून्यमनस्त्वमिष्टानिष्टोपपत्तिषु उप
पत्तिः प्राप्तिः इष्टप्राप्तौ हर्षाभावोऽनिष्टप्राप्तौ विषादाभाव इत्यर्थः ९

ब्रह्मवैजयन्ती टीका ९

किंच असक्तिरिति पुत्रदारगृहादिष्वन्येषु चादिशब्दोपात्तदासदासी
पशुधनद्रव्यादिषु आत्मत्वेन सजीयेषु नामसु असक्तिः ममैवैते इत्याम
भिन्नत्वेन सामान्यप्रीत्यभावः अनभिष्वंगः पुत्रादिषु तेषु च अहमेवा
यमित्यात्माभिन्नत्वेन विशेषप्रीत्यभावः इष्टानिष्टोपपत्तिषु शत्रुपुत्र
मरणादिषु समीचीनोऽयमभवतीति हर्षाभावत्वं अनिष्टप्राप्तिषु स्वपु
त्रमरणादिषु च विषादाभावत्वं अथाहं जीवास्य यद्यहं स्तोसौ सुस्ला
हानि व्याकुलचित्तरहितत्वमित्यर्थः ९ ॥

मधुसूदनी टीका ९

सक्तिर्ममेदमित्येतावन्मात्रेण प्रीतिः अभिष्वंगस्त्वहमेवायमित्यनन्य
त्वभावनया प्रीत्यतिशयः अन्यस्मिन् सुखिनि दुःखिनि वा अहमेव सु
खी दुःखी चेति तद्राहित्यमसक्तिः अनभिष्वंग इति वा केषु पुत्रदाराभि
ष्वंगो वर्जनीयावत् आह पुत्रदारगृहादिषु पुत्रेषु दारेषु गृहेषु आ
दिग्रहणादन्येष्वपि भृत्यादिषु सर्वेषु स्नेहविषयेष्वित्यर्थः नित्यं च
सर्वदा च समचित्तत्वं हर्षविषादशून्यमनस्त्वं इष्टानिष्टोपपत्तिषु उ
पपत्तिः प्राप्तिः इष्टोपपत्तिषु हर्षाभावः अनिष्टोपपत्तिषु विषादा
भाव इत्यर्थः च समुच्चयः ९ ॥

सदानंदी टीका ११

सक्तिर्ममेदमित्येव प्रीतिमात्रमुदीरिता अभिष्वंगस्तु पुत्रादौ तादात्म्या
ध्यासलक्षणः १ अन्यस्मिन् पुत्रभार्यादौ सुखदुःखोत्थिते सति अहमेव
सुखी दुःखीत्यादिरूपो ग्रहः २ वर्ज्यौ तौ सक्त्यभिष्वंगौ पुत्रदारगृहा
दिषु इष्टानिष्टपरिप्राप्तौ सर्वदा समचित्तता ३ इष्टप्राप्तौ न हर्षः स्यादा
निष्टप्राप्तौ विषादता ४ । ९ ॥

नीलकंठी टीका १२

असक्तिरिति सक्तिः पुत्रादौ ममतामात्रं अभिष्वंगस्तेन सह तादात्म्याभि
मानोऽयमेवाहमिति च पुत्रादेः सुखे हमेव सुखी नष्टे दुःखे हमेव दुःखी
ति संगाभिष्वंगौ तद्वर्जनमित्यर्थः समचित्तत्वं हर्षविषादराहित्यं अत्र
इष्टानिष्टोपपत्तिषु इष्टप्राप्तौ हर्षाभावः अनिष्टप्राप्तौ विषादाभावः ९

१३ श्री· गी·टी·

आनंदीटीका १३

असक्तिं पत्रऽऽचनसंगाभावः औदासीन्यं अनभिष्वंगो ममताभा
गः समचित्तत्वं हर्षशोकादिशून्यता ९ ॥

रामकंठीटीका १४

तथाविधस्य च स्वर्गादिफलेषु क्रियाविशेषेषु असक्तिरसंगऔ
दासीन्यं तथाऽहमस्य खेहेतेषु सुतकलत्रभवनादिषु अनभिष्व
ङ्गः सर्वस्वपरिग्रहपरित्यागपर्यन्तौ चदशोप्राप्तेष्विष्टानिष्टोपपत्ति
षु प्रियाप्रियपदार्थप्राप्तिषु सतीषु समचित्तत्वं हर्षशोकादिवि
काररहितान्तःकरणत्वमेवमेव ॥ ९ ॥

लास्यकी [illegible]टीका १५

किंच असक्तिः पुत्रादिपदार्थेष्वनिमग्नमनस्कत्वं अनभिष्वङ्गः पुत्रा
दीनां सुखे दुःखे चाहमेव सुखी दुःखी इत्यध्यासातिरेकाभावः
इष्टानिष्टयोरुपपत्तिषु प्राप्तिषु नित्यं समचित्तत्वं हर्षविषा
दरहितमनस्कत्वम् [illegible] ९ ॥

पंवोलीटीका

पंचोलेटीका

किंचअसक्तिरिति पुत्रदारगृहादिष्वसक्तिःप्रीत्यभावःअनभिष्वं-
गःएकत्वाभिमानाभावःचपुनःइष्टानिष्टोपपत्तिषुइष्टानिष्टप्रा-
प्तौनिरंतरंसमचित्तत्वंतुल्यचित्तता ९॥

रणवीरसमिद्धोधिनी॥

किंचअसक्तिरिति असक्तिःस्नेहनिमित्तेषुविषयेषुसक्तिःसं-
गःप्रीतिमात्रंतस्याभावः अनभिष्वंगोभिष्वंगःस्नेहा तदादिसं
पुत्रेषुदारेषुगृहेषुचादिशब्देनभृत्यादिग्रहणंतथानित्यंसम-
चित्तत्वंसमानचित्तताइष्टस्यप्राप्तौहर्षस्याकरणमनिष्टस्याप्रि-
यस्यप्राप्तौकोपस्याधारणं जयेपराजयेचसमचित्तोभूत्वायोद्धुं
प्रवृत्तस्यपुत्रदारादीनामपिचिंतावसादेवर्जनीया तथानि-
र्गमनकालेतैःसंगोपिनकार्यइतिभावः ९॥

मधुभाष्य

९॥

भाषा अनुवाद टीका

और पुत्र दारा धन आदिमे असक्ति कहे प्रीतित्याग और पुत्रादि मे सुख दुख देखि जो मै सुखी अथवा दुखी हू ऐसा मानिलेना अभिष्वंग है तिसका त्याग और इष्ट और अनिष्ट दोनोकी प्राप्ति मे सर्वदा समचित्त कहे चित्तकी एकरूपता अर्थात् सावधान चित्त रहे ९ ॥

दोहा

अनासक्ति नहि प्रेम जो पुत्र मित्र गृहमांहि नित्यहि समता चित मे इष्ट अनिष्ट परजाहि ९॥

मयि चानन्ययोगेन भक्तिरव्यभिचारिणी
विविक्तदेशसेवित्वमरतिर्जनसंसदि १०

शांकरभाष्ये टीका १

किञ्च मयि चेति मयि चेश्वरेऽनन्ययोगेनापृथक्समाधिना नान्यो
भगवतो वासुदेवात् परोऽस्त्यतः स एव नो गतिरित्येवं निश्चिताऽव्य
भिचारिणी बुद्धिरनन्ययोगस्तेन भजनं भक्तिर्न व्यभिचरणशीला
अव्यभिचारिणी सा च ज्ञानं विविक्तदेशसेवित्वं विविक्तः स्वभाव
तः संस्कारेण वा अशुच्यादिभिः सर्पव्याघ्रादिभिश्च रहितः अरण्य
नदीपुलिनदेवगृहादिभिर्विविक्तो देशस्तं सेवितुं शीलमस्येति
विविक्तदेशसेवी तद्भावो विविक्तदेशसेवित्वं विविक्तेषु हि देशेषु
षु चित्तं प्रसीदति यतस्ततः आत्मादिभावना विविक्ते उपजायतेऽ
तो विविक्तदेशसेवित्वं ज्ञानमुच्यते अरतिररमणं जनसंसदि
जनानां प्राकृतानां संस्कारशून्यानामविनीतानां कलहोत्सुक
(?)तचित्तानां संसत् समवायो जनसंसत् न संस्कारवतां विनीतानां
संसत्तस्या ज्ञानोपकारकत्वात् अतः प्राकृतजनसंसद्यरतिर्ज्ञाना
र्थत्वात् ज्ञानं १० ॥

आनंदगिरिकृत टीका २

साधनान्तरमाह किञ्चेति अनन्ययोगमेव संक्षिप्य व्यनक्ति नेत्या
दिना उक्तधीद्वारा जातायां भक्तौ भगवति स्थैर्यं दर्शयति नेति
तत्रापि ज्ञानशब्दस्य हेतुत्वादिमाह सा चेति देशस्य विविक्तत्वे हि
विपक्षदाहरति विविक्तइति तदेव स्फुटयति अरण्येति उक्तदेश
सेवित्वं कथं ज्ञाने हेतुस्तत्राह विविक्तेष्विति आत्मादीत्यादिश
ब्दे न परमात्मा वाक्यार्थश्चोच्यते तत्त्वरति विषयत्वेनाविषयत्वे
नाविशेषतो जनसंसन्मात्रे किमिति न गृह्यते तत्राह तस्या इति
सन्तः सङ्गः स्म भेषजमित्युपलक्ष्यादित्यर्थः १० ॥

स्वामिकृतटीका ३

किं च मयीति मयि परमेश्वरेऽनन्ययोगेन सर्वात्मदृष्ट्या अव्यभिचा

विण्येकांतभक्तिः विविक्तः शुद्धः चित्तप्रसादकरस्तं देशं सेवितुं शीलं य
स्य तस्य भावस्तत्त्वं प्राकृतानां जनानां संसदि सभायामरतिः रत्यभावः १०

पिशाचभाष्यटीका ४

विविक्तदेशसेवित्वं रहस्यदेशसेवित्वं १० ॥

रामानुजभाष्य टीका ५

मयीति मयि सर्वेश्वरे च एकांतयोगेन स्थिरा भक्तिः जनवर्जितदेश
वासित्वं जनसंसदि चाप्रीतिः १० ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् १० ॥

परमार्थप्रपा टीका ७

मयीति मयि परमेश्वरे अनन्ययोगेन सर्वात्मदृष्ट्या अव्यभिचा
रिणी एकांतभक्ति विविक्तः शुद्धचित्तप्रसादकरो यो देश
स्तन्निवासे शीलं यस्य प्राकृतानां जनानां संसदि सभाया
मरतिः १० ॥

वनमाली टीका ८

मयि सर्वेश्वरे सर्वात्मन्यथी सर्वैकप्रेमप्रवाहः अनन्ययोगेन ना
न्यो भगवतो वासुदेवादन्यः कोऽस्त्यतः स एव नो गतिरित्येवं निश्च
येनाव्यभिचारिणी केनापि प्रतिकूलेन हेतुना निवारयितुमशक्या
विविक्तः स्वभावान्तःस्वकारात् शुद्धः सर्वव्याघ्रादिशून्यश्च समेशुचौ श

केणवह्निवालुकादिविवर्जिते शुद्धजलाश्रयादिभिः मनोनुकूले
नतुवस्त्रःपीडने गुहानिवाताश्रयेनयोजयेदितिश्रुतेः जनानांमो
हमार्गविरुद्धानांविषयभोगवार्तानस्मरणेसंसदिसभायांन
त्वविचारप्रतिकूलायामरतिस्मरणेसाधूनांसंसदिनरतिकार्यैव मं
तदुक्तं संगःसर्वात्मनाहेयःसचेत्त्यक्तुंनशक्यते सद्भिःसहक त्य
र्तव्यःसंतां संगोहिभेषजमिति १० ॥

अस्मवैजयन्ती टीका १०

किंच मयिचानन्ययोगेनेति अनन्ययोगेन न अन्यःश्रीकृष्णादन्य
योयोगःप्राप्त्युपायस्तस्मिन्नस्यात्तेनसएवमेगतिरितिनिश्चयेनम
यिपुरुषोत्तमेभगवतिवासुदेवेऽव्यभिचारिणीकेनापिविघ्नेनन्ह
न्तनावारयितुमशक्यास्थिराभक्तिःविविक्तदेशसेवि विविक्तदेश
सेवित्वं विविक्तंव्याकुलव्यालव्याघ्रदंशमशकाद्युपद्रवरहितंप
वित्रंगंगायमुनाद्युपेतमथुरापुष्करप्रयागादिसेवितंशीले
यस्यसतथातस्यभावस्तत्त्वंतथाचश्रुतिःसमेशुचौशर्करवह्निवा
लुकाविवर्जितेसर्वजलाशयान्वितेमनोनुकूलेनतुचक्षुपीड
नेगुहानिवाताश्रयणेःप्रयोजयेदितिजनसंसदितिजनानांवि
षयभोगलम्पटानामात्मज्ञानविमुखानांदुर्जनानांसंसदिसभा
यामरतिःप्रीत्यभावः आत्मज्ञानसाधनशीलानांजनानांतुसङ्गः
कार्यएवतथाचोक्तंसङ्गःसर्वात्मनाहेयःसचेत्त्यक्तुंनशक्यतेसम
द्भिःसहकर्तव्यःसन्तोसंगोहिभेषजमितितस्मात् सर्वजनानामेव
संगत्यागेनात्मर्थंकिंत्वात्मज्ञानविमुखजनसंगत्यागएवनतु
हरिजनसङ्गत्यागइत्याशयः १० ॥

मधुसूदनी टीका १०

किंच मयिचभगवतिवासुदेवेपरमेश्वरेभक्तिःसर्वोत्कृष्टतानहर्वि
का प्रीतिःअनन्ययोगेननान्योभगवतोवासुदेवात्परोस्ति अ
तःसएवनोगतिरित्येवंनिश्चयेनअव्यभिचारिणीकेनापिप्रति
कूलेनहेतुनानिवारयितुमशक्यासापिज्ञानहेतुः प्रीतिर्निर्याव
न्तायिवासुदेवेनमय्यनेदेहयोगेननावदित्युक्ते विविक्तःस्वभा

श्री॰
गी॰ टी॰
त्र॰
74

वतः संस्कारतो वा शुद्धः शुद्धैर्विभिः सर्पव्याघ्रादिभिश्च रहितः सरयु
नीपुलिनादिः विविक्तप्रसादकोदेशः तत्सेवनशीलत्वं विविक्तदेशसे
वित्वं तथाच श्रुतिः समे शुचौ शर्करावह्निवालुकाविवर्जिते शब्द
जलाश्रयादिभिः मनोनुकूलेन तु चक्षुपीडने गुहानिवाताश्रयणे
नप्रयोजयेदिति जनानामात्मज्ञानविमुखानां विषयभोगलंपटो
पदेशकानां संसदि समवायेन तत्त्वज्ञानप्रतिकूलायामरतिरमणं
साधूनां तु संसदि तत्त्वज्ञानानुकूलायां रुचितैव तथा चोक्तं संगः
सर्वात्मना हेयः स चेत्यक्तुं न शक्यते स सद्भिः सह कर्तव्यः सन्तः सं
गस्य हि भेषजमिति १० ॥

सदानंदी टीका ॥

वासुदेवे भगवति मयि श्रीपरमेश्वरे सर्वात्मकत्वविज्ञानपूर्विका
प्रीतिरुत्तमा १ वासुदेवात्परो नान्यः पुमर्थः सर्व एव गतिः इत्येव
निश्चयेनानन्या विघ्नैर्नाभिभूयते २ सा भक्तिरुत्तमं ज्ञानं साधनं ज्ञा
नसाधने स्वभावतो वा संस्काराच्छुद्धो देशो यत्र योक्तितः ३ तत्से
वनं विविक्तशीलमस्यन्तज्ञावपवतनं प्राकृतानां जनानां च संसदा
भोगैकचेतसां ४ सभायामरतिः शास्त्रप्रतिकूलानुवादिनां
साधूनां तत्त्वनिष्ठानां सभायां तु चिरा रतिः संगः सर्वात्मना हेयः
स चेद्धातुं न शक्यते सद्भिः सह कर्तव्यः सन्तः संगस्य भेषजं
५ इत्थं मदालसा माताप्यलर्कं प्रत्युदीरिते ६ १० ॥

नीलकंठी टीका १२

मयीति श्लोकः स्पष्टार्थः १० ॥

आनंदीटीका १३

अनन्ययोगेन वासुदेवः सर्वमिति निश्चयादन्येन पदार्थेन
योगाभावस्तेन अव्यभिचारिणी केनचिदपि विघ्नेन नि
वारयितुमशक्या १० ॥

रामकंठीटीका १४

तस्मिञ्ज्ञानतरोर्ज्ञानाविषयपल्लवपुष्पस्थानीयायां गुणसा
मग्र्यां निर्हितायां फलस्थानीयां मयि भक्तिरूपां साकी

दृशीअव्यभिचारिणीनिरपायाकेनहेतुनाअनन्येनयोगेनानन्येनय
थाप्रतिपादितमत्स्वरूपव्यतिरिक्तेनवस्तुनायोगः संबंधोन्ययो
गस्तदभावोनन्ययोगस्तेन किमुक्तंभवति सर्वभावानांमत्स्व
रूपाव्यतिरिक्तत्वदर्शनंज्ञानंतरेः फलभूतामुख्यामभ
क्तिः साहिचतुर्थीज्ञानितत्स्वरूपाभक्तावस्थायथोक्तंश्रीकृ
ष्णानीतात्मैवमेमतइति तस्यां चसत्यां विविक्तदेशसेवित्वं
विविक्तदेशस्यतादृशानिरुत्तरभक्तिरसास्तनस्वादविघ्नका
रिचैतन्याचेतनवस्तुरहितस्यगिरिगुहाद्युपसरित्पुलिनगु
मगृहादिदेशस्यसेवित्वंभजनशीलता तद्विपरीतायांजन
संसदिविनयुत्थानहेतुलोकसभायामरतिरुद्वेगस्तत्परि
हरणमित्यर्थः १० ॥

लासिकी[illegible]टीका १५

किंच मय्यात्मन्यनन्येननिरंतरेणयोगेन भक्तिरुपासनाप्रोक्तलक्षणा
व्यभिचारिणीनिश्चलादृढा विविक्तः शुद्धः स्वभावतः संस्कार
तेवा वहिर्मुखानांयमत्मलपतांजनानांसभायामप्रीतिः [illegible] १०

पेवोलेटीका

किंचचपुनः मयिपरमेश्वरेविषयेअनन्ययोगेनअष्टांगकसमाधि
नाअव्यभिचारिणीध्रुवात्तानपूर्विकाभक्तिः विविक्तदेशसेवित्वं
एकांतसेवित्वंजनसंसदिअरतिः अप्रीतिः १० ॥

रमावीरसमिद्धोधिनी

किंचमयिचेति मयिपरमेश्वरेभगवतिवासुदेवेनन्ययोगे
ननान्योभगवतोवासुदेवात्परोस्ति सएवास्माकंपरागतिरि
त्येवंरूपायानिश्चितबुद्धिस्तयाभजनंभक्तिरव्यभिचारिणीन
व्यभिचरति देवांतरंसंसेवतेतच्छीलेत्यव्यभिचारिणी मदे

काष्ठेत्यर्थः विविक्तेति विविक्तः स्वभावतः संस्कारतो वाऽशु
शुद्धो देशस्तत्र स्वभावशुद्धोऽरण्यनदीपुलिनादिः संस्कारशु
द्धः स्वगृहादिर्विविक्तदेशः संसेवितुं शीलमस्येति विविक्त
देशसेवी तद्भावो विविक्तदेशसेवित्वं तथाजनानां सामान्या
सामान्यानां संस्कृतानामसंस्कृतानां वा संसत्समवायस्तस्मि
न्नरमणं तथा चैवमपि परमेश्वरे दृढाभक्तिः क्वाजनानां स्वव
र्णधर्मबहिर्भूतानां वैषम्यदृष्टीनां समवायेनागर्हितानां स
मानानां समूहेनागवतां तथा विविक्तदेशः पाषाणादिका
ठिन्यपरिहारेण सुखासनाभ्यसनार्थं संस्कृतो देशो रंगभूमि
स्तत्सेवनं विधेयमिति फलितमित्यर्थः १०॥

मधुभाष्य

१०॥

भाषा अनुवाद टीका

और परमेश्वरस्वरूप मेरेमे अनन्ययोगे अर्थात् सर्वत्र आत्मदृष्टि से अव्यभिचारिणी एकान्तभक्ति और विविक्त कहे शुद्ध अथवा चित्त प्रसन्नकारी जो निर्जन देश वहां को वास औ संसारीव्यवहारी दुष्ट मनुष्यों की सभामे अरुचि ९ ॥

दोहा

मोमे अनन्ययोग सें अनन्य भक्ति जो होय एकांत देशका
सेवन जनसमूह अरति सोय १० ॥

76

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनं
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ११

शांकरभाष्यं टीका १

किञ्च अध्यात्मेति अध्यात्मज्ञाननित्यत्वमात्मादिविषयं ज्ञानमध्या
त्मज्ञानं तस्मिन् नित्यभावो नित्यत्वममानित्वादीनां ज्ञानसाधनानां
भावानां परिपाकनिमित्तं तत्त्वज्ञानं तस्यार्थो मोक्षः संसारोपरमस्त-
स्यालोचनं तत्त्वज्ञानार्थदर्शनं तत्त्वज्ञानफलालोचने हि तत्साध-
नानुष्ठाने प्रवृत्तिः स्यादिति एतदमानित्वादि तत्त्वज्ञानार्थदर्शनान्त-
मुक्तं ज्ञानमिति प्रोक्तं ज्ञानार्थत्वात् अज्ञानं यदतस्मात् यथोक्तादन्य-
था विपर्ययो मानित्वं दम्भित्वं हिंसा क्षान्तिरनार्जवमित्याद्यज्ञानं
विज्ञेयं परिहरणाय संसारप्रवृत्तिकारणत्वादिति ११ ॥

आनंदगिरिकृत टीका २

साधनान्तरमाह किञ्चेति आत्मादीत्यादिशब्दोऽनात्मार्थस्तद्विषयं ज्ञा
ने विवेकस्तन्नित्यत्वं तन्निष्ठावत्त्वं विवेकनिष्ठो हि वाक्यार्थज्ञान
समर्थो भवति तेषां भावनापरिपाको नाम यत्नेन साधितानां प्रकर्ष
पर्यन्तत्वं तन्निमित्तं तत्त्वज्ञानमैकात्म्यसाक्षात्कारस्तत्फलालोचनं
किमर्थमित्याशंक्याह तत्त्वेति प्रवृत्तिःस्यादित्यत्र तत्त्वज्ञानार्थदर्शन
मप्येवमादिति शेषः ज्ञानस्यान्तरङ्गहेतुस्तबकमुपसंहरति एतदिति कि
मितितस्य विज्ञेयत्वमित्याशंक्याह परिहरणायेति तत्र हेतुः संसा
रेति तस्य प्रवृत्तिरुत्पत्तिस्तद्धेतुत्वान्मानित्वादि त्याज्यं ज्ञाने च त्या-
ज्यत्वे तेन तस्य ज्ञेयतेत्यर्थः इतिशब्दः साधनाधिकारसमाप्त्यर्थः ११

स्वामिकृतटीका ३

किंच अध्यात्मेति आत्मानमधिकृत्य वर्तमानं ज्ञानमध्यात्मज्ञानं तस्मि
न्नित्यत्वं नित्यभावः त्वंपदार्थशुद्धिनिष्ठत्वमित्यर्थः तत्त्वज्ञानस्यार्थः
प्रयोजनं मोक्षस्तस्य दर्शनं मोक्षस्य सर्वोत्कृष्टत्वालोचनमित्यर्थः ए
तदमानित्वमदम्भित्वमित्यादिविंशतिसंख्याकं यदुक्तमेतज्ज्ञानमि
ति प्रोक्तं ज्ञानसाधनत्वात् अतोऽन्यथा यत् हि परीतं मानित्वदम्भित्वादि

77

यदेतत् अज्ञानमिति प्रोक्तं वसिष्ठादिभिस्तेन विरोधित्वात् अतः सर्वथान
ग्राह्यमित्यर्थः ॥ ॥

पैशाचभाष्ये टीका ४

स्पष्टार्थम् ॥ ॥ ॥ ॥

रामानुजभाष्ये टीका ५

अध्यात्मेति आत्मनिज्ञानमध्यात्मज्ञानं तन्निष्ठत्वं तत्त्वज्ञानार्थदर्शनं त-
त्त्वज्ञानप्रयोजनं यत्तत्त्वं तन्निरन्तरत्वमित्यर्थः ज्ञायतेनेनात्मनिज्ञाने आ-
त्मज्ञानसाधनमित्यर्थः हेत्वसंबंधिनः अद्रुष्टसामानित्वायकमत्के
गुणहेत्वेवात्मज्ञानोपयोगि एतद्व्यतिरिक्तं सर्वं हेतुकार्यमात्मज्ञान
विरोधीत्यज्ञाने [illegible]
[illegible] ॥ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् ॥ ॥ ॥

परमार्थप्रपा टीका ७

किंच अध्यात्मेति आत्मानमधिकृत्य वर्तमानं अध्यात्मज्ञानं तस्मिन्नित्यत्वं नित्यभावः त-
त्पदार्थशुद्धिनिष्ठत्वमित्यर्थः तत्त्वज्ञानस्यार्थः प्रयोजनं मोक्षस्तस्य दर्शनं सर्वोत्कृष्टत्वा-
लोचनं एतत् अमानित्वादि अमानित्वादि विंशति प्रकारं ज्ञानं ज्ञानसाधनं प्रोक्तं अतोन्यथा अ-
स्माद्विपरीतं मानित्वादि यदेतदज्ञानमिति प्रोक्तं ज्ञानविरोधित्वात् अतः सर्वथात्या-
ज्यमित्यर्थः ॥ ॥

वनमाली टीका ८

आत्मानमधिगृह्य देहे जीवात्मपरात्मनोर्यज्ज्ञानं तस्मिन्नित्यत्वं तन्निष्ठावत्त्वं तत्त्वज्ञानार्थं भगवत्परोक्षार्थदर्शनं शास्त्रालोचनं श्रवण-
मननिदिध्यासनं च एतदमानित्वादि ज्ञानमिति प्रोक्तं ज्ञायतेनेने-
ति ज्ञानं करणे ल्युट् अतोन्यथा अस्माद्विपरीतं मानित्वादिकं यत्तदज्ञा-
नं विरोधित्वात् तज्ज्ञानविरोधिपरित्यागेन ज्ञानसाधनमेवोपादेयमि-
ति भावः ॥ ॥ ॥

ब्रह्मवैजयन्ती टीका ९

किंच अध्यात्मज्ञाननित्यत्वमिति आत्मानमधिकृत्य प्रवृत्तमात्मानात्म-
ज्ञा
विवेकरूपं यत् ज्ञानं तदध्यात्मज्ञानं तस्मिन्नित्यत्वं निष्ठावत्त्वं तत्त्वज्ञा-
नार्थदर्शनं तत्त्वज्ञानस्यार्थः प्रयोजनं यत्तत्त्वं तस्य दर्शनं निरन्तरं

यद्वा तत्वज्ञानस्य ऽयोर्थः तस्याप्तिलक्षणस्य दर्शनं हृदिस्मरणो
पन्तदमानित्वादिकं ज्ञानं ज्ञायते प्राप्यते ऽनेनेति व्युत्पत्तेः परंपरया
साक्षाच्च तस्यापि साधनभूतं प्रोक्तं तत्वविज्ञेयं ज्ञेयस्वरूपेण सर्वेश्व
रेण मया प्रकर्षेणोक्तं कथितं ऽ अतो ऽस्माज्ज्ञानाद्यज्ञानमस्मितदन्य
थात्म ज्ञानविरोध्यज्ञानम् ११ ॥

॥ मधुसूदनी टीका ९

ज्ञान अध्यात्मआत्मानमधिकृत्य प्रवृत्तमात्मानात्मविवेकज्ञानमध्यात्म
ज्ञानं तस्मिन्नित्यत्वं तन्नैव निष्ठावत्वं विवेकनिष्ठो हि वाक्यार्थज्ञान
समर्थो भवति तत्वज्ञानस्याहंब्रह्मास्मीति साक्षात्कारस्य वेदांतवा
क्यकरणकस्य अमानित्वादिसर्वसाधनपरिपाकफलस्य अर्थः प्रयो
जनं अविद्यातत्कार्यात्मकनिखिलदुःखनिवृत्तिरूपः परमानंदात्मा
वाप्तिरूपश्च मोक्षः तस्य दर्शनमालोचनं तत्वज्ञानफलालोचने हि
तत्साधने प्रवृत्तिः स्यात् एतदमानित्वादितत्वज्ञानार्थदर्शनांतं विं
शतिसंख्याकं ज्ञानमिति प्रोक्तं ज्ञानार्थत्वात् अतोन्यथा अस्माद्विप
रीतं मानित्वादि यत् तदज्ञानमिति प्रोक्तं ज्ञानविरोधित्वात् तस्मा
दज्ञानपरित्यागेन ज्ञानमेवोपादेयमिति भावः [illegible]
[illegible] ११ ॥

महानंदी टीका ॥

आत्मादिविषयं ज्ञानमध्यात्मज्ञानमुच्यते तन्नैवसततं निष्ठावत्वं ज्ञा
नैकसाधनं १ विवेकनिष्ठो वाक्यार्थज्ञाने हि भवति क्षमः तत्वज्ञान
स्य वेदांतवाक्यप्रामाणिकस्य च २ अहं ब्रह्मास्मीति साक्षात्कारस्य
भ्रांतिघातिनः अमानित्वादिकरणपरिपाकफलस्य च ३ प्रयोज
नमविद्यातत्कार्यदुःखादिबाधने द्विरूपपरमानंदावाप्तिमोक्षस्य
तस्य यत् ४ आलोचनं तदध्यात्मज्ञानसाधनमीरितं एतद्विंशति
संख्याकं ज्ञानार्थत्वेन हेतुना ५ ज्ञानमित्युक्तमस्माद्धि विपरीतम
तं यदं मानित्वादि तदज्ञानमुक्तं ज्ञानविरोधि यत् ६ अतो ज्ञानपरि
त्यागाज्ज्ञानं संपर्वोदितं जनैः ७ ११ ॥

नीलकंठी टीका १२ ॥

अध्यात्मशास्त्रजे ज्ञाने निष्ठावत्त्वमध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानस्यार्थः
प्रयोजनमविद्यानिवृत्तिरानंदावाप्तिश्च तयोर्दर्शने एतदमानित्वा
दितत्त्वज्ञानार्थदर्शनांतं विंशकं ज्ञानं ज्ञानसाधनमिति प्रोक्तं वेदे
षु अज्ञानं ज्ञानविरोधि इतोन्यथा यत्तत् अमानित्वादिकमित्यर्थः त
स्मात्तत्परित्यागेनामानित्वादिकमेवोपादेयमिति भावः ११ ॥

आनंदीटीका १३ ॥

अध्यात्मज्ञानमात्मानमधिकृत्य प्रवृत्तमात्मानात्मविचारणं त
स्मिन्नित्यत्वं तत्परत्वम् तत्त्वज्ञानार्थदर्शनं तत्त्वज्ञानार्थदर्शनं तत्त्व
ज्ञानार्थशास्त्रपर्यालोचनम् एतदमानित्वादिकं ज्ञानमिति त
त्त्वज्ञानोपायत्वेनोक्तं यत् तस्मादमानित्वादेरन्यथा विपरीतं दंभा
हंकारादिवत्प्रमाणमज्ञानमित्युक्तम् [illegible]
[illegible] ११ ॥

रामकंठीटीका १४

तथाऽध्यात्मज्ञाननित्यत्वमध्यात्ममात्मनि यज्ज्ञानं परमात्मस्व
भावसंवेदनं तन्नित्यमव्यभिचारि यस्य स तथा तस्य भावस्तत्त्वं
तस्मिंश्च सति तत्त्वज्ञानार्थदर्शनं तस्य परमात्मस्वरूपलक्ष
णस्य परस्य भावस्य ज्ञानं बोधः स्वसंवेदनानुभवः पूर्वेण प
देन ज्ञानसिद्धिं कल्पयतोत्तरेण सिद्धत्वमेव प्रतिपादितम् स
एवार्थः प्रयोजनं फलं यस्येति तस्य दर्शनं साक्षात्कारो निवृत्तरा
सिद्धिरित्यर्थः एते विविक्तदेशसेवित्वादयस्तत्त्वज्ञानार्थदर्श
नान्ताः फलभूताया भक्तेरसस्थानीया इत्येतावती गुणसाम
ग्री ज्ञानमिति प्रोक्तं स्पष्टोर्थः अतउक्तात् गुणसमूहाद्यथा यो
न विपरीतेन प्रकारेण मानित्वदंभित्वादिना यत् स्थितं तत्सर्व
मज्ञानं ज्ञानविपरीतं वेदितव्यमेतत् अपरस्माद्देवासुरसर्ग
कथनप्रसंगेन पुनरपि ज्ञानाज्ञानलक्षणं वक्ष्यति ११ ॥

लासिकी[illegible] टीका १५

किंच आत्मानमधिकृत्य वर्त्तमानं ज्ञानमात्मज्ञानोपदेशकं शास्त्रं तस्य पर्यालोचने नित्यत्वं नित्यभावः तत्त्वज्ञानरूपस्य पुरुषार्थस्य दर्शनं पुरुषार्थेषु सर्वोत्कृष्टं लोचनमित्यर्थः एतदमानित्वमित्यादि विंशतिसंख्याज्ञानमिति प्रोक्तं ज्ञानसाधनत्वाज्ज्ञानोत्तरभावित्वाच्च अतोऽन्यथास्माद्विपरीतं मानित्वादि यदेतदज्ञानमिति प्रोक्तं श्रीवसिष्ठादिभिः ज्ञानविरोधित्वात् अतः सर्वथाः रूपदोस्त्याज्यमित्यर्थः ११

[illegible] ॥११॥

पैचोलेटीका

किंच अध्यात्मेति अध्यात्मज्ञाननित्यत्वं आत्मादिज्ञाने नित्यत्वमिति भावः तत्त्वज्ञानार्थदर्शनं एतदमानित्वादि यदुक्तं तज्ज्ञानहेतुत्वात् ज्ञानमिति प्रोक्तं यत् अतएतस्मादज्ञानात् अन्यथा विपरीतं मानित्वदंभित्वादि तदज्ञानं तेषं संसारहेतुत्वात् ११

रगवीरसमिद्धोधिनी

किंचाध्यात्मेति आत्मन्यधिकृत्य प्रवृत्तं ज्ञानमध्यात्मज्ञानमात्मादिविषयं ज्ञानं स्वधर्मानुष्ठानज्ञानं च तत्र नित्यत्वं नित्यस्थितिभावो यथाव्याख्यातानाममानित्वादीनां साधनानां परिपाकफलं तत्त्वज्ञानं तस्यार्थः ऐहिकीय मोक्षसीतां आमुष्मिकी परपदप्राप्तिस्तस्यार्थस्य दर्शनं पुनः पुनर्विचारणं फलालोचनेदितत् साधनविधाने सम्यक्प्रवृत्तिर्जायते इत्यर्थः तदेतत्स्वेष्टसाधनं स्वष्टसाधनसाम्येन संस्तुत्योपसंहरति एतदिति एतदमानित्वादि तत्त्वज्ञानार्थदर्शनान्तं ज्ञानमिति ऐहिकामुष्मिकोपकारकारित्वाज्ज्ञानमिति नाम्ना प्रोक्तमभिहितं अज्ञानं यदतोन्यथेति अतोऽस्माद्यथोक्तादन्यथा विपर्ययेण मानित्वमप्यान्ती

79

यदिंसेत्यादि इहलोके परत्र चापकारित्वात्पित्रादिहरणायाज्ञान मिति नाशाभिहितं तस्मादज्ञानस्य परित्यागेन ज्ञानमेवोपा यमिति भावः ॥११॥

मधुभाष्य

११

भाषा अनुवाद टीका

और आत्माको अधिकार करिके वर्तमान जो ज्ञान तिसमे नित्यभा व अर्थात् तत्त्वमसि महावाक्य के तत्पद औ त्वं पदके अर्थपर वि श्वास और तत्त्वज्ञान का फल जो मुक्ति तिसीको प्रेक्ष रूपसे आलो चन करना इससे अमानित्व अदंभित्व आदि जो बीस कहे गये सो ई ज्ञान के साधन स्वरूप हैं यह वशिष्ठादि कोने कहा है और इ न बीसोके विपरीत जोमानदम्भहिंसा आदिबीस हैं तेइ ज्ञानके वि रोधी हैं औ अज्ञान के स्वरूप जानो इससे वे सदा वर्जनीय हैं ॥

दोहा

अध्यात्मज्ञान सुनित्यता तत्व ज्ञानार्थ दर्श ऐसो ज्ञान दिसोक हा और अज्ञान अपर्श ॥९॥

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते । अ
नादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ १२ ॥

शांकरभाष्यटीका १

यथोक्तेन ज्ञानेन ज्ञातव्यं किमित्याकांक्षायामाह ज्ञेयं यत्तदित्यादि ननु
यमा नियमाश्चामानित्वादयो न ज्ञेयाः तेन त्वमानित्वादिकस्य विह
ज्ञानः परिच्छेदकं दृष्टं सर्वत्रैव यद्विषयं ज्ञानं तदेव तस्य ज्ञेयस्य
परिच्छेदकं दृश्यते नह्यन्यविषयेण ज्ञानेनान्यदुपलभ्यते यथा घ
टविषयेण ज्ञानेनाग्निर्नैदोषः ज्ञान निमित्तत्वात् ज्ञानमुच्यते इति स
वोचाम ज्ञानसहकारिकारणत्वाच्च ज्ञेयमिति ज्ञेयं ज्ञातव्यं यत्तत्प्र
वक्ष्यामि प्रकर्षेण यथावद्वक्ष्यामि किं फलं तदिति प्ररोचनेन श्रोतृ
रभिमुखीकरणायाह यत् ज्ञेयं ज्ञात्वा अमृतत्वमश्नुते न पुनर्म्रियत
इत्यर्थः अनादिमत् आदिरस्यास्तीत्यादिमत् न आदिमदनादिमत् किं
तत् परं निरतिशयं ब्रह्म ज्ञेयमिति प्रकृतमत्र केचित् अनादिमत्
परमिति पदं छिन्दन्ति बहुव्रीहिणोक्तेऽर्थे मतुप आनर्थक्यमनिष्टं स्या
दित्यर्थविशेषं च दर्शयन्त्यहं वासुदेवाख्या पराशक्तिर्यस्य तन्मत्पर
मिति सत्यमेवमपुनरुक्तं स्यादर्थश्चेत् सम्भवति न त्वर्थः सम्भवति
ब्रह्मणः सर्वविशेषप्रतिषेधेनैव विजिज्ञापयिषितत्वात् न सत्तन्नास
दुच्यत इति विशिष्टशक्तिमत्त्वप्रदर्शने विशेषप्रतिषेधश्चेति विप्र
तिषिद्धः तस्मान्मतुपो बहुव्रीहिणा समानार्थत्वेऽपि प्रयोगः श्लोकपू
रणार्थः अमृतत्वफलं ज्ञेयं मयोच्यत इति प्ररोचनेनाभिमुखीकृत्याह
न सत्तत् ज्ञेयमुच्यत इति नाप्यसदुच्यते ननु महता परिकरबन्धे
न कण्ठरवेणोद्घुष्य ज्ञेयं प्रवक्ष्यामीत्यननुरूपमुक्तं न सत्तन्नास
दुच्यते इति न ह्यनुरूपमेवोक्तं कथं सर्वासु उपनिषत्सु ज्ञेयं ब्र
ह्मनेति नेत्यस्थूलमनण्वित्यादिविशेषप्रतिषेधेनैव निर्दिश्यते
नेदं तदिति वाचोगोचरत्वात् ननु तदस्ति यद्वस्त्वस्तिशब्देनोच्यते अथा
स्तिशब्देन नोच्यते यत् नास्ति तत् ज्ञेयं विप्रतिषिद्धं च ज्ञेयं तद
स्तिशब्देन नोच्यत इति च न तावन्नास्ति नास्तिबुद्ध्यविषयत्वात्तु

श्री॰
गी॰ टी॰
३॰

सर्वा बुद्धयोऽस्तिनास्तिबुद्ध्यनुगता एवं तर्ह्येवं सति ज्ञेयमप्यस्तिबुद्ध्यनु-
गतप्रत्ययविषयं वा स्यान्नास्तिबुद्ध्यनुगतप्रत्ययविषयं वा स्यान्नाती-
न्द्रियत्वेनोभयबुद्ध्यनुगतप्रत्ययाविषयत्वात् यद्धीन्द्रियगम्यं वस्तु घ-
टादिकं तदस्तिबुद्ध्यनुगतप्रत्ययविषयं वा स्यान्नास्तिबुद्ध्यनुगतप्रत्य-
यविषयं वा इदं तु ज्ञेयमतीन्द्रियत्वेन शब्दैकप्रमाणगम्यत्वान्न घ-
टादिवदुभयबुद्ध्यनुगतप्रत्ययविषयमित्यतो न सत्तन्नासदित्युच्यते
यत्तूक्तं विरुद्धमुच्यते ज्ञेयं न सत्तन्नासदुच्यत इति न विरुद्धमन्यदे-
व तद्विदितादथो अविदितादधीति श्रुतेः श्रुतिरपि विरुद्धार्थेति चे-
त् यथा यज्ञाय शालामारभ्य कोहि तद्वेद यद्यमुष्मिन् लोकेऽस्ति वा
न वेतीत्येवमिति चेत् न विदिताविदिताभ्यामन्यत्वश्रुतेरवश्यविज्ञेया-
र्थप्रतिपादनपरत्वात् यद्यमुष्मिन्नित्यादि तु विधिशेषोऽर्थवाद उपप-
त्तेश्च सदादिशब्दैः ब्रह्म नोच्यत इति सर्वो हि शब्दोऽर्थप्रकाशनाय प्र-
युक्तः श्रूयमाणश्च श्रोतृभिर्जातिक्रियागुणसम्बन्धद्वारेण संकेतग्र-
हणसव्यपेक्षोऽर्थं प्रत्याययति नान्यथा दृष्टत्वात् तद्यथा गौरश्व
इति वा जातितः पचतीति वा क्रियातः शुक्लः कृष्ण इति वा गुणतो
धनी गोमानिति च सम्बन्धतो न तु ब्रह्म जातिभेदतो न सदादिशब्द-
वाच्यं नापि गुणवत् येन गुणशब्देनोच्यते निर्गुणत्वान्नापि क्रियाश-
ब्दवाच्यं निःक्रियत्वान्निष्कलं निष्क्रियं शान्तमिति श्रुतेः न च सम्बन्ध्ये-
कत्वादद्वयत्वादविषयत्वादात्मत्वाच्च न केनचिच्छब्देनोच्यत इति यु-
क्तं यतो वाचो निवर्तन्त इत्यादिश्रुतिभिश्च १२ ॥

आनंदगिरिकृतटीका २

उत्तरग्रन्थमवतारयति यथोक्तेति प्रमातृवादीनां ज्ञानत्वमाक्षिप-
ति नास्तीति वस्तुपरिच्छेदकत्वात् ज्ञानत्वमाशंक्याह नहीति परि-
च्छेदकत्वात् ज्ञानत्वे ज्ञातृत्वात् परिच्छेदकत्वमित्यन्योन्याश्रयमित्य-
भिप्रेत्याह सर्वत्रेति ज्ञातृत्वस्यैव ज्ञाने परिच्छेदकमित्येतद्व्यतिरेक-
द्वारा विशदयति नहीति व्यतिरेकदृष्टान्तमाह यथेति प्रमातृवा-
दीनां ज्ञानत्वमाक्षिप्य प्रतिपादितं नैष दोष इति तत्र हेतुत्वेनोक्तं
स्मारयति ज्ञानेति तेन ज्ञानशब्दे हेत्वन्तरमाह ज्ञानेति प्रमातृवा

दीनां ज्ञानत्वमङ्गीकृत्यात्मत्वमवतारयति ज्ञेयमिति प्रश्नद्वारा ज्ञेयप्र
वचनस्य फलमुक्त्वा प्ररोचने कृतानेन श्रोतॄणामभिमुखत्वमापादयि
ते प्ररोचनफलोक्तिपरमनन्तरवाक्यमित्याह किमित्यादिना तदे
व विशिनष्टि अनादिमदिति आदिमत्वराहित्यमव्याकृतस्यापि न
तो विशेषं दर्शयति किन्तदिति भोक्तुरपि भोग्यात् परत्वमित्यतो
विशिनष्टि ब्रह्मेति अनादीत्येके पदं मत्परमिति पदच्छेदात्र पुन
रुक्तिरिति मतान्तरमथाप्यपयाति अत्रेति एकपदत्वसम्भवे किमि
ति पदद्वयमित्याशङ्क्याह बहुव्रीहिणेति आदिरस्य नास्तीति याव
हुव्रीहिणोक्तार्थलाभित्वादिमत्वनिषेधेनास्ति मतुपोऽर्थवत्वमिति
मतुपानर्थक्यमनिष्टं स्यादिति मत्वा पदं छिन्दन्तीति एवेण सम्ब
न्धः आदिरस्य नास्तीत्यनादीत्युक्ते मत्परमित्यु च्यमाने कोऽर्थः स्यादि
त्याशङ्क्याह अर्थेति उक्तव्याख्यानस्यायुक्तत्वान्नाये पुनरुक्तिसमा
धिरित्याह सत्यमिति अर्थ्यासम्भवे समर्थयते ब्रह्मणा इति तथा
पि विशिष्टशक्तिमत्व किं स्यादित्याशङ्क्याह विशिष्टेति तथापि
मतुपो बहुव्रीहिणा नत्वर्थस्य कथं सामर्थ्यं केन तत्राह तस्मादि
ति अनादिमत्परं ब्रह्मेत्यत्र पदान्तरं प्रतिक्षिप्य स्वपक्षः समर्थि
तः सम्प्रति ब्रह्मणोऽवलम्बनादेव कार्यकारणात्मकत्वप्रामाणुकत्वा
वादद्वारा न सदित्याद्यवतारयति अस्तत्वेति सत्कार्यमभिव्यक्त
नामरूपवादसत्कारणं नाद्विपर्ययादिति भागः ज्ञेयप्रवचन
मनिर्वाच्यविषयत्वात् प्रक्रमप्रतिकूलमित्याह प्रतिनत्वेति नि
विशेषस्य वक्तव्ये ते यत्वात्तद्विषयं प्रवचनं प्रक्रमानुकूलमि
त्युत्तरमाह नेत्यादिना अनिर्वाच्यत्वे न सम्बन्धासदित्युच्यमाने क
थमिदमनुरूपमिति पृच्छति कथमिति ब्रह्मणःप्रकाशस्य सिद्ध
त्वात् तद्दर्शविधिमुखेनोपदेशायोगाद्ब्रह्मणो जडत्वमिति हृदये नि
षेधद्वारोपदेशस्य वेदान्तेषु प्रसिद्धेरारोपितविशेषनिषेधरूप
मिदं प्रवचनमुचितमिति परिहरति सर्वेति ते यस्य ब्रह्मणो
विधिमुखोपदेशायोगे हेतुमाह वाच इति ब्रह्मणोऽस्ति शब्दावाच्य
त्वे तदविषयाणवन्नास्तित्वमित्याशङ्क्याह नत्विति एवमत

सर्वेऽपि ब्रह्मणि किमायातमित्याशंक्याह प्रथेति ज्ञेयस्यास्तिशब्दावाच्य
वे व्याख्यानश्चेत्याह विप्रतिषिद्धं चेति अस्तिशब्दावाच्यत्वादवस्तु ब्र
ह्मेत्यत्राप्रयोजकत्वमाह न तावदिति नास्तिबुद्धिविषयत्वमेवावस्तु
त्वे निमित्तमतस्तदभावाद्ब्रह्मणो नावस्तुत्वमित्यत एव यत्तोक्तं चोद
यति नन्विति सर्वा धियामस्तिधीत्वेन नास्तिधीत्वेन वानुगतत्वे
न्यतरधीगोचरत्वाभावे ब्रह्मणो निर्बोध्यं डबोरमिति फलितमाह
नेति ब्रह्मणो घटादिवैलक्षण्यादुभयबुद्ध्यविषयत्वेऽपि नानिर्वा
च्यत्वमित्याह नेत्यादिना घटादेरिन्द्रियग्राह्यस्योभयबुद्धिविषयत्वेऽपि
ब्रह्मणस्तदग्राह्यस्य नोभयधीविषयत्वं तथापि नानिर्वाच्यत्वं सच्चि
देकतानस्य शब्दप्रमाणादविषयत्वेन दृष्टत्वादिति युक्तमेव प्रपञ्च
यति यद्वीति परोक्तं विरोधमनुवदति यद्यपीति श्रुत्यवष्टम्भे न नि
रवद्ये न विरुद्धमिति सापि विरुद्धार्थे नानुमाने बोधकत्वस्यावि
रोधापेक्षत्वादिति शङ्कते श्रुतिरिति तस्या विरुद्धार्थत्वेनाप्रामाण्ये
दृष्टान्तमाह यथेति प्राचीनवंशं करोतीति पारलौकिकफलयज्ञा
नुष्ठानार्थं शालानिर्माणे प्रवृत्तस्य को हि तद्वेदेत्याद्या परलोकसत्त्वे
सन्दिहाना यथा विरुद्धार्था श्रुतिरप्रमाणमेवं विदिताविदितान्यत्व
श्रुतिरपीत्यर्थः नेयं श्रुतिर्विरुद्धार्थत्वेनामानतया हातव्या ब्रह्म
ण्यद्वितीये प्रस्तुतप्रतिपादने तन्मानत्वादित्युत्तरमाह नविदितेति
यत्र विरुद्धार्थत्वे को हीत्युदाहृते तत्र सर्वथार्थवादस्य विधिशेषस्य
स्वार्थे तात्पर्यादित्याह यदीति यत्र अनादिमत्त्वं तत्र वाच्यत्वं य
था गवादेर्न ब्रह्मण्यनादिमत्त्वमतस्तस्यावाच्यत्वमस्तिनिषेधेने
व बोध्यत्वमित्याह उपपन्नश्चेति नोच्यत इति निषेधेनैव तस्योप
देशादिति शेषः अनादिमतोऽपि स्यैव वाच्यत्वं तत्रैव सङ्गतिग्रहादिति
प्रपञ्चयति सर्वो हीति प्रस्तुतस्य अनादिद्वारेणाज्ञातसङ्गतेर्बोध्य
कस्य न बोधकत्वमदृष्टेरित्याह नान्यथेति अनादेः सकलहविषय
त्वमुदाहरति तत्पथेत्यादिना ब्रह्मणः स्वगोत्रमवर्णमित्यादिश्रु
तेः अनादिमतो भावान्न शब्दवाच्यतेत्याह न चेति केवलो निर्गुण
श्चेति श्रुतेर्गुणद्वारा ब्रह्मणोऽवाच्यतेत्याह न चेति केवलो निर्गु

णमिति निःक्रियत्वे मानमाह निष्कलमिति ब्रह्मणो द्वितीयत्वसा
धकोपनिषत्स्थ सिद्धवाद्विशिष्टस्य समन्वयस्य नासिद्धि सिद्धेनेत
हाराणि तस्य वाच्यत्वेत्याह न चेति ब्रह्मण्यभिधायकत्वा शब्दाप्रवृत्तौ
हेत्वन्तराण्याह अहृद्यत्वादिति ब्रह्मणो वाच्यत्वे श्रुतिमपि सम्वा
दयति यत इति १२ ॥

स्वामिकृतटीका ३

एभिः साधनैर्यज्ज्ञेयं तदाह ज्ञेयमिति ज्ञेयं यत्तत्प्रवक्ष्यामि श्रोतृणा
दरसिद्धये ज्ञानफलं दर्शयति यत् वक्ष्यमाणं ज्ञात्वामृतं मोक्षं प्रा
प्नोति किं तत् अनादिमत् आदिमन्न भवतीति परं निरतिशयं ब्र
ह्म अनादि इत्येतावतैव बहुव्रीहिणा नादित्वे सिद्धे पुनर्मतुप्प्र
योगः छांदसः यद्वा अनादीति च मत्परमिति च पदद्वयं मम विष्णोः
परं निर्विशेषरूपं ब्रह्मेत्यर्थः तदेवाह न सत्तन्नासदुच्यते इति वि
धिमुखेन प्रमाणविषयः सच्छब्देनोच्यते निषेधस्य विषयस्त्वसच्छ
ब्देनोच्यते इदं तु तदुभयविलक्षणमविषयत्वादित्यर्थः १२ ॥

पिशाचभाष्ये टीका ४

ज्ञेयमिति मत्परं मदात्मकं १२ ॥

अथैतद्यो वेत्तीति वेदितव्यलक्षणेन उक्त
स्तत्र तत्स्वरूपं विशोध्यते +

रामानुजभाष्ये टीका ५

+ज्ञेयं यत्तत्प्रवक्ष्यामीति अमानित्वादिभिः साधनैर्ज्ञेयं प्रत्यगात्म
तत्स्वरूपं प्रवक्ष्यामि यज्ज्ञात्वा जन्ममरणादिप्राकृतधर्मरहि
तममृतमात्मानं प्राप्नोति अनादिमत् आदिर्यस्य न विद्यते तदनादि
सहि प्रत्यगात्मनो उत्पत्तिर्न विद्यते अत एवान्तो न विद्यते श्रुतिश्च
न जायते म्रियते वा विपश्चिदिति मत्परं अहं परो यस्य तन्मत्परं
इतरस्त्वन्यो प्रकृतिं विद्धि मे परां जीवभूतामिति हि उक्तं भगवच्छरीरत
या भगवच्छेषैकरसमध्यात्मस्वरूपं तथा च श्रुतिः य आत्मनि ति
ष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यम
यतीति तथा स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः प्रधानक्षे
त्रज्ञपतिर्गुणेश इत्यादिका ब्रह्म बृहत्त्वगुणयोगि शरीराद्यर्थान्तर
भूतेभ्यस्ततः शरीरादिभिः परिच्छेदरहितं क्षेत्रज्ञतत्त्वमित्यर्थः स चाऽ

श्री॰
गी॰ टी॰
३॰
८६

नेऽपायकस्तत इति हि श्रूयते शरीरपरिच्छिन्नत्वे वाऽस्य कर्मकृतत्वे कर्म
वैषम्यान्मुक्तस्यानेकत्वे आत्मन्यपि वक्तव्यमाह ॥ प्रयुज्यते सगुणान्तर्मतो
ष्येतान्ब्रह्मभूयाय कल्पते ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्ष
ति समः सर्वेषु भूतेषु मद्भक्तिं लभते परामिति वचनेन सह सङ्गच्छ
ते कार्यकारणरूपावस्थाद्वयरहितं [illegible] सदसच्छब्दाभ्यामात्मस्व
रूपं नोच्यते कार्यावस्थायां देवादिनामरूपभाक्त्वेन सदित्युच्यते
तथा च श्रुतिः असद्वा इदमग्र आसीत् ततो वै सदजायत तद्धेदं तर्हि
तदेवाव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियते इत्यादि कार्यका
रणावस्थाद्वयस्यात्मनः कर्मरूपाविद्याचेष्टनकृतः न स्वरूपकृत
इति सदसच्छब्दाभ्यामात्मस्वरूपं नोच्यते यद्यपि सद्वा इदमग्र आ
सीदिति कारणावस्थं परं ब्रह्मोच्यते तथापि नामरूपविभागान
र्हसूक्ष्मचिद्वस्तुशरीरं परं ब्रह्म कारणावस्थमिति कारणावस्थाया
हेत्वे हेत्वत्स्वरूपमिति पूर्वं ब्रह्मवाच्ये हेतुत्वसमावस्थाकर्मकृते
ति परिशुद्धस्वरूपं न सदसच्छब्दनिर्देश्यं १२ ॥

अभिनवगुप्तकृत टीका ९

एतेन ज्ञानेन यज्ज्ञेयं तदुच्यते ज्ञेयं यत्तत्प्रवक्ष्यामि इत्यादि मञ्ज्ञा
वायोपपद्यते इत्यनन्तम् अनादिमत्परं ब्रह्मेत्यादिभिर्विशेषणैर्ब्रह्म
स्वरूपाक्षेपात्रयग्राहकं सर्वप्रवादानाभिविहितविज्ञानापृथग्भा
वं कथयति एतानि च विशेषणानि पूर्वमेव व्याख्यातानीति किं
निष्फलया पुनरुक्त्या एतत्तत्त्वज्ञानं ज्ञेयात्मकं त्रयं योऽवेत्ति स
एव मद्भक्तः स च मद्भावं एति १२ ॥

परमार्थप्रपा टीका

एभिः साधनैर्युक्तं ज्ञेयमिति षड्भिः यत् ज्ञेयं तत्प्रवक्ष्यामी
ति श्रोतुरवधानसिद्धये ज्ञानफलमाह यदिति यद्वस्तुप्रमा
णं ज्ञात्वाऽमृतमिति मोक्षमश्नुते प्राप्नोति किं तत् अनादिम
त्भवतीत्यनादिमत्परं निरतिशयं ब्रह्म यद्वा मत्परं मनः
परं निर्विशेषं ब्रह्म तदेवाह न सदिति तद्ब्रह्म न सच्चाप्यसत् वि
धिमुखेन प्रमाणस्य विषयः सदित्युच्यते निषेधस्य विषय
मसत् इदं तदुभयविलक्षणमविषयत्वात् १२ ॥

वनमाली टीका

विकारोक्तिप्रसंगात्तदंतर्भूतमायनात्मुक्तानत्वसंगाज्ज्ञानस्यस्वो
विषयः सचयः यत्तत्प्रावक्ष्ये यर्थंइदयत्तद्रूपः पश्चात्वतित्तानमपि
महामहत्वंभेगात्यायेनयतस्यपरिच्छेयतस्पनितायाः प्रागेवनिरूपय
तित्तेयमिति श्रोतुरभिमुखीकरणाययज्ज्ञेयंतत्प्रवक्ष्यामीत्यहज्ञेयंयत्तत्प्र
वक्ष्यामीति सचयइतिप्रज्ञातेपरब्रह्मेत्यनेनोच्यते अनादिमदित्या
दिविशेषणैर्यत्प्रभावइत्यनेनउपपद्यते अज्ञानविषयनेत्रादिरस्मा
श्यैनानादीत्येतावडुक्तिमात्रेणाभीष्टार्थलाभेपिनत्रादिरनादि
रितिनत्वनत्वरुपभ्रमः स्यात् ततस्तद्बलकारणमेवतनभवतीति
भ्रमस्यात्रपरिहारार्थमनादिमदि सर्वकेत्रादिरस्मा लीत्यादिम
नादिमत्अनादिमत्सर्वस्यस्वर्गकारणंस्वकारणरहितंचेत्यर्थः य
द्वानादिर्यस्येतिवहुव्रीहिणार्थलाभेप्यतिशयतेनित्ययोगेवामतुपः
प्रयोगः यत्तुनादीतिचमत्परमितिचयदंपिन्वामत्वगुणात्परस्तुत्
कृष्टेतिविशेषणपरंब्रह्मेत्याहसत्तसौगतसंख्यविवशोमतः परत
रंमात्सर्किविदस्तिपनेजयेत्यानुसहकृडक्ममपिनस्मरतीत्युपेस्प
रभावेप्ययेयदवच्छेदोहषितस्तथाहिमनकेचित् अनादिमत्परमि
तिपदंहिंदेतिगहुव्रीहिणाकर्मधमत्तुपश्चानर्थक्यात्तत्रदेवास
देवाख्यापराशक्तिर्यस्यतत्मत्परमिति चेत्तस्मादेवमपोतकृत्वाम्
ययथंः संभवतिब्रह्मणः सर्वविशेषनिषेधेनैवविज्ञितापयिषि
तत्वात्तस्यतमासङ्घयतइतिविशिष्टशक्तिमत्वप्रदर्शनेविशेषप्र
तिषेधस्येतिविरुद्धे तस्मात्सनपोवहुव्रीहिणासमानार्थत्वेपिप्र
योगः श्लोकपूरणार्थइति अत्रविशेषनिषेधस्येवविशेषत्वेतस
देविशेषनिषेधोक्तियोहनेत्यपसडुक्तमेवहृषणोदकं सतन्मूनं•
मसदमूर्तेतडुभयविलक्षणत्वात्तडुभयशब्दे नोच्यते यदन्यद्वा
पोश्रोतविहांचैनत्सन् वायुरंतरिक्षंचासदितिश्रुत्यन्तसारात्स
दसत्पदवाच्यपंचमहाभूतविलक्षणंततत्पदवाच्यमित्यर्थः १२

एवममानित्वादिभिःसाधनैःसाध्यंज्ञानस्वरूपमुपदिश्यापेदानीं
तेनज्ञानेनज्ञेयंयत्पात्मागात्मस्वरूपंपरमात्मस्वरूपंवाह ज्ञेयंय

श्री॰
गी॰ टी॰
उ॰

84

नरिति यत्ज्ञेयं अमानित्वादिसाधनसाध्येनज्ञानेनज्ञेयं यत् अन
यो वेत्तीति वेदितव्यं लक्षणं हे ब्रह्मस्वरूपं परमात्मस्वरूपं च तत्प्र
वक्ष्यामि प्रकर्षेण सम्बोधनतया वक्ष्यामि यत्ज्ञेयं ब्रह्मस्वरूपं ज्ञात्वा
बद्धजनोऽमृतं प्रकृतिसंबंधरहितं स्वस्वरूपं पर स्वरूपं वा प्राप्नुते मात्म
लभ्यते ननु ज्ञेयं किमित्याशंक्य ज्ञेयस्य स्वरूपं प्रतिपादयन्ना
दीत्यारभ्येति हेत्वभिमन्तानां लोकानां सार्धं तामाह तत्रादौ जीव
पदेऽप्यदर्शयति अनादिनास्त्यादिर्यस्य तत् अंतस्याप्युपलक्षण
मेतत् आद्यंतशून्यमित्यर्थः नजायतेम्रियते वा विपश्चिदित्यादि
श्रुतेः नजायते म्रियते वा कदाचिदित्याद्युक्तत्वाच्च मत्परं अहंम
वैश्वरःपरःस्वरूपगुणशक्त्यादिभिरधिको यस्य तत् ब्रह्म बृहत्त्वगुण
योगित्वादात्मन्यपि ब्रह्मशब्दः प्रयुज्यते विज्ञानं ब्रह्म चेद्वेदेत्यादिश्रु
तेः सगुणान्समानीत्येतान् ब्रह्मभूयाय कल्पते ब्रह्मभूतःप्रस
न्नात्मा नशोचति नकांक्षतीति वक्ष्यमाणाच्च तदात्मस्वरूपं कार्या
वस्थारहितत्वेन सन्नोच्यते कारणावस्थारहितत्वेन चासदपि नो
च्यते विभक्तसुरनरादिनामरूपतया कार्यावस्थं सदित्युच्यते वि
भक्तनामरूपतया कारणावस्थमसदित्युच्यते तदवस्थाद्वयर
हिते विशुद्धमणुरूपकं ज्ञातृत्वकर्तृत्वभोक्तृत्वादिधर्मकर्माधाराधी
नस्वरूपस्थितिप्रवृत्तिकं जीवात्मस्वरूपं ज्ञेयं भवतीत्यर्थः एवमी
श्वरस्वरूपमपि ज्ञेयं तथाहि अनादिमत् आदिमत्त्वं भवतीत्यना
दिमत् अनादित्वात्तत्त्वमाद्यंतरहितमित्यर्थः परं तमःशब्दवाच्यायाः
प्रकृतेः परं नियंतृरूपेण तमसः परस्तादिति श्रुतेः यद्वापि परं नीति
परं विरंचिदात्मकस्य जगतो धारकं पोषकं च परत्वगुणयुक्तमित्य
र्थः ब्रह्म बृहत्त्वरूपगुणशक्तियोगात्वेन ब्रह्मव्यापकं न तन्निर्वि
शेषं ब्रह्म वाममभवान् न सत्तन्नासदुच्यते इति तद्ब्रह्मस्वरूपं सद
सच्छब्दाभ्यां कार्यकारणाभ्यां नोच्यते स्वरूपेणानाभ्यां विलक्षणत्वा
न्यद्वा तत्सत्कार्यं नेति न असत्कारणरूपं नेति न किंतु सदसद्वा
च्यकार्यकारणरूपमेव ब्रह्म भवतीत्यनेन ब्रह्मणो जगतश्च स्व
रूपेणाभिन्नत्वेऽपि तद्धर्मकेनाभिन्नत्वं सूचितम् सदेव सोम्येद

मग्रआसीत् अग्रसदेवेदमग्रआसीदित्यादिश्रुतिभ्यः १२ ॥

मधुसूदनी टीका ९

एभिः साधनैर्ज्ञानशब्दितैः किंज्ञेयमित्यपेक्षायामाह ज्ञेयंयत्तदित्यादिषड्भिः ॥

यत्ज्ञेयंमुमुक्षुणातत्प्रवक्ष्यामिप्रकर्षेणस्पष्टतयावक्ष्यामि श्रोतृणाम
भिमुखीकरणायफलेनस्तुवन्नाह यद्वक्ष्यमाणंज्ञेयंज्ञात्वाअमृतम
श्नुते संसारान्मुच्यतइत्यर्थः किंतत्अनादिमत्आदिरस्यास्तीत्या
दिमत्नआदिमत्अनादिमत्परंनिरतिशयंब्रह्मसर्वतोनवच्छिन्न
परमार्थवस्तु अत्रअनादिइत्येतावतैवबहुव्रीहिणार्थलाभेप्यति
शायनेनित्ययोगेवामतुपःप्रयोगःअनादिचेतिमत्परं मि
तिपदंकेचिच्छिंदंतिमत्तगुणाद्विलक्षणःपरंनिर्विशेषरूपंब्रह्मेत्यर्थः
अहंवासुदेवाख्यापराशक्तिर्यस्येतिमत्परमितितुव्याख्यानं निर्वि
शेषस्यब्रह्मणःप्रतिपादनेनत्रशक्तिमत्त्वस्यावक्तव्यत्वान्निर्विशेष
त्वमाह नसत्तन्नासदुच्यतेविधिमुखेनप्रमाणस्यविषयःसदित्युच्य
ते निषेधमुखेनप्रमाणस्यविषयस्त्वसदित्युच्यते इदंतुनतदुभयविल
क्षणंनिर्विशेषत्वात् स्वप्रकाशत्वेनस्वरूपत्वाच्च यतोवाचोनिवर्तन्ते
अप्राप्यमनसासहेत्यादिश्रुतेः यस्मात्तद्ब्रह्मनसत्भावत्वाश्रयः
नासत्अभावत्वाश्रयःअतोनोच्यते केनापिशब्देनमुख्ययावृत्त्याश
ब्दप्रवृत्तिहेतूनांतत्रासंभवात् तथाहि गौरश्वइतिवाजातितःपच
तिपठतीतिवाक्रियातःशुक्लःकृष्णइतिवागुणतःधनीगोमानिति
वासंबंधतःअर्थंप्रत्याययतिशब्दः अत्रक्रियागुणसंबंधेभ्योविल
क्षणः सर्वोपिधर्मोजातिरूपउपाधिरूपोवाजातिशब्देनसंगृही
तः यदृच्छाशब्दोपिडित्थडवित्थादिरेकव्यक्तिधर्मेस्वात्मन्येवप्रवृत्ति
निमित्तीकृत्यप्रवर्ततइतिसोपिजातिशब्दःएवमाकाशशब्दोपिता
र्किकाणांशब्दाश्रयत्वादिरूपंयंकंचिद्धर्मंपुरस्कृत्यप्रवर्तते स्वमते
तुपृथिव्यादिवदाकाशव्यक्तीनांजन्यानामनेकत्वादाकाशत्वमपि
जातिरेवेतिसोपिजातिशब्दः आकाशातिरिक्ताचदिक्कालस्यैव काल
स्तुनेश्वरादतिरिच्यते अतिरेकेवादिक्कालशब्दावप्युपाधिविशे
षप्रवृत्तिनिमित्तकावितिजातिशब्दावेव तस्मात्प्रवृत्तिनिमित्तवा
न्विधायकत्वविपर्ययशब्दःतत्रनसत्त्वासदितिजातिनिषेधः

श्री॰
गी॰ टी॰
३॰

85

क्रियागुणसंबंधानामपि निषेधोपलक्षणार्थः एकमेवाद्वितीयमिति
नातेनिषेधः तस्यानेकव्यक्तिहत्वेनैकस्मिन्नसंभवात् निर्गुणं निष्क्रि
यं शांतमिति गुणक्रियासंबंधानां क्रमेण निषेधः असंगोह्ययं पुरुष
इतिच अथात आदेशो नेति नेतीति च सर्वनिषेधः तस्मादुक्तलक्ष
नचिह्नेहेतोर्न्यतइति युक्तं नहिकथं प्रवक्ष्यामीतिउक्तं कथंवाशास्त्र
योनित्वादिति सूत्रे यथा कथं विलक्षणया शब्देन प्रतिपादनादिति
गृहाण प्रतिपादनप्रकारस्त्वयास्माभिरेवतथ्यपतिकल्पितेनेत्यत्र
व्याख्यानैःविस्तरस्तुभाष्ये द्रष्टव्यः [illegible]
[illegible]
[illegible]
[illegible] ॥

सदानंदी टीका ॥

किंज्ञानेन यथोक्तेन ज्ञेयमित्यतआह च ज्ञेयंमुमुक्षुणायत्नात्स्थं वक्ष्या
म्यहंहरिः १ तत्फलेन स्तवन्नाहश्रोतारं च प्रवर्तयन् ज्ञेयं यद्वक्ष्यमाणं
च ज्ञात्वावंपामृतमश्नुते २ आदिमत्त्वे च पद्ब्रह्म परमात्मविदद्वयं बहु
व्रीहिसमासेनैवार्थलाभेपिवक्तृतः ३ प्रयोगो मत्परोज्ञेयो नित्ययोगे
तिशायने निर्विशेषं परंब्रह्म वस्तुवाचामगोचरः ४ विधिद्वारा प्रमा
णस्य विषयः सन्निरोच्यते निषेधद्वारतोमानविषयोसन्निरोच्यते ५
इदंतन्निर्विशेषत्वात्सप्रकाशतयाद्वयं उभयस्माद्विभिन्नं तज्ज्ञेयंब्र
ह्मपरात्परं ६ प्रतियोगिव्यवच्छेदशून्यत्वादेवविद्धृतं यतोवाचोनिव
र्तंतेअप्राप्यमनसासह ७ इत्यादिश्रुतिवाक्येभ्यः शाब्दानीतेवविनिश्चि
ते नभावत्वाश्रयो ब्रह्मनाभावत्वाश्रयोस्त्यतः ८ नैवकेनापिशब्दे
नवक्तव्योहुमानइष्यते शब्दप्रवृत्तिहेतूनांजात्यादीनामभावतः ९
ज्ञेयस्यब्रह्मणो नास्तिशब्दवाच्यत्वमंजसा लोकेगुणक्रियाजातिसं
बंधाहेतवोगिरां १० प्रवर्तंते तेन सन्त्यस्मिन्निर्गुणत्वादिहेतुभिः शुक्लः
पचति गौरश्चोयनीगोमानितिस्फुटं ११ दृष्टा प्रवृत्तिरेतासांगुणादयो
हेतवोगिरां निर्गुणं निष्क्रियं शुद्धमेकमेवाद्वितीयकं १२ ब्रह्मतस्मा
न्नकेनापिवक्तुंशब्देनशक्यते कथंनहिप्रवक्ष्यामीत्येवंभगवतेरित

त्रि॰

शृणुलक्षणयाब्रह्मप्रतिपादनमेवमतत् यथाकथंचिज्ज्ञास्येवीयनार्थे
गिरोच्यते १४ वस्तुतोवचनातीतं सर्ववेदांतसंमतं निर्गुणंनिष्क्रियंशं
ततथामेगोह्यंप्रमाणं १५ नेतिनेतीतिशतशःश्रुतिवाक्यानिवक्तितेः
तेनेदंतत्त्वंननास्तीदंह्ययोमोहोऽयवस्तुतः १६ नसत्तन्नासदित्येवंप्राह
विशेषणेऽपिहि आविर्भावतिरोभावौवुद्धेर्यन्मात्रिकाविह १७ नमेक
मेतदात्मानंविद्याद्व्यभिचारिणं इत्युक्तंसंप्रदायज्ञैर्वार्तिकेश्रीसुरे
श्वरैः १८ १२ ॥ ॥

नीलकंठी टीका १२

एवंद्वेत्रेयाख्यायस्वयोर्यत्प्रभावश्चेत्युक्तंतेत्रतत्स्वरूपेणसामायिके
प्रभावेव्याचष्टे ज्ञेयमिति यत्तेज्ञानसाधनैर्यत्तज्ज्ञेयंतत्प्रवक्ष्यामि यज्ज्ञे
यंज्ञात्वाअमृतंमोक्षंअश्नुतेप्राप्नोति तस्यस्वरूपमाविदाह अनादिमदि
तिआदिमत्अव्यक्तं तस्मादव्यक्तमव्यक्तमितितदुत्पत्तिश्रवणात् तदन्य
त्अनादिमत् अनादीत्येतावत्युक्तेप्रवाहनित्यत्वमव्याकृतादीनामप्यस्ती
तितेषामप्यनादितायोऽसौमायोनत्प्रतिषेधार्थमनादिमदित्युक्ते यद्वा
आदिमच्चतनःपरेचआदिमन्तोपरेकार्यकारणेताभ्यामन्यदनादिमत्पर
मिति अतएवपरंतिविशेषणंतत्वपरेषुविशेषं ब्रह्मत्रिविधपरिच्छेदशू
न्यं नसत्तत्प्रधानपरमाण्वादिवत्सदितिनोच्यते नाप्यसत्शशशृंगवद
सदपिनोच्यतेतथावश्रुतिर्नोसदासीन्नोसदासीत्तदानींनासीद्रजोनोव्यो
मापरोयदिति असत्प्रतिहितस्यशशशृंगस्यसत्प्रतिहितस्यप्रधानस्यरजःप्र
हितानांपरमाणूनांपरव्योमशब्दितस्यअसत्प्रतिमतस्याव्यक्तस्यापि
निषेधःप्राकृतनिषेधंदर्शयति १२ ॥

आनंदीटीका १३

अनेनज्ञानेनयद्ज्ञेयंतत्

दाह आदिमत् आगमापायिमहाभूतादिसंघातरूपंतेनशून्यंवाच्यमतस्मा
द्व्यतिरिक्तमागमापायहीनंसदेकरूपम् परमुत्कृष्टंब्रह्मसर्वज्ञंस
र्वशक्तिसर्वकर्तृत्वर्थः परत्वेहेतुमाह नसत्तत् सदितिव्यक्तंस्थू
लंप्रकटितनामरूपंव्यवहारयोग्यमसदादिपरंब्रह्मतत्वेनहिलक्ष
णमित्यर्थः असदव्यक्तंमूलप्रकृतिरचेतनंतद्व्यतिरिक्तंचोच्यते
१२ ॥

मे

एवंविधेन चज्ञानेन ज्ञेयं ज्ञातव्यं यथोक्तेन ज्ञानेन फलतया वस्थि
तेन परमात्मलक्षणं वस्तु तदिदानीं प्रवक्ष्यामि तत्स्वरूपं प्रकर्षेण
कथयिष्यामि यज्ज्ञात्वामृतममविनाशिस्वरूपमश्नुते प्राप्नोति ननु
नन्यसंवेद्यस्य सर्वसंवेदकस्वभावस्य कथमिदं तावज्ज्ञेयत्वमत
एव ज्ञेयत्वेन व्यपदेशः कृतः सत्यं न तस्य वस्तुनः परमार्थतो ज्ञेयता
संभवति किंत्वारुरुक्षावस्थायां ज्ञातृज्ञानज्ञेयविभागात्मकत्वा
दुपचारेण ज्ञेयशब्दस्तत्र प्रवर्तते न तु वास्तवेन रूपेण तस्य ज्ञेयता
विवक्षिता यतः सोयमहमिति स्वात्मत्वेन प्रत्यवमर्शी एव तस्य
ज्ञानं न तु इदमहमिदं वेद्मीति व्यतिरेकेण न ह्येकस्यानुभवितृत्वमा
त्मलक्षणस्य तत्त्वस्यावगमः संभवति तथाविधा एव तद्विशेषणा
न्याह किं तज्ज्ञेयमिति संस्तं निर्दिशति । परं ब्रह्मेति परमार्थतः स
र्वस्य वस्तुनो ब्रह्मरूपत्वे स्थिते यज्ज्ञेयतया संप्रत्याभासते तदपरं
यत्तु ज्ञातृमात्रस्वरूपं तत्परं ब्रह्मेत्युक्तं कीदृशं तदनादिमत् आ
दिवेद्यं वस्तु सर्वं तेन तत्साधारणं पृथिव्यादिरूपं विषयतया व्या
वस्थितं तथा प्रतिदेहं तत्तच्छरीरतया व्यवस्थितम् उभयरूपतया प्र
कृप्रतिपादितम् कारणपदतया सर्वमादिमत् आगमापायधर्म
कत्वात् आदिकोट्यवच्छिन्नं तत्प्रान्तके स्ववच्छिन्नमपि तद्विपरीतं त
त्कारणान्तरनिरपेक्षसद्भावमनादिमत्परं ब्रह्मेत्युक्तमतस्तत्की
दृशं न सदिह यदिंद्रियैर्वीक्ष्याभ्युपेतैरिदमिति गृह्यते तन्मा
यीयैः प्रमातृभिः सदिति पद्यते ब्रह्मतत्प्रमात्रैकस्वभावत्वात्स
र्वेन्द्रियागोचरभूतं तथा सन्न भवति न चैवमसत्तदुच्यते [illegible]
[illegible]
[illegible]
[illegible] सादयितुमाह १२ ॥

^ एभिर्ज्ञानसाधनैर्ज्ञेयमक्षरं ब्रह्मार्थलक्षणं ज्ञेयं सामान्यतः पूर्वमुक्तमपि प्रधुना विशेषतो निरूपयति॥

लासिकी [illegible] गीताटीका १५ ॥

^ ज्ञेयं स्वत्वेन ज्ञातुम् योग्यं मस्कृहार्थलक्षणं तत्प्रवक्ष्यामि विशेषतो
वक्ष्यामि यज्ज्ञेयं ज्ञात्वा सम्यक्प्रतिपद्यामृतं मोक्षं प्राप्नोति तच्च

मच्छब्दवाच्यं परमार्थतत्त्वमेकमेव मायया ब्रह्मेश्वरादिभेद
भिन्नं शास्त्रेषूक्तम् तत्रादौ ब्रह्मस्वरूपं निरूपयति ब्रह्माख्य
यद्वस्तु अनादि आद्यादिरहितम् मत्परं मत्त ईश्वरात् परमुत्कृ
कौ ष्टं मायायोल्लुष्यरहितत्वात् तत्सत् विधिमुखेन प्रमाणविष
यं नोच्यते असन्निषेधविषयं च नोच्यते विधिनिषेधयोर
विषयत्वात् तद्विचारस्य शास्त्रेष्वकथा कृत इह विस्तरभ
यान्नोच्यते तद्ब्रह्मस्वरूपं ज्ञेयं मच्छब्दस्य मुख्यवाच्यमिति
मुनासत्त[illegible]
॥ १२ ॥

पंचोलेटीका

एभिः साधनैर्यत् ज्ञेयं तदाह ज्ञेयमिति यत् ज्ञेयं ब्रह्म तत् प्र
हं प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते वपुनः न म्रियते ईश्वरं तं ब्रह्म अ
नादिमत् उत्पत्तिरहितं परं निरतिशयं ब्रह्म तत् ज्ञेयं न सत् न त्वा
सदुच्यते सदसच्छब्दविषयो न भवति १२ ॥

भगवीरसमिद्धोधिनी ॥

एभिः साधनैः किं ज्ञेयमित्यपेक्षायामाह ज्ञेयमिति ए
भिः पूर्वोक्तैः साधनैर्यज्ज्ञेयं ज्ञातव्यं तत्प्रवक्ष्यामि प्रकर्षेण
स्पष्टतया वक्ष्यामि श्रोतृणामादरसिद्धये ज्ञानफलं दर्शयति
यज्ज्ञेयं ज्ञात्वा साक्षात्कृत्य पूर्वोक्तं किंतु हृद्दकार्य
विषयकनरकपातादिदोषपरंपरापरित्यागेनामृतमश्नु
नत्वं हृतिं प्राप्नोति जन्माद्यनर्थं निवर्तते तदुत्तमं परमं मम स्व
रूपत्वात् किं तदित्यपेक्षायामाह अनादिमदिति आदिमत्त्व
भवतीत्यनादिमत् परं निरतिशयं ब्रह्म ज्ञानादीति बहुव्रीहि
णोक्तेऽप्यर्थे मतुपः प्रयोगोऽतिशायिनि नित्ययोगे वा बोध

व्यः अत्र केचिदनादिमत्परमिति पदद्वयं वदंति ममविसोः
परं निर्विशेषरूपं परं ब्रह्मेत्यर्थः निर्विशेषत्वमेवाह नसदिति
विधिमुखेन प्रमाणस्य विषयः सच्छब्देनोच्यते निषेधमुखे
न प्रमाणस्य विषयो सच्छब्देनोच्यते इदं तु तदुभयविलक्ष
णं तदुभयाविषयत्वात्स्वप्रकाशचैतन्यरूपत्वाद् यतो वाचो
निवर्तंते अप्राप्य मनसा सहेति श्रुतेः भावत्वाश्रयाभावाद
भावत्वाश्रयाभावाज्जात्यादिशब्दव्युत्पत्ति हेतूनां शब्दानां तत्रा
संभवान्न केनापि शब्देन ब्रह्मोच्यते इत्यर्थः १२॥

87

मधुभाष्य

१२

भाषा अनुवाद टीका

और इस सब साधनसे जिसको जानना होता हैं तिसको श्लो
कसे कहते हैं कि जो जानवे जोग है सोई मैं कहूं यहकहूंगा परन्तु
अभीश्रोताके आदर सिद्ध होने के लिये वही ज्ञानका फल देखा
वते हैं कि मैंजो ज्ञानकी बातकहूंगा सो जानि के लोग मुक्ति पा
वतेहैं और सो ज्ञे ये पदार्थ क्याहै इसपर कहतेहैं कि वह अना
दि औ परकहै निरतिशायब्रह्मरूप यही ज्ञेयब्रह्म न सत् न अस
त् अर्थात् सत असत् शब्दसे नहीं कहा जाता तात्पर्य यह कि स
त कहै जो विधि शब्दसे प्रमाण का विषय औअसत् कहै जो नि
षेधका विषय सोई सत् असत् कहावता है यहतो ब्रह्म अविष
य हेतु से इन दोनो से भिन्न ही है १२ ॥

दोहा

जो ज्ञेय तेहि कहहौं जाने मुक्त जिहहोय अनादिमत परब्रह्म
हि कहा सत असत नहि सोय १२॥

४४

व्यः अत्र केचिदनादिमत्परमिति पदद्वयं वदंति मम विष्णोः प
रं निर्विशेषरूपं परं ब्रह्मेत्यर्थः निर्विशेषत्वमेवाह न सदिति
विधिमुखेन प्रमाणस्य विषयः सच्छब्देनोच्यते निषेधमुखे
न प्रमाणस्य विषयोसच्छब्देनोच्यते इदं तु तदुभयविलक्षणं
तदुभयाविषयत्वात्स्वप्रकाशचैतन्यरूपत्वाच्च यतो वाचो नि
वर्त्तंते अप्राप्य मनसा सहेति श्रुतेः भावत्वाश्रयाभावादभा
वत्वाश्रयाभावाच्च जात्यादिमत्त्वप्रवृत्तिहेतूनां शब्दानां तत्रा
संभवाच्च न केनापि शब्देन ब्रह्मोच्यते इत्यर्थः १२॥

सर्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुखं
सर्वतःश्रुतिमल्लोकेसर्वमावृत्यतिष्ठति १३

शांकरभाष्यटीका १

सच्छब्दप्रत्ययविषयत्वादसत्वाशङ्कायां ज्ञेयस्य सर्वप्राणिकरणोपा
धिद्वारेण तदस्तित्वं प्रतिपादयंस्तदाशङ्कानिवृत्यर्थमाह सर्वतइ
ति सर्वतः पाणिपादन्तत् सर्वत्रपाणयः पादाश्चास्येति सर्वतः पा
णिपादन्तत् ज्ञेयं सर्वप्राणिकरणोपाधिभिः क्षेत्रज्ञास्तित्वं विभा
व्यते तत् क्षेत्रज्ञश्च क्षेत्रोपाधितउच्यते क्षेत्रञ्च पाणिपादादिभिर
नेकधाभिन्नं क्षेत्रोपाधिभेदकृतं विशेषजातं मिथ्यैव क्षेत्रज्ञस्येति
तदपनयनेन ज्ञेयत्वमुक्तं न सत्तन्नासदुच्यते इति उपाधिकृतं
मिथ्यारूपमप्यस्तित्वाधिगमाय ज्ञेयधर्मवत्परिकल्प्योच्यते स
र्वतः पाणिपादमित्यादि तथाहि सम्प्रदायविदां वचनमध्यारो·
पापवादाभ्यां निःप्रपञ्चं प्रपञ्च्यत इति सर्वत्र सर्वदेहावयवत्वेन
गम्यमानाः पाणिपादादयो ज्ञेयशक्तिसद्भावनिमित्तस्वकार्याइति
ज्ञेयसद्भावेलिङ्गानि ज्ञेयस्येत्युपचारतउच्यन्ते तथा व्याख्येयम·
न्यत् सर्वतः पाणिपादं तत् ज्ञेयं सर्वतोक्षिशिरोमुखं सर्वतोक्षी
णि शिरांसि मुखानि च यस्य तत् सर्वतोक्षिशिरोमुखं सर्वतः श्रु
तिमत् सर्वत्र श्रुतिमच्छ्रुतिः श्रवणेन्द्रियं तत् यस्य तत् श्रुति
मल्लोके प्राणिनिकाये सर्वमावृत्य संव्याप्य तिष्ठति स्थितिंलभ
ते १३ ॥

आनंदगिरिकृतटीका २

सर्वविशेषरहितस्यावाङ्मनसगोचरस्य अदृष्टेः दृष्टेश्च विपरी
तस्य प्राप्तेर्ब्रह्मणः शून्यत्वे प्राप्ते नेन्द्रियग्रहणादिहेतुत्वेन क
ल्पितद्वैतसत्तास्फूर्तिप्रदत्वे नेश्वरत्वेन च सत्वं दर्शयन्नादौ देहा
दीनां हस्तिमनोरथादिवदचेतनानां चेष्टासर्वैकप्रवृत्तिमत्वात्
चेतनाधिष्ठितत्वमनुमिमानस्तत् प्रयोक्तृचेतनं ब्रह्मेत्याह सर्व
तेति तदस्तित्वमिति तच्छब्दोक्ते यद्ब्रह्मपदं तदाशङ्क्येति तच्छब्देना

सत्त्वमुच्यते ननु सर्वदेहेषु पाणिपादमस्तीति कथं पाणीनां च पा
दानां च देहस्यैव नात्मधर्मत्वे तत्राह सर्वत इति करणग्रहणं शरीरस्यापि प्र
हणीवत् प्रत्येकं कस्य शरीरस्य मनसा चेतनाधिष्ठानत्वविवेकेत्यर्थः उक्त
ग्रहणाच्चेतनात्मनस्तु सिद्धावपि कथं तदा कर्तृत्वमित्याशंका वैमन
स्यैव ते तोपाधिना ते ज्ञानत्वाच्चेतनात्मत्वे तदन्तत्वमेवेत्याह ते
ज्ञत्वे तितस्य तेनोपाधित्वेपि कथं पाणिपादाक्षिशिरोमुखादिम
त्त्वमित्याशंक्याह ते ज्ञत्वेति यतश्चोपाधितत्त्वासिद्धिः विशेषोक्तिरि
तिशेषः कथं तर्हि न सत्तन्नासदिति निर्विशेषत्वोक्तिरित्याशंक्याह
ते चेति पाणिपादादिमत्त्वमौपाधिकं मिथ्या चेत् ते यथा व्यवहाराय
कारे कथं तदुक्तिरित्याशंक्याह उपाधीति मिथ्यारूपमपि ते यथ
लक्षणोपयोगीत्यत्र हृदयं मतिमान् नथाहीति पाणिपादादीना
मन्यगतानामात्मधर्मत्वेनारोप्य व्यपदेशः कोहेतुरिति चेत् तत्राह
सर्वत्रेति ते यस्य ब्रह्मणः शक्तिसन्निधिमात्रेण प्रवर्तनसामर्थ्यं त
त्त्वे निमित्तीकृत्य स्वकार्ये वर्तमाना भवन्ति पाण्यादय इति कृत्वेति यो
जना सर्वतोऽक्षिशिरोमुखमित्यादिश्लोकार्थः तथेति तत्र सर्वं यथा सर्व
तः पाणिपादमिति व्याख्याते तथेत्यर्थमेव स्पष्टयति सर्वत इति
सर्वतोऽक्षिपादेरुक्तार्थमाह सर्वतोदोति प्रतिश्रवणं वक्त्रमवशि
ष्टानेन्द्रियं तत्त्वस्य पाणिपादमुखवक्त्रावशिष्टकर्मेन्द्रियवत्त्वस्य
मनोबुद्ध्यादिमत्त्वस्य चोपलक्षणं एकस्य सर्वत्र पाण्यादिमत्त्वं साध
यति सर्वमिति १३ ॥

स्वामिकृतटीका ६

नचैवं ब्रह्मणः सदसद्विलक्षणत्वे सति सर्वं खल्विदं ब्रह्म ब्रह्मैवेदं
सर्वमित्यादिश्रुतिभिर्विरुद्धेतेत्याशंक्य परस्य शक्तिर्विविधैव श्रूय
ते स्वाभाविकी ज्ञानबलक्रिया चेत्यादिश्रुतिप्रसिद्धया विश्वशक्त्या स
र्वात्मतां तस्य दर्शयन्नाह सर्वत इति पंचभिः सर्वतः पाणयः पादा
श्च यस्य तत् सर्वतोऽक्षीणि शिरांसि मुखानि च यस्य तत् सर्वतः श्रुति
मत् श्रवणेंद्रिययुक्तं सत् लोके सर्वमावृत्य व्याप्य तिष्ठति सर्वप्रा
णिहस्तादिभिः पाण्यादिभिरुपाधिभिः सर्वव्यवहारास्पदत्वेन तिष्ठतीत्य
र्थः १३

पिशाचभाष्यं टीका ४

स्पष्टार्थम् १३ ॥

रामानुजभाष्यं टीका ५

सर्वतइति सर्वतःश्रुतिमत् इत्यंते श्लोकेव्याचष्टेसर्वतस्त्वचरणादिकार्य कृतत्वपाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसशृणोत्यकर्णः इतिपर स्यब्रह्मणोपाणिपादस्यापिसर्वतः पाणिपादादिकार्यकत्वंश्रूयतेप्रत्य गात्मनोपिपरिशुद्धस्यतत्साम्यापत्त्यासर्वतःपाणिपादादिकार्यकत्वंश्रु तिसिद्धमेव तथाविद्वान्पुण्यपापेविधूयनिरंजनःपरमंसाम्यमुपै तीतिहिश्रूयतेइदंज्ञानमुपाश्रित्यममसाधर्म्यमागताइतिचवक्ष्यते लोकेसर्वमावृत्यतिष्ठतीतिलोकेयत्वस्तुजातंतत्सर्वंव्याप्यतिष्ठति परिशुद्धस्वरूपंदेशादिपरिच्छेदरहिततयासर्वगतमित्यर्थः १३ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् १३ ॥

परमार्थप्रपाटीका ७

अथशामाणविषयीभूतस्यसतोविचित्रोक्तिस्वरूपंयत्राहसर्वतइतिपंचभिः तत्ज्ञानबलक्रियाशक्तिमत्ब्रह्मसर्वतःसर्वमन्ततःपाणिपादायस्यास र्वतःश्रुतिमत्श्रवणयुतंसल्लोकेसर्वमावृत्यव्याप्यतिष्ठति श्रुतिरपि विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतःपात् संबाहुभ्यां धमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएकइति भाष्यं अनयासर्वात्मकत्वे नकलालादिविलक्षणत्वात् अधिष्ठानाद्यभावेपि सर्वशक्तित्वाह विश्वतश्चसर्वतोव्यापाचक्षुःउतापिचविश्वतोमुखःतथापिविश्वतोबा हुःउतापिविश्वतस्पात् सएवंविधःपरमेश्वरःस्वस्मिन्त्रैलोक्यमुत्पाद नीयतीत्यर्थः कथमित्यपेक्षायांबाहुभ्यांदिवसेधमतिधमतिगतिकर्मा

\+ वीसंयमतिउभयोरेवच वर्णाआयान्याभिप्रायं एवंद्यावापृथिवीजन यन्नदेवयोद्योतमानः परमेश्वरएकएवसहाय एववर्तते १३॥

संप्राप्यकरोतितथा उत्तेगमनशीलैःपादैःपृथ्वीं॥ +

वनमाली टीका ८

सर्वतःपाणिपादंसर्वेष्ववयवान्तरेषुपाणिपादकार्यकर्तृत्वमेवस र्वतःपाणिपादत्वं एवमवयवान्तरेष्वपियोज्यं यद्वावयवावयविनो रभेदाद्व्यापकविग्रहाभिन्नानामपिपाण्यादीनांव्यापकत्वमित्यर्थः अहिकुंडलन्यायेनाभिन्नानांपाण्यादीनामविभागशक्त्याभेदव्यवहारः य द्वासर्वव्यापकोप्यचिंत्यानंतशक्तिःपाण्यादिसर्वावयवेरनंतैरनंत रूपैःसर्वत्रजीवनदेवनियामकतयास्थितत्वात्सर्वतःपाणिपादत्व

श्री
गी॰ टी॰
३॰

१०

दिग्यादिकमपेक्षते सर्वजीवजडादिकमावृत्य व्याप्य तिष्ठति १३ सर्वेन्द्रि॰
यानींद्रियाणि सर्वेन्द्रियाणि तेषां गुणा विषयाः शब्दादयस्तेषामाभासी
दिपैर्वन्द्रियाणीन्द्रियगुणाभासमेतद्योमि सर्वेन्द्रियैर्दिपैर्वर्जितमि
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
वेष्टुवपालनस्यबलात्पतेः उत्पादवृत्वानकार्यस्य [illegible]
[illegible] १४ ॥

कृतमवैजयन्ती टीका ४

किंच सर्वतस्त्रित्युनः कीदृशं ब्रह्मणात्मस्वरूपे सर्वतःपाणिपादं स
र्वत्र स्वरूपेषु भगवत्साम्यापन्यादिविग्रहेषु वा पाणयःपादाश्च यस्य त
त् अपाणिपादो जवनो ग्रहीतेति श्रुत्या प्रत्यगात्मस्वरूपे पाणिपाद
सुभावेपि जवनग्रहीतेत्यादिना पाणिपादादि कार्यकृत्त्वमंगीकृ
त्य सर्वतःपाणिपादमित्युक्तमतो न विरोधः एवमग्रेपि द्रष्टव्यम्
विग्रहेपि तथैव सर्वतोक्षिशिरोमुखं सर्वत्राक्षीणि शिरांसि मुखा
नि च यस्य तत् तथा सर्वतःश्रुतिमत्सर्वत्र श्रुतिः श्रवणेन्द्रियं यस्य
तत् लोके जगति यद्वस्तुजातं सर्वमावृत्य व्याप्य तिष्ठति परिशु
द्धस्वरूपे देशकालवस्तुपरिच्छेदशून्यतया सर्वगतं यद्वा संदेहा
वयवं विभुरूपेण ज्ञानगुणेन व्याप्य तिष्ठति [illegible] यथा प्रकाशयत्ये
कः कृत्स्नं लोकमिमं रविः क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारते
ति वक्ष्यते न तु प्रत्यगात्मस्वरूपे संकोचो भवति तथैव ब्रह्मस्वरूपमपि
तेयं तथा हि लोके प्राकृते च सर्वत्र चेतनाचेतनवस्तुमात्रं स्वस्वरू
पेणैव व्याप्य तिष्ठतिप्रत्यगात्मनि १३ ॥

+एवं निरुपाधिकस्य ब्रह्मणः सद
सत्त्वयाविषयत्वात् सत्त्वाशंकायां नासदिप्येनेनापास्ता
यामपि विस्तरेण तदाशंकानि
राकृत्यर्थं सर्वप्राणिकरणोपाधि
द्वारेण चेतनत्वेतत्सद्रूपतया त
दस्तित्वं प्रतिपादयन्नाह ॥

मधुसूदनी टीका ४

+सर्वतः सर्वत्र सर्वेषु देहेषु पाणयः पादाश्च चेतनाः स्वस्वव्यापारेषु
प्रवर्तनीयाः यस्य चेतनस्य सत्त्वया तत् सर्वतःपाणिपादं ज्ञेयं

ल सर्वाचेतनप्रवृत्तीनांचेतनाधिष्ठानपूर्वकत्वात्तस्मिन्ज्ञेयचे
चेतनेब्रह्मणिज्ञेयेसर्वाचेतनवर्गप्रवृत्तिहेतौनास्तिनास्तिताशं
केत्यर्थः एवंसर्वतोक्षिशिरोमुखानिचप्रवर्तनीयानियस्य
तत् एवंसर्वतःश्रुतयःश्रवणेंद्रियाणियस्यप्रवर्तनीयत्वेनसं
तितत् सर्वतःश्रुतिमल्लोकेसर्वप्राणिनि
कायेएकमेवनित्यंविभुच सर्वमचेतनवर्गमाहत्यसमस्तंया
स्फूर्तीचाध्यासिकेनसंबंधेनव्याप्यतिष्ठति निर्विकारमेवस्थिति
लभते ततस्तात्पर्यंसजडप्रपंचस्पदोषेणगुणेन वाणुमात्रेणा
पिसंबध्यतइत्यर्थः यथावसर्वेषुदेहेषुएकमेवचेतननित्यंवि
भुचनप्रतिदेहंभिन्नंतथाप्रपंचितंप्राक्

१३ ॥

सदानंदी टीका ॥

एवंचनिर्विशेषस्यब्रह्मणःसदसद्भिरा वक्तुमशक्यत्वमाशंक्य
याविषयत्वेनः १ असत्वमेवकिंनस्यादितिज्ञेयस्यसर्वथा इत्याशंका
निरासार्थंतदस्तित्वंप्रदर्शयन् २ सर्वप्राणींद्रियोपाधिद्वारेणास्या
खिलात्मनासद्भिरानेददेवजत्तद्रूपत्वेनाहकेशवः यस्यसर्वेषुदे
हेषुपाणयश्चरणाजडाःस्वस्वव्यापारविषयेप्रवर्त्यास्तेनतत्
४ सर्वाचेतनवृत्तीनांविदधिष्ठानतावशात् प्रवृत्तिरस्मतोज्ञेयं
सर्वतःपाणिपादवत् ५ नास्मिंश्चब्रह्मणिज्ञेयेजडवर्गप्रवर्तके
नैवास्तिनास्तिताशंकाकाविदित्याशयोहरेः ६ यस्यैवसर्वतोक्षी
णिशिरांसिचमुखानिच संतिप्रवर्तनीयानितत्तेयंसर्वशाक्तिम
त् ७ सर्वतोयस्यविज्ञानंलोकेस्मिश्रवणेंद्रियं सर्वंजडसमूहं
तद्व्याप्यतिष्ठतिसर्वदा ८ स्वसत्तयास्वस्फूर्त्यानदथ्यस्तसर्वं
मात्मनि चालयन्नपिनोयातितत्कृतोविकृतिंमनाक् ९ रूपमौ
पाधिकंमिथ्यैवास्तित्वाधिगमायतत् ज्ञेयधर्मं वदित्येवमपि
कस्तोव्यनेतथा १० १३ ॥

एवंसचयद्येनतत्त्वेनज्ञस्वरूपमपास्तसमस्तविशेषवस्तुपपा॰
यपन्नभावइतिप्रतिज्ञातेतस्यप्रभावेवैस्वरूपमलक्षणमुपपा
दयति सर्वतइति सर्वतःसर्वासुदिक्षुअंतर्बहिश्चपाणयःपादा
श्चास्यसंतीतिसर्वतःपाणिपादं एवंसर्वतःअक्षीणिशिरांसिमु
खानिचयस्यतत्सर्वतोक्षिशिरोमुखं सर्वतःश्रुतिमत्श्रवणवत्
लोकेसर्वंआवृत्यव्याप्यतिष्ठति यथास्वप्नदृक्तैजसोवासनाम
येनैवपाणिपादादिनास्वात्मप्रपंचमनुभवति तस्यचजाग्रत्का
लेउपाधिभूतेपिंडानमेवपाणिपादादिकंनदेवस्थूलप्रपंचा
नुभवसंस्काराधानद्वारावासनामयस्यप्रपंचस्यकारणं वासना
मयस्यस्थूलप्रपंचस्यकारणमितिबीजांकुरन्यायेनानयोरन्योन्य
स्मिन्नन्योन्यसद्भावोन्योन्यकारणत्वंचास्तीति एवंसकलप्राणिधी
वासनोपरक्तात्तातोपाधिकंचैतन्यंसकलप्राणिधीवासनाम॰
यंसमष्टिसूक्ष्मप्रपंचमवभासयति अस्यचोपाधिभूतेब्रह्मांडगा
तसकलप्राणिपाणिपादादिकमेव एवंचस्वर्वत्तस्थूलसूक्ष्मयो
रपिसमष्टिप्रपंचयोरन्योन्यंबीजांकुरन्यायेनकार्यकारणभा॰
वमन्योन्यस्मिन्सद्भावंचाभिप्रेत्योक्तंभगवताभाष्यकारेण सकल
प्राणिकरणोपाधिद्वारेणक्षेत्रज्ञसत्तोपलब्धिर्भवतिपाचयतइति का
र्यद्वाराकरणस्सिन्नसिद्धौचकारणाभावोप्युपपद्यते अनादिमत्प
रंब्रह्मनसत्तन्नासदुच्यतइति ननुप्रक्षालनाद्धिपंकस्यदूरादस्प
र्शनंवरमितिन्यायेनव्यर्थस्तर्हिकारणोपन्यासइतिचेन्न नैवि
नाध्यस्ताधिगमायोगात् शाखाचंद्रन्यायेनहिमुख्यगुणनिर्गुणस्य
वस्तुनोज्ञापकं यथोक्तंभाष्ये उपाधिकृतमिथ्यारूपमस्तित्व
त्वाधिगमायज्ञेयधर्मवत्परिकल्प्योच्यते सर्वतःपाणिपादमि
त्यादि तथाहिसंप्रदायविदांवचनमध्यारोपापवादाभ्यांनिष्प्र
पंचंप्रपंच्यतइति १३ ॥

तदेवमनुभयात्मकत्वेपिसर्वज्ञत्वसर्वकर्तृत्वादि प्रकाशयति---

आनंदीटीका १३

सर्वेषांदेहजातानांयानिकर्मेंद्रियाणिज्ञानेंद्रियाणितत्तद्वि
षयकरणानितत्रायमेकएवस्वतंत्रःकर्ताप्रेरकःयतःसर्व

+ यतएवमपिसत्त्वेन प्रतिपन्नस्य सर्वस्य वस्तुनस्तथावभासकत्वात्तदेव सद्भावकारणं कथमसदिति वक्ष्यशंक्य अतएव तस्य परमार्थसदेकप्रमातृरूपस्य विश्वरूपत्वं प्रतिपादयितुमाह ॥

वै तत्त्वसंख्यानमाहृत्य ज्ञातृत्वकर्तृत्वादिशक्तिभिर्व्याप्य तिष्ठति १३

रामकंठटीका १४

+ सर्वतः पाणिपादं तदित्यादिना सर्वेषां देहज्ञानां यानि पादादीनि कर्मेन्द्रियाणि यानि च चक्षुः श्रोत्रादीनि धीन्द्रियाणि तत्तत्क्रियाज्ञानसाधनत्वेन व्यवस्थितानि तान्यसाधारणकर्तृज्ञातृशक्तेरेकस्य तस्यैव विश्वात्मनः शक्तिभेदा इति तात्पर्यम् यतश्चाह सर्वमावृत्य तिष्ठतीत्येकमेव तत्त्वं सर्वमिदं जगत्कर्तृतया च व्याप्य वर्तत इत्यत एवाह ॥ १३ ॥

लासिकी [illegible] टीका १५

अथुनात्र स्वज्ञानोपाय भूतमन्यन्मखरूमीश्वररूपमाह ॥

सर्वेषां देहज्ञानां यानि बुद्धिकर्मेन्द्रियाणि तानि विश्वात्मन ईश्वरस्यैवावयवभेद इति तात्पर्यम् सर्वमहन्तयावृत्य व्याप्य तिष्ठति स्वस्वभावादप्रच्युत एव भवतीत्यर्थः तदुक्तम् स्वात्मैव सर्वजन्तूनामेक एव महेश्वरः विश्वरूपोऽहमिदमित्यखण्डः सर्वदा हि नः इति १३

[illegible] १३ ॥

पंचोलेटीका

सदसद्रूपत्वाविषयत्वे तस्य श्रुतत्वाशंकायां सर्वप्राणिकरणोपाधिद्वारेण तदस्तित्वं प्रतिपादयन्नाशंकां निवर्तयति सर्वत इति पंचभिः तज्ज्ञेयं ब्रह्म सर्वेषां पाणिपादयोरवयवाश्रयत्वात्सर्वतःपाणिपादं सर्वतः सर्वेषु अक्षीणि शिरांसि मुखानि यस्य तत्सर्वतोक्षिशिरोमुखं सर्वतः श्रुतिमल्लोके प्राणिसमूहे सर्वमावृत्य तिष्ठति १३

रणवीरसमिद्धोधिनी

ननु एवं ब्रह्मणः सदसद्विलक्षणत्वे सति सर्वं खल्विदं ब्रह्म ब्रह्मैवेदं सर्वमित्यादिश्रुतिर्विरुध्यते अत्याशंक्याह पदप्रयत्ना

क्ति विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेत्यादिश्रु
ति प्रसिद्धया विचित्रशक्त्या सर्वात्मकतां तस्य दर्शयन्नाह सर्वत
इति पंचभिः सर्वत्र सर्वेषु देहेषु पाणयः पादाश्चास्य चेतनस्य
देवस्येति सर्वतःपाणिपादं तज्ज्ञेयं ब्रह्म सर्वाचेतनप्रवृत्ती
नां चेतनाधिष्ठानपूर्वकत्वात्तस्मिन्ज्ञेये चेतने ब्रह्मणि ज्ञेये स
र्वाचेतनवर्गप्रवृत्तिहेतोर्नास्ति नास्तित्वशंकेत्यर्थः तथा
सर्वतोक्षिशिरोमुखं शिरोमुखानि च यस्य तत्सर्वतोक्षिशिरोमु
खं सर्वतः श्रुतयः श्रवणेंद्रियाणि यस्य तत्सर्वतःश्रुतिमल्लो
के सर्वप्राणिनिसर्वमावृत्य व्याप्य तिष्ठति सर्वप्राणिवृत्ति
भिः श्रोत्रादिभिरुपाधिभिः सर्वव्यवहारास्पदत्वेन तिष्ठती
त्यर्थः १३ ॥

मधुभाष्य

१३ ॥

भाषा अनुवाद टीका

और जो ऐसा कहो कि ब्रह्म सत् असत्मे भिन्न है तो यह च
राचरात्मक अस्ताख्य ब्रह्म है इत्यादि श्रुतिसे विरुद्ध होय हैं
यह शंका करि इस ब्रह्म की नानाप्रकार शक्तिओरज्ञानक्रिया
बलक्रिया आदि स्वभावसिद्ध नाना मत से श्रुतियोंसे कहाजा
यहै इसतरह ब्रह्मकी सर्वात्मता दिखाय पांच श्लोक से कह
तेहै कि सर्वत्र हस्तपद चक्षु मस्तक मुख जिसके सो सर्व
त्रही श्रवण इन्द्रिय से युक्त होय सब लोकको व्याप्त हो स्थि
त हैं अर्थात् यावत् प्राणीयोंमे वर्तमान करचरण आदि उपा
धि यों से व्यवहार करै है १३ ॥

दोहा

हस्तपाद सर्वत्र तिह नयन शीसमुखजोय श्रुतियुत सभ
हि लोकमें सभ आहत्य स्थित सोय १३॥

सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितं अ
सक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च १४

शांकरभाष्य टीका १

उपाधिभूतपाणिपादादींद्रियाध्यारोपणात् ज्ञेयस्य तद्वत्ताशंका मा
भूदित्येवमर्थः श्लोकारंभः सर्वेंद्रियेति सर्वेंद्रियगुणाभासं सर्वा
णि च तानींद्रियाणि श्रोत्रादीनि बुद्धींद्रियकर्मेंद्रियाख्यान्यंतःक
रणे च बुद्धिमनसी ज्ञेयोपाधित्वस्य तुल्यत्वात् सर्वेंद्रियग्रहणेन
गृह्यंते अपि चांतःकरणोपाधिद्वारेणैव श्रोत्रादीनामपि उपाधित्व
मित्यतोऽन्तःकरणबहिःकरणोपाधिभूतैः सर्वेंद्रियगुणैरध्यवसा
यसंकल्पश्रवणवचनादिभिरवभासत इति सर्वेंद्रियगुणाभासं स
र्वेंद्रियव्यापारैर्व्यापृतमिव तज्ज्ञेयमित्यर्थः ध्यायतीव लेलायती
वेति श्रुतेः कस्मात्पुनः कारणान्न व्यापृतमेवेति गृह्यत इत्यत आ
ह सर्वेंद्रियविवर्जितं सर्वकरणरहितमित्यर्थः अतो न करणव्याप
रैर्व्यापृतं तज्ज्ञेयं यस्त्वयं मंत्रः अपाणिपादो जवनो ग्रहीता पश्यत्य
चक्षुः स शृणोत्यकर्ण इत्यादि सर्वेंद्रियोपाधिगुणानुगुण्यभजनश
क्तिमत् तज्ज्ञेयमित्येवंप्रदर्शनार्थो न तु साक्षादेव जवनादिक्रिया
वत्त्वप्रदर्शनार्थः अनेजदेकं मनसो जवीय इत्यादिमंत्रार्थवत्तस्य मंत्रस्या
र्थो यस्मात् सर्वकरणवर्जितं ज्ञेयं तस्मादसक्तं सर्वसंश्लेषवर्जितं
यद्यप्येवं तथापि सर्वभृच्चैव सदास्पदं हि सर्वं सर्वत्र सद्बुद्ध्य
नुगमात् न हि मृगतृष्णिकादयोऽपि निरास्पदा भवंत्यतः सर्वभृत्
सर्वं बिभर्तीति स्यादिदं चान्यत् ज्ञेयस्य सत्त्वाधिगमद्वारं निर्गु
णं सत्त्वरजस्तमांसि गुणास्तैर्वर्जितं तत् ज्ञेयं तथापि गुणभोक्तृ
च गुणानां सत्त्वरजस्तमसां शब्दादिद्वारेण सुखदुःखमोहाकार
परिणतानां भोक्तृ चोपलब्धृ तज्ज्ञेयमित्यर्थः १४ ॥

आनंदगिरिकृत टीका २

आरोपादृते साक्षादेव ज्ञेयस्य पाण्यादिमत्त्वमाशंक्याह उपाधीति
इंद्रियविशेषणीभूतसर्वशब्दात् ज्ञेयोपाधित्वाविशेषाच्च

बुद्ध्यादेरपि ग्रहणमित्याह अन्तःकरणेति श्रोत्रादीनां तेषामपित्व
स्य मनोबुद्धि द्वारत्वादपि तयोरिह ग्रहणमित्याह अपिचेति तयोरपी
होपादानेफलितमाह इत्यन्तइति अक्षरार्थमुक्त्वा वाक्यार्थमाह सर्वे
ति उपाधिद्वारा कल्पितव्यापारवत्त्वेमानमाह ध्यायतीति कल्पितमेवा
स्य व्यापारवत्त्वे नवास्तवमित्यत्र भगवतोपि सम्मतिमाकोत्ताद्वारा
दर्शयति कस्मादित्यादिना सर्वकरणराहित्ये फलितमाह अतइति
साक्षादेव ते यस्य वेगवद्विहरणादिक्रियावत्तायो मान्त्रवर्णिकत्वात्
कुतोस्य करणव्यापारैरव्यापारैरव्याहतत्वमित्याशंक्यानुवादसर्वके
मन्त्रस्य प्रकृतानुगुणत्वमाह यद्वेति करणगुणानुगुण्यभजनमन्त
रेण साक्षादेव जवनादिक्रियावत्त्वप्रदर्शनपरत्वेमन्त्रस्य मुख्यार्थ
त्वे स्यादित्याशंक्य तदसम्भवान्नैवमित्याह अन्यइति अर्थवादस्य श्रु
तेर्थे तात्पर्याभावान्न प्रकृतप्रतिकूलत्वमित्यर्थः सर्वकरणराहित्यं न
व्यापाराहित्यस्योपलक्षणमित्यङ्गीकृत्योक्तमेव हेतुं कृत्वा वस्तुतः
सर्वसङ्गवर्जितत्वमाह यस्मादिति वस्तुतः सर्वसङ्गाभावेपि सर्वा-
धिष्ठानत्वमाह यद्यपीति स्वसत्तामात्रेणाधिष्ठानतया सर्वं पुष्णाती
त्येतदुपपादयति सदिति विमतेस्य ति कल्पितं प्रत्येकं सदनुविद्धधी
विषयत्वात् प्रत्येकन्त्वन्दभेदानुविद्धधीविषयत्ववद्भेदवदित्यर्थः सर्वस
दास्पदमित्युक्तं मृगतृष्णिकादीनां तदभावादित्याशंक्याह नहीति
तेषामपि कल्पितत्वेन निरधिष्ठानत्वायोगान्निरूप्यमाणे तदधिष्ठा
ने सदेवेति सर्वस्य सति कल्पितत्वमविरुद्धमित्यर्थः सर्वाधिष्ठान
त्वेनत्ते यस्य ब्रह्मणोऽस्तित्वमुक्तमुपसंहरति अतइति इतश्च ते ये
ब्रह्मास्तीत्याह स्यादिदन्त्वेति नहितस्योपलब्धत्वमसत्त्वमसत्त्वेमिथ्याती
त्यर्थः १४ ॥

स्वामिकृतटीका ३

किंचसर्वेन्द्रियेति सर्वेषां चक्षुरादीनामिन्द्रियाणां गुणेषु रूपाद्याका-
रवृत्तिषु तत्तदाकारेणाभासत इति तथा सर्वाणीन्द्रियाणि गुणां
स्तत्तद्विषयानाभासयतीति वा सर्वैरिन्द्रियैर्विवर्जितं च तथा च श्रु
तिः अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्ण इत्या

दि असक्तं संगशून्यं तथापि सर्वं बिभर्तीति सर्वं सत्त्वं सर्वं सर्वाधारभूतं स
देव निर्गुणं सत्त्वादिगुणवर्जितं गुणानां सत्त्वादीनां च भोक्तृपालकं १४

पिशाचभाष्ये टीका ४

सर्वेंद्रियव्यापाराणां मायाभासं प्रतिभासमानं यस्मिन् तत् सर्वेंद्रियगुणा
भासं असक्तं असंबंधं सर्वं धारयति पालने निर्गुण सत्त्वादिगुणरहितं गु
णभोक्तृ च शब्दादिगुणविकाराणां शब्दादिविषयाणां भोक्तृ यत् १४

रामानुजभाष्ये टीका ५

ग्रेति सर्वेंद्रि सर्वेंद्रियगुणैराभासो यस्य तत् सर्वेंद्रियगुणाभासं इंद्रियगुणा
इंद्रियवृत्तयः इंद्रियवृत्तिभिरपि विषयान् ज्ञातुं समर्थमित्यर्थः स्वभा
वतः सर्वेंद्रियविवर्जितं विनेंद्रियवृत्तिभिः सर्वं जानातीत्यर्थः असक्तं
स्वभावादेव देवादिसंगरहितं सर्वभृच्चैव देवादिदेहभरणसमर्थं च
स पक्षधा भवति द्विधा भवति त्रिधा भवतीत्यादिश्रुतिः निर्गुणं तथा स्व
भावतः सत्त्वादिगुणरहितं गुणभोक्तृ च सत्त्वादीनां गुणानां भोगसमर्थं च

१४ ॥ अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् १४ ॥

परमार्थप्रपाटीका ७

किंच सर्वेंद्रियेति सर्वेषां चक्षुरादीनामिंद्रियाणां गुणेषु रूपाद्याका
रासु वृत्तिषु तत्तदाकारेण भासत इति तथा सर्वेंद्रियैर्विवर्जितं च
श्रुतिरपि अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्य
कर्ण इति स्पष्टार्थं असक्तं संगशून्यं तथापि सर्वं बिभर्तीति सर्वभृत्
तत्तदेव निर्गुणं सत्त्वादिगुणरहितं गुणानां सत्त्वादीनां भोक्तृ
पालकं १४ ॥

श्री॰
गी॰ टी॰
त्र॰

95

वनमाली टीका ८

सर्वाणि च तानींद्रियाणि सर्वेंद्रियाणि तेषां गुणा विषयाः शब्दादयस्तानाभा-
सयतींद्रियैर्ग्राहयतीतींद्रियगुणाभासमेतद्यद्यपि स्वयं सर्वेंद्रियैर्व-
र्जितमिंद्रियव्यापाराविषयमिंद्रियजन्यज्ञानाविषयमित्यर्थस्तत्प्रेर-
कत्वात् सर्वेंद्रियादिप्रेरकत्वेप्युदासीनत्वेनासक्तमसंगं निर्लेपं स-
र्वभृत् सर्वेषां जीवजडात्मकजगतो धारकं पोषकं च शब्दाद्युत्पत्त्या-
दिकर्तृ निर्गुणं प्राकृतसत्त्वादिगुणशून्यं सत्त्वादयो न संतीति शेषस्तत्र
प्राकृता गुणा इति वैस्यवोक्तेः गुणानां सत्त्वादीनां भोक्तृ पालकं भक्त-
कं भुजपालनाभ्यवहारयोः गुणमयप्रधानकार्यस्य विश्वस्य पाल-
कं चाप्राकृतं चेत्यर्थः १४ ॥

क्रमवैजयन्ती टीका ९

किंच सर्वेंद्रियेति सर्वेंद्रियगुणाभासं सर्वेंद्रियैः श्रोत्रचक्षुरादिभि-
र्गुणान् शब्दादिविषयान् आभासयति प्रकाशयतीति तथाभूतम् यद्वा
सर्वेंद्रियैश्चक्षुरादिभिर्गुणैर्देवमनुष्याद्याकृतिरूपाभिर्वृत्तिभिरा-
भासते दीप्यते इति तथाभूतम् देवोऽहं ब्राह्मणोऽहं मनुष्योऽहमित्येवं तत्त-
दाकारेणाभासत इत्यर्थः सर्वेंद्रियविवर्जितं इंद्रियैस्तु हृत्तिभिश्च वि-
नापि सर्वविषयाननुभवितुं समर्थमित्यर्थः असक्तं सुरनरादिदेहसंग-
शून्यमपि च पुनः सर्वभृदेव सर्वान् सुरनरादिदेहेंद्रियादीन् बि-
भर्ति धारयति पोषयति चेति तथाभूतम् निर्गुणं प्राकृतगुणव-
र्जितमपि च पुनः गुणभोक्तृ सर्वेषां प्राकृतगुणानां सत्त्वरजस्तम-
सां भोक्तृ भोगकर्तृ ब्रह्मस्वरूपमपीदृशं तथाहि सर्वेंद्रियगुणाभा-
से सर्वेषामिंद्रियाणां बाह्याभ्यंतरकरणानां गुणानां विषयाणां चा-
भासः प्रकाशो यस्मात्तथा सर्वेषां प्रमातृप्रमाणप्रमेयाणां चेत-
नाचेतनवस्तुजातानां प्रकाशकमित्यर्थः सर्वेंद्रियविवर्जितं व-
[illegible] स्वयं न सर्वेंद्रियैः प्रकाश्यं न भवति सर्वभृदपि सर्वधारकम-
पि असक्तं तत्तद्गुणदोषैरलिप्तं गुणभोक्तृ स्वाभाविकानां यावदात्म-
प्रवृत्तीनां कल्याणानामनंतकानामनंतकारुण्यवात्सल्यसौशील्यादी-
नां गुणानां भोक्तृ भोगकर्तृ अपि निर्गुणं प्राकृतहेयसत्त्वादिगुणरहि-

+ अध्यारोपापवादाभ्यां निष्प्रपंचं प्रपंच्यत इति न्यायमनुसृत्य सर्वप्रपंचाध्यारोपेणानादिमत्परं ब्र
ह्मेति व्याख्यातमधुना तदपवादेन न सत्तन्नासदुच्यत इति व्याख्यातुमारभते निरुपाधिकस्वरूपज्ञानाय ॥

नैवलक्ष्यं भवतीत्यर्थः १४ ॥

मधुसूदनी टीका ९

+ परमार्थतः सर्वेंद्रियविवर्जितं सन्मायया सर्वेंद्रियगुणाभासं स
र्वेषां बहिःकरणानां श्रोत्रादीनामंतःकरणयोश्च बुद्धिमनसोर्गुणैर
ध्यवसायसंकल्पश्रवणवचनादिभिस्तत्तद्विषयरूपतया वभा
सत इव सर्वेंद्रियव्यापारैर्व्यापृतमिव तत्ज्ञेयं ब्रह्म ध्यायतीव लेला
यतीवेति श्रुतेः अत्र ध्यानेन बुद्धीन्द्रियव्यापारोपलक्षणं लेलाय
नेन कर्मेंद्रियव्यापारोपलक्षणम् तथा परमार्थतः असक्तं
सर्वसंबंधशून्यमेव मायया सर्वभृच्च सदात्मना सर्वकल्पितं बिभ
र्ति धारयति पोषयतीति च सर्वभृत् निरधिष्ठानभ्रमायोगात्
तथा परमार्थतो निर्गुणं सत्त्वरजस्तमोगुणरहितमेव गुणभोक्तृ च
गुणानां सत्त्वरजस्तमसां शब्दादिद्वारा सुखदुःखमोहाकारेण परि
णतानां भोक्तृ उपलब्धृ च मायया ब्रह्मेत्यर्थः १४ ॥

सदानंदी टीका ॥

अध्यारोपापवादाभ्यां निष्प्रपंचं प्रपंच्यते इति न्यायेन तज्ज्ञेयं विश्वा
ध्यारोपणेन च १ व्याख्यातमधुना विश्वापवादेन तदुच्यते बाह्यान
तरेंद्रियातीतं वस्तुतो ब्रह्मचिह्नतं २ बाह्यांतरेंद्रियाणां तत्सर्वेषाम
खिलैर्गुणैः संकल्पश्रवणाद्यैश्च मायया वभासते ३ सर्वेंद्रियाणां
व्यापारैस्तैर्व्यापृतवदेव न ध्यायतीवेति वाक्येपि ध्यानलेलायने
तथा ४ बुद्धेः कर्मेंद्रियाणां च व्यापार उपलक्ष्यते सर्वसंबंधशून्य
मद्धारयत्यखिलं जगत् ५ मायया कल्पितं स्वस्मिंस्तत्तयास्फुरणे
न च वस्तुतस्तद्गुणैर्हीनं मायया गुणभोक्तृ च ६ सत्वादीनां परी
णामवतां शब्दादिभिः पृथक् सुखदुःखाकारतस्तेषामुपलब्धृ मिद
हयं ७ १४ ॥ ॥

नीलकंठी टीका १२

ननु सृपाहवनीयादिवदलौकिकमपि ब्रह्म कार्यकारणप्रपंच
विशिष्टं चित्रमेव सर्वतः पाणिपादं तदित्यादिना शास्त्रेण कार्यशो
धनतया समर्प्यते न च वाच्यं उपासनापरं शास्त्रं न ब्रह्मणो वैचित्र्य

प्रतिपादयितुमीष्टे इति देवताधिकरणन्यायेन देवताविग्रहादि
वत्त्वैविश्वस्यापिप्रवांतरतात्पर्यविषयतयासिद्धेः नचदेवता
विग्रहादेर्व्यावहारिकमेवसत्वंनपारमार्थिकंब्रह्मज्ञानेनतस्य
बाधादितिवाच्यं सत्ताद्वैविध्यस्याप्रसिद्धेः तस्मात्सर्वतःपाणिपा
दत्वादिकंब्रह्मणोवास्तवमेवेतिनापवादमर्हतीत्याशंक्याह
सर्वेंद्रियेति सर्वाणिश्रोत्रादीनिबाह्यानिचइंद्रियाणिमनोबुद्ध्य
हंकारचित्ताख्यानिश्रोत्रादीनिचेतिग्राहकमात्रसंगृहीतं गुणा
श्चविषयाःतेनग्राह्यमात्रंगृह्यते समस्तग्राह्यग्राहकवदाभा
सतेनतुग्राह्यग्राहकस्वरूपंविविक्तं यथाजलसूर्योऽप्सुइवकं
पतइवाभासतेनतुवस्तुतोऽप्सुकंपतेवानइत्यात्मनोग्राह्य
ग्राहकाकारत्वंमिथ्येत्यर्थः कुतएतत् यतःसर्वेंद्रियविवर्जितं
इंद्रियेतिगुणानामप्युपलक्षणंनहिब्रह्मणिकिंचिद्ग्राह्यरूपा
दिग्राहकंवामनआदिवर्तते अशब्दमस्पर्शमरूपमव्ययं अप्रा
णोह्यमनाःशुभ्रः यत्तदद्रेश्यमग्राह्यमचक्षुःश्रोत्रंतदपाणिपाद
मित्यादिशास्त्रात्तस्मात्प्रपंचविशिष्टंविविक्तंब्रह्म कथंतर्हि
सर्वंब्रह्मेतिशास्त्रमित्याशंक्याह असक्तंसर्वभृच्चैवेति अत्रसर्व
भृदितिसर्वाधारत्वोक्त्यासर्वस्यान्तर्भूतमित्युक्ते सर्वस्यब्रह्म
णासहाधाराधेयभावोपिकिंचद्रूपयोर्विसमवायसंबंधे
नकुंडबदरयोरिवसंयोगसंबंधेनवेत्याशंक्यासंबंधत्वेनैवस
र्वभृत्वंब्रह्मणइत्याह असक्तमिति ननुव्याहतमेतत् असक्तमि
तिसर्वभृदितिचेति नैषदोषः नस्वप्नभूमिर्मरीचिकोदकेनसं
सक्ताअप्यवतदाधारभूतापिभवतितद्वदेतद्भविष्यति नन्वे
वंप्रपंचस्यमिथ्यात्वमापततीति तथाचकर्मोपास्तिविधयउप
रुध्येरन् न ब्रह्मात्मैकत्वज्ञानेनयावद्देहेंद्रबाध्यतेतावत्क्रिया
कारकादिसर्वव्यवहारस्यसत्यत्वोपगमात् प्राणावैसत्यंतेषामेष
सत्यमितिश्रुत्यापिप्राणोपलक्षितस्यकृत्स्नस्यप्रपंचस्यव्यावहारि
कंसत्यत्वमुक्त्वातेनापेक्षिकंपरमार्थसत्यंब्रह्मदर्शितं सत्यत्वं
चाबाध्यत्वंतत्किंचित्कालंप्राणानामस्तिब्रह्मणस्तुसार्वदिकमिति

यथा भूपतीनां भूपतिरित्युक्ते ऐश्वर्यातिशयत्वं भूयस्त्वकृतो भेदः स्या
देवमिहापि द्रष्टव्यं तस्माद्ब्रह्मणः सविशेषत्वं निष्कलात्मबोधा
त्प्रागेव न तूर्ध्वमित्यवगन्तव्यं तत्त्वज्ञानेन बाधितं शक्यमित्यनुपाधि
के ब्रह्मणि केन विकार्यशेषत्वं तेन शक्यं तदधिगमे क्रियाकारका
दिद्वैतोपमर्दी ह्युपास्योपासनाभेदस्य बाधितत्वात् तस्माद्युक्तमुक्त
मुपाधिकृतं रूपं मिथ्येति किंच निर्गुणो गुणभोक्ता च ग्राह्यग्राहक
संबंधस्यात्म्यमपि ग्राहके श्रुत्यादिग्राह्यसंबंधात्मत्वाया कारेण
परिणतेषु सत्सु केवलं तत्प्रकाशकत्वमात्रेण गुणभोक्तृत्वमप्यस्य
चिदाभासरूपस्योपपद्यते यथा प्रतिबिंबरूपेण बुद्ध्युपाधिकृतेन च
लनादिकेन तथा च श्रुतिः ध्यायतीव लेलायतीवेति बुद्धौ ध्यायंत्यां त
त्र प्रविष्टश्चिदाभासो ध्यायतीव न तु स्वतो ध्यायतीवेति प्रतिपादयति
एतेनापाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्ण इत्य
पि ब्रह्मण उपाधिगुणानुगुणभजनशक्तिमत्त्वेनैव व्याख्येयं अयमपा
दोऽपि पादे जववति जववान्भवतीति श्रेयोमार्गमविदद्भिरित्यादिकं व
चनजातं चात्रानुसंधेयं तस्माद्युक्तमुक्तं निर्गुणो गुणभोक्ता चेति भाष्ये
तु निर्गुणं सत्त्वादिगुणरहितमपि तेषां गुणानां सुखदुःखमोहात्मकत्वे
न परिणतानां भोक्तृ च उपलब्धृ चेति व्याख्यातं १४ ॥

आनंदी टीका १३

सर्वेषां ज्ञानकर्मेन्द्रियाणां ये गुणा दर्शनादयः तानाभासय
ति तत्तद्विषयग्रहणाभिमुखानन्तर्यामित्वेन करोतीति सर्वेन्द्रि
यविवर्जितमशरीरस्यैव कर्तृत्वप्रसिद्धेः श्रुतं हि अपाणिपा
दो जवन इत्यादि अतः समस्तजडवर्गो यथा ब्रह्माधिष्ठाय तिष्ठति
तथा ब्रह्म न किमप्यधिष्ठायेत्यर्थः अत एव भूतं सर्वं जडवर्गं
धारयति पोषयति च निर्गुणं यथा सत्त्वादीनामेतदधीना प्रवृ
त्तिः तथा नास्य गुणाधीना यतो गुणभोक्ता गुणाननुभवति ॥

रामकंठीटीका १४

सर्वेन्द्रियगुणाभासमिति यानि नानादेहक्षेत्रसंबद्धत्वेनावभा
समानानि सर्वाणि बाह्याभ्यन्तराणीन्द्रियाणि तेषां शब्दा
दिविषयावभासकत्वाद्योये गुणाधर्मास्तानवभासयति
प्रकाशयतीति यत्तत्तथोक्तं स्वयं तु सर्वेन्द्रियविवर्जितं नहि त
स्य मायावभासितावच्छिन्नस्वरूपे क्षेत्रज्ञवन्नियतेन्द्रियार्थो
पेतत्वमित्यर्थः तथाऽसक्तं विशुद्धचिन्मात्रैकस्वभावव्यव
स्थितत्वाद्देहद्वयप्राकृतप्रपंचेनाऽमिश्रीभूतमप्येवं सर्वभृत्
सर्वं बिभर्ति धारयतीति यत्तद्रहितत्वे व्यतिरिक्तस्वभावेपि
सर्वमिदमवस्थितं तद्विना कस्यचिदपि स्वरूपलाभाभावात्
अतएव निर्गुणं गुणेभ्यः सत्वादिभ्यः प्रकाशप्रवृत्तिनियमा
त्मकेभ्यः सुखदुःखमोहहेतुभ्यो निष्क्रान्तं तेभ्योऽन्यत्व्यति
रिक्तस्वरूपं नहि बलात् नित्यसुखबोधात्मकं भवति केवलमा
काशमिव सूर्यातपरजस्तिमिरादिभिस्तैस्तैर्गुणैरत्यन्तासंस्पृ
ष्टस्वरूपमपि तत्त्वविचारशून्यैः प्रमातृभिस्तद्वृत्त्यारूढत्वे
वस्तुतस्तद्गुणभोक्तृत्वाद्गुणानां भवितृतया भुक्तेन तत्तैस्त
स्वरूपमाश्रयते १४ ॥

+ अथैस्परस्परमाप्तिकारणभूतं कूटस्थं क्षेत्रक्षेत्रज्ञयोः स्वरूपं मत्वा चान्यान्यमविनाभूतत्वादेकत्र निर्दिशति ॥ +

लासिकी [illegible] टीका १५

क्षेत्रज्ञरूपेण सर्वेन्द्रियतद्विषयावभासकम् कूटस्थरूपेण
सर्वेन्द्रियविवर्जितम् आत्मरूपेणासक्तं संगरहितम् जी
वरूपेण सर्वभृत् सर्वं देहादिकमहंकारेण बिभर्तीति आत्म
रूपेण निर्गुणं सत्वादिरहितम् जीवरूपेण गुणानां सत्वादी
नां भोक्तृ उपलब्धृ न ज्ञेयमित्यर्थः ॥ [illegible]
[illegible] १४ ॥

पंवोलेटीका

उपाधिभूतपाणिपादादीन्द्रियत्वानेन्द्रियाध्यारोपणात्तेषु स्वातंत्र
नाशंकामाभूदित्येवमर्थमाह सर्वेन्द्रियेति सर्वेषामिन्द्रियाणां।
कर्मेन्द्रियत्वानेन्द्रियमनोबुद्धीनां बहिष्करणान्तःकरणाणां गुणैः श्रुप
ण

वसायसंकल्पश्रवणवदनादिभिः आभासत इति सर्वेंद्रियगुणाभासं।
कल्पश्रवणवदनादिभिः आभासत इति सर्वेंद्रियगुणाभासं सर्वेंद्रिय।
गुणपारैर्ग्रहीतमिवभासते सर्वेंद्रियांतःकरणबहिःकरणैः रहितं असं
क्तं सकलवस्तुसंश्लेषवर्जितं सर्वं बिभर्तीति सर्वभृत् एवं तत्सेवश्रुकि
सत्वादिगुणैर्वर्जितं निर्गुणं गुणानां सत्वादीनां सुखदुःखमोहाकारप
रिणामानामनुभवत् गुणभोक्तृ १४ ॥

रणवीरसमिद्धायिनी

सर्वेंद्रियेति सर्वेषां चक्षुरादीनामिंद्रियाणां गुणेषु रूपाद्याकार
वृत्तिषु तत्तदाकारेणभासत इति तथा सर्वाणींद्रियाणि तत्क
रणांश्च तत्तद्विषयानाभासयतीति वा सर्वैरिंद्रियैर्विवर्जितं च त
थाच श्रुतिः अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः सशृणो
त्यकर्णः इत्यादि असक्तं संगशून्यं तथा सर्वं बिभर्तीति सर्वभृत् स
र्वस्याधारभूतं तदेव निर्गुणं सत्वादिगुणरहितं गुणानां सत्वा
दीनां भोक्तृ च पालकं तु पाधिभूतपाणिपादादींद्रियाध्यारोप
णाज्ञेयस्य तद्भूताशंका माभूदित्येवमर्थोस्य श्लोकस्यारंभ इति
१४ ॥

मधुभाष्य

१४ ॥

98

भाषा अनुवाद टीका

और चक्षु आदि इन्द्रियोंके गुणस्वरूप अर्थात् रूपादि विषय
मे तिसतिस आकारसे वही प्रकाश मान है अथवा इन्द्रिय
और गुण कहे इन्द्रियों के विषय रूपादि समस्त मे सोई प्रका
श करताहै इससे सर्व इन्द्रियगुण आभास स्वरूप है और समू
र्ण इन्द्रीयों से रहित है सोई श्रुति कहती हैं कि सोई जो ब्रह्म
वे हस्त रहित होके भी ग्रहण करते औपाद विनाभी वेगवान
तथा चक्षु हीन द्रष्टा औकर्ण विहीन श्रोता और इन विषय
सकलको वे जानते हैं परन्तु उन को कोई भी नहीं जानता है व
ही परमात्मा को वेद सब आदिपुरुष औपुर्ण तथा सर्वव्यापी
कहते हैं और वे असक्त कहे सत्तादिगुण रहित औ गुण के
भोक्ता अर्थात् सत्तादि गुण समूह के प्रतिपालक है यह भग
वान अर्जुन से कहा १४ ॥

दोहा

सर्व इंद्रि गुणभासहै सर्व इंद्रि बिन सोय सर्वाधार असंगजो
निर्गुण गुणभुगतहोय १४ ॥

99

बहिरंतश्च भूतानामचरंचरमेवच सूक्ष्म
त्वात्तदविज्ञेयंदूरस्थंचांतिकेचतत् १५

शंकरभाष्यं टीका १

किंच बहिरन्तरिति बहिस्त्वक्पर्यन्तं देहमात्मत्वेनाविद्याकल्पितम
पेक्ष्य तमेवावधिं कृत्वा बहिरुच्यते तथा प्रत्यगात्मानमपेक्ष्य देह
मेवावधिं कृत्वान्तरुच्यते बहिरन्तश्चेत्युक्ते मध्ये अभावे प्राप्ते इद
मुच्यते अचरमेवच यच्चराचरं देहाभासमपि तदेव ज्ञेयं यथा
रज्जुसर्पाभासः यद्यचरं चरमेवच व्यवहारविषयं सर्वं ज्ञेयं किम
र्थमिदमिति सर्वैर्न ज्ञेयमित्युच्यते सत्यं सर्वाभासं तथापि व्यो
मवत् सूक्ष्ममतः सूक्ष्मत्वात् स्वेन रूपेण तत् ज्ञेयमप्यविज्ञेयम्
मविदुषां त्वात्मैवेदंसर्वं ब्रह्मैवेदं सर्वमित्यादि प्रमाणतो हि नित्यवि
ज्ञाते अविज्ञाततयाऽदूरस्थं वर्षसहस्रकोट्याप्यविदुषामप्राप्यत्वा
दन्तिके च तदात्मत्वात् विदुषां १५ ॥

आनंदगिरिकृतटीका २

इतोऽपि ज्ञेयं ब्रह्मास्तीत्याह किंचेति बहिरिति व्याख्येयमादाय
व्याचष्टे त्वगिति भूतेभ्यो बहिर्बाह्यं विषयात्मकमित्यर्थः क
थमनात्मन एवात्मत्वं कल्पनयेत्याह आत्मत्वेनेति अन्तःशब्दार्थ
माह तथेति भूतानां चराचराणामन्तर्मध्ये प्रत्यगात्मभूतमित्यर्थः
द्वितीयपादमवतार्य व्याचष्टे बहिरित्यादिना यन्मध्ये भूतात्मके
नानाविधदेहात्मना भासमाने तदपि ज्ञेयान्तर्भूतं नत्वसदित्यर्थः
कथं चराचरात्मनो भूतजातस्य ज्ञेयत्वं तत्राह यथेति अधिष्ठा
ने रज्जौ कल्पितसर्पादे रज्जुभाववद्देहाभासस्यापि ज्ञेयान्तर्भावान्ना
सत्त्वं मध्ये ज्ञेयस्य शङ्कितव्यमित्यर्थः सर्वात्मकं चेत् ज्ञेयं सर्वै
रिदमितिकिमिति न गृह्यतेनेतिशङ्कते यदीति इदमिति ग्राह्यत्व
योग्यताभावान्नेत्याह उच्यत इति सर्ववस्त्वात्मनाभासनस्तदयोग्य
त्वे कथमित्याशंक्याह सत्यमिति सूक्ष्मत्वेऽपि किं स्यादित्याशंक्या
ह अत इति सूक्ष्मत्वमतीन्द्रियत्वं तस्याविज्ञेयत्वे कृतत्वमज्ञाना

त्वक्तिमत आह अविद्वांसमिति विशेषणफलमाह विद्वांसमिति विद्वांसो हि तेषामात्मत्वेन ज्ञातं स्यात् कथं दूरस्थत्वमित्याशंक्याह अविज्ञाततयेति कथं तर्हि तस्य अन्तिकत्वमत आह अन्तिके चेति विदुदविदुद्भेदापेक्षया दूरात्सुदूरे तदिहान्तिके चेति श्रुतिः तदर्थोत्र प्रसंगादनूदित इत्यर्थः १५ ॥

स्वामिकृतटीका ३

किंच बहिरिति भूतानां चराचराणां स्वकार्याणां बहिरन्तश्च तदेव सुवर्णमिव कटककुंडलादीनां अचरं स्थावरं चरं जंगमं तदेव तज्जातं तदेव कारणात्मकत्वात्कार्यस्य एवमपि सूक्ष्मत्वाद्रूपादिहीनत्वात् तदविज्ञेयं इदं तदिति स्पष्टज्ञानार्हं न भवति अत एवाविद्वांसां योजनलक्षान्तरितमिव दूरस्थं च सविकारायाः प्रकृतेः परत्वात् विद्वुषां पुनः प्रत्यगात्मत्वात् अन्तिके च तत् सन्निहितं तथा च मंत्रः तदेजति तन्नैजति तद्दूरे तद्वंतिके तदंतरस्य सर्वस्य तदु सर्वस्यास्य बाह्यत इति एजति चलति नैजति न चलति तत् उ अन्तिके इति छेदः १५

पिशाचभाष्यं टीका ४

बहिः शरीरादंतश्च १५ ॥

रामानुजभाष्यं टीका ५

बहिरंतश्चेति पृथिव्यादिभूतानि परित्यज्य शरीरो बहिर्वर्तते तेषामंतश्च वर्तते जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा इत्यादि श्रुतिसिद्धस्वच्छंदवृत्तिषु अचरं चरमेव च स्वभावतो ऽचरं चरं देहित्वे सूक्ष्मत्वात्तदविज्ञेयं एवं सर्वशक्तियुक्तं सर्वज्ञं तदात्मतत्त्वं अस्मिन् देहे वर्तमानमपि अतिसूक्ष्मत्वात् देहात्पृथक्त्वेन संसारिभिर्न विज्ञेयं दूरस्थं चान्तिके च तत् पृथिव्यादिभूतानि परित्यज्य शरीरो बहिर्वर्तते तेषामंतश्च वर्तते अमानित्वादियुक्तगुणरहितानां पुंसां स्वदेहे वर्तमानमप्यतिदूरस्थं तथामानित्वादिगुणोपेतानां तदेवान्तिके च वर्तते १५ ॥

अभिनवगुप्तकृतटीका ७

स्पष्टार्थम् १५ ॥ परमार्थप्रपाटीका

किंच बहिरंतश्चेति भूतानां चराचराणां स्वकार्याणां बहिर्बाह्यतोंतरंतरश्च तदेव

सुवर्णमिव कटककुंडलादीनामचरं स्थावरं च जंगमं भूतजातं तदेव कारण
त्मकत्वात्कार्यस्य एवमपि सूक्ष्मत्वाद्रूपादिगुणातीतत्वादविज्ञेयं इदं त(
दित्याकारेण ज्ञानार्हं न भवति अत एवाविदुषां प्रतिहतं तः स्थितं विदुषां
पुनः प्रत्यगात्मत्वादंतिके [illegible] सन्निहितं यद्वा व्यापकत्वात् घटादीनां
काशवत् दूरे अंतिकेपि तदेव अकृतिरूपी श्रावासोपनिषत्तु तदेजति तन्नै
जति तद्दूरे तदंतिके तदंतरस्य सर्वस्य तदु सर्वस्यास्य बाह्यत इति भाष्य
तदात्मा खं वस्तु एजति एजृ कंपने कंपते अथ तन्न एजति निष्कंपमस्ति अ
नेजदेकं मनसो जवीय इति तत्रैवोक्तं तथा दूरे अंतिके च तदेव व्याप
कत्वात् अत एव तदस्य जगतो अंतरस्ति तथा तदु सर्वस्यास्य बाह्यतः य
थाघटांतर्बहिरेक आकाशोस्ति १५ ॥

वनमाली टीका ५

भूतानामाकाशादीनां ब्रह्मादिकीटपर्यंतानां प्राणिनां च बहिरंत
धारकत्वात्पालकत्वाच्च तेषामंतर्यामित्वाद्व्यापकत्वाच्च अ
न्यथाभावराहित्यादचरं सर्वं च देशेषु चरति वर्तते सर्वत्र प्राप्तमि
त्यर्थः गम्यर्थानां प्राप्त्यर्थत्वात् सूक्ष्मत्वादितरादिंद्रियाग्राह्यत्वाद
नुमानस्यत्वानेश्रेणासाधकत्वात् वेदैकसाकल्येनाप्रतिपादना
त्तद्ब्रह्माविज्ञेयमित्युच्यते कंठस्याविस्मृतमणिरिवाज्ञेयत्वात् दू
रस्थं व्यापकत्वेनकपर्यविभूतत्वेनवांतिकेवस्थितं १५ ॥

कुसुमवैजयन्ती टीका ५

किंच बहिरंतश्चेति भूतानां प्राकृतशरीराणां बहिरंतश्च स्थितं
मुक्तावस्थायां तेभ्यो भूतेभ्यो बहिर्वर्तते बद्धावस्थायां च तेषामंत
र्वर्तते जक्षत् क्रीडन्रममाणः सह वस्त्रेणाविपश्चित् जक्षत्क्रीड
न्रममाणः स्त्रीभिर्वा यानैर्वेत्यादिश्रुतिभिर्जीवात्मनो मुक्तवद्धाभ(
यावस्थायामपि स्वच्छंदवर्तित्वमुच्यते अचरं हृत्पाषाणादिशु
स्थितं चरं देवमनुष्यादिषु स्थितं मत्स्यो भयविवशशरीरित्वात्तद्दूर
त्वात्तदविज्ञेयं जीवस्यास्य सूक्ष्मत्वादणुस्वरूपत्वात् अणोरणीयस्त्वा
त्मा चेतसा वेदितव्यः वालाग्रशतभागस्य शतधा कल्पितस्य च भा
गो जीवस्स विज्ञेयः स चानंत्याय कल्पते इत्यादिश्रुतेः अस्मिन्देहे(
वर्तमानमपि संसारिभिर्जनैर्लक्षणमत एव अविज्ञेयं देहादृष्टत्वेन
ज्ञानमशक्यं दूरस्थं वांतिके च तत् बाह्यवृत्तीनां तन्मार्गमस्वरू
पे दूरस्थं अंतर्गतवृत्तीनां वांतिके समीपस्थं द्वितीयच शब्देनात्र(

श्री·
गी·टी·
३·

10

दूरांतिकत्वेदेवत्तकर्मसापेक्षाभगवद्रूपैवहेतुरितिशेषंतम्
एवंब्रह्मस्वरूपमपितथाहिवहिरितिभूतानांचेतनाचेतना
त्मकानांवहिर्व्यापकरूपेणांतरंतर्यामिरूपेणस्थितंसं
र्वहिव्याप्तमत्सर्वंव्याप्यनारायणःस्थितइतिश्रुतेःअचरंचरमेव
विदवितत्मिश्रंचकार्यंस्थावरजंगमरूपंतत्तदात्मकत्वेनत
त्तन्नामात्मत्वयमेवस्थितं [illegible]
[illegible] सर्वेवेदायत्पदमामनंतिनामानिसर्वाणियमा
विशंतिसर्वेनामासर्वेकर्मामहात्मेत्यादिश्रुतिभ्यःएवंचेतर्हि
सर्वैर्जनैःकुतोनज्ञायतेचेत्तत्राह सूक्ष्मत्वात्तदविज्ञेयं अणुरू
पस्यजीवस्याप्यंतरेस्थितमपितत्सूक्ष्मत्वेरविज्ञेयंतातेनशाक्यंत
हिनज्ञानाभावात्कस्यापिमुक्तिर्नस्यादितिचेत्तत्राह दूरस्थंचां
तिकेचतत् अमानित्वादिगुणवर्जितानांजनानांस्वशरीरेवर्त
मानमपिदूरस्थंअमानित्वादिगुणयुक्तानांतुश्रेष्ठमंतिकेएव
तत्रिष्ठतितएवज्ञानिनोभूत्वामज्जकामोक्षभागिनोभवंतिनान्य
इत्यर्थः १५ ॥

मधुसूदनीटीका ॥

भूतानांभवनधर्माणांसर्वेषांकार्याणांकल्पितानामकल्पित
मधिष्ठानमेकमेववहिरंतश्चरज्जुरिवस्त्रकल्पितानांसर्पधा
रादीनांसर्वात्मनाव्यापकमित्यर्थः एवंसर्वात्मकत्वेपिसूक्ष्मत्वा
द्रूपादिहीनत्वात्तदविज्ञेयमिदमेवमितिस्पष्टज्ञानार्हंनभवति
अत्तएवात्मज्ञानसाधनशून्यानांवर्षसहस्रकोट्यापिअप्राप्य
त्वात्दूरस्थंचयोजनलक्षांतरितमिवतत् ज्ञानसाधनसंप
न्नानांत्वंतिकेचतत् प्रत्यग्व्यवहितमेवात्मत्वात् दूरात्सुदूरेतदि
हांतिकेचपश्यत्स्विहैवनिहितंगुहायामित्यादिश्रुतिभ्यः [illegible]
[illegible]
[illegible] १५ ॥

सदानंदीटीका ॥

सर्वेषांकल्पितानांतत्कार्याणांपारमार्थिकं अधिष्ठानतयाव्याप्तमेव

अतएवअचरंस्थावरंचरंजंगमं भूतजातंतदेवाधिष्ठानात्मकत्वात् कल्पितानांततः किंचिद्व्यतिरिच्यतइत्यर्थः

ह्रिरंतस्तत्ताहते स्थावरंजंगमेयथत्ततज्ञानेप्रकल्पितं तत्सर्वेब्रह्म
विन्मात्रेणततोव्यतिरिच्यते १ कल्पितानामधिष्ठानस्वरूपत्वेनभिन्न
ता एवंसर्वात्मकत्वेंडुर्लक्ष्यत्वादहपितत् ३ दुर्विज्ञेयमतोज्ञानो
देहाद्यात्मधियोंन्दणां वर्षकोटिसहस्रैस्तदप्राप्यत्वात्सुदूरगं ४
विद्वषोस्वात्मरूपेणानित्यप्राप्तेःसमीपगं ५ १५ ॥

नीलकंठी टीका १२

ननुसतक्रमसंबंद्धचेत्कथमनुपलभ्यसादित्याशंक्याह बहिरिति भू
तानांप्राणिनांएकादशेंद्रियाणिस्थूलभूतानिचकेवलविकारत्वे
नवबहिस्तत्वात्बहिरित्युच्यंते महदहंकारपंचतन्मात्राख्यानि
प्रकृतिरूपत्वेनसंनिहितत्वादंतरित्युच्यंते चराचरमिति उभयति
कृत्स्नाश्चराचरोपाद्युपलक्षिताश्चवाधिभूताःपुरुषाश्चरमचरंचेत्य
नेनोच्यंते तच्चराचरंज्ञेयमितिसामानाधिकरण्यात्पुरुषाणा
मेवब्रह्मभावउक्तः बहिरंतश्चज्ञेयमितिषोडशस्वविकारेषुसप्त
सुप्रकृतिषुचज्ञेयस्यसंबंधउक्तः सचसंबंधोयादृशोयत्तत्त्वाद
ध्यासोबलिरितिन्यायेनस्थूलप्रकृतिविकृतिनिरूपितत्वेनाध्यस्त
एवंचपुरुषस्योपलब्धिमात्रशरीरस्यगुणैःसहप्राध्यासिकसंबंध
सत्वात्गुणोपलब्धृत्वंयुज्यते यथाप्रकाशमात्रस्वरूपस्यरवेःप्र
काश्यसंबंधापेक्षंप्रकाशयितृत्वंतद्वदित्यर्थः नन्वनित्यापरोक्षःपु
रुषप्रकृतिविकारसंबद्धश्चनहिकृतोनसर्वैर्दृश्यतइत्याशंक्याह
सूक्ष्मत्वात्दुर्लक्ष्यत्वात्तज्ज्ञेयंअविज्ञेयंदुर्विज्ञेयं यथाजपाकुसुमो
पहितस्यस्फटिकस्यशौक्ल्यंसन्निहितमपिरूपांतरव्यवहितेपेरणाऽ
तिरोहितंसन्नगृह्यते एवंनित्यापरोक्षमप्यसंगंब्रह्मलोपाधेरुपया
ताद्विविक्ततयानगृहीतंशक्यंकिंत्वौपाधिकधर्मापेतमेवगृह्यतेमू
ढैः विद्वद्भिस्तूपाधिप्रविलापनेनस्वयंगृह्यतइत्याशयः एतदेवाह दू
रस्थंचांतिकेचतदिति यथास्फटिकजलेसूर्यबिंबस्यातिदूरस्थमप्यते
विहंतस्तडुपाधिप्रतिहननयनरश्मीनांस्वयंप्रेक्षणमगतानांबिंबग्रा
हित्वेसत्यपि बिंबस्यापश्यन्नवग्रहणंतदृष्टुंप्रथमापायस्वल्हृतिसंका
रापेक्षमितिजानन्बिंबदेशमेवप्रतिबिंबंपश्यति बिंबमेवजल

श्री॰
गी॰टी॰
त्रे॰

102

स्वतमथस्यतेनतज्जलेप्रतिबिंबइति उपाधौपम्यासकल्पनातो
विषयस्योपाधिसंसर्गमात्राभ्यासकसनेलाघवात् एवंबिंबभूते
ब्रह्मप्रतिबिंबभूतान्जीवान्प्रत्यानोविप्रकृष्टेविडंबोतत्रअपेतेसंनि
कृष्टमिति १५ ॥

आनंदीटीका १२

एतदेवदर्शयति — वऊशोवाख्यानमिदम् १५ ॥

रामकंठी टीका ४

अतएवाःनवच्छिन्ननिजमाहात्म्यविश्वरूपत्वादाकाशमिवघटादी
नांसर्वभूतानांचराचराणांवहिर्ज्ञेयभावेनान्तर्ज्ञातृभावेनचाव
भासमानमपिपरमार्थतःसामान्यसंवित्स्वभावमेवैकंतत्वव्यव
स्थितंदेहादिप्रत्ययव्यवस्थानमात्रकृतोवाह्याभ्यंतरव्यपदेशः
अतएवाह नित्यनिर्मलस्वभावमात्रप्रतिष्ठितत्वादचरंगतिधर्म
विवर्जितंसर्ववस्तुवेदकतयानित्यप्रसृतशक्तित्वाच्चरंगमनशील
मिव तथेदन्तावसेयसर्ववस्तुविलक्षणस्वरूपत्वात्परमसूक्ष्मंत
त्तस्माच्चसोत्स्माकरणादविज्ञेयमिदमित्यनवधार्यस्वरूपमनप
वसर्वप्रमातॄणांज्ञेयत्वाभावाद्दूरस्थमतिविप्रकृष्टमथचतद्धि
नाकस्यचिदपिज्ञानस्यकर्मणोवाप्यनुपपत्तेः सर्वेषामन्तिके
+एवंमायाकल्पितंचान्तर्वि
धंप्रतिपाद्य अधुनापारमार्थिकेनरूपेणैकं
पादयति॥

भ्यासेस्थितं ॥ १५ ॥

लासिकी [illegible] टीका १५ ॥

+भूतानांचराचराणांवहिरन्तश्चपरमार्थतस्तदेवमञ्छन्नाभि
धेयंज्ञेयंसुवर्णमिवकटककुण्डलादीनाम् अचरंस्थावरंच
रंजंगमंभूतजातं तदेवकारणात्मकत्वात्कार्यस्य नन्वेवमखं
डितंवेतर्हिकथंनदृश्यतेइत्यतआह तत्सूक्ष्मत्वाच्छब्दस्पर्शता
दिदंतावच्छिन्नरूपादिहीनत्वादविज्ञेयमिदंतावच्छिन्नवस्तुनि
ष्ठज्ञेयत्वेनप्रमाणम् लोकैकरत्वादतोनदृश्यते तथाचश्रुतिःवि
ज्ञातारमरेकेनविजानीयात् अतआत्मनःप्रमेयत्वंप्रतिपादय
तोध्यायतयाध्यायतांचदूरस्थंयोजनलक्षान्तरितं प्रमात्रत्वेन
ध्यात्रतयाचविमर्शज्ञानानंदंनिकेचसन्निकृष्टंप्राममेवतुःसाथ

४

नऽक्रंस्वपदास्वशिरश्छायांयद्वल्लंघितुमीहते पादोद्देशेशिरोन स्यात्तथेयंवैंद्वीकलेति अन्यत्र यत्प्रमेयीकृतोऽस्मीति सर्वेषा ल्ं न्मनिर्जिते कथंप्रमेयीकरणंसहतांतन्महेश्वरइति १५ ॥

पंचोलेटीका

बहिरिति बहिः अन्तः तत्तत्पंचस्य भूतानां त्वक्पर्यन्तानां देहानां मध्ये च कल्पितमधिष्ठानमेकमेव बहिर्व्यापकत्वेन स्वरूपेण वर्तते अन्तर्देह मध्ये जीवस्वरूपेण वर्तते मध्यस्थानीयं चराचरं स्थावरजंगमस्वरूपं स। र्वं तत्पंचब्रह्मैव वर्तते अविवेकिभिः स्वतन्त्रत्वेनाध्यात्मस्वरूपेणाविज्ञे यमत एव तेषां दूरस्थं विवेकिनामात्मत्वेन सुलभत्वात् अन्तिके नि कटे १५ ॥

रमणवीरसमिद्बोधिनी

बहिरिति भूतानां भवनधर्माणां सर्वेषां कार्याणां कल्पितानाम कल्पितमधिष्ठानमेकमेव बहिरन्तश्च रज्जुरिव सर्पकल्पितानां स र्पादीनां सर्वात्मना व्यापकमित्यर्थः अत एव चरं स्थावरं चर चरं जंगमं भूतजातं तदेवाधिष्ठानात्मकत्वात्कल्पितानां ततः किं विद्यते इति विद्यतेऽर्थः एवं सर्वात्मकत्वेऽपि सूक्ष्मत्वाद्रूपा दिहीनत्वात् न दृश्यं विज्ञेयमिदमेवेति स्पष्टज्ञानार्हं न भवति अत एवात्मज्ञानसाधनशून्यानां वर्षकोट्याप्यप्राप्यत्वाद्दूरस्थं यो जनलक्षकोट्यन्तरितमिव तज्ज्ञानसाधनसंपन्नानां चान्तिके वर्तदव्यवहितमेवात्मत्वादिति १५ ॥

मधुभाष्य

१५ ॥

103

भाषा अनुवाद टीका

और जैसे सुवर्ण के कार्य कड़ा कंगन कुंडल आदि आभूषणोमे
सोना कारण रूपसे भीतर बाहरवर्त्तमान है और जैसे जल तरं
गमे भी जलछोडि और नहीं है तथा आकाश जैसे सकल वस्तु
के वहिरन्तरवर्त्तमान है तैसेही ब्रह्म के कार्य स्वरूप चराचरादि
भूत समूह मे अन्तर वाहिर भी सोई ब्रह्म ही वर्त्तमान है क्यों
कि तावत कार्य के कारण सोई हैं परन्तु ऐसे होके भी रूपादि
विहीन होनेसे यह इनने ऐसे कर स्पष्टरूप जानने योग्य नहीं
हैं और यही ब्रह्म अज्ञानियों को लक्ष योजनके समान दूर है
क्योंकि विकार सहित जो प्रकृति तिससे पर है और ज्ञानियों को
अपरोक्ष रूपसे नित्यनिकट हैं सूक्ष्मता के कारण अज्ञानियों
को अविज्ञेय और वेदशास्त्र मार्ग से चलनेवाले ज्ञानियों को वि
ज्ञेय है अर्थात् जानिवे योग्य है आकाश के नाईं जानो इसको
भो १५ ॥

दोहा

बाहर अंतर जीवके स्थावर जंगम होहि   जान्यो जात न सू
क्ष्मसें दूर निकट स्थित सोहि १५॥

104

अविभक्तंच भूतेषु विभक्तमिव च स्थितं
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च १६

शांकरभाष्यं टीका १

किंच अविभक्तमिति अविभक्तं च प्रतिदेहं व्योमवत् तदेकं
भूतेषु सर्वप्राणिषु विभक्तमिव च स्थितं देहेष्वेव विभाव्यमा
नत्वात् भूतभर्तृ च भूतानि बिभर्तीति तत् ज्ञेयं भूतभर्तृ च
स्थितिकाले प्रलयकाले ग्रसिष्णु ग्रसनशीलं उत्पत्तिकाले
प्रभविष्णु च प्रभवनशीलं यथा रज्ज्वादिः सर्पादेर्मिथ्याकल्पि
तस्य १६ ॥

आनंदगिरिकृतटीका २

ज्ञेयस्यात्मत्वे हेत्वन्तरमाह किंचेति नहि प्रतिदेहं नभोवदेकं
तद्भेदे मानाभावात् भिन्नत्वे च घटवदनात्मत्वापातादतोऽद्वि
तीयं सर्वत्र प्रत्यग्भूतं ज्ञेयं नास्तीत्यतिप्रसंगमित्याह अवि
भक्तंचेति कथं तर्हि देहभेदे भेदधीरित्याशंक्य कल्पनयेत्याह
भूतेष्विति तत्र हेतुः देहेष्विति कार्याणां स्थितिहेतुत्वाच्च ज्ञेय
मस्तीत्याह भूतेति निमित्तोपादानतया तेषां प्रलये प्रभवे च
कारणत्वाच्च तदस्तीत्याह प्रलयेति तर्हि कार्यकारणत्वस्य
वस्तुत्वान्नाद्वैतमित्याशंक्याह यथेति १६ ॥

स्वामिकृतटीका ३

किंचाविभक्तमिति भूतेषु स्थावरजंगमात्मकेषु अविभक्तं का
रणात्मनाभिन्नं कार्यात्मना विभक्तं भिन्नमिव स्थितं च तत्तद्वी
क्तेज्ञेयं भूतानां भर्तृ पोषकं स्थितिकाले च प्रलयकाले ग्रसिष्णु
ग्रसनशीलं सृष्टिकाले प्रभविष्णु नानाकार्यात्मना प्रभवणः
शीलम् १६ ॥

पैशाचभाष्यंटीका ४

अविभक्तमभिन्नमाकाशवत् भूतभर्तृ स्थितिकाले ग्रसिष्णुः प्र
लयकाले प्रभविष्णुः उत्पत्तिकाले १६ ॥

श्री॰
गी॰ टी॰
३॰

105

रामानुजभाष्यटीका ५

अविभक्तमिति देवमनुष्यादिभूतेषु सर्वत्र स्थितमात्मवस्तु वेदितु
रेकाकारतया अविभक्तं अविदुषां देवाद्याकारेणायं देवो मनुष्य
इति विभक्तमिव च स्थितं देवोहं मनुष्योहमिति देहसामानाधिक
रण्येनानुसंधीयमानमपि वेदितृत्वेन देहादर्थान्तरभूतं ज्ञातुं
शक्यमित्युक्तमेन त्वेवेति इदानीं प्रकारान्तरेणापि देहाद
र्थान्तरत्वेन ज्ञातुं शक्यमित्याह भूतभर्तृ चेति भूतानां पृ[illegible]रूपे
ण संहतानां यद्भर्तृ तद्भर्तव्येभ्यो भूतेभ्योर्थान्तरं ज्ञेयं अर्थान्तरमि
ति ज्ञातुं शक्यमित्यर्थः तथा ग्रसिष्णु अन्नादीनां भौतिकानां ग्रसि
ष्णुः ग्रस्यमानेभ्यो भूतेभ्योर्थान्तरभूतमिति ज्ञातुं शक्यमित्यर्थः
प्रभविष्णु च प्रभवहेतुश्च ग्रस्तानामन्नादीनामाकारान्तरेण परि
णतानां प्रभवहेतुस्तेभ्योर्थान्तरमिति ज्ञातुं शक्यमित्यर्थः मृत
शरीरे ग्रसनप्रभवादीनामदर्शनात् भूतसंघातरूपो देहो न
ग्रसनप्रभवभरणहेतुरिति निश्चीयते १६ ॥

श्रीमद्वेङ्कटनाथकृतटीका ६

स्पष्टार्थम् १६ ॥

परमार्थप्रपाटीका ७

किंच अविभक्तमिति भूतेषु नानानामरूपकर्मात्मकेषु का
रणात्मना अविभक्तमेव तथा कार्यात्मना विभक्तमिव च स्थि
ते तत्त्वतस्तु यथा भिन्ननामाकारेषु तरंगावर्तकल्लोलेषु एकं
जलमेवास्ति यथा [illegible] वा तरंगादीनामुत्पत्ति
स्थितिलयानामुदकमेवाश्रयस्तद्वद्भूतभर्तृ स्थितिकाले
पोषकं ग्रसिष्णु संहारकाले ग्रसनशीलं सृष्टिकाले प्रभ
विष्णु नानाकार्यात्मना प्रभवनशीलं तदेव ज्ञेयं १६ ॥

[illegible]

[illegible] ॥४

वनमाली टीका ८

तस्याद्भुतप्रभावमाह अविभक्तमिति विभक्तेषु भिन्नेषु सर्वेष्वपि भू
तेषु तयोमित्तया स्थितमविभक्तमभिन्नमेव नदीयनत्वमजानतां
नियमेन भेदेन भिन्नमिव प्रतीयते भूतानां प्राणिनां भर्तृ पालकं पो
षकं ग्रसिष्णु संहारकं प्रभविष्णु उत्पादकं तत्परं ब्रह्म मत्तत्त्वं ज्ञेयं वे
दांतश्रवणमनननिदिध्यासनादिभिरपरोक्षीकार्यं १६ ॥

ऊह्ममवैजयन्तीटीका ९

किंच अविभक्तमिति भूतेषु देवमनुष्यादिदेहेषु अविभक्तमभिन्नं ना
चकारोप्यर्थे देवोऽहं मनुष्योऽहमिति देहमात्राधिकरणेपि न प्रतीय
मानमपि विभक्तेभिन्नमिव शास्त्रैः वथारणेभिन्नमेव स्थितं एवं देह
जीवयोरत्वेन नत्वेन त्वेन नत्वे न च स्वरूपेणाभिन्नत्वेपि आत्मात्मीय
त्वाधाराधेयत्वव्याप्यव्यापकत्वादिसंबंधेन वा भिन्नमिति भगवता
भिन्नाभिन्नत्वदर्शिने भूतभर्तृ त्वं च भर्तृभृत्यत्वसंबंधेनापि भिन्नाभिन्नं
ग्रसिष्णु अन्नादिरूपेण परिणतानां तेषां भूतानां ग्रसनशीलं ग्रसितृ
त्वग्रस्यत्वसंबंधेन भोक्तृभोग्ययोर्भिन्नाभिन्नत्वे स्यात् प्रभविष्णु च दे
हादीनामन्नादीनां चोत्पत्तिहेतुः ईदृशोयदात्मवस्तु तद्रूपेण ज्ञेयं वेत्ती
ति वेदितृत्वेन सर्वेभ्यो देहादिभूतेभ्योऽप्यंतरत्वेन सा तत्साक्षाभिन्न
भेः एवं ब्रह्मस्वरूपमपि तत्त्वाह अविभक्तमि[illegible]ति भूतेषु चेत
नाचेतनरूपेषु तादात्म्यसंबंधेनाविभक्तमविभिन्नं च पुनः विभक्त
मिव स्वरूपेणाभिन्नमेव स्थितं च पुनः भूतभर्तृ विरचितद्रूपाणां भूता
नां स्थितौ पालनकर्तृ च पुनः ग्रसिष्णु प्रलयकाले तेषां भूतानां संह
र्तृ च पुनः प्रभविष्णु सृष्टिसमये येषां भूतानामुत्पत्तिकर्तृ यतो वा
इमानि भूतानि जायन्ते येन जातानि जीवंति यत्प्रयंत्यभिसंविशं
ति तद्ब्रह्म विजिज्ञासस्वेत्यादिश्रुतेः जन्माद्यस्य यतः इति लक्षणसूत्रा
च्च उपजिज्ञासाविषयं जगदभिन्ननिमित्तोपादानकारणं अथाद्भिन्ना
भिन्नस्वरूपं तद्ब्रह्म ज्ञेयमसमानित्वादिगुणयुक्तैर्जनैर्ज्ञातव्यमिति भा
वः १६ ॥

+ यदुक्तमेकमेव सर्वमावृत्य तिष्ठतीति तद्विवृणोति प्रतिदेहमात्मभेदवादिनां निरासाय भूतेष्व

श्री॰
गी॰ टी॰
३॰

106

मधुसूदनी टीका ९

+ सर्वप्राणिषु अविभक्तमभिन्नमेकमेव तत्तत्प्रतिदेहं भिन्नं व्योमव
त्सर्वव्यापकत्वात् तथापि देहतादात्म्येन प्रतीयमानत्वात्प्रतिदेहं
विभक्तमिव च स्थितं औपाधिकत्वेन न पारमार्थिको व्योम्नीवात्र भे
दावभास इत्यर्थः ननु भवत्वेतत् क्षेत्रज्ञः सर्वव्यापक एकः ब्रह्म तु जग
त्कारणं ततोऽभिन्नमेवेति नेत्याह भूतभर्तृ च भूतानि सर्वाणि स्थि
तिकाले बिभर्तीति तथा प्रलयकाले ग्रसिष्णु ग्रसनशीलं उत्पत्तिका

व

ले प्रभविष्णु प्रभवनशीलं सर्वस्य यथा रज्ज्वादिः सर्पादेर्मायाकल्पित
स्य तस्माद्यज्जगतः स्थितिलयोत्पत्तिकारणं ब्रह्म तदेव क्षेत्रज्ञं प्रतिदे
हमेकं ज्ञेयं न ततोऽन्यदित्यर्थः [illegible]
[illegible]
[illegible] १६ ॥

सदानन्दी टीका ११

यदुक्तमेकमेवेदं सर्वमावृत्य तिष्ठति इत्येतद्विवृणोतीत्यात्मभेदवाद
निहतये १ अभिन्नं सर्वभूतेषु व्योमवद्व्यापकं महत् देहतादात्म्य
रूपेणाभासमानतया भ्रमात् २ प्रतिदेहं विभागेन तत्तद्भासमिव च
स्थितं औपाधिकतया प्रत्यग्भेदाभासेन कात्स्न्यतः वास्तवाद्वैतविद्व
तोः क्षेत्रज्ञस्यात्मनो विभोः ३ ननु क्षेत्रज्ञ एको व्यापकः सर्वजन्तुषु ४
ब्रह्म तस्माद्धि भिन्नं स्याज्जगज्जन्मादिकारणं मैवं ब्रह्मैव चिन्मात्रं क्षे
त्रज्ञं ज्ञेयमद्वये ५ स्थितौ बिभर्ति भूतानि लये ग्रसनशीलवत् सृ
ष्टौ सर्वप्रभवनशीलं ज्ञेयं तदद्वये ६ यथा रज्ज्वादिः सर्पादेः कल्पि
तस्य तथात्मनः जनिस्थितिलयाधारं तथा ब्रह्माखिलस्य तत् ७ १६

नीलकंठी टीका १२

एतदेवोपपादयन्नाह अविभक्तं चेति एक एव तु भूतात्मा भूते
भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचन्द्रवदिति श्रुतेर्भू
तेषु कार्यकारणसंघातापन्नेषु मलपात्रेषु चन्द्र इव ब्रह्मणः प्रति
बिम्बा जीवा इति चोक्तरीत्या बिम्बादनन्या इति रूपेण भूतेषु अविभ
क्तं च विभागमप्राप्तमपि ज्ञेयवस्तु मृद्घटप्राणाविभक्तमिव हरदेश

स्थमिव चाहिभिन्नमिव च स्थितं एवं तर्हि चेश्वरस्य तद्रूपाज्ञानामि
व भूतानां पृथक्त्वापत्तिरित्याशंक्याह भूतभर्तृ चेति अपि
तत्वेन सर्वाणि भूतानि धारयतीति तत्तस्मात् पृथक्त्वं नास्ति
रज्जुतत्त्वं तदध्यस्तानां सर्पदंडधारादीनामित्यर्थः पुनरेवाह
ग्रसिष्णु प्रभविष्णु च यथा रज्जुः स्वमस्तानदर्शायां सर्पादीन्ग्र
सति अस्तानदर्शायां च तानेव प्रसूते तद्वत्तत्त्वं ब्रह्म सर्वभूता
नि ग्रसिष्णु ग्रसनशीलं प्रस्तानेव सर्वभूतानां प्रभविष्णु उत्पाद
नशीलं १८ ॥

आनंदी टीका १३

वज्रशोभ्या व्याख्यातमिदम् १६ ॥

रामकंठी टीका १४

तथाविभक्तेषु देवमनुष्यतिर्यगादिभेदत्वात्परस्परभिन्नेषु वस्तु
षु सामान्यसंविदात्मकत्वेनाविभक्तमभिन्नैकस्वरूपमथ च
विभक्तवच्च स्थितं भेदेनावभासमानत्वात्तथा तत्तत्त्वं भूतभ
र्तृ सर्वभूतानां तत्स्वरूपस्यावस्थित्येकहेतुत्वाद्धारकं ।
तथा ग्रसिष्णु संहारशक्तियुक्तत्वाद्ग्रसनशीलं तथा प्रभविष्णु
उत्पादनहेतुत्वात् स्थितिप्रलयसर्गकारणमित्यर्थः १६ ॥

लासिकी टीका १५

भूतेषु देवमनुष्यादिषु विरूपतया परमार्थतोऽविभक्तमे
व सद्विभक्तमिव स्थितम् आपाते देहाद्युपाधिभेदेन भा
समानत्वात् तदुक्तं चिद्धर्मा सर्वदेहेषु विशेषो नास्ति कुत्र
चिदिति अथ मंदाधिकारिणामुपासनार्थं तस्य ज्ञेयस्य सा
कारतामाह भूतभर्तृ चेति तदेव ज्ञेयं स्वत्वेन प्रत्यभिज्ञातं
योगं प्रविष्णुरूपेण स्थितिकाले भूतभर्तृ रुद्ररूपेण प्र
लयकाले ग्रसिष्णु ब्रह्मरूपेण सृष्टिकाले प्रभविष्णु
प्रभवनशीलं १६ ॥

पंचोलेटीका

यदुक्तमेवतदिहशृणोति अविभक्तमिति वस्तुतः भूतेषुस
र्वेषुसर्वदेहेषुअविभक्तं व्योमवत्सर्वगतं एकमेवसर्वप्रति
देहंविभक्तमिवभिन्नमिवदृश्यते तत् ज्ञेयंभूतभर्तृस्थिति
कालेभूतानिबिभर्तिग्रसिष्णुप्रलयकालेग्रसनशीलंप्रभवि
ष्णुसर्गकालेप्रभवनशीलं १७॥

श्रगवीसमिद्धोधिनी॥

किंच तज्ज्ञेयंभूतेषुचराचरात्मकेषुसर्वेष्वविभक्तमभिन्नं
कारणात्मकत्वादेकमेवतद्विभक्तमिवभिन्नमिवस्थितं
देहेष्वेवविभाव्यमानत्वात् भूतभर्तृभूतानिबिभर्तीतिभूत
भर्तृस्थितिकाले ग्रसिष्णुग्रसनशीलंप्रलयकालेप्रभविष्णु
प्रभवनशीलंउत्पत्तिकालेकार्यात्मनेत्यर्थः तथाच जगदु
त्पत्तिस्थितिलयकारणंब्रह्मैवदेहेज्ञेयमेकंप्रतिदेहंज्ञेयंनतद्व्य
तिरिक्तंकिंचिदित्यर्थः १६॥

मधुभाष्य

१६॥

भाषा अनुवाद टीका

और इस अध्याय के बारहें श्लोकसे कहाजो ज्ञे यपदवाच्य ब्र
ह्मभूताख्य सो स्थावर जङ्गम समूहमे अविभक्त अर्थात् का
रण रूप से अभिन्न और कार्य रूप से समुद्र फेन के समान
भिन्न वर्तमान है और समस्त भूतों के भर्ता अर्थात् स्थिति
काल मे प्रति पालक औ प्रलय से संहारक तथा सृष्टि का
लमे स्वये आप नाना कार्य रूप से प्रगट होते हैं १८ ॥

दोहा

भूतनमांहि अभिन्नहे भिन्न इवरहितजु सोय भूतभवें सो
ज्ञेय है ग्रसत भवत फिर सोय १८॥

108

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितं १७

शंकरभाष्ये टीका १

किञ्च सर्वत्र विद्यमानं सन्नोपलभ्यते चेत् ज्ञेयं तत्तमस्तर्हि न
किं तर्हि ज्योतिषामपीति ज्योतिषां आदित्यादीनामपि तत् ज्ञे
यं ज्योतिरात्मचैतन्यज्योतिषेद्धानि हि आदित्यादीनि ज्योतींषि
दीप्यन्ते येन सूर्यस्तपति तेजसेद्धस्तस्य भासा सर्वमिदं वि
भातीत्यादि श्रुतिभ्यः स्मृतेश्च इह चैव यदादित्यगतं तेज इत्या
देस्तमसोऽज्ञानात् परमस्पृष्टमुच्यते ज्ञानमिति ज्ञानादेर्दुःस
म्पादनबुद्ध्या प्राप्तावसादस्योत्तम्भनार्थमाह ज्ञानममानित्वादि
ज्ञेयं यत् तत् प्रवक्ष्यामीत्यादिनोक्तं ज्ञानगम्यं ज्ञेयमेव ज्ञा
तं सत् ज्ञानफलमिति ज्ञानगम्यमुच्यते ज्ञायमानन्तु ज्ञेयं
तदेतत्त्रयमपि हृदि बुद्धौ सर्वस्य प्राणिजातस्य विष्ठितं विशे
षेण स्थितं १७ ॥ ॥

आनंदगिरिकृतटीका १

इतोऽपि ज्ञेयं यस्मात्तन्नमित्याह किञ्चेति हेतुत्वमेव स्फोरयति
शङ्कयति सर्वत्रेति न तत्तमस्त्वमित्याह नेति तर्हि कि-
न्तस्य रूपमिति पृच्छति किं तर्हीति तत्रोत्तरं ज्योतिषामिति स-
वित्रादीनां बुद्ध्यादीनाञ्च प्रकाशकत्वात्प्रसिद्धि ज्ञेये ब्रह्मेत्याह
ज्योतिषामिति तदेवोपपादयति आत्मेति तत्र श्रुतिद्वयं प्रमा
णयति येनेति उक्तेऽर्थे वाक्यशेषमपि दर्शयति तस्येति ते
यस्यात्मनः तमस्त्वमपि तमःस्पृष्टत्वमाशङ्क्योक्तं तमस इति उ
त्तरार्द्धस्य तात्पर्यमाह ज्ञानादेरिति उत्तम्भनमुद्दीपनं प्रक
टीकरणमिति यावत् ज्ञानममानित्वादि करणमुक्तं ज्योतिषेषः
ज्ञानगम्यं ज्ञेयमिति पुनरुक्तिं शङ्कित्वोक्तं ज्ञेयमिति उक्त
त्रयस्य बुद्धिस्थतया प्राकट्यं प्रकटयति तदेतदिति १७

स्वामिकृतभाष्यटीका १

किंच ज्योतिषामिति ज्योतिषां चंद्रादित्यादीनामपि तत्ज्योतिः प्र
काशकं येन सूर्यस्तपति तेजसेद्धः न तत्र सूर्यो भाति न चंद्रता
रकं नेमा विद्युतो भांति कुतोयमग्निः तमेव भांतमनुभाति स
र्वं तस्य भासा सर्वमिदं विभातीति श्रुतेः अत एव तमसोऽज्ञाना
त्परं तेनासंस्पृष्टमुच्यते आदित्यवर्णं तमसः परस्तादित्यादि
श्रुतिभिः ज्ञानं च तदेव बुद्धिवृत्तावभिव्यक्तं तदेव रूपाद्याकारे
ण ज्ञेयं च ज्ञानेन गम्यं चामानित्वमदंभित्वमित्यादिलक्षणे
न सर्वोक्तेन ज्ञानसाधनेन प्राप्यमित्यर्थः ज्ञानगम्यं विशिष्टे
सर्वस्य प्राणिजातस्य हृदि विष्ठितं विशेषेण प्रकृतस्वरूपेणाति
येतत्तया स्थितं धिष्ठितमिति पाठे अधिष्ठाय स्थितमित्यर्थः १७

पिशाचभाष्यं टीका ४

तमसः अज्ञानात्परमसंस्पृष्टं ज्ञानममानित्वादि ज्ञेयमनादि
मत्परंज्ञेयं ब्रह्मेत्यादि ज्ञानगम्यं प्राप्यफलमित्यर्थः ज्ञानेन गम्यं
ज्ञानगम्यं फलं तज्ज्ञानयमपि हृदि बुधो सर्वस्य प्राणिजात
स्य विष्ठितं विशेषेणास्थितं १७ ॥

रामानुजभाष्यं टीका ५

ज्योतिषामिति ज्योतिषां दीपादित्यमणिप्रभृतीनामपि तदेव
ज्योतिः प्रकाशकं दीपादित्यादीनामपि आत्मप्रभारूपं ज्ञानमेव
प्रकाशयति दीपादयस्तु विषयेंद्रियसन्निकर्षविरोधि संजम
मतिरस्तनमात्रे कुर्वते तावन्मात्रेणैव तेषां प्रकाशकत्वं तमसः
परमुच्यते तमशब्दः सूक्ष्मावस्थप्रकृतिवचनः प्रकृतेः परमु
च्यते इत्यर्थः अतो ज्ञानं ज्ञेयं ज्ञानेकाकारमिति ज्ञेयं ज्ञानगम्यं
अमानित्वादिभिरुक्तैः ज्ञानसाधनैः प्राप्यमित्यर्थः हृदि सर्वस्या
धिष्ठितं सर्वस्य मनुष्यादेर्हृदि विशेषेणावस्थितं सन्निहितं १७

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् १७ ॥

परमार्थप्रपाटीका ७

किंच ज्योतिषामिति ज्योतिषां सूर्याग्निचंद्रादीनां ज्योतिः प्रकाशकं न
हि सूर्येण सूर्यो ज्ञायते किंतु चित्प्रयुक्तेन चक्षुषेत्यर्थः आत्मज्योति

देवाय प्रस्तुतस्तथा यस्य भासा सर्वमिदं विभातीति श्रुतेः यद्वा ज्योति
षां सूर्यादीनामध्येज्योतीरूपत्वेन स्थितं येन सूर्यस्तपति योसावादि
त्ये हिरण्मयः पुरुषः सोसावहमित्यादिश्रुतेः किंच तमसः परं अ
ज्ञानात्परं परस्तात् आदित्यवर्णं तमसः परस्तादिति श्रुतेः ज्ञानं
बुद्धिवृत्त्यभिव्यक्तं तदेव रूपाद्याकारेण ज्ञेयं यद्वा तदुक्तज्ञानस्या
भ्यन्तरे ज्ञेयं माधुर्यं पयसो यथा ज्ञानगम्यममानित्वादिज्ञानसाधनं
गम्यं सर्वस्य भूतजातस्य हृदि विष्ठितं विशेषेणाप्रच्युतस्वरूपेणानि
यंतृत्वेन च स्थितं ॥ १७ ॥ ॥

वनमाली टीका ८

ननु सर्वत्र विद्यमानमपि तन्नोपलभ्यते वेद्मीयमीदिवदनी
द्रियजन्यस्यात् न स्यात् प्रकाशरूपस्यापि प्राकृतरूपाद्यभावान्ने॰
द्रियैस्तदुपलभ्यत इत्याह ज्योतिषामिति ज्योतिषां सूर्यादीना
मपि ज्योतिः प्रकाशनशक्तिप्रदं तमेव भान्तमनुभाति सर्वं तस्य
स्य भासा सर्वमिदं विभातीति श्रुतेः न तत्र सूर्यो भाति न चन्द्रतार
कमित्यादिना [illegible] तानां सूर्यादीनां सर्वेषां परामर्शात् यदा
दित्यगतं तेजो यच्चन्द्रमसि यच्चाग्नावित्यादि वक्ष्यमाणत्वाच्च तमसः प्रकृतेः
परं तदस्पृष्टं त्रिगुणात्मकत्वेनस्पर्शः ज्ञानं स्वयंप्रकाशरूपं ज्ञेयं
स्वप्रकाश्यं न तु रूपाद्यमत्ताभिरपि ज्ञेयं ज्ञानेन तद्विषयका
परोक्षेण ज्ञानेन गम्यं प्राप्यं सर्वगतमप्यन्तर्यामितया सर्वस्य जी
वजातस्य हृदि स्थितं प्रधुपसर्गस्याकारलोपः [illegible] दस्मे विष्ठित
मिति पाठे विशेषेणानियामकत्वेन स्थितमित्यर्थः १७ ॥

उत्तमवैजयन्तीटीका ९

किंच ज्योतिषामिति ज्योतिषामपि सूर्येन्दुनक्षत्रविद्युदग्न्यादी
पादीनामपि ज्योतिः सूर्यादीनामपि आत्मा प्रभारूपं ज्ञानमेव
प्रकाशयति सूर्यादयस्तु विषये दिवसम्लिकर्षाविरोधिनि तमि
रनिरसनमात्रं कुर्वन्ति तावन्मात्रेणैवैतेषां प्रकाशकत्वमिदं तु
तमसः परमुच्यते तमसो हि बाध्याध्यासत्वावस्थापन्नायाः
प्रकृतेः परं [illegible] मुच्यते शास्त्रैः कथ्यते ज्ञानपदवाच्यं ज्ञानधर्म
के ज्ञानस्वरूपं वा [illegible] ज्ञानगम्यं प्रमानित्वादिज्ञान
साधनैर्गम्यं प्राप्यं हृदि सर्वस्य ब्रह्मादिपिपीलिकान्तस्य हृदि

श्री॰
गी॰ टी॰
त्र॰

110

धिष्ठितमरणस्वरूपेणस्थितंतेनतदात्मस्वरूपंज्ञेयंभवतीत्यर्थः एवं
ब्रह्मस्वरूपमपिनज्ञेयाहिज्योतिषामपि चंद्रादित्यादीनामपित
द्ब्रह्मज्योतिःप्रकाशकम् नतत्रसूर्योभातिन चंद्रतारकंनेमा
विद्युतोभान्तिकुतोऽयमग्निःतमेवभान्तमनुभातिसर्वंतस्यभा
सासर्वमिदंविभातीत्यादिश्रुतेःपुनःकीदृशंतत्तमसःपर
मुच्यतेतमःशब्दवाच्यायाःप्रकृतेःपरंतेनास्पृष्टस्वरूपमुच्य
ते आदित्यवर्णंतमसःपरस्तादित्यादिश्रुतेःपुनःकीदृशंज्ञाने
विवेकरूपंविज्ञानमानंदंब्रह्मसत्यंज्ञानमनंतंब्रह्मेत्यादिश्रुतेः
पुनःकीदृशंज्ञानगम्यंअमानित्वादिसाधनजेनज्ञानेनप्रा
प्यंतमेवविदित्वातिमृत्युमेतीत्यादिश्रुतेःपुनःकीदृशंहृदि
सर्वस्याधिष्ठितं सर्वस्यप्राणिजातस्यहृदिधिष्ठितमंतर्या
मिरूपेणस्थितं अंतःप्रविष्टःशास्ताजनानामित्यादिश्रुतेःएवं
भूतंब्रह्मज्ञेयंभवतीत्यर्थः १७ ॥

+तत्रसर्वत्रविद्यमानमपितत्रो
पलभ्यतेचेत् तर्हिजडमेवस्यात्
नस्यात्स्वयंज्योतिषोपितत्स्वरूपादि
हीनत्वेनेंद्रियाद्यग्राह्यत्वो
पपत्तेरित्याह ॥

मधुसूदनीटीका १७

+तत्स्वरूपंब्रह्मज्योतिषामवभासकानामादित्यादीनांबुद्ध्यादीनां
चबाह्यानामांतराणामपिज्योतिरवभासकं चैतन्यज्योतिषोज
डज्योतिरवभासकत्वोपपत्तेः येनसूर्यस्तपति[illegible]तेजसेद्ध
स्तस्यभासासर्वंविभातीत्यादिश्रुतिभ्यश्च वक्ष्यतिचयदादित्यग
तंतेजइत्यादिस्वयंजडत्वाभावेपिजडसंसृष्टंस्यादितिनेत्याह
तमसोजडवर्गात्परमविद्यातत्कार्याभ्यामपारमार्थिकाभ्यामसं
सृष्टंपारमार्थिकंतद्ब्रह्मसदसतोः संबंधायोगात् उच्यतेऽक्षा
रात्परतःपरइत्यादिश्रुतिभिर्ब्रह्मवादिभिश्चतदुक्तं निःसंगस्यास
संगेनकूटस्थस्यविकारिणा आत्मनोनात्मनायोगोवास्तवोनो
पपद्यतेआदित्यवर्णंतमसःपरस्तादितिश्रुतेश्च आदित्यवर्ण
मितिस्वभानेप्रकाशांतरानपेक्षंसर्वस्यप्रकाशकमित्यर्थःय
स्मात्स्वयंज्योतिर्जडासंसृष्टं अतएवतद्ज्ञानंप्रमाणजन्य
चेतोवृत्त्यभिव्यक्तंसंविद्रूपं अतएवनदेवज्ञेयंज्ञातुमर्हंअ
ज्ञानंवाजडस्याज्ञानत्वाभावेनज्ञातुमनर्हत्वात् कथंतर्हिस

॰भिदं

भि॰

वैर्नेज्ञायते न ग्राह्यस्तानगम्यं पूर्वोक्तेनामानित्वादिना तत्त्वज्ञानार्थ
दर्शनांतेन साधनकलापेन ज्ञानहेतुतया ज्ञानशब्दितेन गम्यं
प्राप्यं नतु तद्विनेत्यर्थः ननु साधनेन गम्यं चेत् किं देशांतरव्यवहि
तेनेत्याह हृदि सर्वस्य धिष्ठितं सर्वस्य प्राणिजातस्य हृदि बुद्धौ
धिष्ठितं सर्वत्र सामान्येन स्थितमपि विशेषरूपेणात्र स्थितम
भिव्यक्तं जीवरूपेणांतर्यामिरूपेण च सौरं तेज इवादर्शरूपं कां
तादौ अव्यवहितमेव वस्तुतो भ्रांत्या व्यवहितमिव सर्वं भ्रमकार
णाज्ञाननिवृत्त्या प्राप्यत एवेत्यर्थः [illegible]
[illegible] १७ ॥

सदानंदी टीका ॥

सर्वत्र विद्यमानं सन्नोपलभ्यत एव चेत् नहि ज्ञेयं तमोरूपं स्यादि
त्यत्राह माधवः १ तज्ज्योतिर्ब्रह्म सर्वेषां सूर्यादीनामप्यभावतां वाद्या
नामंतराणां चक्षुरादीनां प्रकाशकं २ येन ज्योतिषा भास्वज
ज्योतिर्येतो भवेत् अविद्यातमसो यस्मात्परं संसर्गवर्जितं ३
यस्माज्ज्ञेयं स्वयंज्योतिर्जडं सत्स्वप्रकाशितं तत् निःसंगस्य ससंगेन
कूटस्थस्याविकारिणा ४ आत्मनोनात्मना योगो वास्तवो नोपप
द्यते अतएव हि तज्ज्ञानं संविद्रूपं हृदि स्थितं ५ प्रमाणजमनोह
त्ताव्यभिव्यक्तं अमायहं सत्तान्याज्ञदेवाखिलज्ञानं येन गम्यं विदुर्बुधाः ६
जडस्याज्ञानतो भावाज्ज्ञानमहि त्वमेव नोकथ्यं तर्हि न सर्वैर्लज्ञाय
ते चेति चेच्छृणु ७ अमानित्वादिना ज्ञानहेतुतयात्मना ज्ञान
संशब्दितेनैव गम्यं प्राप्यं न तद्विना ८ ननु साधनगम्यं चेत्तर्हि
किं दूरदेशमेवं मा: प्राणिजातस्य सर्वस्यैव हृदि स्थितं ९ सामा
न्येनापि सर्वत्र स्थितं यद्यपि सर्वगं विशेषेण तथाप्यत्र ह्यभि
व्यक्तमेव तत् १० जीवांतर्यामिरूपेण सौरं तेज इवोदके वस्तुतः
स्वात्मरूपं सन्नान्याहृदयमिव स्थितं भ्रांत्याज्ञाननिवृत्त्या तत्प्राप्य
त एवेत्यपि १२ १७ ॥

नीलकंठी टीका १२

एवं क्षेत्रज्ञस्य तटस्थलक्षणमुक्त्वा स्वरूपलक्षणमाह ज्योतिषामि

श्री॰
गी॰ टी॰
३॰

ति ज्योतिषां बाह्यानामादित्यादीनामांतराणां च बुद्ध्यादीनामपि तदव
भासकानामपि तज्ज्योतिः ब्रह्म ज्योतिरवभासकं चैतन्यं ज्योतिषो जडज्यो
तिरवभासकत्वोपपत्तेः तथा च श्रुतयः येन सूर्यस्तपति तेजसेद्धः
तस्य भासा सर्वमिदं विभातीत्याद्याः बह्वतिव यदादित्यगतं तेज इ
त्यादि तमसोऽज्ञानात् भूतग्रामप्रसवहेतोः परं ह्यस्पृष्टं तदुच्यते
न तु यथा चांद्रस्य ज्योतिषोऽवभासकं तत्सजातीयं सौरं ज्योतिरिति
ज्योतिःशास्त्रप्रसिद्धं एवं सौरादिज्योतिषामप्यवभासकं किंचित्
तत्सजातीयं ज्योतिरलौकिकं स्यादित्याशंक्याह ज्ञानमिति केवलज्ञ
प्तिमात्रशरीरं यज्ज्योतिर्न तु भौतिकं न देवशरीरं वक्ष्यमाणत्वात्
ज्ञानेन प्राप्तमिष्टतमं कृत्स्नहितं ज्ञानमत आह ज्ञानगम्यमि
ति यदुक्तं ज्ञेयं तेनामानित्वादिना ज्ञानसाधनेन गम्यं प्राप्यं किंत
हि ग्रामांतरवद्देशव्यवहितं बाबाल्ययौवनाद्यवस्थांतरवत् का
लव्यवहितं वा तत्प्राप्यमसीत्यत आह हृदि सर्वस्य धिष्ठितमि
ति स्वात्मभूतमेव तदंतर्दृष्टीनां सम्यक्प्रकाशत इत्यर्थः १७

आनंदी टीका १२

ज्योतिषां सूर्यादीनामपि तज्ज्योतिः प्रकाशकम् तमोऽज्ञानं तस्मा
त्परम् अज्ञानान्धकारमतीत्यर्थः ज्ञानेनोक्तेन दमादिना ज्ञेयं तस्मा
ज्ज्ञात्वा करणीयम् ज्ञानगम्यं ज्ञानेनैव प्राप्यं न तु स्वर्गादिवत्तपस्या
दिना सर्वस्य प्राणिनः हृदि विष्ठितम् सर्वव्यापकं ब्रह्म सर्वत्र ब
हिरन्तः सदपि हृदये विशेषेणोपलभ्यतम् अतः निशुद्धहृदयस्य ब्रह्मो
पलब्धिः स्यादिति प्रसिद्धः [illegible]
[illegible] दित्यमसा
[illegible] १७ ॥

प्राप्यमित्यर्थः

रामकंठी टीका १४

तथा ज्योतिषां सौरादीनां प्रकाशकानां प्रकाशहेतुत्वाज्ज्योतिः प्र
काशकं तानि हि जगज्जडावप्रकाशकान्यपि संवित्प्रकाशप्रका
शितानि अत एव तमसः परमुच्यते यद्यप्यरप्रकाशं तत्त्व
यमप्रकाशात्मकत्वात्तमोरूपं तस्मात्तत्त्वं परं सर्वप्रकाशैकर

पत्वात्मकत्वं भवति किं वा तथाज्ञानं ज्ञेयं ज्ञानेन यथा प्रतिपादि
तस्वरूपेणोपायेन ज्ञेयमात्मतया प्रत्यभिज्ञेयमित्यर्थः यतो
ज्ञानगम्यं ज्ञानं विना तथा विषयीकर्तुमशक्यं परमार्थेन
स्तु सर्वस्य कस्यचित्सुमानुषहृदये संवेत्तृतया विशेषेण स्थि
तं सिद्धावस्थायां तथात्वसंवेदनसंवेद्यत्वादुपसंहरति १

लासिकी [illegible]टीका ५

किंच एवं स च यश्चैतस्य तत्स्वरूपकथनेनोत्तरश्लोका यत्प्रभा
वश्चैतस्योत्तरमाह ज्योतिषामादित्यादीनां तदेव सकलहृदाभि
धेयं ज्योतिः प्रकाशकं सर्वेषां प्रकाशप्रकाशकत्वात्तेषाम् तथा च
श्रुतिः न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भाति
कुतोयमग्निः तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमि
दं विभाति तमसोऽज्ञानात्परं तेनास्पृष्टमुच्यते परमार्थस
द्रूपाया अहन्तायाः कस्यांचिदप्यवस्थायामनाच्छादित
त्वात् तदेव ज्ञानं बुद्धिवृत्तावभिव्यक्तम् तदेव रूपाद्याकारे
णाज्ञेयं च तदेवामानित्वादिलक्षणेन ज्ञानसाधनेन गम्यं च
तदेव सर्वस्य प्राणिजातस्य हृदि देहैकदेशे विशेषेण प्रत्य
तवलज्ञानादिना स्थितम् सर्वत्र देहसामान्यात्मना प्रदी
पप्रभामण्डलवत्स्थितमपि अत्र तु विशिष्टतया प्रदीपव
त्साक्षात्स्थितम् ॥ १७ ॥

पंबोलेटीका

सर्वत्र विद्यमानमपि नोपलभ्यते केनचिदिति तत्सेयं तमोरूपं स्यादित्य
तआह ज्योतिषामिति ज्योतिषामादित्यादीनामपि तज्ज्ञेयं ज्योतिः चे
तनस्वरूपेण प्रकाशकं तमसः अज्ञानात्परं स्पृष्टमुच्यते ज्ञानम
मानित्वादिभिः [illegible] ज्ञानसाधनं ज्ञेयं परं ब्रह्म तदेव ज्ञेयं ज्ञा
त्वा त्वा परमानंदरूपत्वात् तदेव ज्ञानस्य फलं भवतीति ज्ञानगम्यम्

112

ध्येते ज्ञाने सफले भवति तत्सर्वस्य हृदि विशेषेण स्थितं १७

रणवीरसमिद्धोधिनी

सर्वं विषयमानस्यात्मस्यानुपलब्धिवशाज्जडत्वमिति चेन्न स्वप्र
काशस्य तस्य रूपादिवदिन्द्रियागोचरत्वोपपत्तेरित्याह
ज्योतिषामिति तदेवं ब्रह्म ज्योतिषामपीन्द्रादित्यादीनामपि ज्योतिः
प्रकाशकं तत् येन सूर्यस्तपति तेजसेद्धः न तत्र सूर्यो भाति न चं
द्रतारकमित्यादिश्रुतेः तत एव तमसोऽज्ञानात्परं तेनासंस्पृष्ट
मुच्यते आदित्यवर्णं तमसः परस्तादिति श्रुतेः ज्ञानं तदेव
बुद्धिवृत्त्यावभिव्यक्तं तदेव रूपाद्याकारेण ज्ञेयं ज्ञानेन गम्यम
मानित्वमदम्भित्वमित्यादिलक्षणेन ज्ञानसाधनेन प्राप्य
मित्यर्थः तथा सर्वस्य प्राणिजातस्य हृदि विष्ठितं विशेषेण
प्रवृत्तस्वरूपेण नियन्तृतया स्थितमित्यर्थः १७॥

मधुभाष्य

१७॥

भाषा अनुवाद टीका

और सो ब्रह्म जोति रूप जो सूर्य चन्द्र तारागण विद्युत औ
अग्नि इन सब का जोति कहे प्रकाशक हैं जिस से ये सब
प्रकाश मान हैं और ये सब जिस ब्रह्म को नही प्रकाश
करि शकते हैं ऐसे ब्रह्म से यह समस्त जगत प्रकाशित
है यह श्रुति कहती हैं इसी से तम जो अज्ञान तिससे पर
है अर्थात् अज्ञान का लेशभी वहां नहीं है आदित्य वर्णं त
मसः परस्तात् इस श्रुतिने कहा है और सोई ब्रह्म बुद्धिवृत्ति
मे ज्ञान रूप प्रगट है और सोई रूपादि आकार रूप से ज्ञे
य कहे ज्ञान योग्य है और ज्ञानगम्य अर्थात् पूर्वोक्त अमा
नित्व आदि लक्षण ज्ञान के साधनो से प्राप्य है क्यों कि प्रा
णी मात्रके हृदय मे नियन्ता अन्तर्यामी चेतन रूप से स्थि
त है १७ ॥

दोहा

ज्योतिनकी सोज्योतिहै, तमसें परे कहाय ज्ञेयगम्य है
ज्ञानसें सबहृदि व्यापरहाय १७॥

113

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः म
द्भक्त एतद्विज्ञाय मद्भावायोपपद्यते १८

शांकरभाष्यटीका १

तत्रैव हि एवं विभाव्यते यथोक्तार्थोपसंहारार्थोऽयं श्लोक आरभ्य
ते इति क्षेत्रमिति इत्येवं क्षेत्रं महाभूतादि धृत्यन्तं तथा ज्ञानम
मानित्वादि तत्त्वज्ञानार्थदर्शनपर्यन्तं ज्ञेयञ्च ज्ञेयं यत्तदित्यादि
तमसः परमुच्यत इत्येवमन्तमुक्तं समासतः संक्षेपत एतावान्
सर्वो हि वेदार्थो गीतार्थश्चोपसंहृत्योक्तोऽस्मिन् सम्यक् दर्शने को
ऽधिक्रियत इत्युच्यते मद्भक्तो मयीश्वरे सर्वज्ञे परमगुरौ वासुदेवे
समर्पितसर्वात्मभावो यत् पश्यति शृणोति स्पृशति वा सर्वमे
व भगवान् वासुदेव इत्येवं ग्रहाविष्टबुद्धिर्मद्भक्तः स एतत्
यथोक्तं सम्यक् दर्शनं विज्ञाय मद्भावाय मम भावो मद्भावः प
रमात्मभावस्तस्मै परमात्मभावायोपपद्यते युज्यते घटते मोक्षं
गच्छति १८ ॥

आनंदगिरिकृतटीका २

तत्रानुभवमनुकूलयति तत्रैवेति तमर्थं [illegible] सविकारं क्षे
त्रं पदवाक्यार्थविवेकसाधनञ्चामानित्वादि तत्पदार्थञ्च शुद्धं
तद्भावोक्त्यर्थमुक्त्वा तेषां फलमुपसंहरति यथोक्तेति पूर्वार्द्धं
विभजते इत्येवमिति वक्तव्यान्तरे सति किमिति त्रितयमेव
संक्षिप्योपसंहृतं तत्राह एतावानिति उत्तरार्द्धमाकांक्षाद्वारा व
तारयति अस्मिन्निति ईश्वरे समर्पितसर्वात्मभावमेवाभिनय
ति यत्पश्यतीति विज्ञाय लब्ध्वेत्यर्थः १८ ॥

स्वामिकृतटीका ३

उक्तं क्षेत्रादिकमधिकारिफलसहितमुपसंहरति इतीति इत्ये
वं क्षेत्रं महाभूतादि धृत्यन्तं तथा ज्ञानं चामानित्वादि तत्त्वज्ञाना
र्थदर्शनान्तं च ज्ञेयं चानादिमत्परं ब्रह्मेत्यादि हृदि सर्वस्य विष्ठि
तमित्यन्तं वसिष्ठादिभिर्विस्तरेणोक्तं सर्वमपि मया संक्षेपेणो

क्तं एतच्च पूर्वाध्यायोक्तलक्षणो मद्भक्तो विज्ञाय मद्भावाय ब्रह्मत्वा
योपपद्यते योग्यो भवति १८ ॥

पिशाचभाष्यं टीका ४

ममभावायोपपद्यते मोक्षं गच्छति १८ ॥

रामानुजभाष्यं टीका ५

इतीति एवं महाभूतान्यहंकार इत्यादिना संघा तन्त्येननाक्षेत्रतिविन्यं
तेन क्षेत्रतत्त्वं समासेनोक्तं अमानित्वमित्यादिना तत्त्वज्ञानार्थद
र्शनमित्यन्तेन ज्ञातव्यस्यात्मतत्त्वस्य ज्ञानसाधनमुक्तं अनादिमत्पर
मित्यादिना हृदि सर्वस्य विष्ठितमित्यन्तेन ज्ञेयस्य क्षेत्रज्ञस्य याथात्म्यं
च संक्षेपेणोक्तं मद्भक्त एतत् क्षेत्रयाथात्म्यं क्षेत्राद्विविक्तात्मस्वरूप
प्राप्त्युपाययाथात्म्यं क्षेत्राद्विविक्तात्मस्वरूपयाथात्म्यं च विज्ञाय म
द्भावायोपपद्यते मम यो भावः स्वभावः [illegible] असंसारित्वप्रा
मयेऽपपन्नो भवतीत्यर्थः

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् १८ ॥

परमार्थप्रपाटीका ७

उक्तं क्षेत्रादिकमुपसंहरन्नाह इतीति इत्येवं क्षेत्रं महाभूतादि इत्यन्तं
तथा ज्ञानममानित्वादि तत्त्वज्ञानार्थदर्शनान्तं ज्ञेयं चानादिमत्परं ब्र
ह्मेत्यादि हृदि सर्वस्य धिष्ठितं इत्यन्तं वसिष्ठादिभिर्विस्तरेणोक्तं मया
तु समासेन संक्षेपेणोक्तं एतच्च पूर्वाध्यायोक्तलक्षणो मद्भक्तो विज्ञा
य मद्भावाय ब्रह्मत्वायोपपद्यते योग्यो भवति तदुक्तं अग्नौ यद्वत्
हुतं सर्वमग्निरेव भवेद्यथा विदिते विदितं वेद्यं संविदेव भवेत्त
था कर्पूरो दीपसंसर्गाद्दीप एव भवेद्यथा वेद्यं वेदनसंसर्गा
त्संविदेव भवेत्तथा संविदितं संविन्मयमेव भवति सर्वं वेद्यं ।
अग्नावाहितमाहितमग्निः स्वयं किं न जायते काष्ठमिति तदे
व तत् क्षेत्रं यद्व्याहृक चेत्येतदपि प्रपंचितम् १८ ॥

वनमाली टीका ८

उक्तार्थमुपसंहरन्नुत्तमं स्तौति इतीति इत्यनेन प्रकारेण महा भूतादिधृत्यंतेन तथा ज्ञानममानित्वादि तत्त्वार्थदर्शनांतेन ज्ञेयं चा नादिमत्परं ब्रह्मेत्यादि सर्वस्य धिष्ठितमित्यंतेनोक्तानि भिः क्षत्तिभ्यः ख्याकृपमस्य बहुग्रहणाय मया संक्षेपेणोक्तं एतावानेव हि सर्ववेदा र्थो गीतार्थश्च अस्मिंश्च सर्वो प्यायोक्तलक्षणो मद्भक्त एवाधिका रीत्याह मद्भक्तः मय्यनेन गुणेन सर्वेश्वरे वासुदेवे र्पितसर्वात्मभा वो मदेकशरणः स एतद्यथोक्तं क्षेत्रं ज्ञानं ज्ञेयं विज्ञाय विवेके न ज्ञात्वा मद्भावाय सर्वानर्थशून्यपरमानंदभावाय मोक्षायोपप द्यते मोक्षं प्राप्तुं योग्यो भवति यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्था प्रकाशंते महात्मन इति श्रुतेः १८ ॥

[illegible]वैजयन्तीटीका ९

उक्तानि क्षेत्रज्ञानज्ञेयानि तज्ज्ञानफलसहितान्युपसंहरति इ तीति क्षेत्रमिति इत्युक्तप्रकारेण क्षेत्रं तथा ज्ञानं तथा ज्ञेयं समास तः संक्षेपेण मयोक्तं तत्र महाभूतानीत्यादिना संघातश्चेतनाधृ तिरित्यंतेन क्षेत्रस्वरूपं अमानित्वमित्यादिना तत्त्वज्ञानार्थदर्श नमित्यंतेन ज्ञेयं यद्युक्तज्ञानेन तत्प्राप्यं अनादिमत्परमित्यादिना हृदि सर्वस्य धिष्ठितमित्यंतेन ज्ञेयं तत्पदं यज्जीवेश्वरस्वरूपं चोक्तं म द्भक्त एतत्त्रयं विज्ञाय मिथो विवेकेन ज्ञात्वा यस्य याथात्म्यस्वरू पमवगम्य मद्भावाय मम यो भावो संसारित्वं तत्स्वरूपप्राप्तये उपप द्यते कल्पते योग्यो भवतीत्यर्थः १८ ॥

उक्तं क्षेत्रादिकमधिकारिणं फलं च वदन्नुपसंहरति॥

मधुसूदनीटीका ९

इत्यनेन एवमुक्तेन प्रकारेण क्षेत्रं महाभूतादिधृत्यंतेन तथा ज्ञानं अमानित्वादि तत्त्वज्ञानार्थदर्शनांतं ज्ञेयं च अनादिमत्परं ब्र ह्मादि सर्वस्य धिष्ठितमित्यंतेनोक्तं श्रुतिभ्यः स्मृतिभ्यश्च आकृष्य मंदबुद्ध्यनुग्रहाय मया संक्षेपेणोक्तं एतावानेव हि सर्वो वे दार्थो गीतार्थश्च अस्मिंश्च सर्वो ध्यायोक्तलक्षणो मद्भक्त एवा धिकारीत्याह [illegible] मद्भक्तः मयि भगवति वासुदे

श्री॰
गी॰ टी॰
३॰

115

वेपरमगुरौसमर्पितेसर्वात्मभावेनमदेकशरणः संन्यस्तयथो
क्तेहेतुत्रज्ञानंतेषांचविज्ञायविवेकेनविदित्वामद्भावायसर्वान
र्थशून्यपरमानंदभावायमोक्षायोपपद्यते मोक्षंप्राप्तुंयोग्यो
भवति यस्यदेवेपराभक्तिर्यथादेवेतथागुरौतस्यैतेकथिताः
ह्यर्थाःप्रकाशंतेमहात्मनइतिश्रुतेः तस्मात्सर्वदामदेकशर
णःसन्नात्मज्ञानसाधनान्येवपरमगुरूपार्पलिप्सुरनुवर्तेत
नतुविषयभोगस्पृहालिरित्यभिप्रायः तदनेनग्रंथेनतत्त्वे
त्रयंचपादकेप्येनव्याख्याते इदानींयदधिकारियतत्त्वयत् स
चयोयत्स्वभावस्तेनतावद्व्याख्यानत्वं तत्रप्रकृतिपुरुषयोः
संसारहेतुत्वकथनेनयदधिकारियतत्त्वयदिति प्रकृतिमित्या
दिनाध्यायेप्रपंच्यते सवयोयत्स्वभावश्चेतितपुरुषइत्यादिनाध्या
यितिविवेकः तत्रसप्तमेध्यायेईश्वरस्यद्वेप्रकृतीपरापरेउक्ते
उक्तेचसलक्षणेऽपरेयमितस्त्वन्यामेतद्योनीनिभूतानीत्युक्ते तत्रापरा सर्व
प्रकृतिःक्षेत्रलक्षणापराजीवलक्षणाइति तयोरनादित्वमु
क्तातदुभययोनित्वंभूतानामुच्यते ॥

सदानंदी टीका ॥

उक्तेत्वादिकस्यशास्त्रफलस्यैवाधिकारिणः स्वस्वधर्मेणोपसंहारंक
रोत्याह्यःपरःपुमान् १ महात्मनादिष्टत्वानेतत्रामित्यमदात्म
ते अमानित्वादिचप्रोक्तंविंशतिज्ञानसाधनं २ ज्ञेयंज्ञेयंयदि
त्यादिप्रोक्तमित्येतन्मद्वपं एतत्त्रयंसमासेनमयाकृष्णेनक्तंस्य
तेः ३ एतावानर्थवेदार्थोगीतार्थश्चमुमुक्षुदाहृतं कोऽत्राधिक्रिय
तेसम्यग्दर्शनेत्रोच्यतेपुंना ४ वासुदेवेभगवतिमयिसर्वेश
रोगुरौयःसमर्पितसर्वात्मभावोमच्छरणःपुमान् ५ समभ
क्तोयथोक्तंतत्सम्यग्दर्शनलक्षणं विदित्वाममभावायमोक्षा
यैवोपपद्यते ६ यस्मान्मद्भक्तएवात्रतत्त्वज्ञानेऽधिकारवान्
तस्माद्भोगस्पृहांत्यक्त्वामदेकशरणःसदा ७ अमानित्वादिसं
पाद्यतत्त्वज्ञानपरोभवेत् ८ १५ ॥

नीलकंठी टीका १२

उक्तमर्थजातमुपसंहरति इतीति क्षेत्रंमहाभूतादिधृत्यंतं
ज्ञानंज्ञानसाधनंअमानित्वादितत्वज्ञानार्थदर्शनांतं ज्ञेयं
अनादिमत्परमित्यादिविहितमित्यंतं श्रुतिभ्यः स्मृतिभ्य
श्चसमासतः संक्षेपतउक्तं मद्भक्तएतत्त्रयंविज्ञायमद्भा
वायब्रह्मभावायोपपद्यते युक्तोभवति भक्तैवशाण्यंब्रह्म
यत्वाप्यब्रह्मैवभवति तथाचश्रुतिः यस्यदेवेपराभक्ति
र्यथादेवेतथागुरौ तस्यैतेकथिताह्यर्थाः प्रकाशंतेमहा
त्मनइति ब्रह्मवेदब्रह्मैवभवतीतिच १८ ॥

आनंदी टीका १३ ॥ उक्ततत्वर्णनार्थमेतदुपसंहरतिइति ॥

सुगमोर्थः १८ ॥

रामकंठी टीका १४

इत्येतावताग्रन्थेनक्षेत्रंमहाभूतानीत्यादिनाप्राकृतभावम
यंशरीरंतथाऽमानित्वादितत्वज्ञानार्थदर्शनान्तमुक्त
पंज्ञानं तथाक्षेत्रज्ञंचापिमांविद्धिसर्वक्षेत्रेष्वित्यादिनाभु
ग्वक्षेत्रज्ञस्वरूपंज्ञेयंतत्वमितिप्रधानंपदार्थत्रयमेतदु
क्तंयतोमद्भक्तोमदनुग्रहादेवमत्स्वपर्यापरपतद्वितय
ज्ञात्वामद्भावायमत्स्वरूपसमापत्तयेउपपद्यतेउपपन्नः
समथोभवति

१८ ॥

लासिकी [illegible]टीका १५

क्षेत्रंमहाभूतादिधृत्यन्तम् ज्ञानंचामानित्वादितत्वज्ञानार्थ
दर्शनान्तम् ज्ञेयंच अनादिमत्परंब्रह्मेत्यादिहृदिसर्वस्य
विष्ठितमित्यन्तंसंक्षेपेणोक्तम् एतत्कलक्षणंमद्भक्तोम

उपासकोविज्ञायमद्भावायमस्यह्यभिधेयसम्बन्धस्ययोग्योस्ति
एवंतत्तेनत्रयस्त्वयाहकृचसर्वयोयत्रभावस्त्रेत्येवंधर्मिप्रति
पादनंप्रायश्येननिर्वाहितम् [illegible] १८॥

पंचोलेटीका

यथोक्तार्थमुपसंहरति इतीति इत्येवंक्षेत्रंमहाभूतादि इमंते
तथाज्ञानममानित्वादितत्त्वज्ञानार्थदर्शनपर्यन्तंतथाज्ञेयंप्रव
त्त्वाभिरमादिनमसत्ः परमुच्यतेइत्येवमन्तेनतदयंसमासतःसं
क्षेपतउक्तः मद्भक्तः एतत्त्रयंविज्ञायमद्भावायमोक्षायोपपद्यते
वर्तते १८॥

रत्नावीरसमिद्धोधिनी

उक्तं क्षेत्रादिकं फलसहितं संक्षिपति इतीति क्षेत्रमिति इत्येव
मुक्तप्रकारेणमहाभूतादि धृत्यन्तं तथाज्ञानंचामानित्वादित
त्त्वज्ञानार्थदर्शनान्तंज्ञेयंचानादिमत्परंब्रह्मेत्यादिसर्वस्यवि
हितमित्यन्तं वसिष्ठादिभिर्विस्तरेणोक्तंसर्वंमयासंक्षेपेणो
क्तमेतदुक्तलक्षणंमद्भक्तोविज्ञाय मद्भावायब्रह्मभावायोपप
द्यतेयोग्योभवतीति तदेवंक्षेत्रज्ञस्यैवब्रह्मणःसर्वतःपाणिपा
दंतदित्यादिनासर्वव्यापकत्वमचरंचरमेवचेत्यादिना सर्वा
त्मकत्वंभूतभर्तृचेत्यादिनारक्षकमारकत्वादिप्रतिपादितेज्ञा
नंज्ञेयंज्ञानगम्यमित्यस्योपलक्षणार्थत्वात्कार्यकारणकर
णादियत्किंचिद्विशिष्टरूपंजगतिदृश्यते तत्सर्वंब्रह्मेतिफ
लितं तथाचसति कंचातःइतिदृतिकमित्यादि यत्सर्वमभि
हितंतत्सर्वमुपपन्नंभवतीतिसिद्धम् १८

मधुभाष्य

भाषा अनुवाद टीका

अब अधिकारी औ फल सहित कहा जो क्षेत्रादि इसका तात्पर्य कहते है कि इस अध्याय के पंचमे श्लोक ले कर और सब हेत क ज्ञेय स्वरूप जो वसिष्ठादि ऋषियों ने विस्तार से कहा है सो सब मैने संक्षेप से कहा सो मेरे भक्त यह जानि करिके ब्रह्म ता की प्राप्ति होनेके योग्य होते हैं अर्थात् मेरे भाव को पावते हैं १८ ॥

दोहा

यही क्षेत्र त्यों ज्ञानहे ज्ञेयकहा संक्षेप मोर भक्त यहिजान।
के मोहि पाप अलेप १८

117

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि वि
कारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् १९

शांकरभाष्यं टीका १

तत्र सप्तमे ईश्वरस्य द्वे प्रकृती उपन्यस्ते परापरे क्षेत्रक्षेत्रज्ञल॰
क्षणे एतद् योनीनि भूतानीति चोक्तं क्षेत्रक्षेत्रज्ञप्रकृतिद्वययो
नित्वं कथं भूतानामित्ययमर्थोऽधुनोच्यते प्रकृतिमिति प्रकृति
पुरुषश्चैवेश्वरस्य प्रकृती तौ प्रकृतिपुरुषावुभावप्यनादी न
विद्यते आदिर्ययोस्तावनादी नित्यत्वादीश्वरस्य तत्प्रकृत्योरपि यु
क्तं नित्यत्वेन भवितुं प्रकृतिद्वयत्वमेव हि ईश्वरस्येश्वरत्वं या
भ्यां प्रकृतिभ्यां ईश्वरो जगदुत्पत्तिस्थितिप्रलयहेतुस्ते द्वे अना
दी सत्यौ संसारस्य कारणं न आदी अनादी इति तत्पुरुषसमा
सं केचिद्वर्णयन्ति तेन हि केवलेश्वरस्य कारणत्वं सिध्यति य
दि पुनः प्रकृतिपुरुषावेव नित्यौ स्यातां तत्कृतमेव जगन्ने
श्वरस्य जगतः कर्तृत्वं तदसत् प्राक् प्रकृतिपुरुषयोरुत्पत्ते
रीशितव्याभावात् ईश्वरस्यानीश्वरत्वप्रसङ्गात् संसारस्य निर्नि
मित्तत्वे निर्मोक्षप्रसङ्गात् शास्त्रानर्थक्यप्रसङ्गात् बन्धमोक्षा
भावप्रसङ्गाच्च नित्यत्वे पुनरीश्वरस्य प्रकृत्योः सर्वमेतदुपपन्नं भ
वेत् कथं विकारांश्च गुणांश्चैव वक्ष्यमाणान् बुद्ध्यादिदेहेन्द्रिया
न्तान् गुणांश्च सुखदुःखमोहप्रत्ययाकारपरिणतान् विद्धि जा
नीहि प्रकृतिसम्भवान् प्रकृतिरीश्वरस्य विकारकारणं शक्तिः
गुणात्मिका माया सा सम्भवो येषां विकाराणां गुणानाञ्च तान्
विकारान् गुणांश्च विद्धि जानीहि प्रकृतिसंभवान् प्रकृतिपरि
णामान् १९ ॥ १९ ॥

आनन्दगिरिकृतटीका २

प्रकृतिमित्यादि वक्ष्यमाणमनन्तरश्लोकग्रन्थसम्बन्धीत्याशंक्य
वहितेन सम्बन्धार्थं व्यवहितमनुवदतितत्रेति तयोश्च प्रकृ॰
त्योरहङ्कारमूलकारणत्वमित्याह एतदिति भूतानामिव प्रकृत्योर

ब

श्री॰
गी॰ टी॰
३॰

118

पि प्रकृत्यन्तरापेक्षाभूतयोनितेति शङ्कते हेत्वेति तत्राकृताभ्याग
मादिवारणाय बन्धस्य निदानत्वात्तार्थमात्मनो विक्रियावत्त्वाद् दोष
निरासार्थञ्च प्रकृतिपुरुषयोरनादित्वं हेतुत्वेनोक्तं प्रकृतिं प्रकृति
विकारभावत्वञ्च दर्शयति प्रथमश्थेइति सव योयतत्त्वभावस्थे स
दिश्याचक्षेप्रकृतिमिति ईश्वरस्यापराप्रकृतिरत्रप्रकृतिशब्देनो
क्तापरात्र प्रकृतिर्जीवाख्या पुरुषशब्दे न विवक्षितेति व्याकरोति
ईश्वरस्येति तयोरनादित्वं साधयति नेत्यादिनानत्र युक्तिमाह
नित्यत्वादीश्वरस्येति ईश्वरस्योक्तप्रकृतिद्वयवत्त्वं कथमित्याशंक्या
ह प्रकृतीति तस्यजगज्जन्मादौ स्वातन्त्र्यमेव ईश्वरत्वं न प्रकृतिद्व
यवत्त्वमित्याशंक्याह याभ्यामिति प्रकृत्योरनादित्वं कुतोपयुक्त॰
मित्याशंक्याह ते इति मतान्तरमाह नेत्यादिना तयोर्मूलकारण
त्वाभावे कस्य तदेहत्वमित्याशंक्याह तेन हीति प्रकृत्योरेव मू॰
लकारणत्वे श्रुतिस्मृतिसिद्धमीश्वरस्य तत्त्वात्वं न स्यादित्याह य
दीति प्रकृतिद्वयस्य कार्यत्वपक्षे प्रत्याह तदसदिति किन्तु प्र
कृतिद्वयमनपेक्ष्य ईश्वरस्य संसारहेतुत्वे स्वातन्त्र्यात्मुक्तानाम
पि ततः संसारानिषेधान्मोक्षशास्त्राप्रामाण्यान्न तस्यैव संसार
हेतुत्वमाह संसारस्येति निर्निमित्तत्वे प्रकृतिद्वयापेक्षायास्तत्परस्यै
व निमित्तत्वमितियावत् किन्न कार्यत्वे प्रकृत्योरन्तर्द्वयात् एवं
बन्धाभावे तद्विश्लेषात्मनो मोक्षस्याभावात् कदाचिदुभयाभावे
पुनस्तत्प्रसङ्गान्न प्रकृतिद्वयस्य कार्यत्वमित्याह बन्धोमे प्रकृत्यो
र्मूलकारणत्वेनानुपपत्तिरित्याह नित्यत्वइति स्वपक्षेदोषाभावं
प्रश्नपूर्वकं प्रपञ्चयति कथमित्यादिना सम्बन्धः सत्ताप्रापको
हेतुः प्रकृतेरनादित्वे विकाराणां गुणानाञ्च तत्कार्यत्वादात्म
नो निर्विकारत्वं निर्गुणत्वञ्च सिध्यतीति भावः १९ ॥

स्वामिकृतटीका ३

तदेवं तत्क्षेत्रज्ञपाटकेपतावत्प्रपंचिते इदानीं तयोर्विकारित्व
नत्प्रयत्नमवयोयत्रभावश्चेतेनतत्सर्वं वेष्टितं ज्ञातमेव प्रकृतिपुरु
षयोः संसारहेतुत्वकथनेन प्रपंचयति प्रकृतिमित्यादिपंचभिः त

त्र प्रकृतिपुरुषयोरादिमत्वे तयोरपि प्रकृत्यन्तरेण भाव्यमित्यनवस्था
पत्तिः स्यात् अतस्तावुभावनादी विद्धि अनादेरीश्वरस्य शक्तित्वात्प्र
कृतेरनादित्वं पुरुषोऽपि तदंशत्वात् अनादिरेवानयुवपरमेश्वर
स्य तत्त्वकीनांचानादित्वं च श्रीमच्छंकरभगवत्पादप्रकाश्रितमित्येवं
पेनोपपादितमिति नास्माभिः प्रतन्यते विकारांश्च देहेंद्रियादीन्
गुणांश्च गुणपरिणामान् सुखदुःखमोहादीन् प्रकृतेः संभूतान्वि
द्धि ॥ १९ ॥

विश्वनाथभाष्ये टीका ४

प्रकृतिमव्यक्तं पुरुषं क्षेत्रज्ञं विकारान्बुद्ध्यहंकारतन्मात्रान् देहेंद्रि
यादींश्च सत्वादीन्सुखदुःखमोहाकारपरिणामान्वैवहित्रयं विभा
वते यथार्थोपसंहारार्थोयं श्लोकश्चारभ्यते विद्धि प्रकृतिसंभवान्मे षां

रामानुजभाष्ये टीका ५

+प्रकृतिमिति प्रकृतिपुरुषावुभावप्यन्योन्यसंसृष्टावनादी विद्धि बंधहेतु
भूतान्विकारान् इच्छाद्वेषादीन् अमानित्वादिकांश्च गुणान् मोक्षहेतुभू
तान् प्रकृतिसंभवान् विद्धि पुरुषेण संसृष्टेयमनादिकालप्रवृत्ता
क्षेत्राकारपरिणता प्रकृतिः स्वविकारैः इच्छाद्वेषादिभिः पुरुषस्य बं
धहेतुर्भवति सैवामानित्वादिभिः स्वविकारैः पुरुषस्यापवर्गहेतुर्भ
वतीत्यर्थः १९ ॥

१९
अथात्यंतविभक्तस्वभावयोः
प्रकृत्यात्मनोः संसर्गस्यानादित्वं संसृष्टयोर्द्वयोः कार्यभेदं
संसर्गहेतुश्चोच्यते +

भि^

अभिनवगुप्तकृतटीका ६

एतल्लक्षणं कृत्वा परीक्षा क्रियते द्वाभ्यां प्रकृतिरप्यनादिः कारणां
तराभावात् विकाराः घटादयः प्रकृतिरिति कार्यकारणभावे
हेतुः पुरुषस्तु प्राधान्याद्युक्तो पंचभिः १९ ॥

परमार्थप्रपा टी० ॥

इदानीं यद्विकारियतश्चयः सचयोयत्प्रभावश्चेव एवं प्रतिज्ञात
मेव प्रकृतिः पुरुषयोः संसारहेतुत्वकथनेन प्रपंचयति प्रकृ
तिमिति संसारहेतुभूतयोः प्रकृतिपुरुषयोः सादित्वेनानयो
रपि प्रकृत्यंतरेण भाव्यमित्यनवस्थापत्तिः स्यात् अतस्तावुभा
वनादी विद्धि तयोः सादित्वकल्पश्रुतेरपि वक्तुं न शक्यते ।
अनादिं वा तं स्वधया तदेकमित्यादिश्रुतिभिर्भूतार्थस्यैवोक्त

श्री॰
गी॰ टी॰
३॰

119

त्वात् अथजगत्प्रादुर्भावहेतुत्वंप्रकटयति विकारानिति
विकारान्देहेंद्रियादीन्गुणांश्चसत्वादिपरिणामान्सु
खदुःखमोहादीन्प्रकृतेःसंभूतान्विद्धि १९ ॥

वनमाली टीका ८

यतश्चयदितिप्रतिज्ञातंब्रह्मणःप्रेरकत्वंचकर्तृत्वंचयोस्तत्प्रकृतिपुरुष
विकारान्संक्षिप्याहप्रकृतिमिति अत्रप्रकृतिशब्देनचेतनाचेत
नप्रकृत्योःपुरुषशब्देनजीवपरयोश्चग्रहणंयोभावपीत्युक्ते
प्रकृतिपुरुषौवानादीविद्धि नकेवलमेकैकंकिंतूभावपिपुरु
षोऽभेऽभवप्रकृतीतथाचद्वेप्रकृतीद्वौपुरुषौचानादीविद्धीत्य
र्थः विकारानिच्छादीन्गुणांसत्वादीन्प्रकृतिसंभवान् प्रकृत्यु
पादानकान् सत्वादिगुणानांविकारत्वेपीच्छादीनामधिकविकार
त्वात्सत्वादेरस्यविकारत्वाप्रयुक्तिःऊहापोऽवन्यायेनेतिमन्तव्यं १९

उत्तमवैजयन्ती टीका ९

एवमन्योन्यमत्यन्तभिन्नस्वभावयोःप्रकृतिपुरुषयोःसंबंधस्याना
दिकालिकत्वेसंसृष्टयोस्तयोःकार्यभेदोनादिकालिकस्यतत्संसर्ग
स्यहेतुत्वंनिरूप्यते प्रकृतिमिति प्रकृतिंमायांचपुनःपुरुषंजी
वे अपिशब्दावधारणेउभौद्वौमिथःसंसृष्टावनादीएवविद्धिअना
दिमदीयशक्तित्वान्नित्यावेवजानीहिएवकारेणप्रकृतिरनादि
सांतेतितत्वंभवतिभूयश्चान्तेविश्वमायानिवृत्तिरितिश्रुतेर्मेसंतर
दीनांप्रायपस्यजलप्रक्षालनान्मलपंकादेःराजानुग्रहात्तस्करस्य
खलादेश्चनिवृत्तिवत्तस्यस्यैववस्तुनःनिवृत्तिदर्शनान्निवृत्तिशा
स्त्रस्यापर्यायत्वाभावाच्चदृष्टान्ताभावाच्चप्रागभावदृष्टांतस्य
त्वसंभवोऽभावस्यभावरूपपदार्थदृष्टांततायुक्ततरत्वात् मिथ्या
रूपस्यैवानःस्यान्ततनिष्पस्यतिचेन्नहिवे घापुत्रोमतनइत्यपिव

कंकालत्वादेव श्रियाणां भवन्तो न तस्मान्मायानादित्ति सैव [illegible]नादि साते
तिहू विते विकारान्महदादिशरीरान्तकार्यरूपानिच्छाद्वेषकामक्रो
धादींश्च संसारबंधहेतुभूतान् च गुणान् अमानित्वादिकान्मो
क्षहेतुभूतानेतान्सर्वान्प्रकृतिसंभवान्प्राकृतान् [illegible] विद्धि जा
नीहि अनेन तेचात्मना परिणतायाः प्रकृतेरन्यः पुरुष इति दर्शितं ना
म् या प्रकृतिः स्वविकारैः पुरुषं बध्नाति सैव स्वगुणैः पुरुषं मोचयती
त्यभिप्रायः १९ ॥

प्रकृतिभवा

मधुसूदनी टीका १९

प्रकृतिर्मायाख्या त्रिगुणात्मिका पारमेश्वरी शक्तिः क्षेत्रलक्षणोपाधि
भूः अपरा प्रकृतिरित्युक्ता या तु परा प्रकृतिर्जीवाख्या प्रागुक्ता स इह
पुरुष इत्युक्त इति न पूर्वापरविरोधः प्रकृतिं पुरुषं चैव उभावपि अ
नादी एव विद्धि न विद्यते आदिः कारणं ययोस्तौ तथा प्रकृतेरनादि
त्वं सर्वजगत्कारणत्वात् तस्या अपि कारणसापेक्षत्वेनवस्थाप्रसंगात्
पुरुषस्यानादित्वं धर्माधर्मप्रयुक्तत्वात् कृतस्य जगतो जातस्य
हर्षशोकभयसंप्रतिपत्तेः अन्यथा कृतहान्यकृताभ्यागमप्रसंगात्
यतः प्रकृतिरनादिरतस्तस्या भूतयोनित्वमुक्तं प्रागुपपद्यत इत्या
ह विकारांश्चेत्यादि विकारांश्च षोडश पंच महाभूतानि एकादशे
न्द्रियाणि च गुणांश्च सत्वरज[illegible]स्तमोरूपान् सुखदुःखमोहा प्रक [illegible]
तिसंभवानेव प्रकृतिकारणकानेव विद्धि जानीहि [illegible] १९
[illegible]

सदानंदी टीका १९

अथेदानीं भगवतः प्रकृती द्वे परापरे सम्यक्प्रागुपन्यस्ते क्षेत्रक्षेत्र
ज्ञलक्षणे १ एतद्योनीनि भूतानीत्युक्तं तत्रापराभिधा या क्षेत्रल
क्षणा प्रोक्ता परा क्षेत्रज्ञलक्षणा २ उक्तानयोरनादित्वं भूतयोनि
त्वमुच्यते प्रकृतिः क्षेत्ररूपा या माया सा त्रिगुणात्मिका ३ याजी
वाख्या परा प्रोक्ता पुरुषः स इहोच्यते न विद्यते तयोरादिः कारणं
विद्धि तौ तथा ४ अनादिजगतो हेतुत्वादनादिः प्रकृतिर्मता हेतु
पेक्षा यदा तस्या अनवस्था भवेत्तदा पुरुषस्याप्यनादित्वं धर्मादि

श्री॰
गी॰ टी॰
३॰

120

एतस्य यत्नतः ज्ञातव्य हर्षशोकादेः सर्वसंप्रतिपन्नत्वः ८ अन्यथाऽकृ
तहानादिदूषणं को निवारयेत् अतस्तयोरनादित्वसिद्धं वैदिक
कसंमतं ७ महाभूतानि पंचैवमेकादशेंद्रियाणि च विकाराश्च
गुणाश्चैव सत्त्वाद्याकारधारिणः ८ मायाकारणका विद्धि नाना
रूपविपर्ययान् ९ ॥ १९ ॥

नीलकंठी टीका १९

एवं देहे शरीराख्यमव्यक्तमुक्तं तत्प्रकाराश्च महदाद्यास्त्रयोविंश
तिः तद्विकाराइच्छादयो ज्ञानाज्ञानशब्दिताः अमानित्वमानित्वादयः
पुरुषश्च उक्तः इदानीं देहदेहिनोर्मध्ये यस्माद्यन्नायनेन देहदेह
तस्य प्रभावश्चेति द्वयमेव कथं तज्ज्ञायं विवृणोति त्रिभिः प्रकृतिमिति
सप्तमाध्यायेऽपरा या प्रकृतिरपराऽक्ता सात्र प्रकृतिः यात्र जीवभू
ता परा प्रकृतिरुक्ता सात्र पुरुषशब्देनोच्यते एतौ हि संयुक्तौ संसारं
जनयतः वियोगश्च तयोर्मोक्षः तत्र तौ उभावप्यनादी विद्धि तयोरा
दिमत्त्वे संसारस्याकस्मिकत्वापातात् कृतहानाकृताभ्यागमप्रसंगश्च
स्यात् विस्तरः विकारान् इच्छादीन् गुणान् बुद्धींद्रियादींश्च प्रकृति
संभवान्विद्धि १९ ॥

आनंदी टीका १९

प्रकृतमेवाह अनादी संगप्रलयानंतपुनः पुनः चक्रवत्परिवृ
ते नात्प्रकृतिपुरुषयोः संयोगस्य प्रथमकोटिः केनापि नज्ञा
यते ज्ञानान्नंतकोटिरस्त्येवेत्यर्थः १९ ॥

रामकंठी टीका ॥

अथ यदेतदज्ञानेऽपदिष्टं तेन प्रकृतिदेवज्ञपरमात्मल
क्षणं पदार्थत्रयं निर्णीतमिति संग्रहेण क्रमेण प्रदर्शयित
माह येषा प्रकृतिः सममेविषयभावेन संप्रतिशरीरभावेन
विभज्य प्रतिपादितस्वरूपा तथैव यः पुरुषो विषयित्वेन श
रीरित्वेन प्रतिपादितः एतावेतावन्योन्यसंबंधत्वेनाऽनादी
विद्धि जानीहि नह्येतयोरेकतासंबंधस्य पूर्वकोटिरुप
लभ्यते ज्ञानात्तु यथोक्तस्वरूपादन्तरकोटिरस्त्येवाऽन
योरेवमनादित्वसंबंधस्योपपत्त्यतात्पर्यं तत्र समर्थीर्षि

कयानित्यत्वप्रतिपादनं यतः प्रकृतेर्वैयत्वाडभयव्ययधर्मयोगि
त्वेसतिप्रवाहनित्यत्वं पुरुषस्यतुपरमार्थतः संविद्रूपत्वात्कूटस्थ
नित्यत्वमतएवाह विकारान्महदादीन्गुणांश्चसत्वादीन्वेद्येकस
भावान्प्रकृतिसंभवान्प्रधानकारणानूजानीहि १९ ॥

लासिकी टीका

अधुनायद्विकारियतश्चयदितिधर्मप्रतिपादनायाह प्रकृतिस्व
स्वभावविस्मरणरूपां पुरुषंपुरिशयानंकूटस्थमात्मानमेतावु
भावपिअनादीनविद्यतेन्योन्यमादिर्ययोस्तेअनादीपरस्परसंब
द्धतयातुल्यकल्पसमप्राधान्येजानीहि नहिपुरुषमंतरेणप्रकृ
तिः प्रकृतित्वं अथवाप्रकृतिंविनापुरुषस्यपुरुषत्वं यथामोक्ष
दशायामन्योन्यवियोगेन यत्वनादीआदीरहितेइतिविद्धियतेतत
नोविते ईश्वरादाविर्भूतत्वेनादिमत्वात् विकारान्देहेंद्रियादी
नूगुणानूगुणपरिणामानूसुखदुःखादीप्रकृतेः संभूतान्विद्धि १९

पंचोली टीका

इदानीप्रकृतिद्वयस्यप्रकृतिपुरुषलक्षणस्यजगत्हेतुत्वंविष
यभागेननिरूपयन् यद्विकारियतश्चयदित्यादिपूर्वोक्तमेवप्रपं
चयति प्रकृतमिति पंचभिः प्रकृतिमपरांक्षेत्रलक्षणांपुरुषं
परांजीवरूपामेताउभावनादीविद्धिनविद्यते आदिर्ययोस्ता
वनादीविद्धिविकारस्यबुद्ध्यादिदेहेंद्रियांतानूगुणानूसुखदुः
खमोहप्रत्ययाकारपरिणतान्प्रकृतिसंभवान् प्रकृतिस्त्रिगुणा
त्मिकामायात्संभवान्विद्धि १९ ॥

मणवीरसमिद्धोधिनी ॥

तदेवं तत्त्वेमंयच्चयादृक्चेत्यादिप्रपंचितमधुनायद्विकारियतश्च
यस्सवयोयत्प्रभावश्चेत्यादिपूर्वप्रतिज्ञातंप्रकृतिपुरुषयोः संसार
हेतुत्ववर्णनेनप्रपंचयति प्रकृतिमिति प्रकृतिर्मायाख्यात्रिगुणा
त्मिकेश्वरशक्तिः क्षेत्रलक्षणाप्रकृतिरभिहिताजीवाख्यापराप्रकृ

तिः पुरुषइतिप्रोक्ता उभेएतेप्रकृतीईश्वरयोःशक्ती उभावप्यनादी
अविद्यमानआदिः कारणंययोस्तावनादी संसारस्यकारणंना
नयोःकारणांतरमादिमत्वेत्वनवस्थापातः विद्धिजानीहि वि
कारान्महाभूतादीन्सोऽपि गुणान्सत्वरजस्तमोरूपान्प्रकृतिसं
भवान्प्रकृतिपरिणामान्मत्कारणान्विद्धिइति ॥१९॥

मधुभाष्य

हेतुस्वरूप औ जो जड़ अदृश्य आदि औ स्वभाव औ जैसा इच्छादि धर्म विशिष्ट सो सब सबै हीं विस्तार रूप से कह चुके अब ए वे प्रकीकृत यही हेतु जैसे इन्द्रिय आदि विकार से युक्त और जैसे प्रकृति पुरुष संयोग से प्रगट होय है औ जिस प्रकार स्थावर जंगम आदि भेद से भिन्न भिन्न स्वरूप होय है और सो र देवज्ञ जो स्वरूप औ जैसे प्रभाव विशिष्ट हैं सो सब प्रकृति पुरुष को संसार है तत्व कहते के द्वारा पांच श्लोकसे विस्तार रूप कहते हैं कि कोई प्रकृति औ पुरुष दोनो अनादि हैं जो इ नका कारण और ढूंढोगेतो अनवस्था दोष पड़ेगा अर्थात् उ सका कारण जिसका कारण ऐसे ठिकानाम लगेगा इससे सो र प्रकृति पुरुष को अनादि जानो तो ईश्वर शक्तिप्रकृति भी अनादि है और ईश्वरका अंशभूत पुरुष भी अनादि है और देह इन्द्रिय आदि विकार तथा गुण रूप परिणाम को प्राप्त जो सुख दुख मोह आदि सो सब प्रकृति से होते हैं यह जानो परमेश्वर औ तदीय शक्ति यों को अनादित्व भाष्यकार श्रीशंक राचार्य ने विस्तार से कहा है इससे इहां ग्रन्थ बढ़ने के डर से मैने नहीं कहा देह इन्द्री सुख दुख सब प्रकृति ही के कार्य हैं

१९ ॥

दोहा

विकार गुणांको

प्रकृति पुरुषको जानहुं दोउ अनादि कोय

जानहुं मायासंभव सोय १९ ॥

122

कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते

शांकरभाष्य टीका १

के पुनः ते विकाराश्च गुणाश्च प्रकृतिसम्भवाः कार्येति कार्यकार
णकर्तृत्वे कार्यं शरीरं कारणानि तत्स्थानि त्रयोदश देहस्या
रम्भकाणि भूतानि विषयाश्च प्रकृतिसम्भवा विकाराः पूर्वो
क्ता इह कार्यग्रहणेन गृह्यन्ते गुणाश्च प्रकृतिसम्भवाः सुख
दुःखमोहात्मकाः कारणाश्रयत्वात् कारणग्रहणेन गृह्यन्ते
तेषां कार्यकारणानां कर्तृत्वमुत्पादकत्वं यत्तत् कार्यकारण
कर्तृत्वे तस्मिन् कार्यकारणकर्तृत्वे हेतुः कारणमारम्भकत्वे
न प्रकृतिरुच्यते एवं कार्यकारणकर्तृत्वेन संसारस्य कारणं
प्रकृतिः कार्यकारणयोः कर्तृत्व इत्यस्मिन्नपि पाठे कार्यं य
द्यस्य विपरिणामस्तत्तस्य कार्यं विकारः विकारि कारणं तयो
र्विकारविकारिणोः कार्यकारणयोः कर्तृत्व इति तान्येव का
र्यकारणान्युच्यन्ते अथवा षोडश विकाराः कार्यं सप्त प्रकृति
विकृतयः कारणं तान्येव कार्यकारणानि उच्यन्ते तेषां क
र्तृत्वे हेतुः प्रकृतिरुच्यते आरम्भकत्वेनैव पुरुषश्च संसार
स्य कारणं यथा स्यात्तदुच्यते पुरुषः जीवः क्षेत्रज्ञः भोक्ता इ
ति पर्यायः सुखदुःखानां भोग्यानां भोक्तृत्वमुपलब्धृत्वे हेतु
रुच्यते कथं पुनरनेन कार्यकारणकर्तृत्वेन सुखदुःखभो
क्तृत्वेन च प्रकृतिपुरुषयोः संसारकारणत्वमुच्यते इति अ
त्रोच्यते कार्यकारणसुखदुःखरूपेण हेतुफलात्मना प्रकृ
तेः परिणामाभावे पुरुषस्य चेतनस्यासति तदुपलब्धृत्वे
कुतः संसारः स्यात् यदा पुनः कार्यकारणहेतुफलात्मना
परिणतया तया प्रकृत्या भोग्यया पुरुषस्य तद्विपरीतस्य
भोक्तृत्वेनाविद्यारूपः संयोगः स्यात्तदा संसारः स्यादित्यतोय
त् प्रकृतिपुरुषयोः कार्यकारणकर्तृत्वेन सुखदुःखभोक्तृ

श्री॰
गी॰ टी॰
अ॰

123

तेन च संसारकारणत्वमुक्तं तत्र पुरुषमुक्तं कः पुनरयं संसा
रो नाम सुखदुःखसंभोगः संसारः पुरुषस्य च सुखदुःखानां
संभोक्तृत्वं संसारित्वमिति २० ॥

आनंदगिरिकृतटीका २

विकाराणां गुणानां प्रकृतेश्च स्वरूपमाकांक्षाद्वारा निर्दिश्य पु
नरश्लोकपूर्वार्द्धं पातयति के पुनरिति पुरुषस्यानादित्वकृ
तबन्धहेतुत्वमाह पुरुष इति पूर्वार्द्धं व्याचष्टे कार्यमित्यादि
ना ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं मनोबुद्धिरहंकारश्चे
ति त्रयोदशकरणानि तथापि भूतानां विषयाणाञ्चाग्रहणा
त् कथन्तेषां प्रकृतिकार्यत्वमाशंक्याह देहेति तथापि गु
णानामसंग्रहणाच्च प्रकृतिकार्यत्वं तत्राह गुणाश्चेति उक्त
रीत्या निष्पन्नमर्थमाह एवमिति पाठान्तरमनूद्य व्याख्याह
बैकमर्थाभेदमाह कार्येत्यादिना व्याख्यान्तरमाह अथवेति
एकादशेन्द्रियाणि पञ्च विषया इति षोडशसंख्याकविकारे
ण कार्यशब्दार्थः महानहंकारो भूततन्मात्राणीति प्रकृति-
विकृतयः सप्त कारणं तेषां आरम्भकत्वेन कर्तृत्वेन हेतुरा
द्यो मूलप्रकृतिरित्यर्थः उत्तरार्द्धस्य तात्पर्यमाह पुरुषश्चेति
तस्य परमात्मत्वं व्यवच्छिनत्ति जीव इति तस्य प्राणधारणनि
मित्तस्य तदर्थत्वेन तनमाह क्षेत्रज्ञ इति तस्यानौपाधिकत्वं वा
रयति भोक्तेति तयोः संसारकारणत्वमुपपादयितुं शक्य
ते कथमिति अन्वयव्यतिरेकाभ्यां तयोस्तथात्वमित्याह प्र
वेति तत्र व्यतिरेकं दर्शयति कार्येति नहि नित्यमुक्तस्यात्म
नः स्वतः संसारोस्तीत्यर्थः इदानीमन्वयमाह यदेति अन्व
यादिफलमुपसंहरति अत इति आत्मनोविक्रियस्य संस
रणं नोचितमित्याक्षिपति कः पुनरिति सुखदुःखान्यत
रसाक्षात्कारो भोगः सचाक्रियस्यैव दृष्टः संसारः तथावि
धे भोक्तृत्वमस्य संसारित्वमित्युत्तरमाह सुखेति श्लोकव्या
ख्यासमाप्ताविति शाहः २० ॥

स्वामिकृतटीका ३

विकाराणांप्रकृतिसंभवत्वंदर्शयन् पुरुषस्यसंसारहेतुत्वं दर्शयति कार्यकारणेति कार्यंशरीरंकारणानिसुखदुःखादि साधनानीन्द्रियाणितेषांकर्तृत्वेतदाकारपरिणामेप्रकृतिर्हे तुरुच्यते कपिलादिभिःपुरुषोजीवःतत्कृतसुखदुःखानांभो क्तृत्वेहेतुरुच्यते अयंभावः यद्यप्यचेतनायाःप्रकृतेःस्वतःकर्तृ त्वंनसंभवति तथापुरुषस्य अविकारिणोभोक्तृत्वंनसंभव ति तथापिकर्तृत्वंनामक्रियानिर्वर्तकत्वंतच्चाचेतनस्यापिचेत नादृष्टवशात्संभवति यथावह्नेरूर्ध्वज्वलनंवायोस्तिर्यग्गम नं वत्सादृष्टवशात् स्तन्यपयःक्षरणमित्यादि अतःपुरुष सन्निधानात्प्रकृतेःकर्तृत्वमुच्यते भोक्तृत्वंचसुखदुःखसंवेदनं तच्चेतनधर्मएवेति प्रकृतिसन्निधानात्पुरुषस्यभोक्तृत्वमु च्यतइति २० ॥

(हाशिये पर: १ चैतन्याधिष्ठानवशात् । १० । वे)

पिशाचभाष्यटीका ४

कार्यकारणकर्तृत्वेभोक्तृत्वेऽपलक्ष्यते २० ॥

रामानुजभाष्यटीका ५

संसृष्टयोःप्रकृतिपुरुषयोःकार्यभेदमाह कार्येति कार्यंश रीरंकारणानिसमनस्कानीन्द्रियाणितेषांक्रियाकारत्वेपुरुषा धिष्ठिताप्रकृतिरेवहेतुःपुरुषाधिष्ठितदेहाकारपरिणतप्र कृत्याश्रयभोगसाधनभूताःकृताइत्यर्थःपुरुषस्याधिष्ठातृत्वमे वतदपेक्षयाआयिककर्तृशास्त्रार्थवत्त्वादिशुद्धेशरीराधिष्ठा नयत्नेहेतुत्वमेवहिपुरुषस्यकर्तृत्वंप्रकृतिसंसृष्टपुरुषःसु खदुःखानांभोक्तृत्वेहेतुःसुखदुःखानुभवाश्रयइत्यर्थः २० ॥

(हाशिये पर: यु)

अभिनवगुप्तकृतटीका स्पष्टार्थो २० ॥

परमार्थप्रपाटीका

अथपुरुषस्यानादित्वंतथात्वंदर्शयति कार्यकारणेति पुरुषोजीवस्तत्कृतसुखदुःखादिकार्यशरीरकारणानिसु खदुःखादिसाधनानीन्द्रियाणितेषांकर्तृत्वेतदाकारपरि णामेप्रकृतिर्हेतुःपुरुषस्तुसुखदुःखानांभोक्तृत्वेहेतुर

श्री॰
गी॰ टी॰
३॰

184

येभावः यद्यप्यचेतनायाः प्रकृतेः स्वतः कर्तृत्वेन संभव-
ति तथा पुरुषस्याप्यविकारिणो भोक्तृत्वं न संभवति तथा
कर्तृत्वं नाम क्रियानिर्वर्तकत्वं चेतनस्यापि चेतनादृष्टव-
शात्संभवति यथाग्नेरूर्ध्वज्वलनं वायोस्तिर्यक्प्लवनं वत्स-
हष्णात्तत्पयसः क्षरणं इत्यादि अतः पुरुषसंनिधानात्प्र-
कृतेः कर्तृत्वमुच्यते भोक्तृत्वं सुखदुःखसंवेदनं तच्चचेत-
नाधर्मप्येवेति प्रकृतिसंनिधानात्पुरुषस्य भोक्तृत्वमिति २० ॥

वनमाली टीका ८

कार्यं शरीरं करणानीन्द्रियाणि देहारंभकाणि भूतानि विषया-
श्चेह कार्यपदेन गृह्यन्ते गुणाश्च सुखदुःखादयः करणाश्रय-
त्वात्करणपदेन गृह्यन्ते तेषां कर्तृत्वे क्रियाविकारे हेतुः कारणं
प्रकृतिरुच्यते शरीरेन्द्रियादिरूपेण प्रकृतिः परिणमत इत्य-
र्थः कारणेति दीर्घपाठे सम एवार्थः पुरुषो जीवोऽविद्यावानतः
करणोत्पन्नसुखदुःखादेर्भोक्तृत्वे हेतुः अनुभवितृत्वे हेतुश्चे-
तनत्वात्तु घ्नादिर्जडत्वात् यद्यपि तु घ्नादिरूपेण प्रकृतेरपि
ज्ञानेच्छाकृतिसुखादीनां परिणामिकारणत्वेन प्रयत्नवत्त्वरूपं
कर्तृत्वं दुःखादिमत्त्वरूपं भोक्तृत्वं चास्ति तथापि यथा हस्तोऽत्य-
न्तं दंडस्य तेनोत्पन्नयत्नस्य सहरूपोऽप्येतयोः सत्त्वेऽपि न तत्र दंडि-
त्वव्यवहारः किंतु संयोगस्वत्वादिसंबंधेन यत्र दंडधनादिकं व-
र्ततेतत्रैव दंडी धनीत्यादिव्यवहारस्तथा सुखदुःखादि कर्त्वसं-
बंधेन यत्र जीवे वर्ततेतत्रैव सुखी दुःखी कर्ता भोक्ता-
दिरूपः संसारः भगवज्ज्ञानेनाविद्यानाशात्तु करणोत्पन्नमपि म॰
दुःखादिकं जीवन्मुक्तेनाविद्याजनितस्वामिमानिवनानुभू-
यते संबंधघटकाविद्याभावादिति भावः २० ॥

कृष्णमैवजयन्तीटीका ९

अथ संसृष्टरूपयोः प्रकृतिपुरुषयोः कार्यभेदमाह कार्यका-
रणेति कार्यं शरीरं कारणानि समनस्कानीन्द्रियाणि ज्ञानकर्म-
साधकत्वात् तेषां कर्तृत्वे क्रियाकारित्वे तत्तदाकारस्य परिणा-

मेवइत्यर्थः पुरुषापेक्षिता प्रकृतिर्हेतुः कारणमुच्यते क
र्तृत्वमिति शेषः पुरुषापेक्षिता प्रकृतिः पुरुषकर्मानुसारेण
तत्तद्देहेन्द्रियादीनां तद्भोगापवर्गसाधनभूतानां परिणामस्व
भावानां सृष्टा पुरुषो जीवात्मा प्रकृतिसंसृष्टः सन् प्रकृत्यपि
तानां सुखदुःखादीनां भोक्तृत्वे हेतुः कारणमुच्यते तेषां भोगे प्र
कृतिसंसृष्टो जीवः प्रवर्तक इत्यर्थः प्रकृतेः कर्तृत्वं पुरुषापेक्षि
तत्वेनैव चेतनत्वस्य प्रवेशेन तन्त्रधर्माश्रयत्वेन चेतनाश्रितधर्मा
णां कर्तृत्वभोक्तृत्वसुखदुःखादीनामाश्रयत्वेन संभवति पुरुषस्य
तु स्वाभाविकमेव कर्तृत्वमस्ति कर्मशास्त्राणि वत्वादिति स्वात
परमेश्वरस्य कर्तृत्वं तु चेतनाचेतनाधिष्ठातृत्वेन सर्वज्ञैवाव
र्णनीयमित्युक्तं वस्तुतश्चेत्यभिप्रायः २० ॥

मधुसूदनी टीका ०

\+ विकाराणां प्रकृतिसंभवत्वं विवेच्य पुरुषस्य संसारहेतुत्वं दर्शयति ॥

\+ कार्यं शरीरं करणानि इन्द्रियाणि तस्थानि त्रयोदश देहारंभका
णि भूतानि विषयाश्चेह कार्यग्रहणेन गृह्यन्ते गुणाश्च सुखदुः
खमोहात्मकाः करणाश्रयत्वात् करणग्रहणेन गृह्यन्ते तेषां
कार्यकरणानां कर्तृत्वे तदाकारपरिणामे हेतुः कारणं प्रकृति
रुच्यते महर्षिभिः कार्यकारणेति दीर्घपाठेपि स एवार्थः प्र
वेश प्रकृतेः संसारकारणत्वं व्याख्याय पुरुषस्यापि यादृशं तत्त्वदा
ह पुरुषः क्षेत्रज्ञः परा प्रकृतिरिति प्राग्व्याख्यातः सुखदुः
खानां सुखदुःखमोहानां भोग्यानां सर्वेषामपि भोक्तृत्वे हेतु
परकोपलंभे हेतुरुच्यते [illegible] सुखदुःखभोक्तृत्वे
[illegible] निमित्तमुच्यते २० ॥

सदानंदी टीका ॥

मायिकत्वे विकाराणामविवेकेन विवेचयन् पुरुषस्याविवेके
न संसारित्वमिहोच्यते १ कार्यं शरीरमित्युक्तं करणानीन्द्रि
याणि च कार्यशब्देन भूतानि गृह्यन्ते विषयास्तथा २ गुणाः
करणाश्रयत्वात्सुखबोधाः करणोक्तितः तेषां कार्यकरणाना
मुत्पत्तौ कारणं परं ३ माया प्रकृतिशब्दोक्ता प्रोच्यते सा महर्षि

श्री:
गी:त्र:
टी:

१२५

सि: प्रकृतेर्हेतुमात्रकर्तापुरुषस्यतदुच्यते ४ तेत्रहः सुखदुःखा
नांभोगानांहेतुरुच्यते वित्वहमसुपरक्तोपलंभेभोक्तृत्वशक्तिने ५

२०

नीलकंठी टीका १२

उभयोरपिसंसारंप्रतिकारणत्वेद्वारमाह कार्येति कार्यंशरी
रंतदारंभकाणिभूतानिविषयांश्च कारणंत्रयोदशेंद्रियाणि
तदाश्रितान्सुखदुःखमोहात्मकगुणांश्च करणानीतिपा
ठेपिसएवार्थः एतयोःकार्यकारणयोःकर्तृत्वेनिमित्तेसति
कर्तृत्वेनेत्यर्थः हेतुःसंसारस्यकारणंप्रकृतिर्भवति तथा
पुरुषःसुखदुःखानांभोक्तृत्वेभोक्तृत्वेनसंसारस्यहेतुरिति
यदिहिकार्यकारणसुखदुःखस्वरूपेणहेतुफलात्मनाप्रकृ
तिर्नपरिणमेततदापुरुषः किमुपलभेतअनुपलब्धावा
कथंसंसारीस्यात् अनुपलभ्यकावाप्रकृतिःकस्योपयुज्येत
तस्मादुपलभ्योपलब्धसंयोगःसंसारकारणमितियथाभा
ष्यंव्याख्यातं यद्वा पुरुषस्यकार्यत्वेकारणत्वेकर्तृत्वेचप्रकृति
रेवपुरुषतादात्म्यप्राप्ताहेतुर्भवति वह्नितादात्म्यप्राप्तंलोहं
वह्नेस्तीक्ष्णत्वादाविवहेतुर्भवति तथाप्रकृतेःसुखदुः
खभोक्तृत्वेस्वच्छायाप्रदानेनपुरुषःकारणं वह्निरिवलोहस्य
स्वच्छायाप्रदानेनदाहकत्वे तथाहि कार्यमादयःप्राकृतदेहेंद्रि
यबुद्धिधर्माःसंतश्चिदात्मन्यारोप्यंतेगौरोहंमनुष्योहंश्रोत्राहंका
णोहंखंजोहंकरोम्यहमकार्षमहमिति तथाचिच्छायापन्ना
बुद्धिस्थेनयामहंसुखदुःखादीनुपलभइतिमन्यते सोयंप्रकृ
तिपुरुषयोरन्योन्यधर्माध्यासःसंसारस्यकारणमित्युपपादितं
भवति सांख्याभिमतंपुरुषस्यभोक्तृत्वमपिनिरस्तंभवति अ
न्यथाप्रकृतिःकर्त्रीपुरुषोभोक्तेतिकर्तृत्वभोक्तृत्वयोर्वैयधिक
रण्यमापद्येत नचभोक्तुःपुरुषस्यनिर्विकारत्वमपिवक्तुंशक्य
मित्यन्यत्रविस्तरः इहानेश्लोकमात्रपदंप्रत्येकमभिसंबध्यतेतु
नित्वप्रत्ययस्यहर्दीभ्यामपिसंबंधेकार्यत्वकारणत्वकर्तृत्वेच
तिविग्रहः इहैकवचनावश्यंभावात्परिकार्यलिंगपरिमाणवचन
मात्रेप्रथमेत्यादिवत् २०॥

+ एवं सामान्यतः प्रकृतिपुरुषयोः स्वरूपं प्रतिपाद्य विशेषतः प्रतिशरीरं नानात्वेन यथा क्षेत्रज्ञ स्तथा प्रतिपादयति ॥

आनंदी टीका १३

+ कार्याणि देहारंभकाणि भूतानि करणानि वाह्याभ्यन्तरा णि इंद्रियाणि तेषां कर्तृत्वे हेतुः प्रकृतिरुच्यते यस्या या दृशी सात्त्विकी राजसी तामसी वा प्रकृतिः तस्य तादृशं श रीरमुत्पद्यत इत्यर्थः तदेवं प्रकृतिपरतंत्रः पुरुषः सुख दुःखानां सात्त्विकादिप्रकृतिकार्याणां बहुवचनोक्तेः सु खदुःखमोहानां भोक्तृत्वे चेतनत्वादनुभवे हेतुरुच्य ते [illegible] २० ॥

+ एवं सामान्येन प्रकृतिपुरुषयोः स्वरूपं प्रति पाद्येदानीं यथा प्रकृतिः प्रतिपुरुषं नाना शरीरभावेन संबद्धा [illegible] पुरुषस्य प्रतिशरीरं नानात्वेन ब्रह्मभावे न यथा संबद्धस्तथा प्रतिपा दयितुमाह ॥

रामकंठी टीका १४

+ कार्यं महाभूताद्यात्मकं कारणानि बाह्यान्तराणींद्रियाणि इति शरीराद्यात्मकः समूहः कार्यकारणशब्देनोच्यते त स्य कर्तृत्वे तावन्मात्रनिविष्टाहंप्रत्ययरूपे प्रकृतिरुक्ता हे तुः कारणं सा हि शरीरात्मनाव्यवस्थिता सती तन्निविष्टाहं प्रत्ययनिमित्तं तथा सुखादीनां वेद्यत्वाद्दृश्यानामात्मनो यो भोक्तृत्वाभिमानस्तत्र वेदकस्वभावत्वात्पुरुष एव का रणं सति पुरुषप्रत्यये सुखदुःखात्मनो भोग्यस्य विषयत्व उक्तत्वस्य च विषयित्वव्यपदेशः [illegible] २० ॥

प्रकृतिसंभूतत्वमेव विशदयति ॥

नासिकी [illegible] टीका १५ ॥

कार्यस्य देहादेः कारणस्येंद्रियादेः कर्तृत्वे उत्पादकत्वे देव त्तस्य प्रकृतिस्त्रिगुणसाम्यात्मिका हेतुः प्रयोजिका उच्यते । पाचकस्येव पचनसामग्री न हि चेतनं विहाय जडस्य क र्तृत्वं युक्तम् तदुक्तम् अस्मिन्सतीदमस्तीति कार्यकारण तापि वा साप्यपेक्षाविहीनानां जडानां नोपपद्यते इति एत दुक्तं भवति स्वस्वरूपाविस्मरणेनैव बहिर्मुखत्वेन यातीत्यर्थः विम्बभूतः पुरुष आत्मा सुखदुःखभोक्तृत्वे प्रतिविम्बरूपस्य

तदुपादानं देहेन्द्रियादीनां [illegible]

१३ श्री॰ देवदत्तस्य प्रयोजकत्वेन आश्रयभूतत्वात् पितरावपि बालकस्य २०

गी॰टी॰

126

२०॥

पंचोलीटीका

इदानीं विकाराणां गुणानां च स्वरूपं दर्शयन् तेषां प्रकृतिसंभवत्वकथनेन पुरुषस्य संसारहेतुत्वं दर्शयति कार्येति कार्यकारणकर्तृत्वे कार्यं शरीरं कारणानीन्द्रियाणि तेषां कर्तृत्वे उत्पादकत्वे प्रकृतिः माया हेतुः कारणं पुरुषः क्षेत्रज्ञः सुखदुःखानां भोक्तृत्वे हेतुः कारणमुच्यते २०॥

रणवीरसमिद्बोधिनी॥

विकाराणां प्रकृतिजन्यत्वं दर्शयन् पुरुषस्य संसारकारणत्वं दर्शयति कार्येति कार्यं शरीरं कारणानि देहारंभकानि त्रयोदशभूतानि कार्यग्रहणेनेह विषयाणां षोडशानां विकाराणां त्रयाणां गुणानां सुखदुःखमोहानां च प्रकृतिसंभवत्वाद्ग्रहणं भवति तेषां कार्यकारणानां कर्तृत्वे समुत्पादकत्वे हेतुः कारणं प्रकृतिरुच्यते पुरुषः क्षेत्रज्ञः सुखदुःखमोहानां भोग्यानां भोक्तृत्वे कारणमभिधीयते इति २०॥

मधुभाष्य

२०॥

भाषा अनुवाद टीका

भगवान श्रीकृष्ण सकल विकार प्रकृति से उत्पन्न हैं य
ह देखाय अब पुरुष को संसार होने का हेतु इस श्लोकमें
देखावते हैं कि कार्य जो शरीर और कारण जो सुख दुख
के साधन स्वरूप कहे करने वाले इन्द्री सब और इन्द्रियों
को कर्तृत्व कहे तीन तीन रूप हो जाना इस सब की कार
ण प्रकृति है यह कपिल आदि ऋषियों ने कहा और पु
रुष जो जीव सो शरीर इन्द्री आदिकृत सुख दुख सबका
कारण स्वरूप कहा है तात्पर्य यह कि यद्यपि अचेतन प्र
कृति आपसे कुछ नहीं कर शकती और विकारी पुरुषको
भी भोक्तृत्व कहे भोग करना यह असंभव है तौ भी कर्तृत्व
शब्द का अर्थ यह है कि क्रिया करना अचेतन प्रकृति को
भी चेतन्यरूप जीवके अदृष्टवशते सम्भो है जैसे अचेत
न होके भी अग्निज्वाला का ऊर्ध्व गमन औ वायुका तिर्छा
गमन और वृक्षो को जैसे हृय स्वतः करै है तैसे ही पुरु
रुष की सान्निध्य कहे अवलंब से प्रकृति को कर्तृत्व है
और भोक्तृत्व जो सुख दुख का ज्ञान सो चेतन का धर्म
है इससे प्रकृति संनिधान कहे माया की निकटता को
प्राप्त होय पुरुष को भी भोक्तृत्व कहा है २० ॥

दोहा

कार्यकारण करणमें हेतुप्रकृतिकहिसोय पुरुषहूं
सुखदुःखभोगमे कहा हेतु सो होय २० ॥

127

पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान् गुणा
न् कारणं गुणसंगोस्य सदसद्योनिजन्मसु

शांकरभाष्य टीका १

यत् पुरुषस्य सुखदुःखानां भोक्तृत्वं संसारित्वमित्युक्तं तस्य
तत् किंनिमित्तमित्युच्यते पुरुष इति पुरुषो भोक्ता प्रकृतिस्थः
प्रकृतावविद्यालक्षणायां कार्यकारणरूपेण परिणतायां स्थि
तः प्रकृतिस्थः प्रकृतिमात्मत्वेन गत इत्येतत् हि यस्मात् तस्मा
द्भुंक्ते उपलभत इत्यर्थः प्रकृतिजान् प्रकृतितो जातान् सुख
दुःखमोहाकाराभिव्यक्तान् गुणान् सुखी दुःखी मूढः पंडि
तोऽहमित्येवं सत्यामप्यविद्यायां सुखदुःखमोहेषु गुणेषु भुज्य
मानेषु यः संगः आत्मभावः संसारस्य स प्रधानं कारणं जन्म
नः स यथाकामो भवति तत्क्रतुर्भवतीत्यादिश्रुतेः तदेतदा
ह कारणं हेतुर्गुणसंगः गुणेषु संगोस्य भोक्तुः सदसद्योनि
जन्मसु सत्यश्चासत्यश्च योनयः सदसद्योनयस्तासु सदसद्यो
निषु जन्मानि तानि सदसद्योनिजन्मानि तेषु सदसद्योनिज
न्मसु विषयभूतेषु कारणं गुणसंगोथ वा सदसद्योनिजन्मसु अ
स्य संसारस्य कारणं गुणसंग इति संसारपदमध्याहार्यं सद्यो
नयो देवादियोनयः असद्योनयः पश्वादियोनयः सामर्थ्यात्
सदसद्योनयो मनुष्ययोनयोप्यविरुद्धा द्रष्टव्याः एतदुक्तं भ
वति प्रकृतिस्थत्वाख्याविद्या गुणेषु च संगः कामः संसारस्य का
रणमिति तच्च परिवर्जनायोच्यते अस्य च निवृत्तिकारणं ज्ञा
नवैराग्ये ससंन्यासे गीताशास्त्रे प्रसिद्धं तच्च ज्ञानं पुरस्तादुप
न्यस्तं क्षेत्रक्षेत्रज्ञविषयं यत् ज्ञात्वामृतमश्नुत इत्युक्त्वान्यापोहे
नातद्धर्माध्यारोपेण च २१ ॥

आनंदगिरिकृतटीका २

श्लोकान्तरं प्रश्नोत्तरत्वेनावतारयति यदिति निमित्तं वक्तुमादौ
संसारित्वमस्य विधेयत्वाय प्रस्तौति इत्याह पुरुष इति यस्मात् प्र

कृतिमात्मत्वेन गतस्तस्माद्भोक्तेति योजना गुणविषये भोग
मभिनयति सुखादीति अविद्याया भोगहेतुत्वात् किं कारणत्वेष
णायेत्याशंक्याह सत्यामपीति संगस्य जन्मादौ संसारे प्रधान
हेतुत्वे मानमाह स यथेति उक्तेर्थे द्वितीयार्द्धमवतार्य व्याचष्टे
तदेतदित्यादिना साध्याहारं योजनान्तरमाह अथवेति सदस
द्योनीर्विविच्य व्याचष्टे सद्योनयइति योनिद्वयनिर्देशात् मध्य
वर्त्तियोमनुष्ययोनयोपि खलिताइत्याह सामर्थ्यादिति संग
स्य संसारकारणत्वेनाविद्यायास्तत्कारणत्वमेकस्मादेव हेतो
रुत्पत्तेरित्याशंक्याह यत्तदिति अविद्योपादाने संगोनिमि
त्तमित्युभयोरपिकारणत्वं सिध्यतीत्यर्थः द्विविधहेतूक्तेर्विव
क्षितं फलमाह तद्धेति संसारस्याज्ञानस्य स्वतोनिवृत्तेस्तन्नि
वर्तके वाच्यमित्याशंक्याह अस्येति वैराग्ये सति सन्यासस
सर्वकर्म ज्ञाने सासंगाज्ञाननिवर्तकमित्यर्थः उक्ते ज्ञाने मान
माह गीतेति अध्यायादौ चोक्तं ज्ञानमत्राहृतमित्याह तद्धेति
तदेव ज्ञाने यज्ज्ञात्वेत्यादिना न सत्तन्नासदित्यन्तेनात्मनिषे
धेन सर्वतः पाणिपादमित्यादिनाचानन्दस्मीध्यासेनोक्तमित्या
ह यज्ज्ञात्वेति २१ ॥

स्वामिकृतटीका ३

तथाप्यविकारिणोजन्मरहितस्यच भोक्तृत्वं कथमित्यतआह
पुरुषइति हि यस्मात् प्रकृतिस्थः तत्कार्ये देहे तादात्म्येन स्थितः
पुरुषः अतस्तज्जनितान् सुखादीन् भुंक्ते अस्य च पुरुषस्य सती
षु देवादियोनिषु असतीषु तिर्यगादियोनिषु यानि जन्मानि ते
षु गुणसंगः शुभाशुभकर्मकारिभिरिंद्रियैः गुणेषु विषयेषु
संगः कारणमित्यर्थः २१ ॥

पिशाचभाष्य टीका ४

एवं प्रकृत्योः संबद्धयोः पुरुष॰ पुरुषः प्रकृतिस्थो हि २१ ॥
नित्यप्रकृतयोः कार्यभेदकः पुरुषस्य तत्र स्वानु
भवैकस्वस्यापि वैषयिकसुखदुःखोपभोक्तृ
त्वे हेतुमाह ॥ ॥

रामानुजभाष्य टीका ५

+ पुरुष इति गुणशब्दः स्वकार्येष्वौपचारिकः स्वतन्त्रानुभवैकस्व॰

त्वेः पुरुषः प्रकृतिस्थः प्रकृतिसंसृष्टः प्रकृतिजान्गुणान्प्रकृतिसं
सर्गोपाधिकान्सत्वादिगुणकार्यभूतान्सुखदुःखादीन्भुङ्क्तेऽनुभ
वति प्रकृतिसंसर्गहेतुमाह कारणमिति पूर्वपूर्वप्रकृतिपरिणा
मरूपदेवमनुष्यादियोनिविशेषेष्ववस्थितोऽयं पुरुषः तद्योनिप्रकृ
तिमुक्तसत्वादिगुणमयेषु सुखदुःखादिषु सक्तः तत्साधनभूतेषु पु
ण्यपापकर्मसु प्रवर्तते ततः तत्पुण्यपापफलानुभवाय सदस
द्योनिषु साधुसाधुषु योनिषु जायते ततश्च कर्मारभते ततश्च जा
यते यावदमानित्वादिकानात्मप्राप्तिसाधनभूतान्गुणांश्च सेव
ते तावदेवं संसरति तदिदमुक्तं कारणं गुणसंगोऽस्य सदसद्योनि
जन्मस्विति २१ ॥

अभिनवगुप्तकृतटी

प्रकृतिः पुरुषयोः परं बंधवत्किलान्योन्यापेक्षाहृतिः अत एवास्य
शास्त्रकृद्भिर्नानाकारैर्नामभिरभिधीयते रूपमुपद्रष्टेत्यादिभिः अय
मत्र तात्पर्यार्थः प्रकृतिस्तद्विकारश्च त्रुटदेशाविधः सर्गस्तथा
पुरुष एतत्सर्वमनादिनित्यं च ब्रह्मतत्वात्कुर्वितत्वमतितदनन्य
त्वात्तथा चाह य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सहेति एवमने
न सर्वाभेदरूपेण ब्रह्मदर्शनेन यो योगी प्रकृतिपुरुषं गुणांश्च तन्
विकारांश्च जानाति स सर्वेण प्रकारेण यथा तथा वर्तमानोऽपि मुक्त
एवेत्यर्थः ईदृशं च ज्ञानं प्रधानं केचिदुत्सदा अतत्तयोपास्यते अन्यैः
आगमकेन सांख्येन योगेन अपरैः कर्मणा इतरैरपि स्वयमीदृशं ज्ञा
नमजानद्भिरपि श्रवणमात्रेणैर्यथाश्रुतमेवोपास्यते तेऽपि मृ
त्युसंसारं तरंति येन केनचिदुपायेन भगवत्तत्वमुपास्यमानं तु
तारयत्यतः सर्वथैवमासीतेत्युक्तम् २१ ॥

परमार्थप्रपाटीका

तथाप्यविकारिणो जन्मरहितस्य भोक्तृत्वं कथमित्याह पुरुष इति
हि यस्मात्कारणात्प्रकृतिस्थस्तत्कार्ये देहे स्थितः पुरुषः अतस्त
त्रस्थितान्सुखदुःखादीन्भुङ्क्ते अस्य च पुरुषस्य सतीषु देवादियो
निषु असतीषु तिर्यगादियोनिषु यानि जन्मानि तेषु गुणसंगतः
शुभाशुभकर्मकारिभिरिंद्रियैः संगः कारणमित्यर्थः २१ ॥

वनमाली टीका

दुःखादीनां तत्र मतः कारणं जीवः केवलं भोक्तेत्याह पुरुषइ
ति पुरुषो जीवः प्रकृतिस्थः प्रकृतिकार्ये देहे साभिमानतया
स्थितो देहं दैहिकं चैवाहं ममेति मन्वानः प्रकृतिजान्प्रकृ
तिकार्यबुद्ध्युत्पन्नान् दुःखादीन् गुणान् भुंक्ते अहं दुःखीत्य
नुभवति न तु केवलात्मनो भुक्तेस्तस्य निर्विकारत्वेन दुःखाद्यु
त्पत्त्यसंभवात् हीत्यनेन प्रसिद्धत्वादर्थक्रियाकारित्वाद्बा
धकाभावाच्च कर्तृत्वभोक्तृत्वादिकं जीवस्य परमार्थस
देव न मृषेति सूचयति पुरुषपदेन जीवेश्वरयोः प्रकृत
त्वेपि जीव एव परामृश्यते नेश्वरः तयोरन्यः पिप्पलं स्वाद्व
त्त्यनश्नन्नन्यो अभिचाकशीत्यादिश्रुत्येश्वरस्य भोगनिषेधात्
जीवस्य तद्विधानाच्च ततः शुद्धबुद्धनिर्मुक्तस्वभावस्य जी
वस्य नृपश्वादिदेहसंबंधे किंनिमित्तं तत्राह कारणमि
ति अस्य भोक्तृत्वेन प्रकृतस्य जीवस्य गुणपादिहेतु सदस
न्नृपश्वादिनानायोनिगतेषु जन्मसु तत्प्राप्तावित्यर्थः स
त्वादिगुणसंगः कारणं सत्वादिगुणरचितनानादेहेषु प्र
वाहादिरहं ममेत्यभिमानः पुनस्तत्कर्मभोगाय देहांतरे
(पुनस्तत्राह) मित्यनादिदुरंतपरिसंसारे भ्रमतीत्यर्थः २१

अथ वैजयंतीटीका

एवमिथः संसृष्टयोः प्रकृतिपुरुषयोः कार्यभेद उक्तः अथ
नोरुभयोर्मध्ये पुरुषस्यैव प्रकृत्यधिष्ठाने सुखादिभोगवक
र्तृत्वं प्रकृतिसंसर्गहेतुत्वं च स्फुटयति पुरुष इति पुरुषो
जीवात्मा यद्यपि स्वतः स्वस्वरूपेणानन्दानुभवैकस्वभावस्तथा
प्यनादिकर्मवासनया प्रकृतिस्थः प्रकृतिरधिष्ठितः प्रकृ
तिकृतदेहेन्द्रियप्राणादिरूपः स्वयमेव भूत्वा प्रकृतिजान्
प्रकृतस्तत्प्रजातान् गुणान् सत्वरजस्तमःकार्यरूपान्प्रकृति
संसर्गनिमित्तकान्सुखदुःखादीन् भुंक्ते ऽनुभवति केषु

तुभवतीत्यपेक्षायामाह सदसद्योनिजन्मसु सुरनरादिषु स
तीषु तिर्यगादिषु पुण्यपापकर्मरचितासु साधुष्वसाधुषु योनि
षु यानि जन्मानि तेषु तत्र तत्र जातिकुलधनविद्याबलरू॰
पाद्यभिमानेन इह पुत्रकलत्राद्यनात्मवर्गप्रसक्तः पूर्वोपार्जि
तसंचितादिकर्मप्रयुक्तः पुण्यपापादिकर्मसु प्रवर्तते तत
स्तत्पुण्यपापादिफलानुभवाय सदसद्योनिषु जायते
ततश्च पुनस्तदेव कर्मारभते ततश्च पुनर्जायते एवं यावद॰
मानित्वादिकानात्मप्राप्तिसाधनरूपान्गुणान्न सेवते
तावदेव संसरतीति पुरुषस्यैव कर्तृत्वेन तु प्रकृतेः प्र
कृतिसंसर्गे हेतुमाह कारणमिति अस्य प्रकृतिसंस॰
र्गस्य गुणसंगोऽनादि गुणमयविषयस्पृहा कारणं
अयंभावः जीवोऽनादिरनादिकर्मवासनानुरक्तः सच
भोक्तृत्वाद्भोग्यान् स्पृहयंस्तदर्पितकामनादिसन्निहि

तां प्रकृतिमाश्रयंति यावत्तत्संसर्गात्तद्वासनानलीयतेत।
त्लयेत्र परमात्मधाम सुखानि भुंक्ते सोऽश्नुते सर्वान्कामा
न्सह ब्रह्मणा विपश्चितेति श्रुतिभ्य इति यत्तु प्रकृतिरित्या
देः कार्यकारणोत्पादः प्रकृतैव चेत्यादेर्नान्यंगुणेभ्य इत्या
दे ख्यापनार्थग्राहिभिस्साङ्ख्यैः ॥

प्रकृतेरेव कर्तृत्वमुक्तं तत्किल रभसाभिधानमेव लोष्टकाष्ठव
दचेतनायास्तस्यास्तदसंभवात् उपादानापरोक्षचिकीर्षाकृति
मत्त्वं खलु कर्तृत्वं न चाचेतनस्यैवेति श्रुतिराह विज्ञानं यज्ञं तनु
ते कर्माणि तनुतेऽपि च एष हि द्रष्टा श्रोता रसयिता घ्राता मन्ता बो
द्धा कर्ता विज्ञानात्मा पुरुष इत्यादिका यच्च पुरुषस्तद्विधिना चेत
नायास्तस्यास्तत्त्वमित्याहुस्तत्र यस्मिन्प्रधानफलं चेतनायास्त
स्याः कर्तृत्वं तत्तस्यैव संनिहितत्त्वस्य सत्त्वचत्त्वात् न खलु तन्मायस्मा
दयत्वमयोहेतुकमपि तद्वह्निहेतुकमेव दृष्टं न च चलति ज
लेफलतिनरूतिति वज्र उपात्तस्यास्तत्वसिद्धिः जलादिषु न प्र
माधिष्ठितत्वे नैष्टासिद्धेः विपाय कश्रुतिव्याकोपाच्चेन देवेन हि
नजं प्रकृतिमुद्दिश्य स्वर्गादिफलकं ज्योतिष्टोमादि मोक्षफलकं
~~[illegible]~~ध्यानं च श्रुतिर्विधत्ते ऽपि तु चेतनमे
व भोक्तारमुद्दिश्येति पुरुषस्यैव कर्तृत्वं न च प्रकृतेरिति यदु
क्तं तत्तु हानिशास्त्रमुख्यादेव यथा करेण बिभर्ति पुरुषः करो बिभर्ती
ति व्यपदेशस्तथा प्रकृत्या कुर्वन्पुरुषः प्रकृतिः करोतीति संभ
वेदित्यर्थः प्रपरेत प्राकृतैर्देहादिभिर्युक्तस्यैव पुरुषस्य यत्तु
ज्ञादि कर्मकर्तृत्वं न तु तैर्वियुक्तस्य शुद्धस्य ततः प्रकृतेरेव नन्दि
तिवदेति तेषां शुद्धस्याग्रे रूपत्वं न भवेत्किंतु काष्ठादिसंयुक्तस्यै
वेत्यपि वक्तुं कालज्ञैत्वलं कृतं कतिरासैः २१ ॥

+ यत्पुरुषस्य सुखदुःखभोक्तृत्वे संसारित्वमित्युक्तं तस्य किं निमित्तमित्युच्यते ॥

मधुसूदनी टीका ॥

+ प्रकृतिर्मायाख्या तां मिथ्यैव तादात्म्येनोपगतः प्रकृतिस्थः हि एव पुरु
षः भुङ्क्ते उपलभते प्रकृतिजान्गुणान् अतः प्रकृतिजगुणोपल
म्भहेतुः सदसद्योनिजन्मसु सद्योनयो देवाद्याः ते हि सात्त्विक
मिष्टं फलं भुञ्जते असद्योनयः पश्वाद्याः ते हि तामसमनिष्टं फ
लं भुञ्जते सद्योनयो धर्माधर्ममिश्रत्वाद्ब्राह्मणाद्या मनुष्याः ते हि
राजसं मिश्रं फलं भुञ्जते अतस्त्वस्य पुरुषस्य गुणसंगः स
त्त्वरजस्तमोगुणात्मकप्रकृतितादात्म्याभिमान एव कारणं न तु
असंगस्य स्वतः संसार इत्यर्थः अथवा गुणसंगः गुणेषु शब्दादि

ʻसद

ʻतस्य

सुखदुःखमोहात्मकेषु संगोऽभिलाषः काम इति यावत् स एवास्य
सदसद्योनिजन्मसु कारणं स यथाकामो भवति तत्क्रतुर्भवति
यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यत इति श्रु
तेः अस्मिन्नपि पक्षे मूलकारणत्वेन प्रकृतितादात्म्याभिमानो द्र
ष्टव्यः ... २१ ॥

सदानंदी टीका ॥

भोक्तृत्वे यत् सुखादीनां संसारित्वे यदीरितं पुंसस्तस्य निमित्तं कि
मित्याहुरमापतिः १ सत्वात्तादात्म्यतो मायां गतोयं पुरुषो गु
णान् मायिकान् सुखदुःखादीन् भ्रांत्योपलभते सदा २ पंडितोहं
सुखी दुःखी मूढोहं चेत्यनेकधा पापवंत्सोयश्चासंगः सोऽज्ञाने सति
कारणं देवतिर्यङ्नरादीनां पुरुषस्यास्य जन्मसु यदा गुणोपका
माख्यः संगः शब्दादिरूपिषु ४ कारणं संसृतेर्मुख्यमत्त्वावचजने
सदा अविद्यायां पश्चासंगस्तत्कार्ये गुणोऽपिच ५ कारणं संसृतेः
सोस्ति तादात्म्याध्यासलक्षणः हेयः सम्यग्विद्या संगः इत्येवं वर्जना
यच ६ उक्तं तथा च गीताख्यशास्त्रेन तस्य निवृत्तये सवैराग्यसन्

द्व॰

न्यासं ज्ञानमेवं स्तुदात्ते ७ नच ज्ञानमत्यन्तं देवदेवज्ञगोचरं
यस्माद्विद्या च तत्कार्यं ज्ञानाबलविदत्वयं ८ विमुच्यते गुणासंगा
त्तादात्म्याध्यासलक्षणात् ९ २१ ॥

नीलकंठी टीका ॥

ननु यथा बौद्धं कर्तृत्वं पुंस्यारोप्यते एवं बौद्धं भोक्तृत्वं बुद्धावस्थितमे
नैकम् भ्रमं वारयति पुरुष इति हि प्रसिद्धं प्रकृतिस्थः देहेंद्रियमनः
संघातमध्यारूढस्तत्तादात्म्यं गत इत्यर्थः प्रकृतिजान् सुखदुःख
मोहात्मकान् गुणान् भुंक्ते उपलभते यदा तु सुप्तिसमाधिमूर्छा
दौ प्रकृतिस्थत्वं नास्ति तदा न सुखादीनुपलभते तेनोपाधिगता
नेव सुखादीनिनदभावेन प्रतीयंत इति सिद्धं श्रुतिरप्यात्मेंद्रिय
मनोयुक्तं भोक्तेत्याहुर्मनीषिण इतींद्रियमनोयोगादेवात्मनि भो

क्तृत्वं दर्शयंतीशस्य केवलस्य भोक्तृत्वं नास्तीति दर्शयति कु
तस्तर्हि भोक्तुरप्यस्य प्राकृतो बंध इति तत्राह कारणमिति
अस्य पुरुषस्य सदसद्योनिजन्मसु तत्र सद्योनिजन्मानो देवाः
असद्योनिजन्मभाजस्तिर्यंचः स्थावराश्च सदसद्योनिजन्मा
नो मनुष्याः एतेषु त्रिष्वपि जन्मसु प्राप्येष्वस्य यो गुणासं
गः सत्वादिभिः संगः कारणं हेतुः तथाहि सात्विकादे
वा भवंति राजसा मनुष्यास्तामसाश्च पशवस्तेषां तत्तद्यो
निप्राप्तौ तद्गुणप्राधान्यमेव कारणं वदंति च ऊर्ध्वं गच्छं
ति सत्वस्था इत्यादि यद्वा प्रकृतिस्थो विद्वान्वा गुणान्भुं
क्ते पश्वादिभिश्चाविशेषादिति न्यायात् तत्किं विद्वानि
वाविद्वानपि जंतो न मुच्यते अविद्वानिव विद्वान्वा जंतो न
वध्यते इत्याशंक्याह कारणमिति गुणेषु देहेंद्रियवि
षयेषु संगः अहमिदं ममेदमित्यभिनिवेशः स एव ज
न्मकारणं विशेषात्तु तदभावान्न जन्म समानेपि देहसं
बंधे यदा यद्वा देहाभिमानं धत्ते तदा स एव देहपीडया
पीड्यते न तु देहपतिर्जीवः यदा त्वयं देहाभिमानं धत्ते
तदा नेतर इति प्रसिद्धं संगस्य बंधकत्वं न तत्साक्षित्वमा
त्रं बंधकं अतो विद्वदविदुषोः समानेपि देहसंबंधे संग
तं भावकृतो महान् विशेष इति भावः २१ ॥

२१ १३ श्री गी टी

तदेवविवृणोति ॥

आनंदी टीका १३

प्रकृतिस्थः प्रकृतिपरतंत्रः पुरुषः देही प्रकृतिजान्गुणान्सु
खदुःखमोहान्भुंक्ते न भवति अस्य परतंत्रस्य पुंसः गुणेषु सुखा
दिषु संगः सदसद्योनिजन्मसु कारणम् अथ च षोडशेऽध्याये अ
भयं सत्वसंशुद्धिरित्यादिवक्ष्यमाणेषु प्रकृतीनां गुणेषु संगः सैषा
दैव्यः असत्य आसुर्यः योनयः तासु यानि जन्मानि तेषु कारणम् इति २२ गा १

[illegible]

रामकंठी टीका १४

पुरुषस्य च विषयित्वव्यपदेशः अतः यस्मात्प्रकृतौ नानाकार्य
कारणात्मकशरीरभावेन परिणते प्रधाने स्थितो मायावशात्ता
वन्मात्राहंकारः वहंभेन वर्तमानः प्रकृतेः संभूतान्गुणान्सुखा
दीन्सुखाद्यात्मना परिणतान्भुंक्ते वेदकत्वेन विषयीकरोति
यतो महाभूतगुणाः शब्दादयः सुखाद्यात्मनावेद्यत्वमापन्नाः पु
रुषस्य विषयित्वव्यपदेशहेतवः एवं शरीरशरीरिभावेन विषय
विषयिभावेन च प्रकृतिपुरुषयोरविवेकजः संबंधः ततश्चास्य
पुरुषस्य गुणे शरीरात्मना विषयात्मना च यः संगोहंकारमम
कारात्मको दृढः संबंधः सत्सतीषु सत्वगुणप्रधानासु असतीषु
च रजःस्तमःप्रधानासु योनिषूत्पत्तिकारणम् तिर्यग्योनिजन्मा
नि पुरुषादिरूपतया संभवात्तेषु गुणसंग एव कारणं हेतुः ।
प्रकृतिपुरुषविवेकाभावमात्रनिमित्ता संसारिता पुरुषस्येत
र्थः [illegible] ॥ २१ ॥

लाक्षिकी [illegible] टीका १५ ॥

+ हि यस्मात्पुरुषः आत्मा प्रकृतिस्थः तत्कार्यदेहादौ तादात्म्येन
स्थितः सन् देहात्मसंतां प्राप्तः प्रकृतिजान्गुणान्सुखदुः

+ ननु तदाश्रयभूतः पुरुष एव चेद्भोक्ता तर्हि प्रयोजकस्तर्हि स एव भोक्तास्तु किंचिदाभासरूपक्षेत्र
ज्ञपरिकल्पनया नस्यादर्शे प्रतिबिंबितोवक्त्रिर्दोषं दहेदित्यत आह ॥

खादीन्भुंक्तेनुभवति नखलूपतः अयोगोलद्द्रोतादात्म्य
मात्मेवक्रियथादाह्यंदहति एवमेकस्मिन्देहेतादात्म्या
पत्तौदेहान्तरेतदप्रसक्तिरित्याशंक्याह कारणमिति ।
अस्यदेहज्ञस्यसतीषुदेवादियोनिषु असतीषुतिर्यगा
दियोनिषुसदसतीषुमनुष्यादियोनिषु यानिजन्मा
नितेषुगुणसंगः शुभाशुभकर्मकारिभिरिंद्रियैः संगः
कारणमित्यर्थः [illegible] स
[illegible]
[illegible]
[illegible] २१ ॥

पंचोलीटीका

पुरुषस्यासंगस्यकथंसुखदुःखानांभोक्तृत्वमित्यतआह पुरुष
इति हियस्मात्पुरुषः भोक्ताप्रकृतिस्थःप्रकृतौअविद्यायांस्थितः
प्रकृतिजान्प्रकृतिजातान्गुणान्सुखदुःखादीन् भुंक्तेउपलभते
अस्यभोक्तुःपुरुषस्यसदसद्योनिजन्मसुसद्योनयःदेवादीनांसृष्टि
असद्योनयस्तिर्यगादीनांसृष्टिः तेषुजन्मानितेषुगुणसंगःगुण
सत्वादिषुसुखदुःखमोहाद्याकारपरिणतेषुसंगस्तादात्म्यभावः
अभिलाषोवाकारणंहेतुः २१ ॥

भगवीरसमिद्धोधिनी

किंनिमित्तंपुरुषस्यसुखदुःखभोक्तृत्वंसंसारित्वमित्याह पु
रुषइति प्रकृतौमायायांतिष्ठति प्रकृतिस्थःप्रकृतिमात्मत्वेन
गतःपुरुषःप्रकृतिजान्प्रकृतिरुत्पन्नान्सुखदुःखादिरूपेणो
पस्थितान्गुणान्भुंक्ते अस्यपुरुषस्यसदसद्योनिजन्मसु सत्यो
सत्यश्चयोनयः सदसद्योनयस्तासुयानिजन्मानितेषुविषयभू

133

तेषुगुणानांसत्त्वरजस्तमसांसंगमस्तदात्मकप्रकृत्यभिमानए
वकारणंतत्रसद्योनयोदेवाद्यास्तासुसत्वोद्रेकात्सात्विकंफ
लंभुंक्तेऽसद्योनयःपश्वाद्यास्तासुतामसंफलंमिश्रसद्योन
योमनुष्याद्याधर्माधर्ममिश्रत्वात्तासुराजसंमिश्रमेवफलंभुंक्ते
इति ॥२॥

मधुभाष्य

१२

भाषा अनुवाद टीका

जो कहो कि अविकारी औ जन्म रहित जो आत्मा तिसको भो
क्तृत्व कहे भोगना कैसे संभव होय है कि जिस हेतु सोई पुरु
ष प्रकृतिस्थ अर्थात् प्रकृति का कार्य जो शरीर तिसमे तदा
त्मरूप होय वास करै हैं इससे उस शरीर से प्रगट जो सुख
दुख आदि तिनको भूलसे भोग करै है जैसे मनुष्य कोइ वस्त्र
या द्रव्य पाय अपनी कर मानि फेरि उसके जानेसे दुखी होय
है कहो यहां दुखका कारण अभिमान छोड़ और क्या है औ
र सत जो देव मनुष्य जोनि औ असत् जो पशु पक्षी आदि
जोनि तिनमे जो इस पुरुषका जीवरूप जन्म सो गुण कहे
शुभ अशुभ कर्मकारी इन्द्रीगण तिनके संगसे होय है सं
ग ही ऊंची नीची देह धारण मे कारणरूप है यह जानो २१

दोहा

पुरुष मायायुत होयके भोगें प्रकृति गुण कोय गुणसं
योगको हेतु यह सत असत योनि होय २१॥

134

उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः पर
मात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः २२

शांकरभाष्यं टीका १

तस्यैव पुनः साक्षाद्व्यपदेशः क्रियते उपद्रष्टेति उपद्रष्टा समीपस्थः
सन्द्रष्टा स्वयमव्यापृतो यथा ऋत्विग्यजमानेषु यज्ञकर्मव्यापृ
तेषु तटस्थोऽन्योऽव्यापृतो यज्ञविद्याकुशलः ऋत्विग्यजमानव्या
पारगुणदोषाणामीक्षिता तद्वत् कार्यकारणव्यापारेषु अव्यापृ
तोऽन्यो विलक्षणस्तेषां कार्यकारणानां सव्यापाराणां सामीप्ये
न द्रष्टृत्वादुपद्रष्टा अथवा देहचक्षुर्मनोबुद्ध्यात्मानो द्रष्टारस्ते
षां बाह्यो द्रष्टा देहस्ततआरभ्यान्तरतमश्च प्रत्यक् समीपे आत्मा
द्रष्टा यतः परोन्तरो नास्ति द्रष्टा सोऽतिशयसामीप्येन द्रष्टृत्वादुप
द्रष्टा स्यात् यज्ञोपद्रष्टृत्वाद्वा सर्वविषयीकरणादुपद्रष्टा अनु
मन्ता च अनुमोदनमनुमननं कुर्वंश्च तत्क्रियासु परितोष
लक्षणोऽनुमन्ता अथ वा अनुमन्ता कार्यकारणप्रवृत्तिषु स्व
यमप्रवृत्तोपि प्रवृत्त इव तदनुकूलो विभाव्यते तेनानुमन्ताथ
वा प्रवृत्तान् स्वव्यापारेषु तत्साक्षिभूतः कदाचिदपि न निवार
यतीत्यनुमन्ता भर्त्ता भरणं नाम देहेन्द्रियमनोबुद्धीनां संहतानां
चैतन्यात्मपारार्थ्येन निमित्तभूतेन चैतन्याभासानां यत् स्वरूपा
वधारणं तच्चैतन्यात्मकृतमेवेति भर्तात्मेत्युच्यते भोक्ताग्न्युष्णव
न्नित्यचैतन्यस्वरूपेण बुद्धेः सुखदुःखमोहात्मकाः प्रत्ययाः स
र्वविषयविषयाश्चैतन्यात्मग्रस्ता इव जायमाना विभक्ता विभाव्य
न्त इति भोक्तात्मोच्यते महेश्वरः सर्वात्मत्वात्स्वतन्त्रत्वाच्च म
हान् ईश्वरश्चेति महेश्वरः परमात्मा देहादीनां बुद्ध्यन्तानां प्र
त्यगात्मत्वेन कल्पितानामविद्यया परम उपद्रष्टृत्वादिलक्षण
आत्मेति परमात्मा सोऽतः परमात्मेत्यनेन शब्देनचाप्युक्तः क
थितः श्रुतौ क्वासौ अस्मिन् देहे पुरुषः परोऽव्यक्तादुत्तमः पुरु
षस्त्वन्यः परमात्मेत्युदाहृत इति यो वक्ष्यमाणः तेनात्मापि

श्री॰
गी॰ टी॰
३॰

135

मायिद्धि इत्युपन्यस्तो व्याख्यायोपसंहृतश्च तमेतं यथोक्तलक्षणमा
त्मानं २२ ॥

आनंदगिरिकृतटीका २

प्रकृतस्यैव मोक्षहेतोर्ज्ञानस्य साक्षान्निर्देशायोत्तरश्लोकमुत्थाप
यति तस्येति कार्यकारणानां व्यापारवतां समीपे स्थितः सन्नि
धिमात्रेण तेषां साक्षित्वेवमर्थत्वेन उपद्रष्टेति पदं व्याचष्टे स
मीपस्थ इति लौकिकस्यैव द्रष्टुरस्यापि स्वव्यापाराविष्टतया निः
क्रियत्वविरोधमाशंक्याह स्वयमिति स्वव्यापारादृते सन्निधिरे
व द्रष्टृत्वं दृष्टान्तेन स्पष्टयति यथेति उपद्रष्टृत्वस्यार्थान्तरमाह
अथवेति वहूनां द्रष्टृत्वेपि कस्योपद्रष्टृत्वं तत्राह तेषामिति उपो
पसर्गस्य सामीप्यार्थत्वेन प्रत्यगर्थत्वात्तत्रैव सामीप्यावसाना
त् प्रत्यगात्मा च द्रष्टा चेत्युपद्रष्टा सर्वसाक्षी प्रत्यगात्मेत्यर्थः
उक्तमेव व्यनक्ति यत्त इति यथा यजमानस्य ऋत्विजां च य ज्ञ
कर्माणि गुणाद्वा दोषतो वा सर्वयज्ञाभिज्ञः सन्नुपद्रष्टा विषयी
करोति तथायमात्मा चिन्मात्रस्वभावः सर्वं गोचरयतीत्युपद्रष्टे
ति पदान्तरमाह यत्ते ति अनुमन्ता चेत्येतद्व्याकरोति अनुमन्ते
ति ये स्वयं कुर्वन्तो व्यापारवन्तो भवन्ति तेषु कुर्वत्सु सत्सु या
स्तेषां क्रियास्तासु पार्श्वस्थस्य परितोषोऽनुमननं तच्चानुमोदनं
तस्य सन्निधिमात्रेण कर्ता यः सोऽनुमन्तेत्यर्थः व्याख्यान्तरमाह
अथवेति तदेव स्फुटयति कार्येति अर्थान्तरमाह अथवेत्या
दिना भर्तेति पदमादाय भरणं किंनामेति पृच्छति भर्तेति त
द्रूपं निरूपयन्नात्मनो भर्तृत्वं साधयति देहेति भोक्तेत्युक्ते कि
यावत्वे ग्रामभोगश्चिदवसानतेति व्यायेविभजते अन्नीति विशे
षणान्तरमादाय व्याचष्टे महेश्वर इति परमात्मत्वमुपपादय
ति देहादीनामिति अविद्यया कल्पितानामिति सम्बन्धः परम
त्वे प्रकृष्टत्वे सः सर्वोत्कृष्टविशेषणवानिति यावत् परमात्मशब्द
स्य प्रकृतात्मविषयत्वे श्रुतिमनुकूलयति अत इति तस्य ताट
स्थ्यं अप्रद्वारा प्रत्याचष्टे कृ ति कस्मात् परत्वं तदाह अव्यक्तादि

ति तत्रैव वाक्यशेषान्तरमाह उत्तम इति सोऽस्मिन् देहे परः
पुरुष इति सम्बन्धः श्रोत्रियनिष्ठयोरैक्यज्ञानं प्रागुक्तं फलोक्त्यास्तौ
तिसैषेत्यन्वेति २२ ॥

स्वामिकृतटीका ३

तदेनेन प्रकारेण प्रकृत्यविवेकात्पुरुषस्य संसारः न तु स्वरूपत
इत्याशयेन तस्य स्वरूपमाह उपद्रष्टेति अस्मिन्प्रकृतिकार्ये देहे
वर्तमानोपि पुरुषः परो भिन्न एव न तद्गुणैर्युज्यत इत्यर्थः तत्र हे
तवः यस्मादुपद्रष्टा पृथग्भूत एव समीपे स्थित्वा न द्रष्टा साक्षी
त्यर्थः तथानुमन्तानुमोदिता सन्निधिमात्रेणानुग्राहकः साक्षी
चेताः केवलो निर्गुणश्चेत्यादिश्रुतेः तथा परेश्वरेण रूपेण भर्ता वि
धारकः भोक्ता पालक इति च महांश्चासावीश्वरश्चेति ब्र
ह्मादीनामपि पतिश्चेति परमात्मेत्यपीति चोक्तः श्रुत्या तथा च श्रु
तिः एष लोकाधिपतिरेष लोकेश्वर एष लोकपाल इत्यादि २२

पिशाचभाष्यं टीका ४

उपद्रष्टा शरीरेन्द्रियेषु स्वविषयाणि व्याप्नुवत्सु तत्त्वलक्षणस्य
कर्मणः समीपस्थो उपद्रष्टा अनुमन्ता कार्यकारणप्रवृत्तिषु स्वय
मप्रवृत्तोपि प्रवृत्त इव तदनुकूलो विभाव्यते भर्ता देहेन्द्रियमनो
बुद्धीनां संहतानां चैतन्यात्मपरार्थं निमित्तभूतेन चैतन्याभा
सानां यत्स्वरूपं तच्चैतन्यात्मकृतमेवेति भोक्तात्मेत्युच्यते भोक्ता॥
प्रत्ययैः सुखादिरूपेण तत्स्वरूपेणोद्देश्यस्य सुखदुःखमोहात्मकोऽत्र प्रत्य
यो चैतन्यग्रस्त इव जायमाना विभक्ता इव विभाव्यन्त इति भोक्ता॥
त्मेत्युच्यते महांश्चासावीश्वरो महेश्वरः परमश्चासावात्मेति परमात्मा दे
हेऽस्मिन्नव्यक्तात्परः पुरुषः २२ ॥

रामानुजभाष्यं टीका ५

उपद्रष्टेति अस्मिन्देहे व्यवस्थितः पुरुषो देहप्रवृत्त्यनुगुणसंक
ल्पादिरूपेण देहस्योपद्रष्टा भवति तथानुमन्ता च भवति तथा
देहस्य भर्ता च भवति तथा देहप्रवृत्तिजनितसुखदुःखयोर्भो
क्ता च भवति एवं देहनियमनेन देहभरणेन देहस्य शेषित्वेन

श्री॰
गी॰ टी॰
३

136

चदेहेंद्रियमनोसि प्रतिमहेश्वरो भवति तथा च वक्ष्यते शरीरं य
दवाप्नोति यच्चाप्युत्क्रामतीश्वरः गृहीत्वैतानि संयाति वायुर्गंधानि
वाशयादिति अस्मिं देहेंद्रियमनोसि प्रति परमात्मेति चाप्युक्तः
देहे मनसि चात्मशब्दो नेतरमेव प्रयुज्यते ध्यानेनात्मनि पश्यंति
केचिदात्मानम[illegible]मात्मनेति अपिशब्दान्महेश्वर इति चोक्त इति
गम्यते पुरुषः परः अनादिमत्परमित्यादिनोक्तापरिच्छिन्नज्ञान
शक्तिरयं पुरुषोनादिप्रकृतिसंबंधकृतगुणसंगादेतद्देहमात्रः
महेश्वरो देहमात्रपरमात्मा च भवति २२ ॥

अभिनवगुप्तकृतटीका ९

स्पष्टार्थम् २२ ॥

परमार्थप्रपाटीका ७

तेन तेन प्रकारेण प्रकृतिविवेकात्पुरुषः संसारः न तत्स्वरू
पत इत्याशयेनाह उपद्रष्टेति अस्मिन् प्रकृतिकार्ये देहे वर्त
मानोपि पुरुषः परः भिन्न एव न तद्गुणैर्युज्यत इत्यर्थः तथा अ
नुमंता अनुमोदितैव सन्निधिमात्रेण ग्राहकः तथा पोषणेन
रूपेण भर्ता विदारक इति चोक्तः भोक्ता पालक इति च अत्र
श्रुतनपथीश्रुतिः अदृष्टो द्रष्टा श्रुतः श्रोता मतो मंता विज्ञा
तो विज्ञाता नान्योतोस्ति द्रष्टा नान्योतोस्ति श्रोता नान्योतोस्ति मंता
नान्योतोस्ति विज्ञातैष त आत्मांतर्याम्यमृतोतोन्यदार्तमिति
भाष्यं अदृष्टो दर्शनायोग्यः स तु द्रष्टा विश्वसाक्षी एवं सर्वत्र
तदपेक्षया अन्यो द्रष्टा नास्ति नापि श्रोता मंता विज्ञाता एष एवं वि
ध एष ते अंतर्यामी आत्मा अमृतो नित्यमुक्तः अत आत्मनः सकाशा
दन्यदार्तं अन्यदात्मनो विलक्षणं दृश्यजातमार्तं बाधितं शुक्ति
कारजतवदित्यर्थः किंभूतो महेश्वरः ब्रह्मादीनामधिपतिः
परम आत्मा अंतर्यामी चोक्तः श्रुतिरपि एष भूताधिपतिरेष लो
केश्वर एष लोकपाल इति
लोकपालो भर्ता २२ ॥

वनमालीटीका ८ अत्रोधिपतिराश्रयः ईश्वरो नियंता

ननु जीवस्य देहसंबंधे गुणसंगो निमित्तमात्रे जडत्वादस्वतंत्र
त्वात् स्वतंत्रे किं कारणमित्यपेक्षायां स्वतंत्रे कारणं परमेवद

मेवयनस्त्रयदितिश्रुतिज्ञानमीशस्यप्रेरकत्वंचोपपादयति उ॰
पद्रष्टेतिअनुमंतत्वं । सर्वप्रेरकत्वंसाध्यंउपद्रष्टेत्यादिसर्वे
नत्रहेतुः अनुमंताप्रेरकःसर्वेषामुपरिस्थितोद्रष्टाउपद्रष्टाभ
र्तासर्वस्यधारकःभोक्तापालकःप्रसादःफलस्य भोक्ताच महे
श्वरोचिंत्यशक्तिःपरमात्मातिशयेनव्यापकःइत्यनेनतस्यगुणाः
सर्वचेतनोत्तमस्य अत्रःपुरुषःपरःअनुमंताहेवप्रेरकइत्युप
मीनतयानिर्देशोपि अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवचेत्यु
क्तःदेवत्तेचापिमोविदीत्याप्युक्तइत्याह मेवानुमंतेतिसिध्यतेएव

उत्तमवैजयन्तीटीका ९

एवंदेहेभोक्तृतयावस्थितंजीवेतिरूपेणजीवेनियंतृतयातस्य
नत्रस्थितिमाहउपद्रष्टेति अस्मिन्देहेवस्थितोयंपुरुषोजीवात्मा
स्वदेहस्यस्वभावानुसारसंकल्पादिरूपेणोपद्रष्टाभवतितथैवा
नुमंतास्यस्वरूपस्वभावादेसीता यद्वा अनुमंतानुमतिप्रदाता
तदनुमतिंविनादेहःकिंचिदपिकर्तुंनसमोभवतीत्यर्थः च
नःभर्तास्यधारकःपालकश्चतथाभोक्तास्पर्शीनोस्यसुखदुःखा
दिकमेवभुंक्तेइत्यर्थःतथामहेश्वरोस्यनियंतास्वामीवशीरीत्य
द्वासोतियच्चाप्युत्क्रामतीश्वरःगृहीत्वैतानिसंयातिवाय्वर्गंधानि
वाशयादितिवक्ष्यतेतथापरमात्मेतिचाप्युक्तःदेहोपतस्यात्मश
ब्देनोच्यतेध्यानेनात्मनिपश्यंतिकेचिदात्मानमात्मनेत्यनेनतस्मे
ववक्ष्यते अयंचदेहेंद्रियप्राणमनोभिस्ततिपरमात्मापरमोदे
हादिभ्यउत्कृष्टश्चात्मात्वेनव्यापनस्वभावःसचासौसचतथाप्
वंभूतोपिपुरुषोऽनादिप्रकृतिसंबंधनयातद्गुणेनबद्धोभवती
त्यर्थःकेचित्तस्यश्लोकस्य पूर्वेणव्याख्यानंकृतंतदसंगतम्
पुंप्रकृत्योःप्रकरणत्वात्प्रकृतिपुरुषयोरेवकार्यकारणकर्तृ
त्वेपुरुषःप्रकृतिस्थोहीत्यादीनामसंगतेः यएवंवेत्तिपुरुषंध्या
नं॰ नेनात्मनीत्यादीनांवक्ष्यमाणश्लोकानांविरोधाच्च २२ ॥

+ तदेवंप्रकृतिमिथ्यात्मतादात्म्यात्पुरुषस्यसंसारोनस्वरूपेणेत्युक्तंकीदृशंपुनस्तस्यस्वरूपंयत्रनसंभवतिसंसारइत्याकांक्षायांतस्यस्वरूपंसाक्षान्निर्दिशन्नाह॥

मधुसूदनी टीका ९

+ अस्मिन्प्रकृतिपरिणामेदेहेजीवरूपेणवर्तमानोपिपुरुषःपरः

श्री॰
गी॰टी॰
त्र॰

137

प्रकृतिगुणासंस्पृष्टः परमार्थतः असंसारी तेन रूपेणोपद्रष्टा:
यतउपद्रष्टा [illegible] यथा ऋत्विक्‌यजमानेषुयज्ञ
कर्मव्यापृतेषुतत्समीपस्थोऽन्यःस्वयमव्यापृतोयज्ञविद्याकुशलः
ऋत्विग्यजमानव्यापारगुणदोषा[णा]णामीक्षिता तद्वत्कार्यकार
णव्यापारेषुस्वयमव्यापृतोविलक्षणस्तेषांकार्यकरणानांसव्या
पाराणांसमीपस्थोद्रष्टा नतुकर्तापुरुषः सयज्ञत्रकिंचिसृष्प
त्यननन्वागतस्तेनभवत्यसंगोह्ययंपुरुषइतिश्रुतेः अथवादेह
चक्षुर्मनोबुद्ध्यात्मसुद्रष्टृषुमध्येवाह्यान्देहादीनपेक्ष्य [illegible] व्यव
हितोद्रष्टात्मापुरुषउपद्रष्टा उपशब्दस्यसमीपार्थत्वात्तस्यचा
व्यवधानरूपस्यअन्यगात्मन्येवपर्यवसानात् अनुमंताचकार्य
कारणप्रवृत्तिषुस्वयमप्रवृत्तोपिप्रवृत्तइवसन्निधिमात्रेणतद
नुकूलत्वादनुमंता अथवा स्वव्यापारेषुप्रवृत्तान्देहेंद्रियादी
न्ननिवारयति कदाचिदपितत्साक्षिभूतःपुरुषइत्यनुमंतासा
क्षीचेतेतिश्रुतेः भर्तादेहेंद्रियमनोबुद्धीनांसंहतानांचैतन्या
भासविशिष्टानांस्वसत्तयास्फुरणेनचधारयितापोषयिताचभो
क्ताबुद्धेःसुखदुःखमोहात्मकान्प्रत्ययान् [illegible] स्वरूपचैतन्येनप्रका
शयतीतिनिर्विकारएवोपलब्धा महेश्वरःसर्वात्मत्वात्स्वतं
त्रत्वाच्चमहानीश्वरश्चेतिमहेश्वरःपरमात्मादेहादिबुद्ध्यंतानां
मविद्ययात्मत्वेनकल्पितानांपरमःप्रकृष्टःउपद्रष्टृत्वादिसर्वोक्त
विशेषणविशिष्टआत्मापरमात्माइतिचानेनशब्देनाप्युक्तःक
थितःश्रुतौ चकारादुपद्रष्टेत्यादिशब्दैरपिसएवपुरुषःपरउ
त्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतइत्यग्रेपिवक्ष्यते [illegible]

[illegible] २२ ॥

सदानंदी टीका ॥

तदेवंप्रकृतिस्थस्यमिथ्यातादात्म्यतोनया पुरुषस्यासक्तिसंसा
रोनस्वतस्तेषुशरीरिते १ कीदृशोपुरुषस्यासक्तिस्वरूपंयत्रसंसृतिः
स्वतोनास्तीत्यपेक्षायांपुरुषस्याहयस्यायत् २ याद्दशोरूपमेत

स्यहेत्रज्ञस्यमतेनतथा साक्षात्स्वेवपुनस्तस्यनिर्देशः क्रियतेपुना
प्रस्मिन्नाविपकेदेहे वर्तमानोपिपुरुषः परोदेहाद्यसंस्पृष्टोसं
सारीवस्तुतःस्वतः यस्मादयमुपद्रष्टासम्यक्साक्षात्तेःपरः य
थार्त्विग्यजमानेषुव्याप्टतेषुस्वकर्मणि ५ अव्याप्टतस्तटस्थो
सोपज्ञविद्याविशारदः ईक्षितागुणदोषाणांस्वविगादेस्वकर्म
णः ८ तथादेहेंद्रियादीनांव्यापारेषुविलक्षणः स्वयमव्याप्टत
स्तेषांव्यापाराणांसमीपगः ७ इष्टेवनतुकर्तासौसाक्षित्वेना
प्यविक्रियः द्रष्टारोवात्यवस्तूनांदेहवज्रमेनोपियः ८ तेषा
मभ्यंतरोद्रष्टोपद्रष्टाप्रत्यगीतिगः अव्यवधानरूपस्यापद्रष्टा
पस्यविहृतेन प्रत्यगात्माहृयेपर्यवसानादितिवार्थतः देहेंद्रि
यादिवेष्टास्वयमव्याप्टतोपिसन् ९ प्रहत्तइवसांनिध्यादन
मंतावभासते यहादेहेंद्रियादीन्स्वप्रवृत्तिजनकर्मसु १० नवा
रयतियःसाक्षीसोनुमंतेत्युदीरितः संघातस्यशरीरादेर्धिदाभा
सान्वितस्ययः १२ स्वसत्तास्फूर्तिदानेनपोषकोधारकस्तथा स
भर्तानिर्विकारोपिसर्वापिणानभावतः १३ स्वचैतन्येनसर्वान्धी
प्रत्ययांस्त्रिगुणात्मकान् भासयन्नुपलब्धोक्तोभोक्तानैवतिवि
क्रियो १४ सर्वात्मत्वात्स्वतेनत्रब्रह्मादीनांसहेश्वरः देहादि
षणांनातोकस्मिनानामविद्यया १५ आत्मत्वेनरहीतानांप्रक
ष्टात्मांतरोतरः इक्षैर्विशेषणैरीशुक्तःपरमात्मेतिशास्त्रितः १६
सएवपुरुषःसाक्षादसंसारीस्वरूपतः क्षेत्रज्ञोनित्यमुक्तोपि
भ्रांत्यासंसारितांगतः १७ वक्ततोमतस्वरूपासौक्षेत्रज्ञःपुरुषो
त्तमः सएवात्मापरब्रह्मदेहेस्मिन्पुरुषःस्मृतः १८ परमात्मा
द्वयानंदोमायोपाधिविवर्जितः प्रत्यगात्मतयाप्रोक्तःसाक्षी
सर्वांतरःपरः १९ देहेंद्रियमनोबुद्ध्यादिभ्योयस्तुविविक्तः क्षे
त्रज्ञःपुरुषःसाक्षीसोद्वयानंदलक्षणः २० प्रत्यगात्माद्वयानं
दःप्रत्यग्रूपोद्वयात्मकः नानयोर्विद्यतेभेदोविनोपाधीमनाग
पि २१ उपाध्योर्विनिवृत्तिस्तुवल्मीकाप्ययाभवेत् ऐक्यधी
हेतरेवात्रवक्ष्याहहरिणोदितः २२ ॥ २२ ॥

श्री·
गी· टी·
त्र·

138

सचयोयत्प्रभावश्चेतिक्षेत्रज्ञतत्स्वभावौव्याख्येयत्वेनप्रतिज्ञातौ
तत्रक्षेत्रज्ञःप्रागेववर्णितःतस्येदानींप्रभावमाह उपद्रष्टेति न
त्वह्मैवगुणसंगोजन्मकारणमित्युक्तं तत्रसंगश्चतुर्विधः प्रकृत्या
पलापेनगुणमात्रप्राधान्येनवातमंतर्भाव्यगुणप्राधान्येनवागु
णानांसमप्राधान्येनवास्वप्राधान्येनवेति तत्राद्येदेहेंद्रियमन
आदिरूपंगुणसंघातमेवआत्मत्वेनपश्यन्भोक्ताभवति यथा
चार्वाकादिः द्वितीयेगुणानांप्राधान्यादात्मनिवास्तवकर्तृत्वाद्य
भिमानेनकर्मफलानांभर्तासंचेताभवति यथातार्किकादिः तृ
तीयेगुणानांसमप्राधान्येनगुणगानमपिभोक्तृत्वमसंगत्वमात्म
निवस्तुभल्लातकोकवदनुमन्यतेयथासांख्यः चतुर्थेसर्वथा
पिगुणधर्माणामात्मनिसंक्रममपश्यन्नुदासीनबोधरूपत्वे
नगुणप्रचारदर्शीउपद्रष्टाभवतियथाअस्माकंसाक्षी एतेषुच
तुर्ष्वपिगुणसंगीष्वपद्रष्टोत्तमः अनुमंतामध्यमः भर्ताअध
मः भोक्ताअधमाधमः सएवगुणानवशीकृत्यपराक्रीडतितत
दामहेश्वरइत्युच्यते यःसर्गस्थित्यंतकर्ताप्रभुर्जगदंतर्यामीसए
वगुणानपहायस्थितःपरमात्मेतिचाप्युक्तोभवति यथाउपद्रष्टा
पिगुणानपहायतत्साक्षित्वेनस्थितोभवतितथापितस्यैवसंघा
तोपहितस्यसंघातांतरप्रचारदर्शित्वाभावादयंसकलसंघात
प्रचारदर्शीतिसर्वोत्कृष्टत्वात्परमोऽयमात्मा तमेनंवक्ष्यति उत्त
मःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतः योलोकत्रयमाविश्यबि
भर्त्यव्ययईश्वरइतिएतावपिगुणासंगिनौ एवमेकएवदेहेऽस्मि
न्वियमानःपरोगुणातीतःस्वात्मनिगुणानांविलापात्स्थितोऽद्व
ैकरसआत्मागुणसंगेनषड्विधोभवति अयमेवास्यप्रभावः
तत्रअनुमंतृभर्तृभोक्तृभिस्त्रिभीरूपैरयंबध्यते उपद्रष्टृमहे
श्वरपरमात्मरूपैस्तुनित्यमुक्तएकएवेतिज्ञेयं अत्रभाष्याद्यो
प्यनुसंधेयोविस्तरभयात्तन्नप्रदर्शितः २२ ॥

+ यदास्य प्रकृतिपरतंत्रता न भवेत्तदा स्वरूपं प्राप्नोतीत्याह ॥

आनंदीटीका १३

+ अस्मिन्नेव देहे परः प्रकृतेः पृथग्भूतः पुरुषः उपद्रष्टा साक्षि
वत्प्रकृतिगुणैरलिप्तः अनुमन्तान्तर्यामितयानुमन्ता च जग
तां प्रेरयिता बिभर्ति धारयिता पोषयिता च भोक्ता तत्तत्कर्मा
नुभवन् महान् व्यापकः ईश्वरः प्रवृत्तिनिवृत्तिषु समर्थः पर
मात्मेति चाप्युक्तः बंधनान्मुक्तः परमात्मैव योगिभिः प्रोक्तः
अथवास्मिन्देहे पुरुषः परः परमेश्वरः उपद्रष्टा क्षेत्रज्ञकृता
नां कर्मणामुपद्रष्टानुमन्ता तत्कर्मफलप्रापक इत्यादि स्वगमो
र्थः २२ ॥

+ यतः परतत्त्वस्य देहेस्मिन्नानापुरुषसंबं
धिनि द्विधा स्थितिरित्याह ॥

रामकंठी टीका १४

+ महेश्वरः सर्वपुरुषैश्वर्यापेक्षया महान् स्वतंत्रः ईश्वरः प्रभुः
परब्रह्मशब्दाः पर्यायाः स्वमायोज्जीवितपुरुषव्यपेक्षया देहे
स्मिन्नुपद्रष्टा भर्तानुमन्ता भोक्ता चेति व्यवस्थितो यतः प्रकृत्या
दिमहदहंकारात्मना द्रश्यत्वेनोपस्थापितमर्थं पुरुषः पश्य
तीत्युपद्रष्टासावभिधीयते तथा द्रष्टृत्वमेव शरीराद्यहंतया परा
मृशन्भर्ता कार्यकारणस्याहंतया धारकः स एव व्यपदिश्यते त
थ्या प्रकृत्या समर्पितान्वेद्यत्वेन प्रतिपन्नसुखादिविषयभूतं वस्तु
दृष्टतः पुरुषो मन्यत इत्यनुमन्ता स उच्यते ततश्चात्रस्यैव भोक्तृ
त्वव्यपदेशः इत्थं सांख्यप्रक्रियया पुरुषस्य शरीरित्वविषयि
त्वारोपो य उच्यते तत्र विवेकाभावः कारणं स च मायानिबं
धनः यदा तु विद्योदयविवेकजस्तानाविर्भावस्तदासावेव पु
रुषः परमात्मेत्यभिधीयते एवं च तो यथोक्तो द्वयविदेकस्व
भावब्रह्मस्वरूपतयोच्यते
२२ ॥

लाक्षिकी टीका १५ ॥

ननु प्रकृतितादात्म्यमापन्नस्य पुरुषस्य तेषु भूतसंतानस्य वर्तमानत्वत
स्यैव भोक्तृत्वं सदा दृश्यते निजन्मवत् तर्हि ततो व्यतिरेकानुपपत्तेरनिर्मोक्ष
प्रसक्तिरित्याशंक्याह ॥

१३ श्री
गी०टी०

अस्मिन्प्रकृतिकार्ये देहे वर्तमानोपि पुरुषः उपद्रष्टा इंद्रियद्वारा उप
लब्धा अन्तःकरणद्वारानुमन्ता विसृष्टा प्राणद्वारा भर्ता देहादेर्धा
रकः बुद्धिद्वारा सुखदुःखादेर्भोक्ता एवमीदृशः सन्नपि परो दे
हादेर्भिन्न एवोक्तः यतो महेश्वरः स्वातंत्र्यमपरिच्छिन्नश्च परमात्मा प

ल० १

रमो [illegible]ष्टो निरवधिरात्मा यमेव यथा लौकिके ईश्वरः स्वेच्छयाव
यमनुपगच्छन्नस्वातंत्र्येणैव मोचयति न हन्ति अतो नास्ति मोक्षप

139

सक्तिः [illegible] २२

पंचोलेटीका

इदानीं प्रकृतिविवेकादेव पुरुषस्य संसारः न तु स्वरूपेणेत्याश
येन तस्य स्वरूपमाह उपद्रष्टेति अस्मिन्देहे प्रवर्तमानः परः पुरुषः देहे
न्द्रियव्यापाराणां साक्षी उपद्रष्टा देहेन्द्रियादीनि स्वव्यापारेषु वर्तमाना
नि न निवारयति स्वयं प्रवर्तमानेष्वपि प्रहृष्ट इव दर्शयतीति तेनानुमन्ता
देहादीनामात्माधीनानां स्थितिं तेन भर्ता अन्तःकरणप्रविष्टः सुखदुः
खाद्युपभवति अतो भोक्ता सर्वात्मत्वात् महेश्वरः सर्वान्तर्यामी आ
त्मा परमात्मेत्युक्तः २२

रसावीरसमिद्धोधिनी

तदेवं पुरुषस्य प्रकृतेः स्वात्मत्वाभिमानात्संसारो न स्वरूपत इत्यभि
प्रायेणास्य स्वरूपमाह उपद्रष्टेति अस्मिन्हि देहे प्राकृते जीवस्व
रूपेण वर्तमानोपि पुरुषः प्रकृतिगुणैर्न संस्पृश्यते तत्र हेतुः यतः
स उपद्रष्टा उपसमीपे स्थितत्वाद्द्रष्टा सर्वव्यापारसाक्षीत्यर्थः त
था यथा ऋत्विग्यजमानानां यज्ञकर्मव्यापृतानां समविधस्थोन्यः कर्म
कुशलो निर्व्यापारस्तद्दोषाणामीक्षिता एवं कार्यकारणव्यापाराणां
समीपस्थः स्वयमव्यापारस्तद्विलक्षणः पुरुषो द्रष्टा न तु कर्ता तथा
नुमन्तानुमोदितेव सन्निधिमात्रेणानुग्राहकस्तथा भर्ता देहेन्द्रिय
मनोबुद्धीनां चैतन्याभासविशिष्टानां स्वसत्तया स्फुरणेन च पोष
यितेत्यर्थः भोक्ता पालकश्चेति च महेश्वरः सर्वात्मकत्वात्स्वतन्त्रत्वा

श्च परमात्मांतर्यामीत्यादिभिः शब्दैरात्मा कथितएवंप्रकृतिपुरुष
विवेकज्ञानिनं स्तौति यएवमिति २२॥

मधुभाष्य

उपद्रष्टेति अनुमंता अन्वनविशेषतो निरूपकः पुरुषःसर्व
दुःखानामिति जीवउक्तः पुरुषप्रकृतिमिति जीवेशयोःसदैवो
च्यते अन्यत्रमहत्तात्पर्यविरोधः उत्कर्षेहिमहत्तात्पर्यं तथा
हिसौकरायत्र श्रुतिः अवाप्योत्कर्षमहत्त्वात्सर्ववाच्यं सर्व
न्यायानांचमहत्त्वात्तत्परत्वं विलोरनंतरस्यतत्त्वापियस्यैवन
वात्तत्वशंका अतोविरुद्धं तुयदत्रमानं तदत्तनादावथवापि
युक्तिः नतत्रमानंकवयोवदंति नचापियुक्तिंनमतिर्दृढ
ष्टेरिति अतोयुक्तिभिरप्येतदपलापोनयुक्तः अतोयथाउ
त्मनः विषमानवादिकल्पयतिसाप्याभासरूपेति सदेवमा
हात्म्यं वेदैरुच्यतइतिसिध्यति अवांतरवचनतात्पर्यंतत्राक्लि
उक्तंवत्तैव अवांतरंवतात्पर्यंचसर्वमहद्वाप्येकवाक्यत
योरनंतइति यथामत्वाद्यभिधानाच्च युक्तंचपुरुषमतिक
त्वितपुत्रादेराभासत्वं अज्ञानसंभवात् नतुस्वतःप्रमाण
स्यवेदस्याभासत्वं अवधीनंचसंभवत्येवपुंसांबहूनामप्य
ज्ञानात् नह्यस्मदधीतश्रुत्यादौविपर्ययोपिस्यादितिनवाच्यं
यनस्त्वैवाह नैनहिकश्चावाचोनेनहिकश्चिदुक्तइतिहप्रजा
पतिरुवाचेति नहिकश्चिज्जीवस्यसात्म्यं आभासएवेतिवो
क्तं जनमेजयउवाच बहवःपुरुषाब्रह्मन्नुताहोएकएवतु कोस
त्रपुरुषः श्रेष्ठस्तंभवान्वक्तुमर्हति वैशंपायनउवाच॥
नैतदिच्छंतिपुरुषमेकंकुरुकुलोद्वह बहूनांपुरुषाणांच
यथैकायोनिरुच्यते तथातंपुरुषंविश्वमाख्यास्यामि

उत्माधिकमिति मोक्षधर्मे नचैतत्सर्वं स्वप्नेंद्रियजालवत् वै
यर्थ्यं नस्वप्नादिवदिति भगवद्वचनं नचस्वप्नादिवदेकजीव
कल्पितत्वेमानंप्रमाणाभावः विपर्ययं च माहात्म्यद्वितीये उक्तं च
यास्यप्रमाणवाक्या स्वप्नोद्भवाश्रयं वंचलत्वान्नवस्वप्नो नहि विच्छे
दयतदितीति नायं दोषः नहीश्वरस्य जीवैक्यमुच्यते जीवस्य
हीश्वरस्यैकांशेतदपि न निरुपाधिके अनेन प्रतिबिंबत्वाविरो
धेक्यं तथाचमाधुच्छंदश्रुतिः एको वा तिष्ठति बिंबेन विलोजी
वस्येतद्रूपयोर्वदंतीति अहंग्रहोपासनेचफलाधिकमात्रि
वेमप्रश्रुतिसिद्धं अहंग्रहोपासकस्य स्वसाम्यमभ्याशोद्भवा
स्मृते नात्र शंकेति तदीयोहमितिज्ञानमहंग्रह इतीरितइति
वामने तद्रूपत्वात्तत्सोस्मीति भृत्यैवेव नतत्त्वतइतिच प्राति
बिंबेन सोस्मि भृत्यस्येति भावना तथा सायास्य प्रमाणवाक्यं
मत्स्युस्यादंप्रातिबिंबेन सोस्मीत्येवमुपास्यः परमः पुमानस्म
इति प्रातिबिंबं च तत्साम्यमेव मोक्षेन वेदोक्तभगवत्स्वरूप
ज्ञानेन कस्मिंश्चिदपि श्रुत्वा ज्ञात्वा ध्यात्वा दृष्टिः श्रावकाणां
चज्ञात्वाध्यात्वा सांख्यानां च ध्यात्वा तथा च गोपवनश्रुतिः
कर्मिष्ठत्वापि तच्छ्रुत्वा ज्ञात्वा ध्यात्वानुपपद्यते श्रावकोपित
थाज्ञात्वाध्यात्वाज्ञोन्यपि पद्यते अन्यथा तस्य दृष्टिर्हि कथं
विन्नोपजायत इति अन्यत्र त्यप्राप्तानामप्युपायदर्शनम्
पुनस्तत्प्रकृतिपुरुषेश्वरस्वरूपसाम्याय मंत्रुतमाह २२ ॥

उक्त रीतिसे प्रकृति जो माया तिसके अविवेक दशाने जीवको य हे कर्त्ता अहं भोक्ता इत्यादि कल्पित मात्र संसार है पर विचारस्व रूप से तो इस जीवको संसार नहीं है इसी आशापर अब पुरुष का स्वरूप कहते हैं कि इस प्रकृति का कार्यरूप जो शरीर ति स मे वर्त्तमान होके भी जीव प्रकृति से भिन्न कहे प्रकृति के गुणों से युक्त नहीं उनसे अलग है क्योंकि ईश्वर अंश जीव उप द्रष्टा अर्थात् भिन्नरूपसे समीपमे रह कर देखनेवाला साक्षी मात्र है और अनुमन्ता अर्थात् समीप सम्बन्धसे अनुग्राहक कहे अनु मोदन कर्त्ता माननेवाला है सोई श्रुति कहती हैं कि एक स्वयं प्रकाशरूप जो परमात्मा सो भूत मात्रमे निगूढ भा वसे स्थित है और सर्वव्यापी तावत प्राणी का अन्तर्यामी है औ र सकल कर्म का नियन्ता औ भूतमात्रका अधिष्ठानरूप और द्रष्टा औ समस्त भूतोंका चैतन्यकारी औ अद्वितीय तथा गुणों से अतीत कहे अलग है और यह पुरुष ईश्वर सम्बन्ध रूपसे भर्ता कहे पोषनकारी प्रतिपालक है और महेश्वर कहे ब्रह्मा दिकों का भी अधिपति अर्थात् स्वामी है सोई श्रुति है कि यह पुरुष सबका ईश्वर और सर्व भूतका अधिपति तथा भूतमा त्र का प्रतिपालक है २२ ॥

दोहा

उपद्रष्टा अनुमंता है भर्त्ता भोक्त महेश। यह परमात्मा हि कहा पुरुष देहपर वेश २२ ॥

160

7

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह सर्व
था वर्त्तमानोपि न स भूयोभिजायते २३

शांकरभाष्य टीका ।

य एवमिति य एवं यथोक्तप्रकारेण वेत्ति पुरुषं साक्षादहंभा
वेनायमहमिति प्रकृतिं च यथोक्तामविद्यालक्षणां गुणैः स्व
विकारैः सह निवर्त्तितामभावमापादितां विद्यया सर्वथा सर्व
प्रकारेण वर्त्तमानोपि स भूयः पुनः पतितेऽस्मिन् विद्वच्छरीरे
देहान्तराय नाभिजायते नोत्पद्यते देहान्तरं न गृह्णातीत्यर्थः अ
पिशब्दात् किमु वक्तव्यं स्ववृत्तस्थो न जायत इत्यभिप्रायः ननु
यद्यपि ज्ञानोत्पत्त्यनन्तरं पुनर्जन्माभाव उक्तस्तथापि प्राक् ज्ञा
नोत्पत्तेः कृतानां कर्म्मणामुत्तरकालभाविनां च यानि चातिक्रा
न्तानेकजन्मकृतानि तेषां फलमदत्त्वा नाशो न युक्त इति स्यु
स्त्रीणि जन्मानि कृतविप्रणाशो हि न युक्त इति यथा फले प्रवृ
त्तानामारब्धजन्मनां कर्म्मणां न च कर्म्मणां विशेषोऽवगम्यते
तस्मात् त्रिप्रकाराण्यपि कर्म्माणि त्रीणि जन्मान्यारभेरन् संह
तानि वा सर्व्वाण्येकं जन्मारभेरन् अन्यथा कृतविनाशे सति स
र्व्वत्रानाश्वासप्रसङ्गः शास्त्रानर्थक्यं च स्यादित्यत इदमयुक्तमुक्तं
न स भूयोभिजायत इति न क्षीयन्ते चास्य कर्म्माणि ब्रह्मवेद ब्र
ह्मैव भवति तस्य तावदेव चिरमिषीकातूलवत् सर्व्वकर्म्माणि
प्रदूयन्ते इत्यादिश्रुतिशतेभ्य उक्तो विदुषः सर्व्वकर्म्मदाहः इहा
पि चोक्तो यथैधांसीत्यादिना सर्व्वकर्म्मदाहो वक्ष्यति चोपपत्तेश्चा
विद्याकामक्लेशबीजनिमित्तानि हि कर्म्माणि फलारम्भकाणि
जन्मान्तराङ्कुरमारभन्ते इहापि च साहंकाराभिसन्धीनि कर्म्मा
णि फलारम्भकाणि नेतराणीति तत्र तत्र भगवतोक्तं बीजा
न्यग्न्युपदग्धानि न रोहन्ति यथा पुनः ज्ञानदग्धैस्तथा क्लेशै
र्नात्मा सम्पद्यते पुनरिति अस्तु तावत् ज्ञानोत्पत्त्युत्तरकालकृ
तानां कर्म्मणां ज्ञानेन दाहो ज्ञानसहभावित्वात् न त्विह जन्मनि

ज्ञानोत्पत्तेः प्राक् कृतानां ज्ञानेन दाहो न त्वतीतानामनेकजन्मान्त
रकृतानां दाहोयुक्तः न सर्वकर्म्मणामिति विशेषणात् ज्ञानोत्तरका
लभाविनामेव सर्वकर्म्मणामिति चेन्न संकोचने कारणानुपप
त्तेः यत्तूक्तं यथा वर्त्तमानशरीरजन्मारम्भकाणि कर्म्माणि न क्षी
यन्ते फलदानाय प्रवृत्तान्येव सत्यपि ज्ञाने तथा अनारब्धफला
नामपि कर्म्मणां क्षयो न युक्तइति तदसत् कथं तेषां मुक्तेषुव
त् प्रवृत्तफलत्वात् यथाहिपूर्वं लक्ष्यवेधाय मुक्तइषुर्धनुषोल
क्ष्यवेधोत्तरकालमपि आरब्धवेगक्षयात् पतनेनैव निवर्त्तते
एवं शरीरारम्भकं कर्म्म शरीरस्थितिप्रयोजने निवृत्ते प्यासंस्का
रवेगक्षयात् पूर्व्ववद्वर्त्ततएव यथा सएवेषुः प्रवृत्तिनिमित्ता
नारब्धवेगस्त्वमुक्तोधनुषि प्रयुक्तोप्युपसंह्रियते तथानारब्ध
फलानि कर्म्माणि स्वाश्रयस्थान्येव ज्ञानेन निर्बीजीक्रियन्तइ
ति पतितेस्मिन् विद्वच्छरीरे न सभूयोभिजायतइति युक्तमेवो
क्तमिति सिद्धं २३ ॥

आनंदगिरिकृतटीका २

यथोक्तेन प्रकारेण जीवेश्वरादिसर्वकल्पनाधिष्ठानत्वेनमर्थः
साक्षादपरोक्षत्वेवेति यावत् यथोक्तामनात्मनिर्धीच्यासर्वान
र्थोपाधिभूतामित्यर्थः विद्यया आत्मैकत्वगोचरया प्रकृति
मविद्यारूपां सकार्यामभावमापादितां योवेत्तीति सम्बन्धः
सर्वप्रकारेण विहितेन निषिद्धेन चेत्यर्थः पुनर्नकारोन्वया
र्थः निपातस्तु वर्त्तिते न्यायमाह अपीति नसभूयोभिजायतइत्युक्त
मात्तिपति नन्विति ज्ञानोत्पत्त्यनन्तरं जन्माभावस्योक्तत्वात् पु
नर्देहारम्भमुपेत्य नाक्षेपः स्यादित्याशंक्याह यद्यपीति तथापि
स्युस्त्रीणि जन्मानीति सम्बन्धः वर्त्तमाने देहे ज्ञानात् पूर्वोत्तर
कालीनानां कर्म्मणां फलमदत्वा नाशायोगाज्जन्मत्रयमावश्य
कमतीतानेकदेहेष्वपि कृतकर्म्मणां नाभुक्तं क्षीयते कर्मेति
स्मृतेः अदत्वा फलमनाशादस्ति तृतीयमपि जन्मेत्याह प्रागिति
फलदानमविनापि कर्म्मनाशे दोषमाह कृतेति नयुक्तइतिक

त्वा फलमदत्वा कर्मनाशो नेति शेषः विमतानि कर्माणि
फलमदत्वा न क्षीयन्ते वैदिककर्मत्वादारब्धकर्मवदिति म
त्वाह यथेति नाशेन ज्ञानादिति शेषः नन्वनारब्धकर्मणां
ज्ञानान्नाशोऽयुक्तोऽप्रहतफलत्वादारब्धकर्मणान्तु प्रहत
फलत्वेन बलवत्त्वान्न ज्ञानात् नन्विहतिर्नेत्याह नचेति प्रा
ज्ञानेऽस्यत्वेन ज्ञानविरोधित्वाविशेषात् प्रहताप्रहतफलत्व
मनुपयुक्तमिति भावः कर्मणां फलमदत्वा नाशाभावे फलि
तमाह तस्मादिति ननु कर्मणां बहुत्वात् तत्फलेषु जन्मसु
क्रमस्थितमारब्धकर्मणां त्रिःप्रकारत्वादिति चेत्तानारब्धत्वेने
कप्रकारत्वसम्भवात् तत्राह संहतानीति नास्ति ज्ञानस्यैका
न्तिकफलत्वमिति शेषः उक्तकर्मणां जन्मनारम्भकत्वे प्राप्तं
दोषमनुभाष्य तस्यातिप्रसञ्जकत्वमाह प्रत्यक्षेति सर्वत्रेत्यार॰
ब्धकर्मस्वपीति यावत् फलजनकत्वानिश्चयोः नाशवासः कर्म
णां जन्मनारम्भकत्वे कर्मकाण्डानर्थक्यं दोषान्तरमाह शास्त्रेति
प्रनारब्धकर्मणां सत्यपि ज्ञाने जन्मान्तरारम्भकत्वप्रोक्ते फलि
तमाह इत्यत इति शुभत्वसम्भवेन परिहरति नेत्यादिना ज्ञानाद
नारब्धकर्मदाहे भगवतोऽपि सम्मतिमाह इहापीति ज्ञानाधीन
सर्वकर्मदाहे सर्वधर्मान् परित्यज्येति वाक्यशेषोऽपि प्रमाणी
भवतीत्याह वक्ष्यति चेति ज्ञानादनारब्धाशेषकर्मक्षये युक्तिर
पि वक्तुं शक्येत्याह उपपत्तेश्चेति तामेव विवृणोति अविद्येति
प्रज्ञस्याविद्यास्मितारागद्वेषाभिनिवेशाख्यक्लेशात्मकानि सं॰
वीनर्थबीजानि तानि निमित्तीकृत्य यानि धर्माधर्मकर्माणि
तानि जन्मान्तरारम्भकाणि यानि विदुषो विद्यादग्धक्लेशबीज
स्य प्रतीतिमात्रशरीराणि कर्माणि तानि शरीरारम्भकाणि
दग्धपटवदर्थक्रियासामर्थ्याभावादित्यर्थः प्रतीतिमात्रदेहा
नां कर्माभासानां न फलारम्भकतेत्यस्मिन्नर्थे भगवतोऽपि
सम्मतिमाह इहापीति तत्त्वज्ञाना हर्षे मानीतिकक्षे शानां क
र्महारा देहानारम्भकत्वे वाक्यान्तरमपि प्रमाणयति बीजा॰

नीति ज्ञानानन्तरभाविकर्मणो ज्ञानेन दाहमङ्गीकरोति ग्रसि
ति विरोधिग्रस्तानामेवोत्पत्तेरिति हेतुमाह ज्ञानेति अस्मिन्
जन्मनि जन्मान्तरे वा ज्ञानात् पूर्वभाविकर्मणो न ततो दाहो वि
रोधिनं विनाग्रहणेरित्याह नत्विति श्रुतिस्मृतिविरोधान्नैवमि
ति परिहरति नेत्यादिना सर्वशब्दश्रुतेः संकोचं शंकते ज्ञा
नेति प्रकरणादिसंकोचकाभावान्नैवमित्याह नेति आक्षेपद
शायामुक्तमनुमानमनुवदति यद्विति आभासत्वादिदमसाध
कमिति दूषयति तदसदिति यासादिमत्वे कथमाभासत्वमि
ति पृच्छति कथमिति ग्रहणफलत्वोपाधिना हेतोर्व्यभिचा
दाभासत्वधीरित्याह तेषामिति तदेव प्रपञ्चयति यथेत्यादि
ना धनुषः सकाशाद्विमुक्तो बलवत् प्रतिबन्धकाभावे म
ध्ये न पतति तथा प्रबलप्रतिबन्धकं विना ग्रहणफलानां
कर्मणां भोगादृते न क्षयो न च तत्त्वज्ञानं तादृक् प्रतिबन्धकं
उत्पन्नावेव प्रवृत्तेन कर्मणा प्रति बन्धशक्तित्वादित्यर्थः
यत्र ज्ञानेनादाह्यत्वं तत्र ग्रहणफलत्वमित्यन्वयेऽपि यत्राग्रहण
फलत्वं तत्र ज्ञानदाह्यत्वमिति नव्यतिरेकसिद्धिरित्याशंक्याह
स एवेति ग्रहणो निमित्तभूतो नारब्धो वेगोऽनेनेति विग्रहः आ
ग्रपश्यति साभासान्तःकरणानिष्ठानीति यावत् विमतानि तत्त्व
धीनिमित्तनिहतानि तत्कृतकारणनिहतत्वाद्दग्धसर्पादिव
दिति व्यतिरेकसिद्धिरिति भावः विदुषो वर्तमानदेहपाते देहा
न्तरे हेत्वभावात्तत्त्वधीरैकान्तिकफलेत्युपसंहरति यतितस्त्विति २३

स्वामिकृतटीका ३

एवंप्रकृतिपुरुषविवेकज्ञानिनं स्तौति य एवमिति एवमुप
द्रष्टृत्वादिरूपेण पुरुषं यो वेत्ति प्रकृतिं च गुणैः सुखदुःखादिप
रिणामैः सहितं यो वेत्ति स पुरुषः सर्वथा विधिमतिलंघ्यापि
वर्तमानोऽपि पुनर्नाभिजायते मुच्यत एवेत्यर्थः [illegible]
[illegible] २३ ॥

पिशाचभाष्यटीका ४

गुणैर्विकारैः २३ ॥

रामानुजभाष्यटीका ५

य एवमिति एवमुक्तस्वभावं पुरुषमुक्तस्वभावां च प्रकृतिं
वक्ष्यमाणस्वभावगुणांश्च सत्वादिभिर्गुणैः सह यो वेत्ति यथाव
द्विवेकेन जानाति स सर्वथा देवमनुष्यादिदेहेष्वतिमात्रक्लि
ष्टप्रकारं वर्तमानोपि भूयो न जायते प्रकृत्या न संबध्यते इत्यप
रिच्छिन्नलक्षणमपहतपाप्मानमात्मानं तद्देहावसानसमये
प्राप्नोतीत्यर्थः २३ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् २३ ॥

परमार्थप्रपाटीका ७

एवं प्रकृतिपुरुषज्ञानिनं स्तौति य एवमिति एवमुपद
ष्टत्वादिरूपेण यः पुरुषं वेत्ति तथा गुणैः सह सुखदुःखा
दिपरिणामसहितां प्रकृतिं वेत्ति स पुरुषो विधिमतिल
ङ्घ्य वर्तमानोपि पुनर्नाभिजायते मुच्यत इत्यर्थः २३ ॥

[illegible] २३ ॥

वनमाली टीका ८

प्रकृतिपुरुषौ चैवोक्तौ तयुक्ते बुभुत्सातिशयोत्पादनाय तज्ज्ञानफल
माह य एवमिति यः पुरुषं सर्वनियन्तारं विश्वोदयादिकर्ता
रमचिन्त्यशक्तिं पुरुषं परमात्मानं स्वस्वामिनं वेत्ति अपरोक्षी
करोति जीवं च पुरुषं ज्ञानानन्दघनस्वभावं नित्यनिर्मुक्तं प्रकृ
तितोऽत्यन्तविलक्षणं ज्ञानानन्दाकारत्वादिनेश्वरसदृशं वेत्ति
सत्वदुःखादिधर्मैः सह वर्तमानां प्रकृतिं च पुरुषद्वयविल
क्षणेनेश्वरनियम्यतया हेयतया च वेत्ति स सर्वथा प्रारब्ध
कर्मवशाद्विधिमतिक्रम्य वर्तमानोऽपि भूयो नाभिजायते पत
च्छरीरपतितेः पुनर्देहग्रहणं न करोति भगवत्साक्षात्कारेण
विषयानष्टत्वेन संसारासंभवात् तदधिगम उत्तरपूर्वाघयोर
श्लेषविनाशौ तद्व्यपदेशादिति सूत्रात् अपि शब्दाद्विधिमत
तिक्रम्य वर्तमानः स्वहननस्यो भूयो न जायत इति किमु वक्तव्य
मिति लभ्यम् २३ ॥

अथ श्रीवैजयन्तीटीका १

प्रकृतिपुरुषज्ञानेन किं फलं स्यादित्यपेक्षायामाह य एवमि
ति एवमुक्तप्रकारेण यः पुरुषं प्रकृतिं स्वमपि तद्विलक्षणस्व
भावं वेत्ति च पुनः किंस्वभावां प्रकृतिं मायां वेत्ति याथात्म्यस्वरू
पविवेकेनोभयमेव जानाति स प्रकृतिपुरुषयाथात्म्यवित्पु
रुषः सर्वथा वर्तमानोऽपि व्यवहारसंपर्केण स्वरन्तरादिदेहस्थि
तोऽपि भूयः पुनरपि नाभिजायते पुनर्जन्म न प्राप्नोति किंतु दे
हान्ते विमुच्यत इत्यर्थः २३ ॥

+ तदेवं सत्त्वयोगात्मभावस्तुति व्याख्यातं इदानीं य
ज्ञात्वामृतमश्नुत इत्युक्तमुप
संहरति ॥ +

मधुसूदनी टीका १

य एवमुक्तेन प्रकारेण वेत्ति पुरुषमयमहमस्मीति साक्षा
करोति प्रकृतिं चाविद्यां गुणैः स्वविकारैः सह मिथ्याभूता
मात्मविद्यया बाधितां वेत्ति निवृत्ते मम अज्ञानतत्कार्ये इति स
सर्वथा प्रारब्धकर्मवशादिन्द्रव विधिमतिक्रम्य वर्तमा
नोऽपि भूयो न जायते पतितेऽस्मिन्विद्वच्छरीरे पुनर्देहग्रहणं
न करोति अविद्यायां विद्यया नाशितायां तत्कार्यासंभवस्य

वक्ष्योक्तत्वात् तदपि गामज्जरत्पवीय योरस्त्वेव विनाशेन नमुप
देशादितिन्यायात् अपिशब्दात् विधिमनतिक्रम्य वर्तमानः स
हृतस्थो भूयो न जायत इति किमुक्तमित्यभिप्रायः [illegible]
[illegible] २३ ॥

सदानंदी टीका ११

यथोक्तेप्रत्यगात्मैकं वेत्ति य स तत्ववर्त्ती: उपसंहरतीशं नीम
गवाम्भृतभावनः १ यथोक्तेन प्रकारेण योमुमुक्षुरुदारधीः
पुरुषं प्रत्यगात्मानं वेत्ति साक्षात्करोत्यजे २ मिथ्याभूतामविद्या
ख्यां बाधितां स्वगुणैः सह प्रकृतिं वेत्यसौ देहो विधलाखिलबंध
नः ३ विनिवृत्तममतानतकार्येवे तथा शेषतः सच्चारब्धवशाज्जा
नी वर्तमानोपि सर्वथा ४ शास्त्रीये लौकिके वापि कर्मण्युह्लंघ्य
पतितेस्मि वाविधिं लोकवन्नैव संसारे देहांते याति विद्वद्वः ५ पतितेस्मि
न्शरीरेसौ पुनर्देहं कदाचन नरकृत्ताविनष्टायामविद्याया
मशोषतः ६ स्वहृतिर्यो महात्मायः सदाचारः स्वधर्मवान् नभू
योजायते सोत्र किमवाच्यमिति स्फुटं ७ अविद्याकामकर्मादिबी
जेसकलसंस्थेः तत्वज्ञानाग्निनादग्धेपुनर्नीरोहती हनत् प
बीजाम्यस्त्वपदग्धानि नारोहंति यथा पुनः ज्ञानदग्धैस्तथाक्ले
शैर्नात्मा संपद्यते पुनः क्षीयंते चास्य कर्माणीत्येवं श्रुत्यापि ति
ष्ठते विस्तरेत्वत्र संघेयो भाष्येन ऊपरम्यते ९ २३ ॥

नीलकंठी टीका १२

एवं यथोक्तलक्षणात्मज्ञाने फलमाह य एवमिति गुणैः सवि
कारैः सर्वथा विहितेन निषिद्धेन वा कर्मणा वर्तमानोपि न स भूय
योभिजायते पुनर्जन्म न लभते मुक्तो भवतीत्यर्थः २३ ॥

आनंदी टीका १३

येविद्यानेन विनष्टानि निरोधालिंगनं तं यनेनात्मानिदेहस्थयमे
वाम्बावात्मानं सर्वाणि भूतानि यत्तस्मात्तदात्मज्ञं वेनि अन्यता
देवत्सोमेवमहानिवृत्तयाविवेकेन अपि एवकर्मयोगेनब
नार्थिताकृत्वाज्ञानकर्मसमुच्चयकृत्वा एवं अन्नितानां

एतद्विचारस्यफलमाह ॥

१३ श्री· गी· टी·

144

[illegible] ॥ एवं प्रकृतेः पारतंत्र्येण पुरुषं संसरणशीलं पृथग्भावेन परमात्मरूपमेव यो वेत्ति प्रकृतिं च गुणैः सहेति प्रकृतिसम्बन्धात्पर्वैते गुणा न पुरुषसंबद्धा इति च यो जानाति स प्रकृतिपुरुषतत्वज्ञः सर्वथापि देहे वर्तमानोपि भूयो नाभिजायते [illegible] २३ ॥

एवं प्रकृतिपुरुषेश्वरविवेकलक्षणज्ञानस्यफलमाह —

रामकंठी टीका १४ ॥

यो योग्येवमुक्तप्रकारेण पुरुषं नानादेहव्रततया व्यवस्थितं प्रकृतिं च गुणैः सत्वाद्यात्मकविषयभावेनावस्थितैः सह वेत्ति स तत्वज्ञः परमार्थवेदित्वात्सर्वथापि प्रकारेण न महर्णाश्रमधर्मात्मके न वर्तमानस्तदनुष्ठानात्ततो यातिष्ठन्नपि भूयः पुनर्नाभिजायते न संसारी भवति यथोक्तज्ञानाग्निना संसारप्रसवहेतूनां बीजस्थानीयानां कर्मणां दाहात् यथोक्तं बीजान्यग्न्युपदग्धानि न रोहन्ति यथा पुनः ज्ञानदग्धैस्तथात्मा क्लेशैर्नात्मा संपद्यते पुनः । स्पष्टार्थः [illegible] २३

+एवं प्रकृतिपुरुषविवेकलक्षणज्ञानस्यफलमाह ॥ नासिकी

[illegible] टीका १५

+यो योगी एवमुक्तविधया पुरुषं गुणसंयुक्तां प्रकृतिं च विवेकेन वेत्ति उपलभते सर्वथा विधिमुल्लंघ्यापि वर्तमानः स योगी योगमारूढ एव न पुनर्नाभिजायते देहसम्बन्धं न प्राप्नोति मुच्यत इत्यर्थः किं पुनर्वक्तव्यं स्वधर्मस्थो भूयो न जायत इत्याशयः [illegible] २३ ॥

पंचोली टीका

एवंप्रकृतिपुरुषविवेकज्ञानिनं स्तौति य एवमिति य एवं प्रकारेण पुरुषं साक्षादहमिति वेत्ति चान्यत् गुणैः स्ववि-
कारैः सह प्रकृतिमविद्यालक्षणां बाधितां वेत्ति स सर्व-
था सर्वप्रकारेण वर्तमानोपि भूयः पुनरपि अस्मिन् श-
रीरे नाभिजायते २३ ॥

रमावीरसमिद्धोधिनी

य एवं पूर्वोक्तेन प्रकारेण पुरुषं यथोक्तलक्षणां प्रकृतिं चोक्तस्वरूपां गुणैः स्वविकारैः सह वेत्ति पुरुष एवाहमस्मीति प्रकृतिरविद्येह मायामेव न विद्यते इति च जानाति स सर्वथा सर्वप्रकारेण विधिमतिक्रम्येह वर्तमानोपि भूयो न जायते अपि शब्दाद्विधिमनतिक्रम्य वर्तमानः स्वधर्मस्थः पुनर्नोत्पद्यते इति किमु वक्तव्यं तस्मात्प्रकृतिपुरुषविवेकवान्भूत्वा स्वधर्मस्थो मुमुक्षुस्स्व न हिते विरुषः पापात्मना पुण्यात्मना वा कर्मणां संसर्गो वर्तते इत्यर्थः २३॥

मधुभाष्य

२३॥

भाषा अनुवाद टीका

ऐसी जो प्रकृति औ पुरुष तिनके विवेक के ज्ञानवान मनुष्यों की प्रशंसा करते हैं कि जो लोग ऐसे उपद्रष्टारूप पुरुषको जानते हैं तथा प्रकृतिको औ प्रकृतिके गुणरूप परिणामको प्राप्त कहे रूपान्तर को प्राप्त सुखदुःख सहित को जानि सके हैं वेई मनुष्य संसार मे रहते सम्पूर्ण विधिको उल्लंघन करके भी पुनर्जन्म ग्रहण नहीं करते मुक्तही होते हैं यह जानो २३ ॥

दोहा

जो यों जाने गुणसहित पुरुष प्रकृति हिं याहि वर्तत सभमे तद्यपि सो फिर जन्मत नाहि २३॥

146

ध्यानेनात्मनि पश्यंति केचिदात्मानमात्मना
अन्ये सांख्येन योगेन कर्मयोगेन चापरे २४

शांकरभाष्ये टीका १

अत्रात्मदर्शने उपायविकल्पा इमे ध्यानादय उच्यन्ते ध्यानेने-ति ध्यानेन ध्यानं नाम शब्दादिभ्यो विषयेभ्यः श्रोत्रादीनि कर-णानि मनस्युपसंहृत्य मनश्च प्रत्यक्चेतयितर्येकाग्रतया य-च्चिन्तनं तद्ध्यानं तथा ध्यायतीव बकः ध्यायतीव पृथिवी ध्या-यन्तीव पर्वताः इत्युपमोपादानात् तैलधारावत् सन्ततोवि-च्छिन्नप्रत्ययो ध्यानं तेन ध्यानेनात्मनि बुद्धौ पश्यन्त्यात्मानं प्रत्यक्चेतनमात्मना ध्यानसंस्कृतेनान्तःकरणेन केचित् योगिनः अन्ये सांख्येन योगेन सांख्यं नाम इमे सत्वरजस्तमां-सि गुणा मया दृश्या अहं तेभ्यो अन्यस्तद्व्यापारस्य साक्षिभूतो नि-त्यो गुणविलक्षण आत्मेति चिन्तनमेष सांख्यो योगस्तेन प-श्यन्त्यात्मानमात्मनेति वर्तते कर्मयोगेन कर्मैव योग ई-श्वरार्पणबुद्ध्यानुष्ठीयमानं घटनरूपत्वं योगार्थत्वात् योग उच्यते गुणतस्तेन सत्वशुद्धिज्ञानोत्पत्तिद्वारेण चापरे २४

आनंदगिरिकृतटीका २

ज्ञेयं यत्तदित्यादिना तत्पदार्थस्त्वंपदार्थश्चानन्तरमेव शोधितौ तयोरैक्यन्तु तेत्रज्ञञ्चापि मां विद्धीत्युक्तमिदानीं तद्दृष्टिहेतून् यथाधिकारं कथयति अत्रेति ध्यानाख्यसाधनं किं रूपमिति पृच्छति ध्यानं नामेति तद्रूपं वदन्नुत्तरमाह शब्दादिभ्य इति एकायनतयोपसंहृत्येति सम्बन्धः यच्चिन्तनं प्रत्यक्चेतयित-रि इति पूर्वेणान्वयः किं तच्चिन्तनमित्युक्ते दृष्टान्तद्वारा स्पष्ट-यति बकस्येव ध्यानं प्रपञ्चयति तैलेति विवक्षितध्यानानुरोधेने-ति यावत् आत्मानं पश्यन्ति परमात्मतयेति शेषः केचिदि-त्युत्तमाधिकारिणो गृह्यन्ते मध्यमाधिकारिणो निर्दिशति अन्य इति सांख्यशब्दितं साधनं किन्नामेत्युक्ते विचारजन्यं

श्री॰
गी॰टी॰
३॰
147

ज्ञानेनैव ज्ञानहेतुतपोयोगतुल्यतया योगश्शुद्धिहेतोरनेन
गौण्या वृत्त्या योगशब्दितेन कर्मणेत्याह सांख्यमिति अथ मानधि
कारिणः संधीरते कर्मणेति चित्तैकाग्र्यं योगः तादृशी कर्मणः
शुद्धिहेतोरस्ति तेन गौण्या वृत्त्या योगशब्दितेन कर्मणेत्याह गुण
इति अपरे पश्यन्त्यात्मानमात्मनेति सर्वत्र वदन्नाह॰ मङ्गी
कृत्याह तेनेति २४ ॥

ॱएवंभूतविविक्तात्मज्ञानसाधनविकल्पानाह ध्यानेनेतिद्वाभ्यां ॥

स्वामिकृतटीका ३

ॱध्यानेनात्माकारप्रत्ययावृत्त्या आत्मनि देहे आत्मना मनसा प
श्यन्त्यात्मानं केचित्पश्यन्ति अन्ये तु सांख्येन प्रकृतिपुरुषवैलक्ष
ण्यालोचनेन योगेनाष्टाङ्गेनापरे अपरे च कर्मयोगेन सत्वशु
द्ध्यात्मज्ञानद्वारा पश्यन्तीति सर्वत्रान्वयः एतेषां च ध्यानादी
नां यथायोग्यं क्रमसमुच्चये सत्यपि तत्तन्निष्ठाभेदाभिप्रायेण
विकल्पोक्तिः २४ ॥

पिशाचभाष्यटीका ४

ध्यानेनेति चित्तस्याविच्छेदेन एकप्रकारतया ध्यानेनेन सांख्ये
न साक्षी नित्यो विलक्षण आत्मेति चिन्तनेन योगेन अनेनैव
चिन्तनेन कर्मयोगेन ईश्वरार्पितेनानुष्ठीयमानेन कर्मणा २४

+अथ प्रकृतिसंसृष्टस्यात्मनो विविक्तानुसंधानप्रकारं
वक्तुं स्थावरजंगमं च सत्वविद
चित्तं सर्गजमित्याह ॥

रामानुजभाष्यटीका ५

+ध्यानेनेति केचिन्निष्पन्नयोगा आत्मनि शरीरे वस्थितमात्मानं
मनसा ध्यानेन भक्तियोगेन पश्यन्ति अन्ये चानिष्पन्नयोगाः सां
ख्येन योगेन ज्ञानयोगेन योगयोग्यं मनः कृत्वात्मानं पश्यन्ति
अपरे योगादिष्वात्मावलोकनसाधनेष्वनधिकृता ज्ञानयो
गानधिकारिणः सुकरोपायसक्ताव्यपदेश्याश्च कर्मयोगेनान्त
र्गतज्ञानेन मनसो योगयोग्यतामुत्पाद्यात्मानं पश्यन्ति २४

अभिनवगुप्तकृतटीका ८ एवार्थो २४

ॱपरमार्थप्रपा टी ७ =

अथैवंविधविवेकेनात्मज्ञानेसाधनं विनास्माकं — ध्यानेने
तिद्वाभ्यां ध्यानाकारप्रत्यावृत्त्या देहे आत्मनि देह एव आत्मना
मनसैवात्मानं केचित्पश्यन्ति कृतिरपि श्रद्धान्विता भूत्वा वा

त्मन्येवात्मानं पश्यति सर्वो स्यात्मा भवतीति स्पष्टार्थं तथा
न्यधिकारिणः सांख्यैर्नैकेन प्रकृतिपुरुषविवेलक्षणालो
चनेन न पश्यंति श्रुतिरपि ऋग्वेदे पतंगमक्तमसुरस्य मा
यया हृदा पश्यंति मनसा विपश्चितः समुद्रे अंतः कवयो
विचक्षते मरीचीनां पदमिच्छंति वेधस इति भाष्यं अस्य
रस्य बलवतः परमेश्वरस्य मायया अक्तं व्याप्तं अत एव प
तंगमनेकदेहपतनशीलं तेचतं विपश्चितो ज्ञानवंतः
अस्य मंसे कल्प्यात्मकेन मनसा अनंता हृदा निश्चयात्म
कबुद्धिरूपेण एवमात्मन्येवात्मानं पश्यंतीत्यर्थः तमे
व कवयः क्रांतिदर्शिनः संतः समुद्रे विचक्षते समुद्रं
व्याप्नोति इति समुद्रः प्रपंचस्तस्मिन् पश्यंति तीरंतः
र्हितमेवेत्यर्थः तत्रैव वेधसो हिरण्यगर्भस्य मरीचीनां प्रका

श्णनोपंचेंद्रियाणांपंदंसुस्थानमिच्छंति पदार्थश्रतीतिहृ॰
पेणावेषयंति अपरेकर्मयोगेनचित्तशुद्धिद्वारापश्यंति
एवंयथाधिकाराविकल्पोक्तिः २४ ॥

[illegible] ॥

वनमाली टीका ८

एवं परमपुरुषज्ञाने साधनान्याह ध्यानेनेति इह चतुर्विधा ज
नाः केचिदुत्तमाः केचिन्मध्यमाः केचिन्मंदाः केचिन्मंदतराः त
त्रोत्तमा ध्यानेन विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययप्र
वाहेण श्रवणादिफलनिदिध्यासनाख्येनात्मनि हृदये आत्मा
नमीश्वरमात्मनैकाग्रचित्तेन केचित्पश्यंति अन्ये मध्यमाः सां
ख्येन योगेन निदिध्यासनस्य पूर्वभाविना श्रवणमननरूपेण
त्मनि हृदये आत्मानं कालेन ध्यानोत्पत्तिक्रमेण पश्यंति मंदा
ईश्वरार्पणधिया क्रियमाणेन फलाभिसंधिरहितेन स्वोचित
कर्मयोगेनापरे पश्यंति सत्वशुद्ध्या श्रवणमननध्यानोत्पत्ति
द्वारेणेत्यर्थः २४ ॥

कुसुमवैजयन्तीटीका ९

तस्य पुरुषस्य प्राप्तौ किं साधनं स्यादित्यपेक्षायां तत्प्रकारमाह
द्वाभ्याम् ध्यानेनात्मनीति केचित्परिपक्वयोगेन विशुद्धमानः
साः पुरुषा आत्मनि देहे वर्तिनमात्मानं प्रत्यगात्मानमात्मना
भक्तियुक्तेनेनरविवयपशून्येन ध्यानतीक्ष्णेन मनसा पश्यंति सा
ख्यान्कुर्वंति अन्ये परिपक्वभक्तियोगेनास्थिरचित्ताः पुरुषाः सां
ख्येन योगेन ज्ञानयोगेन भक्तियोगयोग्यं मनः कृत्वा तेनात्मा
नं पश्यंति च पुनरपरे आत्मसाक्षात्कारासाधारणसाधनभूते
षु भक्तिज्ञानरूपेषु योगेष्वयं नधिकारिणस्ते कर्मयोगेन ता
नगर्भकनिष्कामकर्मणा मनसो भक्तियोगे योग्यत्वमुपपाद्य
नेन ज्ञानभक्तियुक्तेन मनसात्मानं पश्यंति २४ ॥

^अत्रात्मदर्शने साधनविकल्पाइ मेकथ्यंते

मधुसूदनी टीका ९

^इहाधिचतुर्विधा जनाः केचिदुत्तमाः ~~केचिदुत्तमाः केचिन्मध्य~~
~~मा~~ केचिन्मध्यमाः केचिन्मंदाः केचिन्मंदतराः तत्रोत्तमाना
मात्मज्ञानसाधनमाह ध्यानेनेति ध्यानेन विजातीयप्रत्यया
नंतरितेन सजातीयप्रत्ययप्रवाहेन श्रवणमननफलभूते

नात्मचिंतनेन निदिध्यासनशब्दोदितेनात्मनि बुद्धौ पश्यंति साक्षा
त्कुर्वंति आत्मनेत्यत्र केनेत्यात्मना ध्यानसंस्कृतेनांतःकरणे
न केचिदुत्तमा योगिनः मध्यमानामात्मज्ञानसाधनमाह अन्ये
मध्यमाः सांख्येन योगेन निदिध्यासनपूर्वभाविनाश्रवणमन
नरूपेण नित्यानित्यविवेकादिपूर्वकेण इमे गुणत्रयपरिणा
मा अनात्मानः सर्वे मिथ्याभूताः तत्साक्षिभूतो नित्यो विभुर्नि
र्विकारः सत्यः समस्तजडसंबंधशून्यः आत्माहमित्येवं वेदांत
वाक्यविचारजन्येन चिंतनेन पश्यंत्यात्मानमात्मनीति वर्त्तते ।
ध्यानोत्पत्तिद्वारेणेत्यर्थः मंदानां ज्ञानसाधनमाह कर्मयोगेनेई
श्वरार्पणबुद्ध्या क्रियमाणेन फलाभिसंधिरहितेन तत्तद्वर्णा
श्रमोचितेन वेदविहितेन कर्मकलापेन चापरे मंदाः पश्यंत्या
त्मानमात्मनीति वर्त्तते सत्त्वशुद्ध्या श्रवणमनननिदिध्यासनोत्पत्तिद्वा
रेणेत्यर्थः २४ ॥

सदानंदी टीका ॥

अत्रात्मदर्शने श्रीपाः साधनान्याह शास्त्रतः अधिकारानुसारे
णाविकल्पाद्विनाश्रमी १ बहुविधा जना लोके केचित्सुकृत
मा बुधाः केचित्सुमध्यमाः केचिन्मंदा भेदतस्त्रयः परे तत्रोत्तमाना
वलिकज्ञानसाधनमुच्यते सम्यक्कृतेन तेन ध्यानेनात्मनि
संस्कृते ३ सेंद्रियचित्तमायस्य निदिध्यासनरूपिणा अखंडब्र
त्मा^ ह्मणात्मानं साक्षात्कुर्वंति चेत्तमा ४ सत्त्वशुद्धौ संस्कृतेनैके सुव्याख्याले
ज्ञानयोगिनः मध्यमाः सांख्ययोगेन वेदांतश्रवणेन च ५ नि
त्यानित्यविवेकेन युक्तिभिर्मननेन च देहेंद्रियादयः सर्वे विका
राः प्रकृतेरिमे मिथ्याभूता अनात्मानस्तेभ्यो भिन्नोऽहमांतरः सा
क्षिभूतो विभुर्नित्यो निर्विकारोऽस्मि केवलः ७ जडसंबंधशून्यो
हमित्येवं युक्तितत्पराः बुद्धौ ध्यानपरिपाक्या पश्यंत्यात्मानमा
त्मना ८ कृत्वा मनसा निदिध्यासनं साक्षात्कुर्वंति ये जनाः अखंडं
वस्तु सद्बुद्ध्या भावयाना मंदजनाः ९ यज्ञकृताध्ययनेन तत्पराः
अश्रद्धयानताः किं विद्यानेऽप्यविद्या तेन मध्यमाः सांख्ययोगिनः ९

ईश्वरार्पणबुद्ध्यायेमंदाःकुर्वंतिकर्माणितेफलाभिसंधिशून्येनान
हंकारेणचेतसा ॥ स्ववर्णाश्रमधर्मेणसत्त्वशुद्ध्याधिकारिणः
भूत्वाबोधपरिशुद्ध्यापश्यंत्यात्मानमात्मना १३ २४ ॥

नीलकंठी टीका १३

एवंविधात्मदर्शनेऽधिकारिभेदेनोपायविकल्पानाह ध्याने॰
नेति अत्रयेआत्मानंविविदिषंतितेनिष्कामकर्मणापरमेश्वर
माराधयंतितेकर्मयोगिनः ततएवोत्पन्नविविदिषावेदांतश्र
वणेप्रवर्तंते ततःप्रमाणगतासंभावनानिहत्यैसमनंतरंतस्यैवा
र्थस्यमननेप्रवर्तंतेप्रमेयगतासंभावनानिहत्यर्थंतेसांख्याः
ततःप्रमाणप्रमेयगतासंभावनायानिहत्यनंतरंआत्मनिदे
हादावात्मबुद्धिरूपायाविपरीतभावनायानिहत्यर्थंनिदिध्या
सनेविजातीयप्रत्ययतिरस्कारपूर्वकसजातीयप्रत्ययप्रवाही
करणलक्षणेकर्तुंप्रवर्तंतेततस्तत्परिपाकेआत्मनिबुद्धिहैमो
आत्मानंपरमेश्वरंपश्यंतितेध्यायिनः तत्रयेकर्मसांख्ययोगि
ध्यानाख्येध्यानेनात्मनिदेहेआत्मानंपरमेश्वरंआत्मनाबुद्ध्या
पश्यंतिअन्येत्वकृतकर्माणःसांख्येनयोगेनविचारात्मकेनयो
गेनध्यानद्वारापश्यंति अन्येपुनःकर्मयोगेनैवद्वैतीकलत्वे
नसांख्यध्यानद्वारापश्यंतीतिसाधनत्रयस्यसमुच्चयोनतुवि॰
कल्पः २४ ॥

आनंदगिरी का १३

+अत्रोपायान्तराण्याह ॥+
केचिद्ध्यानेनचित्तवृत्तिनिरोधाख्येनसंयमेनात्मनि
देहेहृदयमेवात्मनात्मानंपश्यंतिभूमिजयक्रमेण
साक्षात्कुर्वंतिअन्येसांख्येनयोगेनप्रकृतिपुरुष
विवेकेनअपरेचकर्मयोगेनब्रह्मार्पणबुद्ध्याकृतेन
कर्मसमन्वयबुद्ध्या [illegible]
[illegible] वन्तस्तन्मतिंतरन्ति सर्वमेवज
गत्सकलनिष्कर्मयोगेनभिन्निदर्शयति २४ ॥

+ अत्र चात्मनो दर्शने यथोक्तं ज्ञानमेव यद्यपि मुख्यस्तथोपायस्तथाप्युपायान्तरैर्गौणै रप्यसौ कथं विज्ञप्यत इत्याह ॥

रामकंठटीका १४

+ केचित्सहजसिद्धतत्त्वज्ञाना नित्यं परमेश्वरानुग्रहभाजो ध्यानेनात्मानं पश्यन्ति यथोक्तब्रह्मस्वरूपतानुस्मरणेन साक्षात्कुर्वन्ति अत एव केनचित्कल्पितत्वभेदप्रतिपादनार्थमाह आत्मनात्मानमात्मनि पश्यन्तीति किमुक्तं भवति यत्राधिकरणे हृदयादौ ध्यानं कुर्वन्ति येन चान्तःकरणेन यत्नेन ध्यानेनोपलभन्ते तत्सर्वं ब्रह्मरूपतयैवमात्मत्वमरूपन्तीति तात्पर्यम् तथा च पराकाष्ठात्मज्ञानस्य संपन्नेनावर्तनी योगेनाममात्राय अन्ये सांख्येन प्रकृतिपुरुषविवेकरूपज्ञानेनात्मानं पश्यन्ति अन्ये योगेन यमनियमादिप्रणीतविधिना समाधिनात्मानं पश्यन्तीत्यात्मज्ञानस्य परापरभेदेन प्रकारद्वयमुपन्यस्तं तत्र ध्यानेनेत्यादिना मुख्यज्ञानमात्रं पायोक्ता साधककर्मयोगिनामारूढावस्था यथोक्तं योगारूढस्य तस्यैव शमः कारणमुच्यते इति कर्मयोगेनेति समुच्चयात्मकत्वेऽपि कर्मप्रधानां कर्मयोगिनामाह तत्त्ववस्था आरुरुक्षोर्मुनेर्योगमित्यादिना प्रतिपादितेति द्विप्रकारः परउपायः सांख्येन योगेन चेत्यपरः स्थूलभेदप्रतिपत्तेरनुमानात् २४ ॥

+ एवं प्रकृतितो विवेकेनात्मनि प्रत्यभिज्ञाते सति तद्दर्शनार्थं उपायभेदानाह +

लासिकी [illegible] टीका १५

केचिद्विवेकभाजो योगिन आत्मनि स्वतनावस्थितं पुरुषमात्मानमखण्डं कूटस्थं सर्वभूतव्यापकमात्मनात्मत्वेन ध्यातृतया नन्तध्येयतया ध्यानेन चित्तैकाग्र्येण पश्यन्ति साक्षात्कुर्वन्ति एवमन्ये योगिनः सांख्येन प्रकृतिपुरुषवैलक्षण्यालोचनेन अन्ये योगेनाष्टाङ्गेन अपरे कर्मयोगेन फललक्षणेन पश्यन्तीति सर्वत्रानुषङ्गः [illegible]

[illegible] २४ ॥

[illegible]

एवं [illegible] विवेकमात्मनिस्तोनि यथावसिति यथा [illegible]
[illegible]

पंचोलेटीका

एवंभूतविविक्तात्मज्ञाने साधनविकल्पानाह ध्यानेनेति केचिद्यो
गिनः ध्यानेन एकाग्रतया आत्मचिंतनेन आत्मनि बुद्धौ आत्मना ध्यान
संस्कृतेनांतःकरणेन आत्मानं परमात्मस्वरूपेण पश्यंति अन्ये सांख्ये
न योगेन सत्वादिगुणा नाहं एतेभ्यः पृथक् तिगुणाविलक्षण आ
त्मेति सांख्ययोगस्तेन परमेश्वराज्ञया अनुष्ठीयमानं कर्मैव योगस्तेन
कर्मयोगेन २४ ॥

रत्नावीरसमिद्धोधिनी

अथात्मज्ञाने साधनभेदानाह ध्यानेनेति इहोत्तममध्यममन्दमन्द
तराणां चतुर्विधानां जनानां मध्ये केचिदुत्तमाः पुरुषाः ध्यानेनात्मा
कारप्रत्ययाहत्त्यात्मनि बुद्धावात्मना निर्मलेनांतःकरणेनात्मानं प
श्यंति साक्षात्कुर्वंति अन्ये मध्यमाः सांख्येन प्रकृतिपुरुषवैलक्षण्या
लोचनेन योगेन सर्वमेतत्प्राकृतत्वेन जडत्वादनात्मा तत्साक्षिभू
तो जडवर्गसंबंधरहित आत्माहमित्येवंविचारजन्येन चिंतनेनात्मा
नं पश्यंति अपरे मंदाः कर्मयोगेन वेदोदितेन स्ववर्णाश्रमोचितेन
कर्मकलापेनेश्वरार्पितेनात्मानं पश्यंतीति २४॥

मधुभाष्य

२४॥

151

। एवंप्रकृ
भिज्ञातेय
धैव्रपाय

भाषा अनुवाद टीका

ऐसी जो प्रकृति तिस से भिन्न जो आत्मा तिसके ज्ञान हो
नेके विषयमे अनेक अनेक कल्पना रूप साधन दो श्लोक
से कहते हैं कि कोईतो ध्यान कहे आत्माकाराकारित ज्ञा
नरूप धारावाहिक अन्तःकरण की वृत्ति से इसी शरीरमे
मनके द्वारा आत्माका दर्शन करते हैं और कोई सांख्य अर्था
त् प्रकृति पुरुष का भेद आलोकनके द्वारा देखते हैं कोई
यम नियम आसन प्राणायाम प्रत्याहार धारणा ध्यान स
माधिरूप अष्टांग योगके क्रमसे जानते हैं और कितने प
क निःकाम कर्मरूप भक्तियोग अनुष्ठान करके शुद्ध स
तोगुण होय तत्त्वज्ञानके द्वारा आत्माको देखते रहते हैं य
द्यपि ध्यानादि यथा योग्य क्रमसे एकही है तोभी तौन तौन
निष्ठाके भेद से भिन्न नाना मत कहा है २४ ॥

दोहा

लखें आपमे ध्यानसें आप आपहिं कोय और सांख्यसें यो
गसें कर्मयोगसें कोय २४

152

अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपासते ते
पि चातितरंत्येव मृत्युं श्रुतिपरायणाः २५

शांकरभाष्यं टीका १

अन्ये त्विति अन्ये त्वेतेषु विकल्पेषु अन्यतरेणाप्येवं यथोक्तमा
त्मानमजानंतोऽन्येभ्य आचार्येभ्यः श्रुत्वा इदमेव चिन्तयतेति उ
क्ता उपासते श्रद्दधानाः सन्तश्चिन्तयन्ति तेपि चातितरंत्येवा
तिक्रामन्त्येव मृत्युं मृत्युयुक्तं संसारमित्येतत् श्रुतिपरायणाः
श्रुतिः श्रवणं परमयनं गमनं मोक्षमार्गप्रवृत्तौ परं साधनं
येषां ते श्रुतिपरायणाः केवलपरोपदेशप्रमाणाः स्वयं वि
वेकरहिता इत्यभिप्रायः किमु वक्तव्यं प्रमाणं प्रति स्वतन्त्रा वि
वेकिनो मृत्युमतितरन्तीत्यभिप्रायः २५ ॥

आनंदगिरिकृतटीका २

अधमतमानधिकारिणो मोक्षमार्गे प्रवृत्तिं प्रतिलम्भयति अ
न्ये त्विति आचार्याधीनां श्रुतिमेवाभिनयति इदमिति उपास
नमेव विवृणोति श्रद्दधाना इति परोपदेशात् प्रवृत्तानामपि
प्रवृत्तेः साफल्यमाह तेपीति तेषां मुख्याधिकारित्वं व्यावर्त
यति श्रुतीति तेपीत्यादिना सूचितमर्थमाह किमिति २५

स्वामिकृतटीका ३

अतिमंदाधिकारिणां निस्तारोपायमाह अन्ये त्वेवमिति अन्ये
तु सांख्ययोगादिमार्गेणैवंभूतमुपद्रष्टृत्वादिलक्षणमात्मानं
साक्षात्कर्तुमजानंतः अन्येभ्य आचार्येभ्य उपदेशेन श्रुत्वा उपास
ते ध्यायंति ते च श्रद्धयोपदेशश्रवणपरायणाः संतो मृत्युं सं
सारं शनैरतितरंत्येव २५ ॥

पैशाचभाष्यं टीका ४

श्रुत्वान्येभ्य उपासते यथाश्रुतेः श्रुतिपरायणाः २५ ॥

रामानुजभाष्यं टीका ५

अन्ये त्विति अन्ये तु कर्मयोगादिष्वात्मावलोकनसाधनेष्वन

श्री॰
गी॰टी॰
३॰

153

पि कृताश्चन्येभ्यस्तत्त्वदर्शिभ्यो ज्ञानिभ्यः श्रुत्वा कर्मयोगादिभिरात्मा
नमुपासते नैते ध्यानदर्शनेन मृत्युमतितरंति ये श्रुतिपरायणाः
श्रवणमात्रनिष्ठाः ते च श्रवणनिष्ठाः स्तपायाः क्रमेण कर्मयोगा
दिनारभ्यातितरंत्येव मृत्युमपि शब्दाच्च शब्दाच्च भेदोवगम्यते

[illegible] २५ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् २५ ॥ ॥

परमार्थप्रपा टीका ७

अथाति मंदाधिकारिणां निस्तारोपायमाह अन्येत्विति
अन्ये सांख्ययोगादिमार्गेणैवंभूतमुपदेष्टुं त्वादिलक्ष
णमात्मानं साक्षात्कर्तुं जनानंतस्तेन्येभ्य आचार्येभ्य उ
पदेशतः श्रुत्वा उपासते ध्यायंति तेपि श्रुतिपरायणा
आचार्योपदेशश्रवणसादरा मृत्युमतितरंत्येव २५ ॥

[illegible] ॥

वनमाली टीका ८

मंदतराणां ज्ञानसाधनमाह अन्य इति अन्ये तु मंदतरा उपायं

ष्टयमनंतरेणाप्येवंयथोक्तमात्मानमजानंतोन्येभ्यःकारुणिकेभ्यः
आचार्येभ्यःश्रुत्वेदमेवंचिंतयतेत्युक्ताउपासतेश्रद्दधानाःसंत
श्चिंतयंतितेपिचातितरंत्येवमृत्युंसंसारंश्रुतिपरायणाःस्वयं
विचारासमर्थाअपिश्रद्दधानतयागुरूपदेशश्रवणमात्रपरा
यणाःश्रवणादिकेध्यानांतेशाध्यंतरंतीत्यर्थः २५ ॥

उत्कर्षवैजयंतीटीका ९

किंच अन्येत्वेवमिति नतुनरन्येयेआत्मदर्शनसाधनभूतेषुक
र्मज्ञानभक्तियोगेष्वनधिकारिणस्तेएवमजानंतः कर्मज्ञानभ
क्तिरूपसाधनैरेवात्मदर्शनंभवेदित्येवमीदृशान्तुपायानजानं
तोविदंतःअन्यएवचश्रुतिपरायणाःश्रुतिश्रवणपरास्तूत्कृष्ट
मयतमात्मावलोकनोपायस्यानेयेषांतेतथाकर्मज्ञानभक्ति
रूपाश्रवणानिष्ठाःसंतोन्येभ्यस्तदनुभूतेभ्यस्तान्कर्मज्ञानादीनुपा
यान् श्रुत्वातैःकर्मादिसाधनैस्तमात्मानमुपासतेभजंतितेपि
चकारात्तत्संगिनश्चकर्मणातेभ्यस्तानुपलभ्यानुष्ठायचातियो
रत्तरंमृत्युंजन्ममरणरूपंसंसारमतितरंत्येवनतुपुनःसंसरंति
यदियेश्रुतिमात्रनिष्ठास्तत्संगिनश्चतेपिमृत्युंतरंतितर्हियेकर्म
ज्ञानभक्तियोगयुक्तास्तेषांमृत्युतरणेकिमुवक्तव्यमित्याशयः २ ५

मधुसूदनी टीका १

मंदतराणांज्ञानसाधनमाह ॥

अन्येतुमंदतराःतुशब्दःपूर्वोक्तत्रिविधाधिकारिवैलक्षण्यद्यो
तनार्थः यद्यप्येषुअन्यतमेनाप्येवंयथोक्तमात्मानमजानं
तःअन्येभ्यः कारुणिकेभ्यआचार्येभ्यःश्रुत्वाइदमेवंचिंतयते
त्युक्ताउपासते श्रद्दधानाःसंतःचिंतयंति तेपिचातितरंत्येवमृ
त्युंसंसारंश्रुतिपरायणाःस्वयंविचारासमर्थाअपिश्रद्दधानतया
गुरूपदेशश्रवणमात्रपरायणाः तेपीत्यपिशब्दान्येस्वयंविचा
रसमर्थास्तेमृत्युमतितरंतीतिकिमुवक्तव्यमित्यभिप्रायः

२५ ॥

सदानंदी टीका ११

अन्येतेषुविकल्पेष्वपायेनाभ्यंतरेणच अजानंतोविवेकेनयथोक्ता
त्मानमांतरं १ आचार्येभ्योदयालुभ्यःश्रुत्वायेश्रद्धयान्विताःइदमे
वेचिंतयंतेमुक्ताःसंतउपासते २ तेपिधीरास्तरंत्येवमृत्युंसंसा
रसागरं स्वयंविचाराकुशलाःश्रद्धयाननयाजनाः ३ गुरूपदे
शश्रवणात्तत्परामुक्तिभाजनाः येविचारेस्वयंदक्षाःश्रद्धयाना
जितेंद्रियाः ४ संसारंतेतरंतीतिकिमुवाच्यंविचक्षणाः ५ २५

नीलकंठी टीका १२

यत्नांतरमाह अन्येत्विति अन्येऊहापोहकौशलहीनाः तुशब्दे
नसर्वेभ्योविलक्षणाः एवंसर्वोक्तप्रकारमजानंतोन्येभ्यआ
चार्येभ्यःश्रुत्वाआत्मनोनिर्विशेषब्रह्मचैतन्यरूपत्वंतदुपासना
मार्गंचाधिगम्यउपासतेयथोक्तप्रकारेणध्यायंतितेपिचमृत्यु
संसारंतरंत्येव अपिशब्दात्पूर्वश्लोकोक्तास्तरंतीत्यत्रकिमाश्चर्य
मितिगम्यते एवशब्दात्तेषांमुख्यक्रमाभावेपितरणेसंशयोना
स्ति यतस्तेश्रुतिपरायणाःश्रुतिःश्रवणंतदेवपरंअयनंमोक्ष
साधनंयेषांतेतथा ध्यानेप्रवृत्त्यतिशयात्तेषांचित्तशुध्यर्थं
कर्मापेक्षा वेदोक्तत्वेनदृढनिश्चयात्संभावनानिरसनार्थंश्रव
णमननापेक्षेतिभावः अयंब्रह्मसाक्षात्कारःसंवादिभ्रमरू
पइतिकेचित् प्रमारूपइत्यन्ये तथाहि यथाकश्चिन्मणिप्रभा
मणिबुध्याप्रपन्नोभ्रांतएवतथापितद्ग्रहणकालेमणिंलभते।
ततःसंवादिभ्रमः एवंत्वंपदार्थेतत्पदार्थमणिप्रभाभूतेतत्पदार्थ
बुध्याभावयन्व्यवहारतोभ्रांतएवतथापितत्साक्षात्कारकाले
तदनन्यस्वतत्पदार्थस्यसाक्षात्कारोपिसंवादिभ्रमन्यायेनजाय
तइति तथाचवसिष्ठः असत्येसत्यतासाधोशास्त्रतोपदिश्यते
सत्येनध्यानयोगेनप्राप्यतेपदमिति व्यवहारतोनिर्विशे
षत्वरूपत्वेनासत्येष्वात्मनितत्रनिर्विशेषत्वभावनेसत्यानि-
र्विषयोयंध्यानयोगोयोषित्याग्निध्यानवत्तथापितेनशाश्वती
सत्यताप्राप्यतेइष्यतइतिवसिष्ठवाक्यार्थः कल्पद्रुमाचार्यास्तु

+ एवं ब्रह्मज्ञानाधिकारिणो त्रैवर्णिकानां दर्शनोपायमुक्त्वा तदनधिकारिणां स्त्रीशूद्रादीनामप्याह ॥

वेदांतवाक्यजध्यानभावनाजाः परोऽथवा : मूलप्रमाणदार्ढ्येन
भ्रमत्वं प्रतिपद्यते इति श्रुतेः २५ ॥

आनंदी टीका १३

त्वन्मोर्थः एवं प्रकृतिपुरुषयोर्विवेकपरमात्मानं पश्यंति
+ अन्ये त्वेवमजानन्तः तु पुनः अन्ये स्त्रीशूद्रादयः एवमुक्तप्रका
रेणानधिकारादजानन्तः अन्येभ्यः श्रुत्वा श्रावयेच्चतुरो व
र्णान् कृत्वा ब्राह्मणमग्रत इत्यादिस्मरणात् पुराणेतिहा
सविद्भ्यः परमात्मस्वरूपं श्रुत्वा परमेश्वरमुपासते ते स्त्री
शूद्रादयोऽपि च श्रुतिपरायणाः यथाश्रुतार्थचिन्तनतत्
पराः एवं ध्यानादिदर्शनवन्मृत्युमतितरंति [illegible]
[illegible] २५ ॥

रामकंठी टीका १४

अन्ये पुनर्द्विप्रकारेष्वप्युपायेसंप्रतियोग्यताभावादेवं यथोक्तप्रका
रेणात्मानमजानन्तस्तावन्मात्रश्रद्धादिगुणयोगादन्येभ्यो दृष्टा
त्मतत्त्वेभ्यः श्रुत्वा यथायोगममात्रशरणास्तमुपासते
भजन्ते तेऽपि तथाविधाः श्रद्धालक्षणस्य सिद्धिबीजस्य तेनाभू
ताः संतो मृत्युमतितरन्त्येवाऽविनाशिनमात्मानं क्रमेण प्रतिपद्य
न्ते सत्यार्थाभिनिवेशितया यतः सत्यमसत्यं च द्वयमपि संभवति ॥
विद्यानुगृहीताः सत्यमभिनिविशन्ति मायामोहितास्त्वसत्यं ते
च तादृशमेव फलमाप्नुवंति तथा चोक्तममृतं चैव मृत्युश्च द्वयं
देहे प्रतिष्ठितम् मृत्युमापद्यते मोहात्सत्येनामृतमाहितमिति
क्रमेणार्थस्फुटतरं प्रतिपादयितुं यावदध्यायपरिसमाप्तेराह २५

लासिकी [illegible]टीका १५ ॥

एवं प्रत्यभिज्ञानात्मतत्त्वस्य साधनभेदानुक्त्वा तदनभिज्ञस्य श्रवणमात्रेण भजन
श्रवणस्य फलमाह ॥

अन्येतुएवंप्रकृतितोविवेचितमात्मानमप्रत्यभिजानन्तोन्येभ्युक्त
त्वनिष्टेभ्यः श्रुत्वानत्ववथार्थश्रद्धादिगुणयुक्तत्वाउपासतेतेध्या
यन्ति तेचश्रवणमात्रतत्पराः सन्तोमृत्युंसंसारंक्रमेणमोक्ष
लब्धिपुरःसरमतितरन्त्येव नन्वेवंसंसारोत्तारणेप्राकृतपु
रुषविवेकपर्यवसायकत्वमनेनकिमितिसूच्यते किंसाधना
न्तरंनास्तीत्याशंक्याह २५ ॥

पंचोलेटीका

अतिमंदाधिकारिणांनिस्तारोपायमाह अन्येत्विति पुनः अन्येत्वेते
षुविकल्पकेष्वन्यतरेणापियथोक्तमात्मानमजानन्तः अन्येभ्यः आ
चार्येभ्यः श्रुत्वाउपासतेचिंतयन्तितेपिचश्रुतिपरायणाः श्रवणपरा
यणाः तत्वज्ञानविश्वासाः मृत्युसंसारमतितरन्त्येव २५

रमावीरसमिद्बोधिनी

अन्येत्विति अन्येमंदतराः तु पुनः पूर्वेभ्योवैलक्षण्यद्योतनार्थः
एवं यथोक्तमात्मानमजानन्तोन्येभ्य आचार्येभ्य उपदेशेनश्रुत्वो
पासते इदमेवचिंतयन्तस्तिष्ठन्तीत्यर्थः तेपिश्रुतिपरायणाः श्रुतिः
श्रवणंतदुपदेशस्तत्परायणास्तत्पराः श्राद्धालवइत्यर्थः मृत्युसं
सारमतितरन्त्येवतेपीत्यत्रापिशब्दाद्वादशाः स्वयंविचारयन्तीतिकिमु
वक्तव्यं २५ ॥

मधुभाष्य

२५ ॥

भाषा अनुवाद टीका

और अब अतिमन्द अधिकारियों के निस्तार की उपाय कहते हैं कि सांख्ययोग आदि मार्ग से ऐसे उपद्रष्टारूप आत्माको साक्षात्कार करने मे अर्थात् देखने मे जो अशक्त हैं परन्तु और किसी आचार्य का उपदेश श्रवण करिके ध्यानमात्र करते हैं तेउ श्रद्धा सहित उपदेश श्रवण मे तत्पर होय क्रम से मृत्युयुक्त संसार से अवश्य मुक्त होते हैं अर्जुन तुम यह जानो २५

दोहा

और जु यह अध्यानहू भजें सुनि औरहिं सोय सोभी अतिशय तरत है मृत्यु श्रुतिपर होय २५

156

यावत्संजायते किंचित्सत्वं स्थावरजंगमं क्षे
त्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ २६

शांकरभाष्यटीका १

क्षेत्रज्ञेश्वरैकत्वविषयं ज्ञानं मोक्षसाधनं यत् तदमृतमश्नु
त इत्युक्तं तत् कस्माद्धेतोरिति तद्धेतुप्रदर्शनार्थं श्लोकआरभ्यते
यावदिति यावत् यत्किंचित् संजायते समुत्पद्यते सत्वं वस्तु
किमविशेषेणेत्याह स्थावरं जंगमं स्थावरं जंगमंच क्षेत्रक्षेत्र
ज्ञसंयोगात् तज्जायते इत्येवं विद्धि जानीहि हे भरतर्षभ कः पु
नरयं क्षेत्रक्षेत्रज्ञयोः संयोगोऽभिप्रेतो न तावत् रज्ज्वेव घटस्या
वयवसंश्लेषद्वारकः संबन्धविशेषः संयोगः क्षेत्रेण क्षेत्रज्ञ
स्य संभवति आकाशवन्निरवयवत्वात् नापि समवायलक्षणः त
न्तुपटयोरिव क्षेत्रक्षेत्रज्ञयोरितरेतरकार्यकारणभावानभ्यु
पगमादित्युच्यते क्षेत्रक्षेत्रज्ञयोर्विषयविषयिणोर्भिन्नस्वभा
वयोरितरेतरतद्धर्माध्यासलक्षणः संयोगः क्षेत्रक्षेत्रज्ञस्वरूपवि
वेकाभावनिबन्धनो रज्जुशुक्तिकादीनां तद्विवेकज्ञानाभावाद
ध्यारोपितसर्परजतादिसंयोगवत् सोयमध्यासस्वरूपः क्षेत्र
क्षेत्रज्ञसंयोगो मिथ्याज्ञानलक्षणो यथाशास्त्रं क्षेत्रक्षेत्रज्ञलक्ष
णभेदपरिज्ञानपूर्वकं प्राक् दर्शितरूपात् क्षेत्रात् मुञ्जादिवे
षीकां यथोक्तलक्षणं क्षेत्रज्ञं प्रविभज्य न सत्तन्नासदुच्यते इ
त्यनेन निरस्तसर्वोपाधिविशेषं ज्ञेयं ब्रह्मस्वरूपेण यः पश्यति
क्षेत्रंच मायानिर्मितहस्तिस्वप्नदृष्टवस्तुगन्धर्वनगरादिवदस
देव सदिवावभासते इति एवं निश्चितविज्ञानो यस्तस्य यथोक्त
सम्यक्दर्शनविरोधादपगच्छति मिथ्याज्ञानं तस्य जन्महेतोरप
गमात् य एवं वेत्ति पुरुषं प्रकृतिंच गुणैः सह इत्यनेन विद्वा
न् भूयो नाभिजायत इति यदुक्तं तदुपपन्नमुक्तं न स भूयोऽभि
जायत इति सम्यक्दर्शनफलमविद्यादिनिवर्तकं सम्यग्दर्श
ने फलमविद्यादिसंसारबीजनिवृत्तिद्वारेण जन्माभाव उक्तः

जन्मकारणमविद्यानिमित्तकः क्षेत्रक्षेत्रज्ञसंयोग उक्तः २९ ॥

पेक्षधीर्मुक्तिहेतुरिति प्रागुक्तमनूद्य सम्यग्विवेकं जिज्ञासि
तहेतुपरत्वेन श्लोकमवतारयति क्षेत्रेति सर्वस्य प्राणिजातस्य
क्षेत्रक्षेत्रज्ञसम्बन्धाधीना यस्मादुत्पत्तिस्तस्मात् क्षेत्रज्ञात्मकप
रमात्मातिरेकेण प्राणिनिकायस्याभावादेकज्ञानादेव मुक्ति
रित्याह कस्मादिति क्षेत्रक्षेत्रज्ञसम्बन्धमुक्तमाक्षिपति कःपुन
रिति क्षेत्रज्ञस्य क्षेत्रेण सम्बन्धः संयोगो वा समवायो वेति
विकल्प्याद्यं दूषयति न तावदिति द्वितीयं निरस्यति नापीति
वास्तवसम्बन्धाभावेऽपि तयोरध्यासस्वरूपः सोऽस्तीति परिहर
ति उच्यत इति भिन्नस्वभावत्वे हेतुमाह विषयेति इतरेतरत्र
क्षेत्रे क्षेत्रज्ञे वा तद्धर्मस्य क्षेत्रज्ञाधिकरणस्य क्षेत्रज्ञगतस्य चैतन्य
स्य क्षेत्रस्य जाड्यादेश्चाध्यासलक्षणो योगोऽयमित्याह इतरे
ति तत्र निमित्तमाह क्षेत्रेति अविवेकादारोपितः संयोगो दृष्टान्त
माह रज्ज्विति उक्तं सम्बन्धं निगमयति सोऽयमिति तस्य निवृत्तियो
ग्यत्वं सूचयति मिथ्येति कथं तर्हि मिथ्याज्ञानस्य निवृत्तिरित्या
शंक्याह यथेति यथोक्तं विज्ञानमयः प्राणोऽस्मीत्यादि वेदपदार्थविषयं
शास्त्रमनुसृत्य विवेकज्ञानमापाद्य महाभूतादिष्वन्तानां क्षे
त्रात्मुपदृष्टत्वाद्विलक्षणं प्रागुक्तं मुंजेषीकान्यायेन विविच्य सर्वो
पाधिविनिर्मुक्तब्रह्मस्वरूपेण ज्ञेयं योऽनुभवति तस्य मिथ्याज्ञान
मपगच्छतीति सम्बन्धः कथमस्य निर्विशेषत्वं क्षेत्रज्ञस्य सविशे
षत्व हेतोः सत्त्वादित्याशंक्याह क्षेत्रं चेति बहुदृष्टान्तोक्तेर्बहुविध
त्वं क्षेत्रस्य द्योत्यते उक्तज्ञानान्मिथ्याज्ञानापगमे हेतुमाह यथो
क्तेति तथापि कथं पुरुषार्थसिद्धिः कालान्तरे तुल्यजातीय॰
मिथ्याज्ञानोदयसंभवादित्याशंक्याह तस्येति सम्यग्ज्ञानादज्ञान
तत्कार्यनिवृत्त्या मुक्तिरिति स्थिते फलितमाह यस्त्वमिति उत्तर
ग्रन्थमवतारयति व्यवहिते हते कीर्तयति तेष्वादिना अविद्या
नाशनिमित्तमज्ञानं मिथ्याज्ञानं तत् संस्कारश्चादिशब्दार्थः व

व क्षेत्रनिष्ठस्य च

क्षेत्रत्वं

वहितमनूयाख्यवहितमनुवदति जन्मेति २६ ॥

स्वामिकृतटीका ३

तत्र कर्मयोगस्य तत्तीयचतुर्थपंचमेषु प्रपंचितत्वात् ध्यानस्य योगस्य च षष्ठाष्टमयोः प्रपंचितत्वात् ध्यानादेश्च सांख्यविविक्तात्मविषयत्वात् सांख्यमेव प्रपंचयन्नाह यावदित्यादि यावत्समाप्तिः यावत्किंचिद्वस्तुमात्रं सत्त्वमुपपद्यते तत्सर्वं क्षेत्रक्षेत्रज्ञयोः संयोगात् अविवेककृतात्तादात्म्याध्यासात् भवतीति जानीहि २६ ॥ ॥

पिशाचभाष्य टीका ४

स्पष्टार्थम् २६ ॥ ॥

रामानुजभाष्य टीका ५

+ अथ प्रकृतिसंसृष्टस्यात्मनो विवेकानुसंधानप्रकारं वक्तुं स्थावरं जंगमं च सत्त्वं चिदचित्संसर्गजमित्याह +

यावदिति यावत् स्थावरजंगमात्मना सत्त्वं जायते क्षेत्रक्षेत्रज्ञयोरितरेतरसंयोगादेव जायते संयुक्तमेव जायते नवितरेतरवियुक्तमित्यर्थः २६ ॥

अभिनवगुप्तकृतटीका ६

यत्किंचिच्चरमचरं च तत्सर्वं क्षेत्रज्ञातिरेकि न संभवतीत्यत एव सर्वत्रैव समबुद्धिर्योगी आत्मानं न हिनस्ति न दुस्तरे संसारार्णवे पातयति २६ ॥

परमार्थप्रपा टी.

अध्यात्मसांख्येन योगेन ध्यायं मीतिपूर्वकमुक्तं तदेव प्रकटयन्नाह यावदिति यावत्किंचित्सत्त्ववस्तुमात्रं स्थावरं जंगमं वा समुत्पद्यते तत्सर्वं क्षेत्रक्षेत्रज्ञयोर्योगात् अविवेककृतात्तादात्म्याध्यासाद्भवतीति जानीहि प्रकृतिपुरुषयोरनादित्वमित्यादि २६ ॥

श्री॰
गी॰ टी॰
३॰

158

[illegible] ॥

वनमाली टीका ८

प्रकृतिपुरुषेश्वरस्वरूपेण हमेव प्रकं उद्बोधयन्नरष्याह यावदिति यावत्किंचित्स्थावरजंगमात्मकं प्राणिजातं संजायते तावत्सर्वं क्षेत्रज्ञयोः प्रकृतिपरमात्मनोः संयोगात्सर्वथा जायते इति ईश्वराधिष्ठितप्रकृतेः सकाशात्स्थावरजंगमानामुत्पत्तिः उत्पन्नदेहसंबंधादेव जीवस्यैवोपचारिक्युत्पत्तिः २६ ॥

कुसुमवैजयन्ती टीका ९

अथ यथा पूर्वानादिसंयुक्तावेव प्रकृतिपुरुषौ तथापि प्रकृतेः सकाशात्पुरुषो भिन्न एवेति वक्तुं प्रथमं तावत्तयोः संयोगेन सृष्टिमाह यावदिति स्थावरजंगमं स्थावरं वृक्षादिकं त्रिकं तु जंगमं ब्रह्मादिपिपीलिकान्तं यावत्किंचिन्मात्रं प्राणिमात्रं सत्त्वं सत्त्वमयप्रकृतं च संजायते उत्पन्नं भवति हे भरतर्षभ भरतवंशश्रेष्ठ तत्सर्वं क्षेत्रक्षेत्रज्ञसंयोगात्प्रकृतिपुरुषयोरितरेतरसंयोगादेव जायते न तु तयोरेकतरस्मादेवेति त्वं विद्धि जानीहि संबोधनेन यथा राजा भरतः प्रकृतिपुरुषसंयोगादुत्पन्नं जगज्ज्ञात्वा प्रकृतिविप्रयुक्तमात्मानं च विज्ञाय मयि भक्तिं कृत्वा संसारमतरत्तथा त्वमपि तद्देशोत्पन्न एवं करिष्यसि चेत्तरिष्यसि वेति सूचितं २६ ॥

+ पुंसस्स्वात्मिकत्वाद्धि यया मोहः उपपद्यते इत्येतस्या र्थस्यावधारणाय संसारतन्निवर्तकज्ञानयोः प्रपंचः क्रियते यावदध्यायसमाप्ति तत्र कारणं गुणसंगोस्य सदसद्योनिजन्मस्वित्येतत्प्राक् विवृणोति ॥+

मधुसूदनी टीका १०

+ यावत्किमपि सत्त्वं वस्तु संजायते स्थावरं जंगमं वा तत्सर्वं क्षेत्रक्षेत्रज्ञसंयोगादविद्यातत्कार्यात्मकं जडमनिर्वचनीयं सदसत्त्वेन दृश्यजातं क्षेत्रं तद्विलक्षणं तद्भासकं स्वप्रकाशं परमार्थसत्क्षेत्रज्ञं तयोः संयोगादासीत्ततो हि मिथ्यामहिनीयं क्षेत्रक्षेत्रज्ञं तयोः संयोगो मायावशादितरेतराविवेकनिमित्तो मिथ्यात्मा

दात्म्याध्यासः सत्यानृतमिथुनीकरणात्मकः तस्मादेव संजाय
तेतत्सर्वं कार्यजातमिति विद्धि हे भरतर्षभ अतस्स्वरूपाज्ञान
निवर्तनः संसारः स्वरूपज्ञानाद्धि नष्टमर्हतीति स्वर्णादिवदित्य
भिप्रायः २६ [illegible] ॥

सदानंदी टीका ॥

संसारस्य स्वप्नस्येवाविद्यकत्वाद्विद्यया मोक्षोपपत्तिरत्रोच्यते
तस्यार्थस्यावधारणे १ प्रपंचः क्रियते वेदान्तनिवर्तकबोधयोः
स्थावरं जंगमं सत्वं यत्किंचित्सत्वं जायते २ क्षेत्रक्षेत्रज्ञयोस्तस्मा
न्योन्याध्यासात्प्रजायते अनिर्वाच्यमविद्यातत्कार्यं क्षेत्रं जडात्मके
ततोभिन्नं चिदानंदब्रह्मलक्षणसदद्वये उदासीने परे शुद्धे क्षेत्रज्ञो
निर्गुणात्मके ४ तयोर्मायावशादन्योन्याविवेकनिमित्तकः मि
थ्याज्ञानात्मको ध्यासः सत्यानृतगुणात्मकः ५ तस्मादेवाखिलं
सत्वजातं संजायते जगत् अतः स्वात्मापरिज्ञानहेतुको बंध एव
वयः ६ संसाराख्यः सम्यगात्मैकज्ञानान्नश्यति सर्वथा स्वात्मवबोधो
यथा निद्रात्ययेन नश्यति तत्क्षणे ७ तथैवाविद्यको बंधस्तत्वज्ञा
नाद्धि नश्यति अतस्त्वाध्यासिके सर्वमाब्रह्मादितृणावधि ८ स
त्यब्रह्मैव चेत्येवं विनिश्चित्य धिया बुधः क्षेमं हित्वा स्वतः सिद्धं प्र
तिष्ठां प्राप्य निश्चलो जीवन्मुक्तो मुनिर्नित्यकृतकृत्यः सुनिष्ठित

नीलकंठी टीका १२

एवं कार्यकारणकर्तृत्वेरस्य त्रविदविते: पुप्रकृत्योरन्योन्यथ
मीथ्याध्यासकृतस्यैव गुणसंगरूपस्य कारणं गुणसंगोस्येति ना
नाजन्महेतुत्वं चोक्तं न हि शाद्यति यावदिति सत्वं जीवरूप
गुणसंगो त्ररूपाध्यासक्तिर्न किंत क्षेत्रक्षेत्रज्ञयोः संयोगोन्योन्य
स्मिन्नन्योन्यात्मकताध्यासलक्षणो बोध्यः शेषं स्पष्टं २६ ॥

[illegible] टीका २६

[illegible]
[illegible]

+ सर्वमेवजगत्प्रकृतिपुरुषसंयोगजमितिदर्शयति ॥

१३ श्री॰
गी॰ता॰

159

आनंदीटीका १३

~~[illegible]~~
~~[illegible]~~ सुगमोऽर्थः ~~[illegible]~~
~~[illegible]~~ २६ ॥

रामकंठीटीका १४

यावत्परिमाणमपरिसंख्येयं किंचित्सत्त्वं केनचिद्भेदेन प्र
सक्तं प्राणिजातं संभवति विद्यते तत्सर्वं क्षेत्रस्य शरीरभावेन प
रिणतायाः प्रकृतेस्तथा क्षेत्रज्ञस्य नानाशरीरित्वाभिमा
नेन व्यवस्थितस्यात्मनः संयोगादनादिसंबंधप्रवाहरूपादन्यो
न्यसंबंधाद्धेतोर्विजानीहि किमुक्तं भवति अस्यापर्यव
सानस्य नानाचराचरभावरूपस्य प्रपंचस्याविवेचितस्व
रूपतया प्रकृतिपुरुषयोः शरीरशरीरिभावेनैकतया
संबंधो निमित्तमतः शरीरशरीरिणोर्विवेकः प्राप्यः प्र
कारोऽयथाप्रतिपादितस्य ज्ञानस्य तेन शरीरभावपरिण
तप्रकृतिविविक्तस्वरूपे स्ववित्ते आत्मनि वेदकत्वमा
त्रैकलक्षणाव्यभिचारात्सर्वक्षेत्रज्ञप्रतिपत्तिभ्रमनिवृत्ते
र्योगी परमात्मनः स्वाभाविकैकादर्शनात्सम्यग्दर्शी भ
वतीत्याह २६ ॥

लासिकी ~~[illegible]~~टीका १५

यावद्यत्परिसंख्येयं स्थावरं जंगमात्मकं किंचित्सत्त्वं प्राणि
मात्रं संसारे जायते हे भरतर्षभ तत्क्षेत्रक्षेत्रज्ञयोः संयो
गादविवेककृतात्तादात्म्याध्यासाद्भवतीति जानीहि अ
तस्तयोर्विवेक एव साधनानां तदभावेन संसारो नरकेण प्रह
श्योहितः [illegible] २६ ॥

पंचोलीटीका

कर्मयोगस्य तृतीयचतुर्थपंचमाध्यायेषु प्रपंचितत्वात् ध्यान
योगस्य षष्ठाष्टमयोः प्रपंचितत्वात् ध्यानादिसाध्यसांख्यविविक्ता

त्वविषयत्वात्सांख्यमेव सम्यग्दर्शनं प्रपंचयन्नाह यावदि।
ति यावत्समाप्तिः हे भरतर्षभ यावत्किंचित्स्थावरजंगमं महत्पे
सत्त्वं वस्तु संजायते समुत्पद्यते तत्सर्वं क्षेत्रक्षेत्रज्ञसंयोगात् ।
क्षेत्रक्षेत्रज्ञयोर्मिथ्याध्यारोपितसंयोगात् समुत्पन्नं विद्धि
जानीहि २६ ॥

गगवीरसमिद्धोधिनी ॥

सांख्यमेवमप्रपंचयन्नाह यावदिति यावत्किंचित्सत्त्वं वस्तु.
स्थावरं जंगमं वा संजायते समुत्पद्यते तत्सर्वं क्षेत्रक्षेत्रज्ञसं
योगाद विवेककृतात्तादात्म्याध्यासाद्भवतीति जानीहि २६ ॥

मधुभाष्य

यावदित्यादिना आत्मानं वाकर्तारं पश्यति स पश्यति
ततएव च विस्तारोविस्ता
एकस्थं एकस्मिन्नेव विस्तारोस्थितं
रं न च व्ययादिमत्स्येत्याह २६ ॥

160

भाषा अनुवाद टीका

अब तृतीय चतुर्थ पञ्चम अध्याय मे कर्म्मयोग विस्तार से कहा और छटयें अध्याय मे ध्यान योग का विस्तार कहा औ ^अष्टमे
र सांख्यके द्वारा भिन्न किया जो आत्मा सोई ध्यान आदिका वि
षय है इस हेतु सांख्य ही को अध्याय समाप्ति पर्यन्त विस्तार
करिके भगवान कहते हैं कि हे भरतर्षभ अर्जुन जो कुछ
स्थावर जंगम आदि वस्तु उत्पन्न है सो सब क्षेत्र क्षेत्रज्ञ दोनो
के योगसे है अर्थात अविवेककृत जो आत्माका अध्यास है
तिस हेतुसें उत्पन्नमात्र है यह निश्चय जानो २६ ॥

दोहा

जेताहोतहैं जुकछु स्थावर जंगमजोय क्षेत्र क्षेत्रज्ञ योग
सें जान भरत वरसोय २६ ॥

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरं विन-
श्यत्स्वविनश्यन्तं यः पश्यति स पश्यति २७

शांकरभाष्यं टीका १

ग्रन्तस्याविद्यायानिवर्तकं सम्यग्दर्शनमुक्तमपि पुनः शा
ब्दान्तरेणोच्यते समं सर्वेष्वित्यादि सममिति समं निर्विशेषं
तिष्ठन्तं स्थितिं कुर्वन्तं क्व। सर्वेषु भूतेषु ब्रह्मादिस्थावरान्तेषु
प्राणिषु कं परमेश्वरं देहेन्द्रियमनोबुद्ध्यव्यक्तात्मनोऽपेक्ष्य परं
परमस्यासावीश्वरश्च ईशानशीलत्वेति परमेश्वरस्तं सर्वेषु
भूतेषु समं तिष्ठन्तं तानि विशिनष्टि विनश्यत्स्विति तञ्च प
रमेश्वरमविनश्यन्तं इति भूतानां परमेश्वरस्य चात्यन्तवैलक्ष
ण्यप्रदर्शनार्थः कथं सर्वेषां हि भावविकाराणां जनिलक्षणो
भावविकारो मूलं जन्मोत्तरभाविनोऽन्ये सर्वे भावविकारा विना
शान्ता विनाशात् परेण कश्चिदस्ति भावविकारः भावाभावात्
सति हि धर्मिणि धर्मा भवन्त्यतोऽन्त्यभावविकारानुवादेन सर्वे
भाविनः सर्वे भावविकाराः प्रतिषिद्धा भवन्ति सह कार्यैः
तस्मात् सर्वभूतवैलक्षण्यमत्यन्तमेव परमेश्वरस्य सिद्धं निर्वि
शेषत्वमेकत्वञ्च कथञ्च यएवं यथोक्तं परमेश्वरं पश्यति स
पश्यति ननु सर्वोऽपि लोकः पश्यति किं विशेषणेन सत्यं पश्य
ति किन्तु विपरीतं पश्यत्यतो विशिनष्टि सएव पश्यतीति यथा
तिमिरदृष्टिरनेकं चन्द्रं पश्यति तमपेक्ष्यैकचन्द्रदर्शी विशिष्य
ते सएव पश्यतीति तथैवेहाप्येकमविभक्तं यथोक्तमात्मानं
यः पश्यति सविभक्तानेकात्मविपरीतदर्शिभ्यो विशिष्यते स
एव पश्यतीति इतरे पश्यन्तोऽपि न पश्यन्ति विपरीतदर्शित्वा
दनेकचन्द्रदर्शिवदित्यर्थः २७ ॥

आनंदगिरिकृतटीका २

व्यवधानाव्यवधानाभ्यां सर्वानर्थमूलत्वादज्ञानस्य तन्निवर्तकं
सम्यग्ज्ञानं वक्तव्यमित्याह पुनरिति तस्यासकृदुक्तत्वात् तदु

श्री·
गी· टी·
त्र·

162

कार्यप्रकृतिरिहेषम्याशंक्यातिसूक्ष्मार्थस्य शास्त्रभेदेन पुनः पुनर्व
चनमपिकारिभेदादनुग्रहायेति मत्वाह उक्तमिति सर्वत्र परस्यै
कत्वात् नोत्कर्षापकर्षवत्त्वमित्याह सममिति परमत्वमीश्वरः
तच्चोपपादयति देहेति आत्मा जीवस्तमित्यादिनान्वयोक्तिः आ
श्रयनाशादाश्रितस्यापि नाशमाशंक्याह तच्चेति अविनश्यन्त
मिति विशिनष्टि इति सम्बन्धः उभयत्र विशेषणद्वयस्य तात्
पर्यमाह भूतानामिति नाशानाशाभ्यां वैलक्षण्येपि कथमत्य
न्तवैलक्षण्यं सविशेषत्वभिन्नत्वयोस्तुल्यत्वादिति शङ्कते कथ
मिति भूतानां सविशेषत्वादिभावेपि परस्य तदभावादत्यन्तवै
लक्षण्यमिति वक्तुं जन्मनो भावविकारेस्यादित्वमाह सर्वेषा
मिति तत्र हेतुमाह जन्मेति न हि जन्मान्तरेणोत्तरे विकारायु
ज्यन्ते जन्मवतस्तदुपलम्भादित्यर्थः विनाशानन्तरभाविनोपि
विकारस्य कस्यचिदुपपत्तेर्न तस्यान्त्यविकारत्वमित्याशंक्याह
विनाशादिति तस्यान्त्यविकारत्वे सिद्धे फलितमाह अत इति ते
षां जन्मादीनां कार्याणि कादाचित्कसत्त्वानि तदधिकरणानि
तैः सहेति यावत् परमेश्वरस्य भूतेभ्योऽत्यन्तवैलक्षण्यमुक्त
मुपसंहरति तस्मादिति निर्विशेषत्वे सर्वभावविकारविरहि
त्वे कूटस्थत्वमेकत्वमद्वितीयत्वं यः पश्यतीत्यादि व्याचष्टे य
एवमिति उक्तविशेषणमीश्वरं पश्यन्नेव पश्यतीत्युक्तमाक्षि
पति नन्विति ईश्वरपराङ्मुखस्यानात्मनिष्ठस्य तद्दर्शित्वेपि
विपरीतदर्शित्वादीश्वरश्रवणस्यैव सम्यग्दर्शित्वमिति विव
क्षित्वा विशेषणमिति परिहरति सत्यमिति उक्तमेव दृष्टान्ते
न विवृणोति यथेत्यादिना यः पश्यतीत्यादेरर्थमुपसंहरति
इतर इति परवक्तानिष्ठेभ्यो व्यतिरिक्ता इत्यर्थः २७ ॥

स्वामिकृतटीका १

अविवेककृते संसारोद्भव उक्तस्तन्निहतये विविक्तात्मविषयं
सम्यक्दर्शनमाह सममिति स्थावरजंगमात्मकेषु भूतेषु नि
र्विशेषरूपेण समं यथा भवति एवं तिष्ठंतं परमात्मानं यः प

श्यति अतएव तेषु विनश्यत्स्वपि अविनश्यन्तं यः पश्यति स एव
सम्यक् पश्यति नान्यः २७ ॥

पिशाचभाष्यं स्पष्टार्थं २७ ॥

रामानुजभाष्यं

सममिति एवमितरेतरैर्युक्तेषु सर्वेषु भूतेषु देहादिविषमा
काराद्विमुक्तं तत्र तत्र तेहेहमतां स्थितं प्रति परमेश्वरत्वेन स्थिर
मात्मानं ज्ञातृत्वेन समानाकारं तेषु देहादिषु विनश्यत्सु वि
नाशानर्हस्वभावेनाविनश्यन्तं यः पश्यति स पश्यति स आत्मा
नं यथावस्थितं पश्यति यस्तु विषमाकारेण देहादिनात्मा
नमपि विषमाकारं जन्मविनाशादियुक्तं च पश्यति स नित्य
मेव संसारीत्यभिप्रायः २७ ॥

अभिनवगुप्तकृतटी० स्पष्टार्थः २७ ॥

परमार्थप्रपाटी०

सर्वेषु स्थावरजंगमेषु समं सद्रूपेणावर्तमानमीश्वरं यः पश्य
ति स एव पश्यति नान्यः श्रुतिरपि शातपथी यद्वेव समः प्लु
षिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समा
नेन सर्वेण तस्मादेव समाश्नुते साम्नः सायुज्यं सलोकतां
जयति य एवं वेदेति भाष्यं पूर्वं साचामषेति श्रुत्यन्तत्या साम०
स्वरूपमुक्तमिदानीं यद्वेवेति विकल्पेन समत्वमेव सामेत्याह त
नुर्नं प्लुषिणा प्रति हस्तिजीवेन समः समो मशकेनेत्यादि यप०
वे वेद साम्नः परमेश्वरस्य सायुज्यं जयति अथ किंभूतेषु विनश्य
त्सु किंभूतमीश्वरं अविनश्यन्तं यथा यवादिषु नष्टेषु तदंतर्गत
प्रकाशेन न नश्यति अत्र अपश्यमहतो महित्वे इत्यादिश्रुतयः
पूर्वं व्याख्याताः २७ ॥

वनमालीटी०

नरूपद्रष्टेत्याद्युक्तं हरेः सर्वप्रेरकत्वं तत्र युक्तं तारतम्येनेश्वर
कत्वात्तारतम्यापत्तेस्तथाहुः ऋषिभिः सहावस्थानात् तद्दुःखस्था०
दित्यत आह सममिति सर्वेषु दुःखादियुक्तेषु तारतम्ययुक्तेषु

भूतेषु स्थितं परमेश्वरं समं तारतम्यहीनमप्रच्युताद्भुतैश्वर्यं भू-
तेषु विनश्यत्सु क्रियमाणेषु विनश्यन्तं निर्विकारं सदेकाकारं
परमेश्वरमचिंत्याद्भुतानंतशक्तिं यो निरतिशयभक्त्यादिसाधन-
संपन्नः पश्यति स एव तदीयतत्त्वं पश्यति २७ ॥

उत्तमवैजयन्तीटीका

अथात्मनः प्रकृतिवियुक्तत्वं दर्शयन् तज्ज्ञानेन तदेवात्मप्रा-
प्तिमाह द्वाभ्यां समं सर्वेष्विति सर्वेषु स्थावरजंगमेषु जंगमा-
त्मकेषु दीर्घह्रस्वस्थूलकृशादिधर्मैर्विषमाकारेषु भूतेषु प-
रस्परेण पंचभूतमिलितेषु देहादिषु तिष्ठन्तमपि समं ज्ञाना-
त्मस्वरूपत्वेन समानाकारं परमेश्वरं देहेंद्रियमनः प्राणादीनां
स्वामिनं विनश्यत्सु विनश्यन्तं तेषु मूलेषु विनश्यत्सु सत्स्वपि वि-
नश्यन्तं विनाशानर्हस्वभावमेवं जीवात्मानं यः पुरुषः पश्यति
स एव याथात्म्येनात्मानं पश्यति साक्षात्करोति यस्तु देवमनु-
ष्यादिदेहविषयाकारेण पश्यति स न पश्यति तस्य मत्स्वरूपं
संसारनिवृत्तिर्न स्यादित्याशयः २७ ॥

मधुसूदनीटीका

एवं संसारमविद्यात्मकमुक्त्वा तन्निवर्तकविद्याकथनाय य एवं
वेत्ति पुरुषमिति प्रागुक्तं विवृणोति सर्वेषु भूतेषु भवनधर्म-
केषु स्थावरजंगमात्मकेषु प्राणिषु अनेकविधजन्मादिपरि-
णामशीलतया गुणप्रधानभावापन्नत्वाच्च विषमेषु अत एव चं-
चलेषु प्रतिक्षणपरिणामिनो हि भावा नापरिणम्य क्षणमपि
स्थातुमीशते अत एव परस्परबाध्यबाधकभावापन्नेषु एव-
मपि विनश्यत्सु हृष्टनष्टस्वभावेषु मायागन्धर्वनगरादिप्रा-
येषु समं सर्वत्रैकरूपं प्रतिदेहमेकं जन्मादिपरिणामशून्य-
तया च तिष्ठन्तमपरिणममानं परमेश्वरं सर्वजडवर्गसत्ताप्र-
तिप्रदत्वेन बाध्यबाधकभावशून्यं सर्वदोषानास्कंदितमविन-
श्यन्तं हृष्टनष्टप्रायसर्वद्वैतवादेऽप्यबाधितं एवं सर्वप्रकारेण

जडप्रपंचविलक्षणमात्मानंविवेकेनयःपश्यत्येवन्तु
द्यापश्यतिसएवपश्यत्यात्मानंजाग्रद्बोधेनस्वप्नभ्रमं
बाधमानइव अज्ञस्तुस्वप्नदर्शीवभ्रांत्याविपरीतंप
श्यन्नपश्यत्येव अदर्शनात्मकत्वाद्भ्रमस्यनहिरज्जुं
सर्पतयापश्यन्पश्यतीतिव्यपदिश्यते रज्जुदर्शनात्म
कत्वात्सर्पदर्शनस्यएवंभूतान्याज्ञपरकस्यशुद्धात्मद
र्शनात्तद्दर्शनात्मिकाया अविद्यायानिवृत्तिस्ततस्त
त्कार्यसंसारनिवृत्तिरित्यभिप्रायः अत्रात्मानमिति॰

विशेष्यलाभोविशेषणमर्यादया १ १

परमेश्वरमित्येवं वा विशेषणपदं विषमत्वं चंचलत्व बाध्यबाध
कत्वचलत्वलक्षणं जडगतं वैधर्म्यं समत्वतिष्ठत्व परमेश्वरत्वरूपाल
विशेषणवशाद्ध्यात्वा मं ग्रन्थकेनोक्तमिति विवेकः [illegible]
[illegible] २७ ॥

सदानंदी टीका ॥

एवमात्मविषयकं वंधं विद्याबाध्यं प्रदर्श्य च तन्निवर्तकविद्यायाः स्व
यीयाज्ञापुनोच्यते १ स्वतस्तु तः स्वभावेनावैषम्यं विषमेष्वपि ब्र
ह्मादिस्थावरांतेषु भूतेषु विषमेषु च २ परिणामस्वभाववत्त्वा च
चलेषु विरोधिषु बाध्यबाधकरूपत्वाद्दोनं तत्क्षणनाशिष्व च ३ द
ष्वनु स्वभावेषु पुनः समं परमेश्वरं सर्वत्रैकस्वरूपत्वात्प्रतिदेह
मखंडितं ४ निर्विकारं स्थिरं सनातनं कूटस्थं जडवस्तुषु बाध्यबाध
कतारूपमबाध्यं दोषवर्जितं सर्वद्वैतसमवायेऽपि निर्विकल्पम
बाधितं एवं सर्वप्रकारेण जडवैरविलक्षणं ६ ब्रह्मात्मानं वि
वेकेन पश्यति श्रोतव्यस्तथा स एव पश्यत्यात्मानं स कार्याज्ञान
बाधनात् ७ स्वप्रभमेयपश्यात्मकाज्ञानग्रहो यो नष्टकुधीः सम्य
मविति मुक्तमात्मानं पश्यति स्फुटं समदर्शी तु विभ्रान्त्यापश्यन्न
पि न पश्यति तथाक्तोऽभ्रान्तिवाकल्मात्पश्यन्नपि न पश्यति ९ नहि
सर्पेन पारज्ञे पश्यन्नपि स पश्यति तथात्मत्वेन देहादिजडवर्गं
विनश्वरं १० पश्यन्नतो विमूढात्मा चिदात्मानं न पश्यति तत्त्वदर्शी
मुनिस्तस्मात्सम्यक्पश्यति नेतरः ११ एवमत्यन्तभिन्नत्वाद्दृश्यासं
सर्गिणापरं विशुद्धं प्रत्यगात्मानं साक्षात्कृत्याद्वयात्मना १२ स
कार्याज्ञानबाधेन कृतकृत्यो भवेन्नरः १३ ॥ २७ ॥

नीलकंठी टीका १२

समममपरिणामिनं कूटस्थं नित्यं स
तत्त्वज्ञोपायमाह समभिति
वैषम्येषु भूतेषु देहाद्याकारेण परिणतेषु तिष्ठंतं एतेन देहएव तद
पिगमस्थानमित्युक्तं परमेश्वरमंतर्यामिणं सर्गस्थित्यंतकर्ता
रं अतएवा तत्त्वदृष्ट्या विनश्यत्स्वतेषु भूतेषु रज्जूरगादिव
त्कल्पितत्वाददर्शनेन गच्छन्तं विभुत्वादात्मत्वान्निःस्वरूपत्वाच्चा

श्री॰
गी॰ टी॰
३॰

165

विनश्यंतं सर्वास्ववस्थास्वदर्शनमगाच्छंतं यः पश्यति स एव
पश्यति सम्यैः याइत्यर्थः २७ ॥

आनंदी टीका १३

सर्वभूतेषु समं आसीनं संपद्यमानं दिनाशमवलिन नमीश्वरं हन्तारं अभ्युभानां कर्मणामानुरूप्येण फलदातारं पश्यन् आत्मानमात्मनान हिनस्ति श्रोत्रादिने करणान्तरामेवगतिं गच्छतीत्यर्थः २७ ॥

न मे द्वेष्योऽस्ति न प्रिय इत्युक्त्वा सर्वत्र पक्षपातं विना कर्मानुरूपफलप्रापकम् २७ ॥

रामकंठीटीका १४

सर्वेषु स्थावरेषु जङ्गमेषु च हि प्रकारेषु वान्तरभेदादनन्तविशेषेष्वपि भूतेषु समं जन्मादिविकाररहितत्वान्निर्विशेषं कृत्वा तिष्ठन्तं परमार्थनित्यत्वात्सदा वर्तमानमीश्वरं स्वतंत्रं परमात्मानं यो योगी पश्यत्यात्मत्वेन प्रत्यवमर्शात्साक्षात्कुरुते स पश्यति तस्यैव सम्यगर्थदर्शित्वात्पारमार्थिकं द्रष्टृत्वं नह्यतिरिक्तात्मनानात्वदर्शिनः सर्वेमिथ्यार्थदर्शिन इत्यर्थः कीदृशेषु भूतेषु कीदृशं पश्यति विनश्यत्स्वविनाशान्तजन्मादिविकारभागिषु विनश्यन्तं वेदकत्वमात्रादेकरसात्स्वभावादप्रच्यवमानं सहितयाविधयो योगी समुन्मिषितेन यथोपवर्णितेन ज्ञानमयेन चक्षुषा प्रादुर्भावतिरोभावधर्मकसकलवेद्याशाविविक्तस्वरूपं वेदकैकलक्षणं परमात्मानं सर्वावस्थास्वेकतत्त्वमात्मत्वेन साक्षात्कुर्वन्सम्यग्दर्शन उच्यते अन्यस्तु विपरीतदर्शनादित्यर्थः स एव चात्मवानिति

२७ ॥

लासिकी टीका २७ ॥

अथात्मदर्शनस्यावधिमाह

विनाशभागिषु सर्वेषु स्थावरजङ्गमात्मकेषु भूतेषु प्राणिषु समं चिद्रूपतया निर्विशेषं वर्तमानमविनाशिनं स्वात्मा

नमेवेश्वरं योगी सत्वेन प्रत्यवमर्शीत्सादानात्‌कुरुते सएवप
श्यति तस्यैव पारमार्थिकदर्शनभाक्त्वात्सम्यग्दृष्टत्वम् न
त्वन्यतिरिक्तपुरुषकृतदर्शिन २७ ॥

पंचोलेटीका

अविवेककृतं संसारोद्रवमुक्तानत्रिहमये विविक्तात्मविषयं स
म्यग्दर्शनमाह सममिति यः सर्वेषु ब्रह्मादिस्थावरांतेषु समं नि
विशेषं तिष्ठंतं देहादिभ्यः परमीशितारं परमेश्वरं तेषु ब्रह्मादिषु
नश्यत्स्वविनश्यंतं एवं यथोक्तं परमेश्वरं यः पश्यति स पश्यति २८

श्रमावीरसमिद्धोथिनी

सममिति सर्वेषु स्थावरजंगमात्मकेषु भूतेषु सद्रूपेण समं
निर्विशेषं यथा भवति तथा तिष्ठंतं परमेश्वरं यः पश्यति अत
एव तेषु विनश्यत्स्वपि नाशं गच्छत्स्वप्यविनश्यंतमनश्वरं नि
त्यं यः पश्यति स एव पश्यति सम्यग्दर्शित्वान्नान्य एकः परमे
श्वरः सर्वभूतेषु निर्विशेषतया स्थित इति पितृवत्पुत्रवद्भ्रातृवत्वा
दृभिर्न कोपि स्नेहास्पदं न वा तद्व्यतिरिक्तत्वेन कोपि द्वेषास्पदं
तस्मात्सर्वात्मत्वात्तथा एतान्‌ हंतुमिच्छामीत्यादि वच।
नाना मोह नष्टेर्हि विषयता नयोरविषयतोचितेति भावः २७

मधुभाष

२७॥

166

भाषा अनुवाद टीका

अविवेक से संसार उत्पत्ति कहि कर अब संसार की निवृत्ति के
अर्थ प्रकृति से भिन्न स्वरूप जो आत्मा उसका शोभन दर्शन क
हते हैं कि स्थावर जंगमात्मक सर्व भूत मे निर्विशेष कहे स
मान सत्‌रूप समभाव स्थायी परमात्मा को जो मनुष्य देखते
है और भूतोंके विनाशमे आत्माको अविनाशीरूप देखते हैं
तेई शोभन देखते है और कोई नहीं २७ ॥

दोहा

नष्टहि में अवि
समहिं समहि जीवमें रहे परमेश्वर जोय
नष्ट है लखें जो लखहे सोय २७

समंपश्यन्हिसर्वत्रसमवस्थितमीश्वरं
नहिनस्त्यात्मनात्मानंततोयातिपरांगतिं २८

शांकरभाष्य टीका १

यथोक्तस्य सम्यग्दर्शनस्य फलवचनेन स्तुतिः कर्त्तव्येति
श्लोकआरभ्यते समं पश्यन्निति: समं पश्यन्नुपलभमानोहि य
स्मात् सर्वत्र सर्वभूतेषु समवस्थितं तुल्यतयावस्थितमीश्वरं
अतीतानन्तरश्लोकोक्तलक्षणमित्यर्थः समं पश्यन् किन्न हि
नस्ति हिंसां न करोति आत्मना स्वेनैव स्वमात्मानं ततस्तस्मा
त् अहिंसनात् याति परां प्रकृष्टां गतिं मोक्षाख्यां ननु नैव क
श्चित् प्राणी स्वयं स्वमात्मानं हिनस्ति कथमुच्यतेऽप्राप्तं नहिन
स्तीति यथा न पृथिव्यामग्निश्चेतव्यो नान्तरिक्षइत्यादि नैषदो
षः अज्ञानामात्मतिरस्करणोपपत्तेः सर्वोह्यज्ञोऽत्यन्तप्रसिद्धं सा
क्षादपरोक्षादात्मानं तिरस्कृत्यानात्मानमात्मत्वेन परिगृह्य त
मपि धर्माधर्मौ कृत्वोपात्तमात्मानं हत्वान्यमात्मानमुपादत्ते
नवन्तच्चैवं हत्वा तमप्येवं हत्वान्यमित्येवं नवमुपात्तं
मुपात्तमात्मानं हन्तीत्यात्महा सर्वोऽज्ञः योयस्तु परमार्थात्मा असा
वपि सर्वदाऽविद्यया हतइव विद्यमानफलाभावादिति सर्वे
आत्महनाएवाविद्वांसोयस्त्वितरो यथोक्तात्मदर्शी सउभय
थात्मनात्मानं न हिनस्ति ततो याति परां गतिं यथोक्तं फलं
तस्य भवतीत्यर्थः २८ ॥

आनन्दगिरिकृत टीका २

प्रकृतं सम्यक्ज्ञानेन किमित्यपेक्षायां तत्फलोक्त्या तदेव
स्तुत्वा तद्वैतो पुरुषं प्रवर्तयितुं श्लोकान्तरमित्याह यथोक्त
स्येति यस्मादित्यस्य ततःशब्देन सम्बन्धः सर्वभूतेषु तुल्यत
या स्थितं सर्वोक्तलक्षणमीश्वरंनिर्विशेषं पश्यन्नात्मानमा
त्मना यस्मान्न हिनस्ति ततस्तस्मान्मोक्षाख्यां परां गतिं याति
इति योजना तत्पादत्रयेण ज्ञानादज्ञानध्वस्त्यध्वस्त्यन्यपर्यवसो

क्ताज्ञानमिथ्याज्ञानयोरावरणयोर्नाशे सतीतकृष्णो गतिं परमपु
रुषार्थं परमानन्दमनुभवति विद्वानिति चतुर्थपदार्थः नहि
नस्त्यात्मनात्मानमिति यथाश्रुतमादाय चोदयति नन्विति नष्ट
स्यिष्यामिति प्राप्तिद्वारा निषेधवन्नान्तरिक्षे न दिवीति प्राप्त्यभा
वात्र यन्निषेधोऽस्त्वनैष्यतेन तथेहापि प्राप्तिं विना निषेधोन
युक्तिमानित्याह यद्येति अज्ञानामात्मनैवात्महिंसासम्भवाद्वि
दुषां तदभावोक्तिर्युक्तेति समाधत्ते नैषदोषइति संग्रहवाक्यं
विवृणोति सर्वोहीति अनात्मग्राही देहादिविषयः अविद्यया
मारोपितात्महन्तृत्वं निगमयति इत्यात्महेति तथापि पारमा
र्थिकस्यात्मनो हननाभावान्न तेषां सर्वेषामात्महन्तृत्वमित्या
शंक्याह यस्त्विति उक्तरीत्या सर्वेषामविदुषामात्महन्तृत्वमिहे
त्युपसंहरति सर्वइति आत्मनैवात्महननमविदुषां दृष्टं त
दिह विद्वद्विषये शक्यं निषेद्धुमित्याह यस्त्वितरइति उभयथा
पीत्यारोपितारोपाभ्यामित्यर्थः ज्ञानादनर्थभ्रमभ्रंशे एवोक्तप
रमानन्दप्राप्त्या परित्यक्तं युक्तमित्याह ततइति २८ ॥

स्वामिकृत टीका ३

अतश्चैतदाह समभिति सर्वत्रभूतमात्रे समं सम्यक् अप्र
च्युतस्वरूपेणावस्थितं पश्यन् हि यस्मादात्मना स्वेनैवात्मानं
न हिनस्ति अविद्यया सच्चिदानन्दरूपमात्मानं तिरस्कृत्य न वि
नाशयति ततश्च परां गतिं मोक्षं प्राप्नोति यस्त्वेवं न पश्यति स
हि देहात्मदर्शी देहेन सहात्मानं हिनस्ति तथा च श्रुतिः असु
र्यानामते लोका अन्धेन तमसावृताः तांस्ते प्रेत्याभिगच्छन्ति ये के
चात्महनो जनाइति २८ ॥

पिशाचभाष्यं टीका ४

समं पश्यन्निति न हिनस्ति न व्यापादयति २८ ॥

रामानुजभाष्यं टीका ५

समभिति सर्वत्रदेवादिशरीरेषु ज्ञानैकाकारतया नियं
तृतयावस्थितमीश्वरमात्मानं देवादिविषमाकारादिवियु

कंज्ञानैकाकारतया समं पश्यन्नात्मना मनसा स्वमात्मानेन हिनस्ति
रक्षति संसारान्मोचयति यतस्तस्मात्ज्ञानात्तया सर्वत्र समाना।
कारदर्शिनात्परांगतिं याति गम्यत इति गतिः परं गतं यथावस्थित
मात्मानं प्राप्नोति देवाद्याकारादियुक्ततया सर्वत्र विषममात्मानेप।
पश्यन्नात्मानं हिनस्ति भवजलधिमध्ये प्रक्षिपति २८ ॥

अभिनवगुप्तकृत टीका समाप्ता २८ ॥

परमार्थप्रपा टीका

अथ पूर्वोक्तप्रकारस्य प्रयोजनमाह सममिति सर्वत्र सर्वभूतेषु स
स्थितमीश्वरं समं स्वसदृशं पश्यन् तारतम्यविवर्जितं वा पश्यन् स्वात्म
ना सर्वात्मना मनोवाक्कायैरात्मानेन न हिनस्ति हिंसां न करोति तत
स्तेनानुष्ठानेन परां गतिं याति श्रुतिरपि यदैतमनुपश्यत्यात्मानं
देवमंजसा ईशानं भूतभव्यस्य न ततो विचिकित्सतीति भाष्यं यदा
एनमनुभवसिद्धं यतो देवं द्योतमानं भूतस्यातिक्रान्तस्य भव्यस्य भ
विष्यतो वा भूतजातस्य ईशानं नियामकं अंजसा साक्षात्करोति तदा
न विचिकित्सति हिंसावज्ञानिंदारूपां विचिकित्सां न करोति २८

वनमाली टीका

ज्ञानफलमाह सममि।
सर्वनियामकस्य सर्वान्तर्गतस्य निर्लिप्ततया वर्तमाने स
ति सर्वत्र चराचरप्राणिषु सम्यगवस्थितं नियामकत्वेन वर्तमाने स
मं निर्विकारत्वात्तत्पहीनं च निर्दोषं ईश्वरमविंत्यानंतशक्तिं भगवंत
पश्यन्नपरोक्षीकुर्वन्नुमानात्मना मनसात्मानं न हिनस्ति आत्मघा
तफलं नरकरूपं पुनः पुनर्जन्ममरणादिरूपं संसारं न प्राप्नोतीत्य
र्थः कुतो यतस्ततस्तादृशभगवज्ज्ञानात्परां गतिमपुनर्भवरूपां
मुक्तिं याति एतादृशानंताचिंत्यैश्वर्यविशिष्टस्य हरेरपरोक्षज्ञाना
त्तन्महाप्रसादस्ततो मुक्तिरिति भावः २८ ॥

उत्तमवैजयन्ती टीका

किंच समं पश्यंतीति सर्वत्र स्थावरजंगमभूतेषु समं यथास्यात्तथा
सम्यगप्रच्युतस्वरूपगुणतया अवस्थितं तत्तदात्मत्वेन तदाधारत्वे
न तन्नियंतृत्वेन वास्थितमीश्वरं तत्तद्देहादीनां स्वामिनं देहादिल
क्षणं जीवात्मानमात्मना प्राकृतविषयविरहितेन तत्त्वग्राहिणा
मनसा पश्यंस्तु न हि क्रमो मनसैवानुद्रष्टव्यम् इत्यादिश्रुतेः आत्मा।

नंजीवंनहिनस्तिजन्ममरणस्वरूपसंसारेणपातयतिकिंतुततः प्रकृति
विमुक्तात्मज्ञानात्संसाराद्दापरामुत्कृष्टांगतिंगम्यतेपरमेश्वरोऽहंपु
रुषोत्तमः प्राप्यतेनयासागतिस्तांपरांगतंवायाथात्म्यात्मस्वरूपंप्राप्नो
ति २८ ॥

मधुसूदनी टीका

तदेतदात्मदर्शनंफलेनस्तौतिसमंसर्वत्रेति समवस्थितंजन्मादिवि
नाशांतभावविकारशून्यतयासम्यक्तयाचावस्थितमित्यविनाशि
त्वलाभः अन्यत्समंव्याख्यातं एवंपूर्वोक्तविशेषणमात्मानंपश्यन्
अयमहमस्मीतिशास्त्रदृष्ट्यासाक्षात्कुर्वन् नहिनस्त्यात्मनात्मानं
सर्वोह्यज्ञः परमार्थसंतमेकमकर्त्रभोक्तृपरमानंदरूपमात्मानं
अविद्ययासतिभात्यपिवस्तुनिनास्तिनभातीतिप्रतीतिजनन
समर्थयास्वयमेवतिरस्कुर्वन्नसंतमिवकरोतीतिहिनस्त्येवतंत
थाअविद्ययात्मत्वेनपरिगृहीतंदेहेंद्रियसंघातमात्मानंपुरातनं
हत्वानवमादत्तेकर्मवशादितिहिनस्त्येवतं अतउभयथाप्यात्म
हैवसर्वोप्यज्ञः यमधिकृत्ययंशाङ्कंतलावचनरूपास्मृतिः किंते
ननकृतंपापंचौरेणात्मापहारिणा योन्यथासंतमात्मानमन्यथा
प्रतिपद्यतेइतिश्रुतिश्च असुर्यानामतेलोकाअंधेनतमसावृताः
तांस्तेप्रेत्याभिगच्छंतियेकेचात्महनोजनाइति असुर्याःअसुरस्
यस्वरूपभूताःआसुर्यासंपदाभोग्याइत्यर्थः आत्महनइत्यनात्म
निआत्माभिमानिनइत्यर्थः अतोयमात्महासम्यगनात्मनिआत्मा
भिमानंशुद्धात्मदर्शनेनबाधते अतःस्वरूपलाभान्नहिनस्त्या
त्मनात्मानंततोयातिपरांगतिं ततआत्माहननाभावादविद्या
तत्कार्यनिवृत्तिलक्षणांमुक्तिमभिगच्छतीत्यर्थः २८ ॥

सदानंदी टीका

तदेतदात्मविज्ञानंफलतस्तौतिमाधवः तुल्यत्वेनस्थितंयस्मा
त्सम्यग्दर्शीपरेश्वरं १ सर्वभूतेषुपूर्वोक्तविशेषणसम १

स्थिते पश्यन्नात्मानमद्वैतमयमहमितिस्वयं २ साक्षात्कुर्वन्प्रिया
सम्यक्कवमस्मादिज्ञानया स्वेनस्वं नहिनस्त्यस्माद्दर्शनान्मुक्तिमृ
च्छति ३ सर्वोत्तमएकमात्मानमकर्तारमसंगिनं अविद्ययातिरस्कृ
वैहिनस्त्येवात्मनास्वयं ४ परानंदघनं नित्यं विद्यमानमपीश्व
रं आत्मानमनुभवन्मूढोमाययावेष्टितःस्वतात् ५ अविद्याध्यस्त
देहादिमात्मानं संपूर्णानंदं हत्वावर्तनमादत्तेकर्मणानोहिन
स्त्यसौ ६ सर्वोत्तमात्महातस्मात्तथैवस्तःकृतिरसौ असूर्यानाम
मतेलोका अंधेनतमसावृताः ७ तांस्तेप्रेत्याभिगच्छंति ये केचा
त्महनोजनाः योन्यथासंतमात्मानमन्यथा प्रतिपद्यते किंतेनन
कृतंपापंचौरेणात्मापहारिणा अतोयआत्मविद्यकादेहादावा
त्मताभ्रमं ९ स्वात्मबोधेनतत्वेकोत्तानेस्वनहिनस्त्यसौ आत्मा
नोहननादेवसकार्यज्ञानबाधनात् १० ब्रह्मणांगतिमानंदा
वाप्तिरूपांप्रयात्यसौ ११ २८ ॥

नीलकंठी टीका १२

दर्शनफलमाह सममिति स्वदेहेष्वसर्वत्रदेहमात्रेसमवस्थि
तंसमगवस्थितमीश्वरंसमंसमतयापश्यन्हियतःससर्वाभे
ददर्शी आत्मनादेहादिना आत्मानं ईश्वरं नहिनस्ति नानायोगि
सेकटेष्वपाननेनतपीडयतिकिंतुततःपरांगतिंमोक्षंयाति
यत्नापेक्षान्यदर्शीवास्वात्मानमिवान्यमपिनहिनस्ति सर्वत्रा
दयालुर्भवतीतिभावः ततश्चपरांगतिंयाति २८ ॥

आनंदी टीका १३

प्रियस्मात्प्रकृत्यैवदेवैनाखरेणवाह्यभावेनपुरुषःमुमुक्षु
सकर्मकार्यमनेस्वनटनगुणगुणफलदायीपरमेश्वर
नियतमेवाः सर्वैः प्रकारैः यः पश्यतिविचारयतिसएवंवि
चारयन्नात्मानं अकर्तारं पश्यतिमयेदंबंधकंकर्मनकर्तव्य
मितिनिश्चिनोति २९ ॥

आनंदीटी टीका १३

सर्वत्रदेवेसर्गेष्वासुरेवासमंपक्षपातेनविनाशमवस्थितमी
श्वरंकृतानांशुभाशुभानांकर्मणामानुरूप्येणफलदाता
रंपश्यन् आत्मानमात्मनानहिनस्तिअविहितकरणात्संसा
रेनपातयतिकिंतुविहितकर्मकरणात्परामेवगतिंगम
यतीत्यर्थः २८ ॥

रामकंरी टीका १४

तत्रहेतुमाह — यस्माद्यथोक्तप्रकारेणसर्वत्रप्राकृतभावमयदेवयवर्गेसमं
सामान्येनविरूपतयातत्स्वंकृत्वासमवस्थितंस्वभावतएव
सम्यक्कृतप्रतिष्ठमीश्वरंप्रभुंपरमात्मानंपश्यन्नत्यभिज्ञा
नतःकश्चिद्देवात्मनात्मनःस्वयमेवात्मानंस्वस्वभावंनहिनस्ति
प्रत्यभिज्ञानेनसंतमेवंभावंनप्रापयति किमुक्तंभवति
यएवंप्रतिपादितेनज्ञानचक्षुषादेहेदेहत्त्वविविक्तंपरमा
त्मानंनपश्यति सआत्मघातयुक्तोमुख्ययाहत्या यथोक्तं
योन्यथासन्तमात्मानमन्यथाप्रतिपद्यते किंतेननकृतं
पापंचौरेणात्मापहारिणा कश्चैवंविधंपरमात्मस्वरूपं
पश्यतीत्याह २८ ॥

नन्वभित्रात्मदर्शनएव किमितिसम्यग्दर्शनमित्याशंक्याह ॥

लासिकी ~~[struck]~~ टीका १५

+यस्मादात्मानमेवेश्वरंसर्वत्रभूतमात्रेसमंचिद्रूपतयानिर्वि
शेषम् सम्यगप्रच्युतरूपतयास्थितंस्मादात्ताकुर्वन्यः स
एवं खलु आत्मानं आत्मनापरिच्छिन्नपुरुषमात्रज्ञाने
ननहिनस्तिनद्वैधीकरोति अतस्तस्यैवभेदाभावात्मस
द्दर्शनम् नभेददर्शिनः अथतत्फलमाह ततःसम्यग्दर्श
नान्नपरमेवयोगीपरांगतिंमोक्षाख्यांप्राप्नोति [illegible]
[illegible] २८ ॥

पं बोलेटीका

सम्यक्दर्शनस्य फलवचनेनैतं स्तौति समम् इति हि यस्मात्सर्वत्र
सर्वभूतेषु समवस्थितं तुल्यतयावस्थितमीश्वरं समं समतया स्थितं
पश्यन् सः आत्मना आत्मानेन हिनस्ति ततएतात्मनो हिंसनाभया।
मुक्तः श्रेष्ठां मोक्षाख्यां गतिं याति २८

व्रणावीरसमिद्धोधिनी

ऊतश्चात्याह समंपश्यन्निति हि यस्मात्सर्वत्र सर्वेषु स्थावरजंगमा
त्मकेषु भूतेषु समं तुल्यतया समवस्थितं सम्यगप्रच्युतस्वरूपे
णावस्थितं परमेश्वरं पश्यन्नात्मना स्वयमेवात्मानं नहिनस्ति स्वव
र्णोचितधर्मपरित्यागेन न नाशयति अवश्यमनुष्ठेयस्ववर्णधर्म
परित्यागोऽप्यात्महिंसा तां न करोति ततश्चात्महिंसाया अकरणात्प
रां गतिं महापुरुषाभिलषणीयां याति गच्छति प्राप्नोतीत्यर्थः २८

मधुभाष्य

171

भाषा अनुवाद टीका

और उस शोभन दर्शन होनेका कारण क्याहै इस पर कहते
हैं कि सोई शोभन देखने वाला मनुष्य यावत् भूतमात्र मे स
म्यक् प्रकार से अन्तरस्वरूप अवस्थित परमात्मा का दर्शनक
रिके आप अपने को नष्ट नहीं कर्त्ता अर्थात् सच्चिदानन्द आ
त्मा स्वरूप को अविद्या अज्ञानसे आवरण करि के नाश नहीं
करता है तिससे श्रेष्ठगति मुक्तिरूप को प्राप्त होता है और जो
इस पूर्वोक्तरूप से नहीं देखता है सो शरीरही को आत्मा क
रि के देखनेवाला शरीरके सहित अपने को अवश्य ही नष्ट
कर्त्ता है सोई श्रुति कहती हैं कि जो उक्त प्रकार से आत्महा
होता है सोई मरण के अनन्तर प्रकाश शून्य अन्धकार से
आहत्त जो स्थान ताहो को जाता हैं २८ ॥

दोहा

देषत समहि सर्वमे समहे ईश्वर जोय आपआपको नांह
नेंजात परमगति सोय २८॥

172

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः। यः पश्यति तथात्मानमकर्तारं स पश्यति २९

शांकरभाष्यटीका १

सर्वभूतस्थमीशं समम्पश्यन्न हिनस्त्यात्मनात्मानमित्युक्तं तदनुपपन्नं स्वगुणकर्मवैलक्षण्यभेदभिन्नेष्वात्मस्वित्येतदाशंक्याह प्रकृत्यैवेति प्रकृत्या प्रकृतिर्भगवतो माया त्रिगुणात्मिका मायान्तु प्रकृतिं विद्यादिति मन्त्रवर्णात्तया प्रकृत्यैव च नान्येन महदादिकार्यकारणाकारपरिणतया नान्ये व कर्माणि वाङ्मनःकायारभ्याणि क्रियमाणानि निर्वर्त्यमानानि सर्वशः सर्वप्रकारैर्यः पश्यत्युपलभते तथात्मानं क्षेत्रज्ञमकर्तारं सर्वोपाधिविवर्जितं पश्यति स परमार्थदर्शीत्यभिप्रायः निर्गुणस्याकर्तुर्निर्विशेषस्याकाशस्येव भेदे प्रमाणानुपपत्तिरित्यर्थः २९ ॥

आनंदगिरिकृतटीका २

श्लोकान्तरं शंकोत्तरत्वेनावतारयति तमनुवदति सर्वेति प्रतिदेहं धर्माधर्मादिमत्त्वे नात्मनो भेदभानात्तु सम्यक् दर्शनमिति शंकते तदिति स्वगुणैः सुखदुःखादिभिः स्वकर्मभिश्च धर्माधर्माख्यैः वैलक्षण्यात् प्रतिदेहं भेदे नहि शिष्टे स्वात्मस्तु कथं साम्येन दर्शनमित्येतदाशंक्य परिहरतीत्याह एतदिति प्रकृतिशब्दस्य स्वभाववाचित्वं व्यावर्तयति प्रकृतिरिति मायाशब्दस्य मायाविषयीयत्वं व्याह त्रिगुणेति उक्तं परस्य शक्तिर्मायेत्यत्र श्रुतिसंमतिमाह मायान्त्विति अन्येन केनचित् क्रियमाणानि न भवन्ति कर्माणीत्येवकारार्थमाह नान्येनेति किंतदन्यन्निषेध्यमित्युक्ते सांख्याभिप्रेता प्रधानाख्या प्रकृतिरित्याह महदादीनि सर्वप्रकारत्वं कायत्वनिषिद्धत्वादिना प्रकारत्वात्तस्यमात्मानमकर्तृविशेषणः पश्यतीति सर्वेण सम्बन्धः स पश्यतीत्युपक्रमे पुनरुक्ते

विमाशंक्याह समपश्यन्नेति आत्मनो प्रतिदेहं भिन्नत्वे तेषु समद
र्शनमयुक्तमित्युक्तस्य कः समाधिरित्याशंक्याह निर्गुणत्वादिति २९

स्वामिकृतटीका ३

नतु शुभाशुभकर्मकर्तृत्वेन वैषम्ये दृश्यमाने कथमात्मनः सम
त्वमित्याशंक्याह प्रकृत्यैवेति प्रकृत्यैव देहेंद्रियाकारेण प
रिणतया सर्वशः सर्वप्रकारैः क्रियमाणानि कर्माणि यः पश्य
ति तथात्मानं चाकर्तारं देहाभिमानेनैवात्मनः कर्तृत्वेन स्व
तस्त्वेवं यः पश्यति स एव सम्यक्पश्यति नान्य इत्यर्थः २९ ॥

पिशाचभाष्ये टीका ४

प्रकृत्याविद्यया सर्वशः सर्वप्रकारैः २९ ॥

रामानुजभाष्ये टीका ५

प्रकृत्वेति सर्वाणि कर्माणि कारणकर्तृत्वे हेतुः प्रकृतिरुच्यत इ
ति सर्वीकरीत्या प्रकृत्या क्रियमाणानि यः पश्यति तथात्मानम
कर्तारं ज्ञानाकारं स्वपश्यति तस्य प्रकृतिसंयोगात् तदधिष्ठानेन त
जन्मसुखदुःखानुभवस्य कर्मरूपाज्ञानकृतमिति वयः पश्य
ति आत्मानं यथावदवस्थितं पश्यति २९ ॥

अभिनवगुप्तकृत टीका ६

यस्य हीदृशी स्थिरतरा बुद्धिर्भवति प्रकृतिरेवेदं करोति नाहं
किंचिदिति स सर्वं कुर्वाणोपि न करोति एवमकर्तृत्वं यदि वा
विलीनत्वेन सर्वथाध्यायसाभूतानां पृथक्तां विगतामात्मन्ये
व पश्यति आत्मन एव चोदितां तां मन्यते तदापि सर्वकर्तृत्वा
न्न लेपभाक् यतोसौ परमात्मैव शरीरस्थोपि न लिप्यते आका
शवत् २९ ॥

परमार्थप्रपाटीका

अथ न्योत्पत्तिफलमाह प्रकृत्वेति सर्वशः सर्वप्रकारैः क
र्माणि देहेंद्रियादिरूपेण परिणतया प्रकृत्यैव क्रियमाणा
नीति यः पश्यति स एवात्मानमकर्तारं कर्तृत्वाभिमानशू
न्यं पश्यति २९ ॥

वनमाली टीका ८

विकृतेषु नानावस्थेषु भूतेषु विद्यमानेन परमात्मनेन निर्विकार
त्वमुपपाद्य जीवस्यापि स्वतो निर्विकारत्वमाह प्रकृत्येति कर्मा
णि वाङ्मनःकायारभ्याणि सर्वशः सर्वप्रकारैः प्रकृत्यैव देहेन्द्रि
यादिसंघाताकारपरिणतया न केवलपुरुषेण निर्विकारेण
यः पश्यति तथात्मानं स्वतो कर्तारं पश्यति स पश्यति स एवात्मत
त्वसम्यग्दर्शीत्यर्थः अनाद्यविद्यावशाद्देहादावहंममेत्यभिमा
नस्य जीवस्याभिमानिकसंबंधेन वास्तवं कर्तृत्वं न त्वविद्यादेहा
दिसंबंधं विना केवलस्य न च बुद्धिस्थकर्तृत्वं जीवे मिथ्याभूत
मारोपितमिति वाच्यं यत्र यत्र समानसत्ताककर्तृत्वादिरूपो
वेथ तस्यैव हि मो[illegible]तः स्यान्न च वस्तुहेतोर्मोक्षः संभवतीत्यतो नाद्य
विद्यया देहतत्कृतकर्मादौ जीवस्य प्रवाहानाद्यहंममेत्यभिमा
नस्यादृष्टाभिमानसंबंधेन वास्तवमेव कर्तृत्वादिकमपि चक
र्तृत्वं च[illegible]काभिमानाद्यनंतभावेन केवलस्याकर्तृकमिति भावः २९ ॥

ऊसमुवैजयनी टीका ९

नन्वति चोररूपयाति दुर्वृत्यं यात्वमायया पाशुकोऽयं पुरुषः स्वाज्ञा
नेकध्यं पातिकथं वा [illegible] स्वकं रूपं प्राप्नोतीत्यपेक्षायां न तत्र प्रका
रमाह द्वाभ्याम् प्रकृत्यैव चेति प्रकृत्यैव चकारान्मदधिष्ठितया
परमेश्वरप्रेरितया सर्वशः सर्वाणि क्रियमाणानि कार्यकारण
कर्तृत्वे हेतुः प्रकृतिरुच्यते इत्युक्तप्रकारेण प्रकृतिकर्तृकाणि
कर्माणि कर्मेन्द्रियैः कृतानि यः पुरुषः पश्यति विवेकचक्षु

श्री॰
गी॰ टी॰
३॰

174

थाऽवलोकयति तथा तेनैव प्रकारेण कर्तारं निमित्तं विना नाविर्भूत
कर्तृत्वधर्मकं ज्ञानाकारं यद्वा अकर्तारं पूर्वं स्वतन्त्रकर्तृत्वलक्षणप्र
युक्तः कर्तुः कर्त्तीनमकर्तारं प्रयोज्यकर्तारमित्यर्थः अथवा तेनिवृ
तिः प्रकारो वासुदेवस्यादिति स्मरणेः अक्षराणामकारोऽस्मीत्यत्रैवो
क्तत्वाच्च आत्मानं जीवात्मानं च यः पश्यति स एव प्रकृतिवियुक्ता
त्मानं याथात्म्येन पश्यति नान्य इत्यर्थः २९

ननु शुभाशुभकर्मकर्तारः प्रतिदेहं भिन्नाश्चात्मनो विषमाश्च तत्तद्विचित्रफलभोक्तृत्वेनेति कथं सर्वभूतस्थमेकमात्मानं समं पश्यन् हि न हन्त्यात्मनात्मानं इत्युक्तमत आह॥

मधुसूदनी टीका ॥

+कर्माणि वाङ्मनःकायारभ्याणि सर्वशः सर्वैः प्रकारैः प्रकृत्यैव दे
हेन्द्रियसंघाताकारपरिणतया सर्वविकारकारणभूतया त्रिगु
णात्मिकया भगवन्माययैव क्रियमाणानि न तु पुरुषेण सर्व
विकारशून्येन यो विवेकी पश्यति एवं क्षेत्रेण क्रियमाणेष्वपि
कर्मसु आत्मानं क्षेत्रज्ञमकर्तारं सर्वोपाधिविवर्जितमसंगमेकं
सर्वत्र समं यः पश्यति तथाशब्दः पश्यतीति क्रियाकर्षणार्थः
स पश्यति स परमार्थदर्शीति सर्ववेदत् सविकारस्य देहस्य न
तद्धि विचित्रकर्मकर्तृत्वेन प्रतिदेहभेदेऽपि वैषम्येऽपि निर्विशेष
स्याकर्तुराकाशस्येव न भेदे प्रमाणं किंचिदात्मन इति प्रतिपा
दितं प्राक् २९

देवेत्रे

॥ २९ ॥

सदानंदी टीका ॥

शुभाशुभादिकर्तारः प्रतिदेहं विलक्षणाः विचित्रफलभोक्ता
रो विषमाविषमाश्च माः १ कथं समस्तभूतस्थमात्मानं समम्
ईदृशं पश्यन् संहिनस्तीति शंकायामाह मापतिः २ वाङ्मनःका
यकृत्यानि प्रकारैरखिलैरपि देहाद्याकारया मिथ्या त्रिगुणात्म
कया नया ३ मायया क्रियमाणानि नात्मना विक्रियात्मना यः प
श्यति विवेकेन तथा क्षेत्रेण सर्वथा ४ कर्मस्वक्रियमाणेषु क्षे
त्रज्ञमविकारिणं असंगमेकं सर्वत्र यः पश्यत्यक्रियं बुधः स
परमार्थदर्शीति सम्यक् पश्यति वस्तुतः स देहस्याविकारस्यैव

घसंयभिन्नतायतः ९ प्रकृतेर्निर्विशेषस्य नवैषम्येन भिन्नता
१ ११९ ॥ ॥

नीलकंठी टीका १२

ननुविषमस्वभावानिभूतानिकःसमंतुल्यंपश्यत्यशिवशी
नंतुल्यमेवपश्यत्याह प्रकृत्यैवेति सर्वशःसर्वप्रकारेणकर्माणि
वाङ्मनःकायैरारभ्यातिप्रकृत्यैवक्रियमाणानीतियःपश्यति
तथात्मानंचाकर्तारंयःपश्यतिसर्वोपाधिरहितंसएवसर्वत्रस
मंपश्यतीतिपूर्वेणान्वयः २९ ॥

आनंदीटीका १३

हियस्मात्प्रकृत्यैवदेवेनासुरेणवासहभावेनपुरुषःशुभा
शुभंकर्मकार्यतेतस्मात्तदनुगुण[illegible]फलदायीपरमे
श्वरइतिसर्वशःसर्वैःप्रकारैःयःपश्यतिविचारयति
सएवंविचारयन्नात्मानंअकर्तारंपश्यति[illegible]मये
देवपंककर्मनकर्तव्यमितितिनिश्चिनोति २९ ॥

रामकंठी टीका १४

प्रकृतिश्चेतनाचेतनविभागेनपरापररूपाप्राक्प्रतिपादित
द्विप्रकारा परमेश्वरेच्छावशादेवक्षेत्रक्षेत्रज्ञभावेनाऽनादि
ब८ नासंप्रथेनसंबद्धासतीसर्वमिदंजगच्चित्रंविरचयति यथाच
सप्तमेद्विप्रकारायाःप्रकृतेःस्वरूपंप्रतिपाद्योक्तमेतद्योनी
तिभूतानिसर्वाणीत्युपधारयेति अस्मिन्नप्यध्यायेयाव
त्किंचित्संभवतीत्यादिनाश्लोकेनैषयवार्थोभिहितः तदेवं
रूपयाप्रकृत्यैवकेवलयाक्रियमाणानिनिर्वर्त्यमानानिना
नाशरीरसंबद्धत्वेनावभासमानानिकृत्स्नानिकर्माणिवि
विधाःक्रियायआत्मनस्तत्त्वदर्शीपश्यतिसम्यङ्निरूपयति।
सतादृशोयोगीतथानेनप्रकारेणात्मानंब्रह्मस्वरूपस्तस्य
स्वभावंसर्वदाविशुद्धचिन्मात्रस्वरूपेस्वात्मन्येवस्वप्रतिष्ठं

१३ श्री॰ सत्तमकर्त्तारंपरमार्थतः सर्वक्रियास्तव्याप्तत्वात्स्वरूपव्य
गी॰टी॰ तिरिक्तकार्यनिर्हेतुप्रयत्नरहितंपश्यति किमुक्तंभवति ।
यथादेहात्तस्यप्रकृत्यभेदाभिमानेनकर्तृत्वंनतथापरमा
त्मनस्तस्यहिस्वरूपप्रत्यवमर्षमात्रमुख्याकर्तृता देहान्त
स्यकर्तृत्वाभावेननगौणीतियायंकर्तृकार्यव्यपदेशः स
र्वोभेदनिबंधेनाभेदस्त्रमायामात्रविलसितोनवस्तुसत्ता
मवलंबते नतएकस्यतत्वस्यव्यतिरिक्तकार्यनिबंधनंक
र्तृत्वंनवास्तवमितितात्पर्यम्

२९ ॥

प्रत्यभिज्ञात्मदर्शिनोदर्शनं प्रत्याययति ॥

लासिकी ... टीका १५

+प्रकृत्यैवदेहेंद्रियाद्याकारेणपरिणतया सर्वैःप्रकारैः क्रि
यमाणानिकर्माणियःपश्यति तथात्मानंचाकर्तारंयःप
श्यतिसात्मानं करोतिसयवात्मानंपश्यति तेनैवप्रकृतितो
विवेकेनसम्यगात्माहष्टः

२९ ॥

पंचोलीटीका

ननुशुभाशुभकर्मकर्तृत्वेनवैषम्येदृश्यमानेकथमात्मनःसमत्व
मित्याशंक्याह प्रकृत्यैवेति यश्चनः यःसर्वशःसर्वप्रकारैः प्रकृ
त्यात्रिगुणात्मिकयापारमेश्वर्यासमायायैवदेहेंद्रियव्यापारद्वा
राणिकर्माणिक्रियमाणानि नतुपरमेश्वरेणपश्यतितथात्मा
नमकर्तारंसर्वोपाधिरहितंयःपश्यतिसएवपश्यति सर्वेतरस्यार्थः २९
रणवीरसमिद्बोधिनी ॥

सर्वत्रहिवैषम्यस्यदृश्यमानत्वात्कथमात्मनः समत्वमित्याह प्र
कृत्यैवेति प्रकृतिर्मायातयैवमहदादिषोडशकार्यकारणकारण
विणतयाक्रियमाणानिसंपद्यमानानिकर्माणि मनोवाक्कायका

यीषि सर्वथाः सर्वैः प्रकारैः यः पश्यति तथात्मानं क्षेत्रज्ञमकर्ता
रं कर्मणामनिष्पादकं यः पश्यति स एव सम्यक्पश्यति स एव परत
त्वदर्शी प्रकृतिविधीयमानानां कर्मणां क्षेत्रज्ञ आत्मन्यनारोपादि
ति २९

मधुभाष्य

२९॥

भाषा अनुवाद टीका

जो कहो कि शुभ अशुभकर्म के कर्तत्व हेतुसे वैषम्य देख
पड़ती है फेरि आत्माका समत्व कैसे है इसपर कहते हैं कि
जो देह इन्द्रिय आकार मे रूपान्तर को प्राप्त प्रकृति के द्वारा
नाना प्रकार क्रिय माण कर्म होते हैं ऐसा जो मनुष्य देखै
है और अपने को अकर्त्ता देखै है अर्थात् स्थूल शरीर मे अ
हं बुद्धि से आत्मा कर्त्ता होता है और स्वरूप से उसको कर्त्त
त्व नहीं है ऐसे जो मनुष्य देखै है सो सम्यक देखै है सोई
कहा हैं कि यः पश्यति सपश्यति इति २९ ॥

दोहा

मायासें हूं कर्म यह किए जात सभ जोए देषत जो त्यों आ
त्मको अकर्त्ता देषहिं सोए २९

176

यदा भूतपृथग्भावमेकस्थमनुपश्यति । त
त एव च विस्तारं ब्रह्म संपद्यते तदा ३० ॥

शांकरभाष्य टीका १

पुनरपि तदेव सम्यग्दर्शनं शब्दान्तरेण प्रपञ्च्यते यदेति यदा
यस्मिन् काले भूतपृथक् भावं भूतानां पृथग्भावं पृथक्त्व
मेकस्थमेकस्मिन्नात्मनि स्थितमेकस्थमनुपश्यति शास्त्राचार्यो
पदेशतो मत्वात्मानं प्रत्यक्षत्वेन पश्यत्यात्मैव इदं सर्वमिति
अत एव च तस्मादेव च विस्तारमुत्पत्तिमनुपश्यति आत्मनः
प्राण आत्मन आशा आत्मनः स्मर आत्मन आकाश आत्मनस्तेज आ
त्मन आप आत्मन आविर्भावतिरोभावौ आत्मनो भूतात्मनोऽन्न
मित्येवमादिप्रकारैर्विस्तारं यदा पश्यति तदा ब्रह्म संपद्यते
ब्रह्मैव भवति तदा तस्मिन् काले इत्यर्थः ३० ॥

आनंदगिरिकृतटीका २

प्रकृतेर्विकाराणां च सांख्यवत् पुरुषादन्यत्वप्रसक्तौ प्रत्याह
पुनरपीति उपदेशजनितं प्रत्यग्दर्शी तमनुवदति आत्मैवेति
भूतानां विकाराणां नानात्वं प्रकृत्या सहात्ममात्रतया प्रलीनं
पश्यति नहि भूतपृथक्त्वं सत्यां प्रकृतौ केवले परस्मिन्विला
पयितुं शक्यत इत्यर्थः परिपूर्णादात्मन एव प्रकृत्यादेर्विशे
षान्तस्य स्वरूपलाभमुपलभ्य तन्मात्रतां पश्यतीत्याह अत
एवेति उक्तमेव विस्तारं श्रुत्यवष्टम्भेन स्पष्टयति आत्मन इति
ब्रह्मसंपत्तिर्नाम पूर्णत्वेनाभिव्यक्तिः पूर्णत्वहेतोः सर्वस्यात्म
ज्ञानकृतत्वादित्याह ब्रह्मैवेति ज्ञानसमानकाले मुक्तिरिति
सूचयति तदेति ३० ॥

स्वामिकृतटीका ३

इदानीं तु भूतानां प्रकृतितावन्मात्रत्वेनाभेदात् भूतभेदकृतम
प्यात्मनो भेदमपश्यन् ब्रह्मत्वं संपद्यत इत्याह यदेति यदा भूतानां
स्थावरजंगमानां भेदं पृथग्भावं पृथक्त्वमेकस्थमेकस्यामेवेश्वर

शक्तिरूपायां प्रकृतौ स्थितं प्रलये तु पश्यति आलोचयति तत एव
च तस्या एव प्रकृतेः सकाशात् भूतानां विस्तारं सृष्टिसमये तु प-
श्यति तदा प्रकृतितादात्म्यापन्नत्वेन भूतानामप्यभेदं पश्यन् परिपू-
र्णं ब्रह्म संपद्यते ब्रह्मैव भवतीत्यर्थः ३० ॥

पैशाचभाष्ये टीका ४

पुनरपि सम्यग्दर्शनं प्रकारान्तरेण प्रपञ्चयन्ते यदेति एकस्थमका-
स्मिन्नात्मनि स्थितं विस्तारं विकासः ३० ॥

रामानुजभाष्यं टीका ५

यदेति प्रकृतिपुरुषतत्त्वात्मकेषु देवादिषु सर्वेषु भूतेषु सत्सु
तेषां देवत्वमनुष्यत्वह्रस्वत्वदीर्घत्वादिपृथग्भावमेकस्थं प्रकृ-
तिस्थं यदा पश्यति नात्मस्थं तत एव प्रकृतेरेव उत्तरोत्तरपुत्र-
पौत्रादिरूपभेदविस्तारं च यदा पश्यति तदैव ब्रह्म संपद्यते अनव-
च्छिन्नज्ञानैकाकारमात्मानं प्राप्नोतीत्यर्थः ३० ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ३० ॥

परमार्थप्रपाटी ७

एवं सम्यक्त्वाकर्तृत्वदर्शनेन ब्रह्मसंप्राप्तिमुक्त्वाऽधुना जगत एक-
त्वदर्शनादाह यदेति यदा नानानामस्वरूपवतां भूतानां पृ-
थग्भावं पृथगवस्थानमेकस्थं एकस्मिन्समष्टिरूपे तिष्ठती-
त्येकस्थं अनुवेलं पश्यति एकस्मिन्नूर्णनाभौ नानामणीनामिवेत्य-
र्थः ततस्तेन एकरूपेण परमेश्वरेण सह विस्तारं पश्यति ज-
लेन तरंगाणामिव तदा ब्रह्म संपद्यते ब्रह्मैव भवति अथ स-
म्यक्त्वदर्शनेऽपि संसारावस्थायां देहसंबंधनिमित्तेः ३० ॥

वनमाली टीका ८

ईश्वरस्य सर्वाधारत्वसर्वकर्तृत्वादिज्ञानस्य फलमाह यदेति
यदा भूतानां स्थावरजंगमादीनां जरायुजादीनां वा पृथग्भावं

पृथक्त्वम् एकस्थं एकाधारकं अनुतिष्ठन्तं पश्यति पार्थक्ये
न भूतानि हरिस्थानानि पश्यतीति यावत् तत एव हरेः सकाशा
देव च विस्तारं विश्वस्योत्पत्तिं पश्यति तदा तादृशज्ञानकाले ब्रह्म
संपद्यते परमात्मानं निर्मुक्तबंधनः प्राप्नोति ततो मोक्षः स्यादिति
शेषः परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति श्रुतेः
भावप्रधाननिर्देशाद्ब्रह्मत्वमाविर्भूतेन बृहद्गुणावत्वं प्राप्नोती
स्पष्टः स चानेन्यायकल्पन इति श्रुतेः ३० ॥

कुसमवेजपन्ती टीका ९

किं च यदा भूतेति यदायं पुरुषो भूतपृथग्भावं भूतानां देवमनु^
ष्यादीनां पृथग्भावं नानाकारागतं देवत्वमनुष्यत्वदीर्घत्वह्रस्व
त्वस्थूलत्वकृशत्वादिरूपं पार्थक्यमेकस्थं प्रलयकाले प्रकृतिस्थ
मेव नात्मस्थं ततः प्रकृतेः सकाशादेव विस्तारं सृष्टिसमये तेषां
देवत्वादीनां विस्तारं पुत्रपौत्रादिकं भिन्नभिन्नाकारं नीलपीतादि
विविधरूपादिभिर्बहुविस्तारं च पश्यति स प्रकृतिविप्रकृष्टस्वहा
त्मदर्शी पुरुषस्तदात्मदर्शनानन्तरमेव काले ब्रह्म प्रकृतिविवि
क्तमभिव्यक्तापहतपाप्मत्वादिहद्गुणाकं स्वस्वरूपं संपद्यते प्रा^
प्नोति ३० ॥

+ एवमापाततः क्षेत्रभेददर्शनमभ्या^
यतेत्र ब्रह्मभेददर्शनमपाकृतं इदानीं
क्षेत्रभेददर्शनमपि मायिकत्वेनाप
करोति ॥

मधुसूदनी टीका ९

+ यदा यस्मिन्काले भूतानां स्थावरजंगमानां सर्वेषामपि जडवर्गा^
णां पृथग्भावं पृथक्त्वं परस्परभिन्नत्वं एकस्थमेकस्मिन्नेवात्मनि
सद्रूपे स्थितं कल्पितं तस्याधिष्ठानादनतिरेकात् सद्रूपात्मसरूपा
दनतिरिक्तमनुपश्यति शास्त्राचार्योपदेशमनुसृत्यालोचयति
आत्मैवेदं सर्वमिति एवमपि मायावशात् तत एकस्मादात्मन ए
व विस्तारं भूतानां पृथग्भावं च स्वप्नमायादिवदनुपश्यति ब्रह्म
संपद्यते तदा सजातीयविजातीयभेददर्शनाभावात् ब्रह्मैव स
वीनयीभूतं भवति तदा तस्मिन्काले यस्मिन्सर्वाणि भूतान्या^
त्मैवाभूद्विजानतः तत्र को मोहः कः शोक एकत्वमनुपश्यत इति
श्रुतेः प्रकृत्यैव चेत्यत्रात्मभेदो निराकृतः यदा भूतपृथग्भाव

गं　　श्री॰
　　गी॰टी॰
　　३

178

मिथ्यात्वेनात्मभेदोपीतिविशेषः [illegible]
[illegible]
[illegible] ७ ॥

सदानंदी टीका ११

एवमायाततः द्वैतभेददर्शनमादिशन् द्वैतस्याभिदादार्ढ्यार्थं वि
वेकेन निराकृता १ इदानीं मायिकत्वेन द्वैतस्यापि भिदेत्तणो अपा
करोति भगवानीशानोत्तरो ह्यः २ यस्मिन्काले समस्तानां स्थि
रजंगमरूपिणां परस्परविभिन्नत्वमेकस्मिन्नात्मनि स्थिते ३ अ
धिष्ठानादभिन्नत्वे कल्पितत्वेन सर्वतः शास्त्राचार्योपदेशेन स्वानु
भूत्यानुपश्यति ४ मिथ्यात्मना हि सर्वेषां सत्यादिलक्षणो व्या
विद्धाशेषसंसारमात्मानं तेन प्रवर्त्मते ५ न ह्यात्मवान्भवेत्सर्पो र
ज्ज्वा यथासत्रूपिणा आत्मना वितथेनैव सर्पो रज्ज्वात्मनात्मवान् ६
इत्युक्तं वार्तिके द्वैतेन व्याविद्धं वस्तुतोत्यापि अधिष्ठानाद्धि भिन्नत्वं क
ल्पितानां यदा भवेत् ७ कल्पितत्वस्तनिस्तं हि तथाधिष्ठानता ह
तिः सर्पदंडस्रगादीनां कल्पितानां गुणो हयं ८ अधिष्ठानस्वरूपा
त्वान्नभेदोस्ति मनागपि एवं मायावशाज्जगत्स्मादेकस्मादात्मनो ह्या
त् ९ स्थावरजंगमस्य पृथग्भावं प्रकल्पितं सम्यगालोच्य येषु
आत्मैवेदमिति स्फुरतः ११ तस्मिन्काले तु भूतेषु वस्तुतो भेदमतिः पुमा
न् सजातीयविजातीयभेददर्शनबाधतः १२ समस्तानर्थमूलं तत्
द्वैतं नैव भवति स्वयं यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः १३
तत्र को मोहः कः शोक एकत्वमनुपश्यतः प्रकृतैवेति पद्येस्मिन्ना
त्मभेदो निराकृतः १४ यदाश्रुतेति पद्येन वानात्मभेदो निराकृतः १५

नीलकंठी टीका १२

ननु कथं प्रकृतेरेव कर्तृत्वं न त्वात्मन इत्याशंक्याह यदेति भूता
नां वियदादीनां जरायुजादीनां च पृथग्भावं नानाभावेनावस्थानं
परिदृश्यमानमिदं यदा एकस्थं एकस्मिन्नात्मनि स्थितं रज्ज्वां सर्पा
दिवत् कनके वा कुंडलादिवत् विलीनं शास्त्राचार्योपदेशमनुप
श्यति तत एव एकस्मात् विस्तारं च भूतपृथग्भावस्य व्युत्थानाव

स्यामनुस्वमादिवत्पश्यतितदाब्रह्मसंपद्यतेब्रह्मैवभवति ब्र
येभावः कर्तृत्वंहिक्रियावत्वंक्रियाचपरिस्पंदः सचपरिच्छिन्न
स्पष्टप्रभृतस्याप्राकृतस्यबुद्ध्यादेरेवसंभवतिनतुव्यापकस्य
सर्वभूतस्थस्याभावग्रसिष्णोरात्मन इति ३० ॥

आनंदीटीका ३

भूतानांचराचराणांपृथग्भावंनानात्वमेकस्थमेकस्मिन्नेव
परमेश्वरेतिष्ठतीत्यनुपश्यति अद्वैतेजीवानानाकाराःना
नास्वभावाः स्वभावानुरूपंनानाकर्मकुर्वाणाःप्रलयेत्वेक
स्मिन्नेवपरमेश्वरेसंकुचितस्वरूपास्तिष्ठंतीतिविचारयति
चपुनःसर्गादौततएवपरमेश्वरादेवविस्तारंपश्यतिसर्गा
दौहिपरमेश्वरप्रेरिताःप्राक्कर्मानुरूपमाकारस्वभावा
दिनानात्वंप्राप्नुवंतीत्येतत्परमार्थज्ञानंतत्परोयदाभवति
नदैतत्परमेश्वरतत्त्वज्ञानमाहात्म्याद्ब्रह्मसंपद्यतेइतिफल
स्तुतिः ३० ॥

+ इत्थंचावस्थितेप्रकृतिपुरुषविवेकज्ञाना
नंतरंवास्तवब्रह्मतत्त्वैकत्वविषय
ज्ञानमाविर्भवतीतिप्र
तिपादयितुमाह ॥

रामकंठी टीका ४

+ तदानस्मिन्कालेयोगीब्रह्मसंपद्यतेयथोक्तपरमात्मनिपरमा
त्मनिपरमार्थसत्येएकस्मिंस्तत्वेसमापत्तिमाप्नोतिकदाय
स्मिन्कालेविवेकज्ञानेनैर्मल्यात्स्वप्रकाशमानसर्वग
नैकदेशेनतत्स्वरूपोयोगीभूतानांचराचराणामनंतभेदानांपृथ
गभावमन्योन्यव्यतिरिक्तत्वमेकस्थंपश्यत्येकस्मिन्परमात्मनि
स्वभिन्नसंवित्प्रकाशैकरूपेतायदानुभवतियोगी यथा
चसर्वमेकस्थंपश्यतितथैवयदाततएवैकस्मात्तत्त्वाद्विस्ता
रंनानाभावमयंविभूतिवैतत्यंपश्यतितदाब्रह्मसंपद्यते
अनेनापिकिमुक्तंभवति विवेकजज्ञाननिस्नाततनिर्मलम
तिर्योगीयथैकस्मिंस्तत्त्वेलीनंसर्वभेदजातंतदभिन्नंपश्यती
त्यर्थः तथैवतदैवैकंतत्त्वंविश्वभावभेदात्मनाप्रसृतंतत्स्वम
वीत्मनाभावनानात्वप्रतिपत्तिभ्रमोविगलतीत्यर्थः तथा

चायमेवार्थः केनापि विपश्चिता नूदितः यद्यत्पृथक्त्वसं
दिग्धं तत्पृथक्त्वान्न भिद्यते इति नेदं वं विधस्य परमात्म
नो वक्तुं शोभ्यं कालदर्शनप्रसंगात्पुनराह १०॥

नन्वेवंसति भिन्नात्मदर्शिनोऽपि
सम्यग्दर्शित्वान्मोक्षावाप्तिः स्या
दित्याशंक्याह पुनराह॥

लासिकी [illegible]मी टीका १५

+यदायं भिन्नात्मदर्शी योगी भूतानां भेदं वैचित्र्यमेकस्मिन्नात्म
निपश्चेन स्थितं योगाभ्यासतारतम्येनानुपश्यति साक्षात्क
रोति ततएवात्मनस्तेषां विस्तारं पृथक्त्वमुदितं पश्य
ति तदा ब्रह्मसंपद्यते मुच्यते इत्यर्थः नभिन्नात्मदर्शनद
शायाम् [illegible]
[illegible] ३०॥

पंत

पंचोलेटीका

इदानीं भूतानामपि प्रकृतिमात्रत्वेन अभेदात्भूतभेदकृत
मपि आत्मनो भेदमपश्यन् ब्रह्मत्वमुपैतीत्याह यदेति यदाय
स्मिन्काले भूतपृथग्भावं भूतानां पृथग्भावमेकस्मिन्नात्मनि स्थि
तमेकस्थं पश्यति ततश्चात्मन एवाविर्भावतिरोभावादिविस्ता
रं च यदा पश्यति तदा तस्मिन्काले ब्रह्म संपद्यते ब्रह्मैव भवति ३०

रणवीरसमिद्धोयिनी॥

यदायस्मिन्काले भूतानां स्थावरजंगमानां पृथग्भावं परस्पर
भिन्नत्वमेकस्थमेकस्मिन्नात्मनि स्थितमनुपश्यति शास्त्राचार्यो
पदेशमनुसृत्य आलोचयति ततएवात्मनएव च विस्तारं पृथ
ग्भावं च पश्यति प्रलयकाले पृथक्त्वमात्मस्थं सृष्टिकाले आत्म
न एव पृथक्त्वमुद्भूतं प्रकृतिवशात्पश्यति तदा तस्मिन्काले ब्र
ह्म संपद्यते इति ३०॥

मधुभाष्य

३०॥

भाषा अनुवाद टीका

अब प्रकृतिके सकल कार्यभूत औ तिन की कारणस्वरूप प्रकृतिमात्र इस भेदके अभाव हेतुसे जो मनुष्य भूतगत भेदजनित आत्माका भेद नहीं देखें हैं ऐसे मनुष्योंको ब्रह्मभाव प्राप्ति कहते हैं कि जब स्थावर जङ्गम भूतका पृथक भाव कहे भेदको ऐसे देखते हैं कि एक यही परमेश्वर की शक्तिरूप प्रकृति मे सृष्टि स्थिति प्रलय कालमे भूतोंको उत्पत्ति पालन नाश निरन्तर देखते हैं और तत्त कालमे प्रकृतिस्वरूप मात्र देखते भूतोंके अभेददर्शी लोग परिहरणस्वरूप ब्रह्मही हैं ३० ॥

दोहा

भूत पृथकता जबहि जो एकहि मे देषंत ताते हुं विस्तार तब
ब्रह्महि मे वर्तंत ३० ॥

180

अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः
शरीरस्थोपि कौंतेय न करोति न लिप्यते ३१

शांकरभाष्यटीका १

एकस्यात्मनः सर्वदेहात्मत्वे तद्दोषसम्बन्धे प्राप्त इदमुच्यते अ
नादीति अनादित्वादनादेर्भावोऽनादित्वमादिः कारणं यस्य ना
स्ति तदनादि यद्ध्यादिमत् तत् स्वेनात्मना व्येत्ययं त्वनादित्वान्नि
रवयवइति कृत्वा न व्येति तथा निर्गुणत्वात् सगुणोहि गुणव्य
याद्व्येत्ययं तु निर्गुणत्वाच्च न व्येतीति परमात्मायमव्ययोनास्य
व्ययोविद्यत इत्यव्ययोयतएवमतः शरीरस्थोपि शरीरेष्वात्मन
उपलब्धिर्भवतीति शरीरस्थउच्यते तथापि न करोति तदकर
णादेव तत्फलेन न लिप्यते योहि कर्ता सकर्मफलेन लिप्य
ते अयन्त्वकर्ता अतोन फलेन लिप्यतइत्यर्थः कः पुनर्देहेषु
करोति लिप्यते च यदि तावदन्यः परमात्मनो देही करोति लि
प्यते च ततइदमनुपपन्नमुक्तं क्षेत्रज्ञेश्वरैकत्वं क्षेत्रज्ञञ्चापि
मांविद्धीत्यादि अथ नास्तीश्वरादन्योदेही कः करोति लिप्यते चेति
वाच्यं परोवा नास्तीति सर्वथा दुर्विज्ञेयं दुर्वाच्यञ्चेति भगवत्
प्रोक्तमौपनिषदं दर्शनं परित्यक्तं वैशेषिकैः सांख्यार्हतबौद्धैः
श्च तत्रायं परिहारोभगवता स्वेनैवोक्तः स्वभावस्तु प्रवर्ततइ
ति अविद्यामात्रस्वभावोहि करोति लिप्यतइति व्यवहारोभवति
न तु परमार्थतएकस्मिन् परमात्मनि तदस्त्यतएतस्मिन् पर
मार्थसांख्यदर्शने स्थितानां ज्ञाननिष्ठानां परमहंसपरिव्राजका
नां तिरस्कृताविद्याव्यवहाराणां कर्माधिकारोनास्तीति तत्र त
त्र दर्शितं भगवता ३१ ॥ ॥

आनंदगिरिकृतटीका २

परिहृणीतेन सर्वात्मत्वे प्राप्तमात्मनोदेहादिगतेन कर्तृत्वादि
ना तद्वत्वं दृष्टं हि पवित्रस्यापि पञ्चगव्यादेरपवित्रसंसर्गात्
तद्दोषेण दुष्टत्वमित्याशंकामनूद्योत्तरत्वेन श्लोकमवतारयति

श्री॰
गी॰टी॰
३॰

पकस्येति अनादित्वमेव साधयति आदिरिति तथापि किं स्यादि
त्याशंक्य कार्यत्वकृतव्ययासंभावः सिध्यतीत्याह यद्धीति तथापि
गुणापकर्षहारको व्ययो भविष्यति नेत्याह तथेति निरवयवत्वा
देव अवयवह्रासकस्य निर्गुणत्वाद्गुणह्रासकस्य च व्ययस्याभा
वेपि स्वभावतोव्ययः स्यादित्याशंक्याह परमात्मेति परमात्मनः
स्वतः परतोवा व्ययाभावे फलितमाह यतइति स्वमहिम्नि प्र
तिष्ठस्य कथं शरीरस्थत्वे तत्राह शरीरेष्विति सर्वगतत्वेन स
र्वात्मत्वेन च देहादौ स्थितोपि स्वतोदेहाद्यात्मना वा न करोति
कूटस्थत्वादेहादेश्च कल्पितत्वादित्यर्थः कर्तृत्वाभावेपि भोक्तृ
त्वं स्यादित्याशंक्याह तदकरणादिति तदेवोपपादयति योही
ति परस्य कर्तृत्वादेरभावे कस्य तदिदमिति पृच्छति कः पु
नरिति परस्मादन्यस्य कस्यचिज्जीवस्य कर्तृत्वादीत्याशंक्यामा
नुवदति यदीति तस्मिन् पक्षे प्रक्रमभङ्गः स्यादिति दूषयति
ततइति ईश्वरातिरिक्तजीवानङ्गीकारात्तदुपक्रमविरोधोस्तीति
शङ्कते अथेति नहि प्रतीतकर्तृत्वादेरधिकरणं वक्तव्यमिति
हर्षवायाह कइति परस्यैव कर्तृत्वाद्यापारन्त्वान्नास्ति वक्तव्यमि
त्याशंक्याह परो वेति नास्तीति वाच्यमिति हर्षेण सम्बन्धः
नहि कर्तृत्वादिभाक्त्वे परस्यास्मदादिवदीश्वरत्वमिति भावः प
रस्यान्यस्य वा कर्तृत्वादावविशिष्टे शरीरस्थोपीत्यादिश्रुतिमूल
मपि ज्ञातं वक्तुं त्वाशक्यत्वात् त्याज्यमेवेति परीक्षकंमन्योप
संहरति सर्वथेति परस्य वस्तुतोकर्तृत्वे भोक्तृत्वाविषया तदा
रोपादादेयमेव भगवन्मतमिति परिहरति तत्रेति तमेव प
रिहारं प्रपञ्चयति अविद्येति व्यावहारिके कर्तृत्वादावविशि
ष्टे पारमार्थिकमेव किन्नेष्यते तत्राह नतिति वास्तवकर्तृत्वा
द्यभावे लिङ्गमपन्यस्यति यतइति ३१ ॥

स्वामिकृतटीका १

तथापि परमेश्वरस्य संसारावस्थायां देहसंबंधनिमित्तैः कर्मभि
र्लसत्फलैश्च सुखदुःखादिभिर्वैषम्यं दुःपरिहरमिति ज्ञतःस्म

सांदि

दर्शनेनत्राह अनादित्वादिति यदुत्पत्तिमत्तदेवहिव्ययंतिविना
शमेति यच्चगुणवत्तस्यगुणनाशेव्ययोभवति अयंतुप
रमात्मानादिर्निर्गुणश्चातोव्ययोविकारीत्यर्थः तस्माच्छरीरेस्थि
तोपिकिंचिन्नकरोतिनचकर्मफलेलिप्यते ३१ ॥

पिशाचभाष्य टीका ४

शरीरस्थः शरीरउपलभ्यमानः ३१ ॥

रामानुजभाष्य टीका ५

अनादीति अयंपरमात्मादेहान्निःकृष्टस्वभावेननिरूपितः शरी
रस्थोपिअनादित्वादनारभ्यत्वादव्ययः निर्गुणत्वात्सत्वादिगुणर
हितत्वान्नकरोतिनलिप्यतेदेहस्वभावेनलिप्यतेनवाप्यते
[illegible]
[illegible] ३१ ॥ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ३१ ॥

परमार्थप्रपाटीका ७

कर्मभिस्तत्फलैश्चसंबद्धःस्वादिभिर्वैषम्यंदृष्टाविहरमित्याह अनादित्वा
दिति अयंपरमात्माशरीरस्थोपिनकरोति अकर्तैवास्तिनतत्फलेलिप्य
ते कुतःअनादित्वात् निर्गुणत्वाच्च यदुत्पत्तिमत्तन्नश्यति तथायद्गुण
वत्तद्गुणक्षयेउपक्षीणंभवति परमात्मातुअनादिर्निर्गुणश्चातोऽव्य
यः अविकारोअतो नलिप्यते ३१ ॥

वनमाली टीका ८

नानाविकारवत्सुस्थितस्यनिर्विकारत्वमत्यंतासंभाव्यमानमि
तिपुनरपीश्वरस्यनिर्लेपत्वमाह अनादित्वादिति अनादित्वा
त् आदिमत्पत्तिलक्षणत्वात् निर्गुणत्वात्प्राकृतगुणशून्य
त्वादव्ययःषड्विधविकारशून्यःशरीरस्थोपितियामकतया
जीवदेहस्थोपिकर्तापिलोकवदनित्यक्रियाशून्यत्वाद्विंस्प
शक्तिमत्वाच्चनकरोत्युदासीनत्वान्नलिप्यते जीवस्यस्वतोव्यय
त्वेपिदेहाभिमानेनसादित्वात्तथादेहाद्यात्मकसत्वादिगुणसं
वेधाच्चतदनादिरूपोनाशोप्यस्तितनएवकर्मलेपोस्तीतिभा

श्री॰
गी॰ टी॰
३

वः यद्वा पुरुषएवेदं सर्वमिति श्रुतेः सर्वस्य ब्रह्मात्मकत्वात्कथं
भूतानां ततः पृथक्त्वमत आह अनादित्वादिति अत्र शरीरस्य श
होजीवत्वाची अयं परमात्मा शरीरस्थो जीवो न भवति कुतः प
रमात्मनोनादित्वात् देहादिसंबंधेनाणुत्वस्य संभवात् निर्गुण
त्वात् सर्वात्मना त्रिगुणसंबंधाभावात् अव्ययः देहादिसंबंधे
नापि नाशशून्यः ईश्वरस्तु सर्वं करोति ईश्वरो न चलिप्यते जीव
स्य तु तादृशत्वात् तथा च विरुद्धधर्माविकरणत्वेन जीवेशयो
र्भेदसिद्धिः यदेश्वरो जीवाभिन्नो न भवति तदा किमु वाच्यं जडा
भिन्नो न भवतीति सूचनायापि शब्दः ३१ ॥

उत्तमवैजयन्ती टीका ४

न तु प्रकृतिवियुक्तात्मदर्शनादेवायं कृतार्थो भवतीत्युक्तिरयु
क्तमेतेष्वपवर्भूतेभ्यः स्वस्यात्यन्तान्यत्वानुविनश्यति न श्रमसं
सारीति श्रुतेर्जीवस्य देहेन सहोत्पत्तिविनाशश्रवणात्वादितिचे
त्तत्राह अनादित्वादिति हे कौन्तेय अयं जीवात्मा शरीरस्थोप्यना
दित्वादनारभ्यत्वात्परं देहाद्यतिरिक्तः अपोऽव्ययत्वप्रधानय
मेत्वाद्विनाशरहितः निर्गुणत्वात्सत्वादिप्राकृतगुणरहितत्वा
त्स्वाभाविकत्वानानेदादिगुणकत्वात् प्राकृतगुणकृतं यज्ञत्व
द्वादिकं कर्म न करोति अतो देहेन्द्रियादिस्वभावेनोत्पत्तिविनाश
रूपेण न लिप्यते न वध्नाते श्रुत्यर्थस्त्वौपचारिकत्वेन ज्ञेयः ३१

आत्मनः स्वतन्त्रकर्तृत्वेपि शरीरसंबंधोपाधिकं कर्तृत्वं स्यादित्याशंकामपनु दन्पः पश्यति तथात्मानं अकर्तारं स पश्यतीत्यनेन हि हृतेति ॥

मधुसूदनी टीका ४

+ अयमपरोक्षः परमात्मा परमेश्वराभिन्नः प्रत्यगात्मा अव्ययः
न व्येतीत्यव्ययः सर्वविकारशून्य इत्यर्थः तत्र व्ययो द्वेधा धर्मि
स्वरूपस्यैवोत्पत्त्यादिमत्तया वा धर्मिस्वरूपस्यानुत्पाद्यत्वेपि ध
र्माणामेवोत्पत्त्यादिमत्तया वा तत्राद्यमपाकरोति अनादित्वादि
ति आदिः प्रागसत्वावस्था सा च नास्ति सर्वदा सत आत्मनः अत
स्तस्य कारणाभावाज्जन्माभावः नह्यनादेर्जन्म संभवति तदभा
वे च तदुत्तरभाविनो भावविकारा न संभवन्त्येव अतो न स्वरूपे
णाव्येतीत्यर्थः द्वितीयं निराकरोति निर्गुणत्वादिति निर्धर्मकत्वा

दित्यर्थः नहि धर्मिणामविकृतस्य कस्यचिद्धर्मस्योपैति अपैति वा यधर्मे
धर्मिणोस्वात्मात् अयं तु निर्धर्मकः अतो न धर्मद्वारापि व्येती
त्यर्थः अविनाशी वा अयमात्मानुच्छित्तिधर्मेति श्रुतेः यस्मादे
व जायतेऽस्ति वर्धते परिणमते पक्षीयते विनश्यतीत्येवं षड्भाव
विकारशून्यः सर्वव्यापिकेन संबंधेन शरीरस्थोपि न स्मिन् ऊर्वे
तिश्च पमात्मानं करोति यथा व्यापिकेन संबंधेन जलस्थः सवि
ज्ञातस्मिन् चलत्यपि न चलमेव तद्वत् यतो न करोति किंचिदपि
कर्म अतः केनापि कर्मफलेन न लिप्यते यो हि यत्कर्म करोति स
तत्फलेन न लिप्यते न त्वयमकर्तृत्वादित्यर्थः इच्छाद्वेषः सुख
दुःखमित्यादीनां देहधर्मकथनात् प्रकृत्यैव च कर्माणि क्रिय
माणानीति मायाकार्यत्वव्यपदेशात् ज्ञानमेव परमार्थदर्शिनाम
वैकर्माधिकारनिवृत्तिरिति प्रागव्याख्यातं एतेनात्मनो निर्धर्म
त्वकथनात्स्वगतभेदोपि निरस्तः प्रकृत्यैव च कर्माणीत्यत्र सजा
तीयभेदो निराकृतः यदाभूतपृथग्भावमित्यत्र विजातीयभेदो
निराकृतः अनादित्वान्निर्गुणत्वादित्यत्र स्वगतो भेदोपि निरस्तः इ
त्यद्वितीयं ब्रह्म आत्मेति सिद्धं [illegible] ३ ॥

सदानंदी टीका ॥

न्वात्मनः स्वतो मास्तु कर्तृत्वमविकारिणः देहाद्यौपाधिकं किं
न कर्तृत्वं स्याद्देहात्मनः १ इत्याशंक्याम संबंधात्स्वेनेधुना अ
परोक्षोप्यात्मायं प्रत्यक्षादद्वयोस्तपः निर्विकारोप्यनादित्वा
स्वरूपेण न जन्मभाक् निर्धर्मकत्वान्नास्य जन्मधर्मनिमित्तके
३ प्रागसत्वेन वा सत्यस्याबाधितस्य जनो जातिः न ह्यनादेर्भवेज्जन्म
तद्भावान्नवेतरे ४ विकाराः संभवंत्यस्य कूटस्थस्याद्वयस्य च
अविनाशीवनिष्कन्मानिर्धर्मकत्वेपरितः यद्यप्यव्यापिकेना
सौसंबंधेन शारीरगः तथापि तत्त्वात्माकुर्वन्नपि शरीरके ९ प
व्यापिकसंबंधाज्जलस्थोपि दिवाकरः चलत्यपि जलेनासौ
चलत्येवं विदक्रिया यतः किंचिन्न कर्मान्नाकरोति प्रत्यगद्वयः

श्री॰
गी॰ टी॰
३॰

183

अतः कर्मफलेनासौ केनचिच्चोपलिप्यते ८ करोति यो हि यत्क
र्म तत्फलेन स लिप्यते न त्वयं निर्विकारात्मा निष्क्रियो निर्मलो वि
भुः ९ इच्छाद्वेषः सुखं दुःखमित्यादीनां प्रस्फुटं देहत्रयमेतत्कथ्य
नाहं मे कोऽपि न चात्मेति १० प्रकृत्यैव च कर्माणि त्वत्र कर्तृत्वमा
त्मके अविद्याकर्तृकं प्रोक्तं न किंचित्कर्म विद्यते ११ अत एव पर
ब्रह्मप्रत्यगात्मैक्यदर्शिनां सर्वकर्माधिकारस्य निवृत्तिः प्रागुदी
रिता १२ निर्धर्मकत्वकथनान्निरस्ता स्वगताभिदा प्रकृत्यैवेति
विधत्वात्सजातीयभिदोज्झिता १३ यदा भूतपृथग्भावमित्यत्र ह
रिणा स्वयं विजातीयभिदा ध्वस्ता नानार्थसमाश्रया १४ अना
दित्वान्निर्गुणत्वादित्यत्र स्वगताभिदा विध्वस्तात्यद्वितीयेन ब्रह्मै
वात्मेति निर्णयः १५ ३१ ॥

नीलकंठी टीका १२

नन्वात्मनो विभुत्वेन रूपेण कर्तृत्वे मास्त्वीकारि देहाद्यवच्छिन्ने
न तद्रूपेण तद्धक्तव्यमन्यथानुभवविरोधादित्याशंक्याह अना
दित्वादिति अयं सर्वेषां प्राणिनां नित्यापरोक्षः परमो देहादिभ्यः
परमेभ्य आत्मभ्योऽन्यः कोशपंचकातीत आत्मा परमात्मा अव्य
यः न व्येति परिच्छिद्यते देशतः कालतो वस्तुतश्चेत्यव्ययः अव्य
यत्वे हेतुः अनादित्वादिति यद्धि आदिमदाकाशादि तद्व्येति न त्व
यं व्येति अनादित्वात् नन्वनादिभावस्यानेन्यनियमेनात्मनः का
लतः परिच्छेदो मास्तु तथा देशतः परिच्छिन्नस्य नाशावश्यंभा
वादनादित्वायोगाद्देशतोऽपि परिच्छेदो ब्रह्मणो मास्तु ननु प
रमाणुवद्भविष्यतीति चेन्न दशदिगवच्छेद्यत्वदेशभेदवतो
द्रव्यस्य निरवयवत्वरूपाणुत्वासिद्धेः न हि परमाणोः पूर्वादिगव
च्छिन्नो भागः पश्चिमया व्यवच्छेत्तुं शक्यते अनुभवविरोधात् दे
शतः परिच्छेदाभावादेव सजातीयविजातीयवस्तुसद्भावकृतः
परिच्छेदोऽपि मास्तु तथापि विचित्रशक्तियुक्तस्य अभिनवप्रपंच
रचनापटीयसः परस्य सर्वेश्वरत्वसर्वज्ञत्वादिगुणयुक्तस्य स्वग
तभेदोऽवश्यंभावी स्वशक्तिमायावच्छिन्नेन रूपेण जगत्कर्तृ

त्वे देहावच्छेदेनाग्निहोत्रादिकर्तृत्वे वाचावश्यमेव वक्तव्यमित्याशंक्या
ह निर्गुणत्वादिति यो हि गुणवानाकाशादिः स संयोगविभागे
र्वोपाधिं प्राप्य स्वगुणं शब्दमाविष्करोति न तु स्वस्मिन्संलग्नेन स्पर्शे
केनचिदपि उपाधिना दर्शयितुमीष्टे एवं आत्मा सर्वगुणही
नः सन्नप्यवच्छेदलाभकर्तृत्वादिकं गुणमाविष्कर्तुं न समर्थ
इति फलितमाह शरीरस्थोपीति स्पष्टार्थमेतत् ३१ ॥

आनंदीटीका ३२

आदिमान्हि महदादिः सगुणेनाव्ययेन विकारेण च सहितो भव
ति अयमीश्वरस्तु नेदृशः क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु
त्सूक्ष्मशरीरस्थोप्यन्तर्यामितया तत्तत्कर्मदर्शनाय तेष्वेतेषु
शरीरेषु वर्तमानोपि परमेश्वरो न करोति न लिप्यते निर्गुणित
चैतत् न च मां तानि कर्माणि निबध्नन्तीति नवमे निर्लेपत्व
मीश्वरस्य दर्शयति ३१ ॥

रामकंठी टीका ३४

अयं भगवान्परमात्मा परं तत्त्वं स्वभावत एव सर्वत्र सर्वदा चा
व्याहतसद्भावः ततश्च सर्वस्मिन्शरीरे स्थितिरव्याधितैव तथा
पि च तत्रस्थोपि प्रतिपादितैकस्वरूपमात्रे स्थितत्वान्न क
रोति न भिन्नं कार्यनिर्बन्धनं कर्तृत्वमनुभवति ततश्च का कथा
कर्मफलानुभवस्येति न लिप्यते यस्मादनादित्वात्सर्वका
रणत्वादत एव निर्गुणत्वाद्गुणेभ्य उदयव्ययधर्मकेभ्यो नि
ष्क्रान्तत्वान्न हि भक्तस्वभावत्वादव्ययो गुणव्ययेन विनाश
रहितः यद्यप्यनादित्वमव्ययत्वं च क्षेत्रज्ञस्याप्युक्तं तथा
पि तस्य गुणमय्या प्रकृत्या संबद्धस्य तत्स्वरूपानुविधायित्वा
त्तदुदयव्ययधर्मकत्वमुपचर्यते आविद्योदयात् परमा
त्मनस्तु स्वरूपचारोपि नास्य ततः क्षेत्रज्ञवत्तस्य कर्तृत्वं न कर्मफलसंयो
गः

३१ ॥

नतु चेतनात्मग्रहं हि विनाज / डायाः प्रकृतेः कर्तृत्वात्तु / प्रपत्ते रात्मन पूर्वकर्तृत्व / मायातमित्याशंक्याह ॥

लासिकी [illegible]टीका १५

अयंपरमात्मा कूटस्थः स्वभावतोऽव्ययः निर्विकारः शरीरे स्थितोपि वर्त्तमानोपि अनादित्वादुत्पत्तिविहीनत्वान्निर्गुणत्वात्सत्वादिरहितत्वान्न करोति नच कर्मलिप्यते अभिमानकलंकितः क्रियते यत्तत्कर्म भवति नकेवलायाः प्रकृतेः कर्तृत्वम् किंतु तादात्म्यमापन्नस्य देहस्यादिमत्वात्सत्वादिगुणयुक्तत्वाच्च कर्तृत्वम् नात्मनः अत्रार्थे पंचं धन्यायो दर्शितः [illegible] ॥३१॥

पंचोलेटीका

एकस्यात्मनः सर्वदेहात्मत्वेन व्याप्तिमंसारावस्थायां देहसंबंधनिमित्तैः कर्मभिः तत्फलैश्च सुखदुःखादिभिः वैषम्यसंप्राप्तिकृतः समदर्शनमिति तदाह अनादित्वादिति हे कौंतेय अयंपरमात्मा अनादित्वात्कारणरहितत्वान्निरवयवत्वाच्च स्वरूपतो व्येतीति नाव्ययः तथा निर्गुणत्वात् गुणव्ययेनापि न व्येतीति नेन वअव्ययः शरीरे उपलभ्यमानत्वात् शरीरस्थ उच्यते शरीरस्थोपि न करोति अकरणात्कर्मफलेन न लिप्यते यः कर्त्ता स कर्मफलेन न लिप्यते अयमात्मा न तथा न भवति असंगत्वात् ३१

यशोवीरसमिद्दीपिनी

यद्यप्यात्मनः स्वतः कर्तृत्वं कथं न स्यादित्याशंकापनोदनाय अकर्तृत्वं पुनः साधयति अनादित्वादिति अयंपरमात्मा प्रत्यगात्माव्ययो न व्येति विकारं न गच्छतीत्यव्ययः षड्भावविकाररहित इत्यर्थः विकारो द्विधा धर्मिस्वरूपस्यैवान्यथात्वादिमत्तया तद्धर्माणामन्यथात्वादिमत्तया वा तत्राद्यं निराकरोति

अनादित्वादिति आदिरुत्पत्तिः प्रागभावावस्था नादिरनादिरनादेर्भा
वोनादित्वं तस्मात्प्रागभावस्यान्यत्वात् प्रागभाववतो हि वस्तुन उत्प
त्यादिमत्त्वमात्मनस्तु सत्तात्मकत्वात्तदभावोतः कारणाभावे जन्मा
भावात्तदुत्तरकालभाविभावविकाराणामपि परमात्मनि न संभवो
स्तिइति स्वरूपेण न विकारमेति द्वितीयमपनुदति निर्गुणत्वादिति
धर्मरहितत्वाद्धर्मिणो निर्विकारत्वाद्धर्मधर्मिणोस्तादात्म्याद्धर्मा
णामप्यपायानपायेन हि भवतः अयंतु धर्मरहितोतो धर्मतोपि न
विकारमुपैतीत्यर्थः यस्मादेवमतः शरीरस्थोपि शरीरे स्थितोपि
अयमात्मा किंचित्कर्म न करोति जलगतचंद्रवदतो न लिप्यते कर्मणा
मकरणात्कर्मफललेपं न भजति यो यत्कर्ता स तत्फलभाग्यं त्वकर्ता
त्फलेन न लिप्यते ३१॥

मधुभाष्य

अनादित्वादिति सादिर्हि पदार्थो व्ययि गुणात्मकं च न करोती
त्यादेरर्थ उक्तः पुरस्तात् न लौकिकः क्रियादिस्तस्य अतो न प्र
नमित्यादिवदिति भूतेभ्य प्रकृतेश्च मोक्षसाधनममानित्वा
दिकं ३१॥

भाषा अनुवाद टीका

और जो कहो कि सर्वोक्तरूप आत्माके भेदका अभाव होनेसे
भी संसारावस्था मे देह संवन्ध से जो कर्म और इन्ही कर्मों का
फलरूप जो सुखदु:ख आदि तिनके द्वारा वैषम्य भावतो नहीं
दूर हो सके है इससे वैसे आत्माका सम्यक दर्शन कैसे संभ
व होय इस शंकापर कहते हैं कि जिसकी उत्पत्ति होती उस
का अवश्य आदि है और जो गुणयुक्त वस्तु है इसीको गुणना
श होनेसे रूपान्तर प्राप्तिरूप विकार भी होता हैं किन्तु जिस
हेतु यह जीव परमात्मा श्री अनादि तथा निर्गुण हेतु से अ
व्यय अर्थात् अविकारी है इस से हे कौन्तेय शरीर मे रहिके
भी कोई कर्म नहीं कर्ता और कर्मफल मे भी लिप्त नहीं हो
ता अर्थात् इसको कोई कर्म नहीं लगते है ३१ ॥

दोहा

अनादी निर्गुण भावसें परमात्मा अव्ययजोय कुंतिसुतय
ह देहमें करेन नलिपहूं सोय ३१॥

185

यथासर्वगतंसौक्ष्म्यादाकाशंनोपलिप्यते
सर्वत्रावस्थितोदेहेतथात्मानोपलिप्यते ३२

शांकरभाष्य टीका १

किमिव न करोति नलिप्यतइत्यत्र दृष्टान्तमाह यथा सर्वगत॰
मिति यथा सर्वगतं सर्वव्याप्यपि सत् सौक्ष्म्यात् सूक्ष्मभावादा
काशं खं नोपलिप्यते न सम्बध्यते सर्वत्र अवस्थितोदेहे तथा
त्मा नोपलिप्यते ३२ ॥ ॥

आनंदगिरिकृतटीका २

सूक्ष्मभावादप्रतिहतस्वभावत्वादित्यर्थः न सम्बध्यते पङ्कादि
भिरिति शेषः ३२ ॥

स्वामिकृतटीका ३

तन्निर्लेपत्वेदृष्टांतमाह यथेति यथासर्वत्रपंकादिष्वपिस्थि॰
तमाकाशंसौक्ष्म्यादसंगत्वात्पंकादिभिर्नोपलिप्यतेकेनापिस
हनसंबध्यते तथासर्वत्रउत्तममध्यमेधमेवादेहेवस्थितोप्यात्मा
नोपलिप्यतेदैहिकैर्गुणदोषैर्नयुज्यतइत्यर्थः ३२ ॥

पिशाचभाष्य टीका ४

यथेति भ्रमन्तघारादिभिः ३२ ॥

+ यद्यपिनिर्गुणत्वान्नकरोतिनित्यसंयुक्तैर्देहा
वैःकथंनलिप्यतइत्यत्राह॥

रामानुजभाष्य टीका ५

+ यथाकाशंसर्वगतमपिसर्वैर्वस्तुभिःसंयुक्तमपिसौक्ष्म्यात्सर्व
वस्तुस्वभावैर्नलिप्यते तथात्मापिसौक्ष्म्यात्सर्वत्रदेवमनुष्यादौ
देहेवस्थितोपिनदेहस्वभावैर्नलिप्यते ३२ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् ३२ ॥

परमार्थप्रपा टीका ७

अत्रदृष्टांतमाह यथेति यथासर्वत्रपंकादिस्थितमाकाशं
सौक्ष्म्याद[illegible] संगत्वात्पंकादिभिर्नलिप्यते तथासर्वत्रोत्तमेऽ
धमेवादेहेवस्थितोप्यात्मादेहिकैर्गुणदोषैर्वानलिप्यतेन

श्री॰
गी॰ टी॰
३॰

185 186

न युज्यत इत्यर्थः ३२ ॥ ३२ ॥ ३२ ॥

[illegible]
[illegible] ॥

वनमाली टीका ८

निर्लेपत्वे दृष्टान्तमाह यथेति यथा सर्वे पङ्कादिषु गतं प्रामे संप्रक्तमप्याकाशं सौक्ष्म्यान्नोपलिप्यते तथा सर्वत्र नीचोच्चदेहे ववस्थित आत्मा परमात्मा च विभ्यानेन शक्तिः सूक्ष्मत्वादसंगत्वाच्च तत्कर्मभिः पापादिभिर्न लिप्यते ३२ ॥

कुसुमवैजयन्ती टीका ९

ननु निर्गुणत्वादयं न किंचित्करोतीति भवतु न कापि क्षतिः किंतु नित्यसंयुक्तैर्देहादिस्वभावैः कथं न लिप्यते इति चेत्तत्र दृष्टान्तमाह यथा सर्वगतमिति यथाकाशं सर्वगतमपि सर्वैर्जलपंकादिभिर्वस्तुभिः संयुक्तमपि सौक्ष्म्यादाकाशस्तेभ्यो वस्तुभ्योऽति सूक्ष्मत्वात्तैर्वस्तुस्वभावैः पंकादिभिर्नो लिप्यते तथात्मा जीवोपि सर्वत्र देवमनुष्यादिदेहे व्यवस्थितोपि तत्र देहादिभ्योऽतिसूक्ष्मत्वात्तत्र देहादिस्वभावैर्जन्मनाशादिलक्षणैर्नोपलक्ष्यते नोपलिप्यते ३२

मधुसूदनी टीका ९

+सौक्ष्म्यादसंगस्वभावत्वात् आकाशं सर्वगतमपि नोपलिप्यते पंकादिभिर्यथेति दृष्टान्तार्थः स्पष्टमितरत् [illegible]
[illegible] ३२ ॥

शरीरस्थोपि तत्कर्मणा न लिप्यते स्वयमसंगत्वादित्यत्र दृष्टान्तमाह ॥

सदानंदी टीका ११

असंगत्वात्स्वयं प्रत्यक्लिप्यते नात्मकर्मणा इत्यत्रापि सदृष्टान्तमलेपत्वे विदात्मनः १ व्योमासंगस्वभावत्वात्सर्वगं नैव लिप्यते पंकादिभिर्यथा तद्वदात्मासंगो न लिप्यते २ असंगो ह्ययमात्मा न भौतयः स्युः सहस्रशः एवं नित्यमसंगात्मतत्त्वज्ञानानुभूतितः ३ स्वाराज्यसिद्धिरस्तीति श्रीहरेरयमाशयः ४ ३२ ॥ ह४

नीलकंठी टीका १२

निर्गुणत्वान्न करोतीति सिद्धं असंगत्वान्नोपलिप्यत इत्याह या
थेति यथा आकाशो धूमादिना न लिप्यते सोऽस्मादसंगस्वभाव
त्वात् एवमात्मा पुण्यपापादिना नोपलिप्यत इत्यर्थः ३२ ॥

आनंदी टीका १३

सर्वत्र देहे सर्वेषु देहेष्ववस्थितोऽन्तर्यामितया स्थित आत्मा
परमेश्वरो नोपलिप्यते ३२

+ येषां चैतस्य सर्वशरीरस्थत्वेपि कर्मफलसंयो
लक्षणक · लेके संपर्काभावस्तत्र योपम
नेन दर्शयितुमाह ॥

रामकंठी टीका १४

+ यथा सौक्ष्म्यादलीयस्त्वात्सर्वगतं समस्तवस्तुव्यापकं देश
कालाद्यनवच्छिन्नमाहात्म्यमाकाशमवच्छिन्नैर्व्याप्येमीवे
नैलिप्यते स्वधर्मेण न संयोज्यते नैव सर्वत्र सर्वस्मिन्स्व
नरतिर्यगाद्यनन्तभेदेऽपि देहे शरीरे व्यापकतयावस्थितो
नित्यसंनिहितोऽपि ह्ययं परमात्मा तद्धर्मैः सुखदुःखादिभि
रुत्पादविनाशादिभिर्वा कर्मफलसंबंधित्वाभिमानजन्म
भिर्नोपलिप्यते न संस्पृश्यते तथा चोक्तं यथैकस्मिन्घ
टाकाशे रजोधूमादिभिर्युते संयुज्यन्ते न सर्वाणि तथा जी
वाः सुखादिभिरिति तद्वद्विदा केनचित्

३२ ॥

टीका १५

+ अत्रैतदर्थप्रतीत्यर्थं दृष्टान्त लाक्षिकी
माह ॥

+ यथा सर्वत्र पंकादिष्वप्यवस्थितमाकाशं सौक्ष्म्यादसंगत्वाद्द्र
वत्वादिभिर्नोपलिप्यते तथा सर्वत्र देहे जातावेकवचनम्
सर्वेषु देहेष्ववस्थितोऽप्ययमात्मा कर्मभिस्तत्फलैश्च न संस्पृ ३२ ॥
श्यते

187

पंचोलेटीका

अत्रैवपक्षे दृष्टांतमाह यथेति यथा सर्वगतमाकाशं सौक्ष्म्यात्सूक्ष्मभावात् नोपलिप्यते केनापि सह न संबध्यते तथा सर्वत्र सर्वस्मिन् देहे अवस्थितोपि आत्मा इति सूक्ष्मत्वात् नोपलिप्यते ३२॥

रत्नावीरसमिद्बोधिनी

अस्यात्मनः शरीरस्थस्याप्यसंगत्वात्कर्मलेपरहितत्वं सिद्धमित्यत्र दृष्टांतमाह यथेति यथा सर्वगतं सर्वत्र पंकादिषु गतं स्थितं सौक्ष्म्यात् सूक्ष्मतरत्वात् आकाशं नोपलिप्यते द्रवत्वादिलेपं न भजते तथा सर्वत्र देहे अवस्थितोप्यात्मा नोपलिप्यते दैहिकैर्गुणदोषैर्न युज्यते इत्यर्थः ३२॥

मधुभाष्य

३२॥

भाषा अनुवाद टीका

अब आत्माके कर्म न करने औ कर्मफल मे लिप्त न होने मे दृष्टान्त देते हुये हेतु कहते हैं कि जैसे सूक्ष्मता के हेतुसे सर्वगत आकाश पङ्क आदिमे रहते भी असंग हेतुसे पङ्क आदि उसको नहीं लगाते अर्थात् पंकमे वह लिप्त नही होता है जैसे ही पावन उत्तम मध्यम औ अधम शरीरों मे रहिके भी आत्मा लिप्त नही होता है अर्थात् शरीरसंबंधी पुण्यपाप आदिसे युक्त नही होताहै ३२ ॥

दोहा

जैसें सभमें सूक्ष्मसें नभसों लिप्त है नांहि जैसें सभहि देहमें
नहि आत्म लिपयांहि ३२॥

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ३३

शांकरभाष्यं टीका १

किञ्च यथा प्रकाशयतीति यथा प्रकाशयत्यवभासयत्येकः
कृत्स्नं लोकमिमं रविः सविता आदित्यः तथा तद्वन्महाभूतादि
धृत्यन्तं क्षेत्रमेकः सन् प्रकाशयति कः क्षेत्री परमात्मेत्यर्थः
रविदृष्टान्तोऽत्रात्मन उभयार्थोऽपि भवति रविवत् सर्वक्षेत्रेष्वेकः
आत्मा अलेपकश्चेति ३३ ॥

आनंदगिरिकृतटीका २

न करोति न लिप्यते चेत्यत्र दृष्टान्तेन दृश्यधर्मास्पृष्टत्वे हेतुमाह
किञ्चेति दृष्टान्तेन विवक्षितमर्थं दर्शयति रवीति उभयविधा-
धर्मार्थमेव स्फुटयति रविवदिति ३३ ॥

स्वामिकृत टीका ३

असंगत्वाल्लेपो नास्तीत्याकाशदृष्टान्तेनोक्तं प्रकाशकत्वाच्च प्रका-
श्यधर्मैर्न लिप्यत इति रविदृष्टान्तेनाह यथा प्रकाशयतीति स्पष्टार्थः
३३ ॥

पिशाचभाष्यंटीका ४

॥

स्पष्टार्थम् ३३ ॥

रामानुजभाष्यं टीका ५

यथेति यथैक आदित्यः स्वया प्रभया कृत्स्नमिमं लोकं प्रकाशय-
ति तथा क्षेत्रमपि क्षेत्री ममेदं क्षेत्रमीदृशमिति कृत्स्नं बहिरन्त-
श्चापादतलमस्तकं स्वकीयेन ज्ञानेन प्रकाशयति प्रकाशालो-
कात्प्रकाशकादित्यवद्देहादित्वेन वेद्यभूतादस्मात्क्षेत्रादत्यन्त-
विलक्षणोयमकलंणाड्त्यर्थः ३३ ॥

अभिनवगुप्तकृतटीका ६

श्री॰
गी॰ टी॰
३

१८९

नैनेकः परमात्मा कथमनेकानि क्षेत्राणि व्याप्नोतीत्याशंः
काप्रसिद्धेन रविना दृष्टान्तेनापाकृता कृत्स्नं क्षेत्रं चराचरा
णि क्षेत्राणीत्यर्थः ३३ ॥

परमार्थप्रपाटीका

एवं प्रकृतात्मसंगात्वाद्बलेपो नास्तीत्याकाशदृष्टान्तेनोक्तं तथै
व प्रकाशकत्वाद्य प्रकाश्यधर्मैर्न युज्यत इति दृष्टान्तेनाह य
थेति स्पष्टं उक्तं च यद्वत्सविता दिने करोति कर्माणि जीव
लोकोयं न च तानि करोति रविर्नैकारयति तद्वदात्मापी
ति ३३ ॥

वनमाली टीका ८ ॥

यज्ज्ञातायक्षेत्रं निरूपितं तत्क्षेत्रज्ञस्वरूपं दृष्टान्तेन दर्शयति यथै
टि॰१॰ को रविः कृत्स्नं लोकं प्रकाशयति तथा क्षेत्री क्षेत्रज्ञः सर्वेश्वरः कृत्स्नं
क्षेत्रं जडवर्गरूपं प्रकाशयति बोधयति प्रवर्तयति प्रवर्तयति च
सर्वप्रकाशस्य सर्वप्रवर्तकस्य सर्वाधीनत्वमिति प्रकृष्टमादिनात्र
क्षेत्रज्ञो ज्ञापन इति भावः ३३ ॥

ऊसमवैजयन्ती टीका ९

ननु विपरीतोयं दृष्टान्तः आकाशस्य विभुत्वेन सर्ववस्तुव्याप्तिसंभ
वान्निर्लिप्तकथनं संभवति आत्मा त्वणुरूपकः स कथमतिस्थूल
गजादिदेहमाप्नोति तदभावे निर्लेपत्वकथनस्याप्यभाव इत्या
शंक्याणुरूपत्वेपि विभुगुणत्वात्सर्वं घटत इति सदृष्टान्तेनाह
यथा प्रकाशयतीति यथैको रविरंशुमानाकाशस्यैकदेशप्रवस्थि
तोपि परिच्छिन्नोपि स्वाभाविकधर्मभूतेन विभुरूपेण स्वकिरणे
नेमं चेतनाचेतनात्मकं कृत्स्नं सर्वं लोकं जगत्प्रकाशयति स्वयं
तत्प्रकाशकः प्रतप्य च स्वप्रकाश्यभूतान्यालोकाक्रान्तप्रवस्थितत
न्मलादिगतशीतार्द्रादिधर्मैर्न लिप्यते प्रत्युत स्वकैरणैर्जला
दिकमीदृशं करोति तथा क्षेत्री क्षेत्रं शरीरं विद्यते यस्य स क्षेत्री
जीवात्माणुस्वरूपेण शरीरैकदेशस्थितस्स्वस्वाभाविकानवच्छि
न्नेन स्वकीयधर्मभूतेन ज्ञानेन कृत्स्नं समग्रमापादतलमस्त
कमिदं क्षेत्रं शरीरं प्रकाशयति तत्र देहस्थितादेहजातत्वेन

ज्ञेयरूपाद्देहादत्यन्तभिन्नो देहधर्मैःस्थूलत्वदुःखत्वादिभिर्वति
लिप्तोभूत्वास्वचेतनत्वरूपधर्मेणाचेतनरूपंदेहंचेतनीभावं
करोतीत्यर्थः एवंसूत्रकारेणाप्युक्तंग्राह्यलोकवदिति ३३

+ नकेवलमसंगस्वभावत्वा[illegible]
दात्मनोपलिप्यतेप्रकाशव
त्वादपिप्रकाशधर्मैर्नलि
प्यत इतिसदृष्टान्तमाह॥

मधुसूदनी टीका ९

+ यथारविरेकएवकृत्स्नंसर्वमिमंलोकंदेहेंद्रियादिसंघातरूप
वस्तुमात्रमितियावत् प्रकाशयति नचप्रकाश्यधर्मैर्लि
प्यते नवाप्रकाश्यभेदाद्भिद्यते तथाक्षेत्रीक्षेत्रज्ञएकएवकृ
त्स्नंक्षेत्रंप्रकाशयतिहेभारत अतएवनप्रकाश्यधर्मैर्लिप्यते
नचप्रकाश्यभेदाद्भिद्यतेइत्यर्थः सूर्योयथासर्वलोकस्यचक्षुर्न
लिप्यतेचाक्षुषैर्बाह्यदोषैः एकस्तथासर्वभूतान्तरात्मानलिप्य
तेलोकदुःखेनबाह्यइतिश्रुतेः [illegible]
[illegible] ॥ ३३ ॥

सदानंदी टीका ११

नकेवलमसंगत्वादलेपत्वंचिदात्मनः प्रकाशकतयाप्यस्यभा
स्यधर्मैर्नसंगता १ सदृष्टान्तमितिप्राहभगवान्दीनवत्सलः
एकएवरविःसर्वंरूपवद्वस्तुमात्रकं २ यथाप्रकाशयत्येष
भास्यधर्मैर्नलिप्यतेनापिप्रकाश्यभेदाद्भिद्यतेकिलभास्क
रः ३ तथैवैकएवक्षेत्रज्ञोभासयत्यखिलंजडं नासौप्रकाश्यध
र्मैर्वालिप्यतेनापिभिद्यते ४ ३३ ॥

नीलकंठी टीका १२

नकरोतिनलिप्यतइतिद्वयमपिदृष्टान्तान्तरेणप्रतिपादय
ति यथेति यथासूर्यःस्वसत्तामात्रेणविश्वंप्रकाशयतिनच
व्यापाराविष्टतयाकुविंदइवपटं यथाचैवप्रकाश्यधर्मैर्दुर्गं
धादिभिर्नलिप्यते एवमयंक्षेत्रीक्षेत्रज्ञःसूर्यवदेकएवसन्नते
कथाभूतंक्षेत्रंमहाभूतानीत्यादिनाचतुर्विंशतितत्त्वात्मकमि
च्छाद्वेषादिविकारयुक्तंसमस्तंनतत्सत्तामात्रेणप्रकाशयति
हेभारत नतुव्यापाराविष्टतयातत्संपादयति नतद्धर्मैर्वापुण्य
पापादिभिर्नलिप्यते सूर्यदृष्टान्तेनएकत्वमकर्तृत्वंचप्रयुक्तं

+एवं परमेश्वरलक्षणं परीक्ष्याध्यायार्थोपसंहाराय क्षेत्रक्षेत्रज्ञयोरेव लक्षणं विवेचयति॥

मलेपत्वे चदर्शितं तथा वस्तुतः यथा सूर्य ज्योतिरात्मा विवस्वा नपो भिन्ना बहुरूपो ऽनुगच्छन् उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मा सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्य इति ३३ ॥

190

आनंदी टीका १३

+देही देहस्थः जीवात्मा कृत्स्नं देहं सर्वमेव शरीरं अचेतनं प्रकाशयति तत्तत्कार्यकरणाय चेतनावदिव करोति ३३

रामकंठी टीका १४

+यथा येन प्रकारेणायं सर्वलोकप्रत्यक्षपरिदृश्यस्वभावो भगवान् भास्करः कृत्स्नमखिलं लोकं नानाभावमयं विश्वमेक एवासहायः प्रकाशयति स्वस्वरूपलेवयति तेनैव प्रकारेणायं देही सर्वदेहव्यापक एकः परमात्मा क्षेत्रं प्रकाशयतीति किमुक्तं भवति प्रकाश्यवस्तुनानात्वात्प्रकाशस्य परमात्मधर्मस्य यदपि परं नानात्वोपचारः परमार्थेन त्वेक एव सकलप्रकाश्यवस्तुप्रकाशकः प्रकाशकत्वमात्रेणोपमानोपमेयभावो रविक्षेत्रिणोः यथा हि रविर्भावानां प्रकाशको न तथा च क्षेत्री यथा हि जनस्थितकारणाल्लब्धात्मनां घटगवादीनामर्थानामभिव्यंजकत्वमात्रेण रविः प्रकाशको न जनकत्वेन क्षेत्री तु प्रकाश्यत्वापादनेनैव तान् जनयत्यतो जनकत्वं तस्येति प्राक् प्रतिपादितमेव ॥३३॥

वं सर्वात्मनः कर्मफल
पर्कोऽभावेप्यन्यस्य
रणप्रकाशकत्वधर्म
गात्स एवैकः क्षेत्रक्षेत्र
व्यवहारप्रकाशक इत्य
मानान्तरेण दर्शयित
माह॥

लासिकी टीका १५

यथैक एव रविरिमं कृत्स्नं जीवलोकं प्रकाशयति तथैक एवात्मा क्षेत्री क्षेत्रज्ञत्वं प्राप्तः सन् कृत्स्नं क्षेत्रं प्रकृतिपरिणामरूपं प्रकाशयति प्रकाशेन व्याभाति ३३ ॥

नन्वेकत्र देहेऽवच्छिन्नस्यात्मनः कथं सर्वदेहव्यापकत्वमित्याशंक्य दृष्टान्तेन स्पष्टयति॥

पंचोलेटीका

कृत्स्नकार्यं युगपत् प्रकाशयति देवेति यथैकेनैव प्रकाशकत्वात्प्रकाशए पा
यथैकेन युगपतेरतिरविरदृष्टांतेनाह यथेतिहे भारत यथा रविः एकः स
न् इमं कृत्स्नं लोकं युगपत्प्रकाशयति तथा रविवत्क्षेत्री आत्मा एकः
सन् कृत्स्नं क्षेत्रं मायाकार्यं युगपत्प्रकाशयति ३३ ॥

रत्नावीरसमिद्धोधिनी

यथेति रविः सवितैकः कृत्स्नमिमं लोकं यथा प्रकाशयति अवभास
यति तथा क्षेत्रं महाभूतादि धृत्यंतं क्षेत्री परमात्मैकः सन्नेवावभा
सयतीत्यर्थः ३३ ॥

मधुभाष्य

३३ ॥

19/

भाषा अनुवाद टीका

असंग हेतु से परमात्मा की निर्लेपता आकाशके दृष्टान्त से दिखाया अब प्रकाशक होके भी जो प्रकाश्य वस्तुवोंके धर्म से आत्मा युक्त नहीं है यह सूर्यके दृष्टान्तसे कहते हैं कि हे भारत अर्जुन एक यही सूर्य जैसे समस्त लोकको प्रकाश करते हैं परन्तु प्रकाश्य वस्तुके गुणदोषसे लिप्त नहीं होते ऐसे ही क्षेत्री जो आत्मा सो क्षेत्र कहे शरीर आदि सबको प्रकाश करते भी देहादि केगुण दोष से लिप्त नहीं होता है यहतुम हमारी बात सत्य करके मानो हे भारत ३३ ॥

दोहा॥

ज्यों प्रकाश है एक रविलोक सर्व इहकोय ज्यों क्षेत्री यह
क्षेत्रको प्रकाशतभारतसोय ३३॥

192

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा भूत-
प्रकृतिमोक्षं च ये विदुर्यान्ति ते परं ३४ इति
श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे क्षेत्रक्षेत्रज्ञ
निर्देशो नाम त्रयोदशोऽध्यायः १३ ॥

शांकरभाष्य टीका १

समस्ताध्यायार्थोपसंहारार्थोयं श्लोकः क्षेत्रक्षेत्रज्ञयोरिति क्षे
त्रक्षेत्रज्ञयोर्यथाव्याख्यातयोरेवं यथाप्रदर्शितप्रकारेण अन्त
रमितरेतरवैलक्षण्यविशेषं ज्ञानचक्षुषा शास्त्राचार्योपदेश
जनितमात्मप्रत्यायिकं ज्ञानं चक्षुस्तेन ज्ञानचक्षुषा भूतप्रकृ
तिमोक्षं च भूतानां प्रकृतिरविद्यालक्षणाव्यक्ताख्या तस्या भूत
प्रकृतेर्मोक्षणमभावगमनं च ये विदुर्विजानन्ति यान्ति गच्छ
न्ति [illegible] ते परं परमार्थतत्त्वं ब्रह्म न पुनर्देहमाददतेऽ
त्यर्थः ३४ इति श्रीभगवद्गीताभाष्ये त्रयोदशोऽध्यायः १३ ॥

आनंदगिरिकृत टीका २

अध्यायार्थं सफलमुपसंहरति क्षेत्रेति विशेषकौटस्थ्यापरि
विणामादिलक्षणान्तदेवममानित्वादिनिष्ठतया क्षेत्रक्षेत्रज्ञ
याथात्म्यविज्ञानवतः सर्वानर्थनिवृत्त्या परिपूर्णपरमानन्दा
विर्भावलक्षणपुरुषार्थसिद्धिरिति सिद्धं ३४ इति आनन्दगि
रिकृतटीकायां त्रयोदशोऽध्यायः १३ ॥

स्वामिकृत टीका ३

अध्यायार्थमुपसंहरति क्षेत्रक्षेत्रज्ञयोरिति एवमुक्तप्रकारे
ण क्षेत्रक्षेत्रज्ञयोरन्तरं भेदं विवेकज्ञानलक्षणेन चक्षुषा ये विदुः
तथा च भूतानां प्रकृतिस्तस्याः सकाशान्मोक्षं मोक्षोपा
यं ध्यानादिकं ये विदुः ते परं पदं यान्ति ३४ विविक्तौ येन तत्त्वेन
मिश्रौ प्रकृतिपूरुषौ तं वंदे परमानंदं नंदनंदनमीश्वरं ३५

श्री॰
गी॰ टी॰
त्र॰

19
193

इति श्रीभगवद्गीतासुबोधिन्यां टीकायां त्रयोदशोऽध्यायः १३

पिशाचभाष्य टीका ४

क्षेत्रक्षेत्रज्ञयोरिति भूतप्रकृतिर्मायातस्या मोक्षो भूतप्रकृति
मोक्षस्तं ३४ इति पैशाचभाष्ये त्रयोदशोऽध्यायः १३ ॥

रामानुजभाष्य टीका ५

क्षेत्रेति एवमुक्तेन प्रकारेण क्षेत्रक्षेत्रज्ञयोरंतरं विशेषं विवे
कविषयज्ञानाख्येन चक्षुषा ये विदुः भूतप्रकृत्यो मोक्षं च ते प
रं यांति ते निर्मुक्तबंधनमात्मानं प्राप्नुवंति एवमुक्तेन प्रका
रेण मोक्षसाधनेनेति मोक्षः अमानित्वादिकमुक्तं मोक्षसाधन
मित्यर्थः क्षेत्रक्षेत्रज्ञयोर्विवेकविषयेनोक्तेन ज्ञानेन तयोर्वि
वेकं विदित्वा भूतप्रकृतिमोक्षोपायमु अमानित्वादिकं चावगम्य
ये आचरंति ते निर्मुक्तबंधाः स्वेन रूपेणावस्थितमनवच्छिन्न
लक्षणमात्मानं प्राप्नुवंतीत्यर्थः ३४ इति श्रीभगवद्रामानुज
विरचितभाष्ये त्रयोदशोऽध्यायः १३ ॥

अभिनवगुप्तकृत टीका ६

[illegible]
[illegible]
[illegible] एवमध्यायेन यदुक्तं ज्ञेयं ज्ञानं क्षेत्रक्षेत्रज्ञयोरंत
रं भूतप्रकृतेश्च स्वल्पात्म विराममधर्मत्वात्मोचनेन तद्येन ज्ञानल
क्षणेन सर्वत्राप्रतिहतेनालौकिकेन चक्षुषा पश्यंति ते वासुदे
वतां प्राप्य लभंते एवं परमेशिवम् ३४ संग्रहोऽत्र प्रमान् प्रकृति
रित्येष भेदः संमूढत्वेन साम्य परिहृत्य [illegible] निमेलात्मम
येजगत् इति श्रीभगवद्गीतार्थसंग्रहे त्रयोदशोऽध्यायः १३ ॥

परमार्थप्रपा टीका ७

[illegible]
[illegible]
[illegible]
[illegible]

[illegible] ३४ [illegible]

[illegible]

[illegible] अध्यायार्थमुपसंहरति

नादिकं च ये विदुर्यान्ति परं [illegible] प्रथमाध्यायनामर्थं क्षेत्रक्षेत्र

ज्ञयोरेवं प्रकृतिपुरुषयोरंतरं ज्ञानहेतो लब्ध्वा [illegible] यथा

त्यागाविकृतिमयीकर्तृकार्यत्वहेतुः भोक्तृहेतव आत्मा सुखवत

दितरयोरेकप्रवाविलेप्रदेशेभास्वंतिवेवंविमहितनद [illegible] शामे

पुं [illegible] प्रकृत्याविविरेः इतिश्रीमद्देवतपंडितसूर्यविचरचितायां

भगवद्गीताटीकायांपरमार्थप्रपायांप्रकृतिपुरुषविवेकोनामत्र

योदशोध्यायः १३ ॥

वनमाली टीका ५

अध्यायार्थमसंक्षेपेणाह रयति क्षेत्रेति क्षेत्रक्षेत्रज्ञयोरंतरंभे

दमेवमुक्तप्रकारेणज्ञानचक्षुषाविवेकदृष्ट्या मानित्वादिना

वयेविदुः मोक्षसाधनेन नेति मोक्षसाधनं भूतप्रकृतिमोक्षं चल

भूतानां प्रकृतेर्मोक्षमितिवानादृशममानित्वादिकेलिंगदेह

स्थपतभूतप्रकृत्याधात्मकत्वानहियोगसाधनामितिस्पर्यः क्षेत्रे

जरं क्षेत्रज्ञः परमात्मा सदनेनगुणालयः सर्वेश्वरः सदेकाकारः

सर्वकर्तृत्वेपि निर्लेपः परमानंदघनरूपः सर्वांतर्यामी जीवोपि

ज्ञानानंदस्वरूपः स्वतोनिर्विकारोगतज्ञात्सर्वप्रापितविलक्षणः

क्षेत्रंसविकारमितिस्पष्टमेनरभेदनमानित्वादिनाविवेकदृष्ट्या

वाज्ञानचक्षुषापश्यतिभूतप्रकृत्यात्मकलिंगदेहमोक्षंमोक्षो

पायममानित्वादिकंचयेजानंतितेपरंपरमात्मानंयांतिपरं

मोक्षरूपंफलंचप्राप्नुवंतीत्यर्थः ३४ इतिगीतायांत्रयोदशः १३

कुसुमवैजयन्ती टीका ५

प्रकृतिपुरुषयोः ज्ञानफलमुपदिशन्नध्यायार्थमुपसंहरति

क्षेत्रक्षेत्रज्ञयोः क्षेत्रेण क्षेत्रक्षेत्रज्ञयोः इतिएवमुक्तप्रकारेणक्षेत्रक्षेत्रज्ञयोः स्वरूपभेदं वपुनभेत

महितोयोक्षेत्रज्ञोजीवस्तयोरंतरंस्वरूपभेदं [illegible] सतेः नेनेतिमो

प्रकृतिमोक्षंभूतानांप्रकृतेः सकाशान्मो

क्षेत्रेति एवमुक्तप्रकारेणक्षेत्रक्षे

त्रयोरंतरंयदन्तरंस्वरूपं वैलक्षण्यं ज्ञानल

क्षणेन चक्षुषाये विदुस्तथाभूतानां

प्रकृतिः तस्याः सकाशान्मोक्षोपायं

मानादिकंचयेविदुः तेयांति परं

त्रोःमानित्वमपायत्वथ्यानंयेविदविदीश्वरस्वरूपयाथात्म्यविदो
ज्ञानचक्षुषोक्तेनभिन्नाभिन्नविषयकज्ञानेनेत्येवविदुश्चिदचिदी
श्वरवस्तुस्वरूपेणाभिन्नमपितयोरीश्वरादृथक्सिद्धत्वेनाभिन्नमि
तिजानंतितेएवंज्ञानवंतःपरंसर्वोत्कृष्टंमहाविभूत्याख्यंविस्मप
देयान्निप्रकृतिसंबंधरहितेशुद्धात्मस्वरूपेप्राप्यततोभगवद्भावा
पत्तिलक्षणंमोक्षंप्राप्नुवंतीत्यभिप्रायः ३४ अनाद्यविद्ययानादि
जीवोप्रकृत्याःजयासह तस्यानिवृत्तयेत्वात्मज्ञानमुक्तंत्रयोदशे
भिन्नाभिन्नंभवेत्तस्माज्जगच्चिदचिदात्मकं तेवेदेगोपिकाकांतं
मुक्तिदंपार्थसारथिम् २ इतिश्रीनियमानंदवंशावतंशाकस्मदा
सस्यांतेवासिनागिरिधारिदासेनविरचितायांभगवद्गीतार्थक
सुमवैजयंत्यांनामत्रयोदशोऽध्यायः १३ ॥

मधुसूदनी टीका ५

+इदानीमध्यायार्थंसकल मुपसंहरति ॥

+क्षेत्रक्षेत्रज्ञयोःप्राग्व्याख्यातयोरेवमुक्तेनप्रकारेणांतरंपरस्प
रवैलक्षण्यंजाड्यचैतन्यविकारित्वनिर्विकारत्वादिरूपंज्ञानच
क्षुषाशास्त्राचार्योपदेशजनितात्मज्ञानरूपेणचक्षुषायेविदुः
भूतप्रकृतिमोक्षंच भूतानांसर्वेषांप्रकृतिरविद्यामायाख्या त
स्याःपरमार्थात्मविद्ययामोक्षमभावगमनंचयेविदुःजानंति

त्म

यांतितेपरंपरमार्थवस्तुस्वरूपंकैवल्यंनपुनर्देहमाददते इ
त्यर्थः तदेवममानित्वादिसाधननिष्ठस्यक्षेत्रक्षेत्रज्ञविवेक
विज्ञानवतः सर्वानर्थनिवृत्त्यापरमपुरुषार्थसिद्धिरितिसि
द्धं ३४ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसर
स्वतीपादशिष्यश्रीमधुसूदनसरस्वतीविरचितायांश्रीभगव
द्गीतागूढार्थदीपिकायांक्षेत्रक्षेत्रज्ञविवेकोनामत्रयोदशोध्यायः १३

सदानंदी टीका ॥

अध्यायार्थमशेषेणोपसंहरतीश्वरः क्षेत्रक्षेत्रज्ञयोरेवंप्र
वेव्याख्यातयोर्भिदां जाड्यचैतन्यमिथ्यात्वसत्यत्वाद्यात्मिकां
जनाः शास्त्राचार्योपदेशोत्थसम्यग्ज्ञानैकचक्षुषा १ येजानं
तितथासर्वप्रपंचस्यास्यकारणं अविद्यामात्मबोधेनतन्निवृ

न्तिं च ये विदुः ३ ते यंति परमं ब्रह्म कैवल्यमपुनर्भवं ४ ३४
क्षेत्रक्षेत्रज्ञभेदं विमलमतिमतां प्राहमध्येऽथईशो ज्ञानक्षे
पाववोधं प्रतिपदमखिलं दर्शयामास सम्यक् भक्तेभ्यः श्रीति
मञ्जोविशारदपदमुदयस्य भक्त्यामनुत्वा तं श्रीकांतं मुकुंदं
त्रिरवधिचरितैर्हृत्समाराधयामि ८ इति श्रीभावप्रकाशे॰
श्रीसदानंदविदाकृते प्रबंधेऽर्थैकतिष्ठोपेगतः इतित्र
योदशोध्यायः १३ ॥ ॥ स८

नीलकंठी टीका १२

ध्यायार्थं कृत्स्नमुपसंहरति क्षेत्रेति क्षेत्रक्षेत्रज्ञयोः सर्वो
कयोरेवमुक्तरीत्यांतरं भेदं जडत्वाजडत्वकर्तृत्वाकर्तृत्वविका
रित्वाविकारित्वकृतं वैलक्षण्यं ज्ञानचक्षुः शास्त्राचार्योपदेशा॰
त्मप्रत्ययजनितेन ज्ञानचक्षुषा ये विदुस्ते परं मोक्षं यांति प्राप्नु
वंति किं सांख्यानामिवास्माकमपि गुणपुरुषान्यत्वज्ञानादेव
कैवल्यमुच्यते इत्याशंक्याह भूतप्रकृतिमोक्षमिति भूतानां
वियदादीनां प्रकृतिरुपादानं त्रिगुणात्मिकाऽविद्या तस्या॰
विद्यया मोक्षं तन्निरन्वयोच्छेदं च ये विदुस्त एव परं यांति न तद्दे
त्रक्षेत्रयोरंतरमात्रविदस्त्वपर्याः ययेकासन्नादिमबीचप्रकृ
तिस्तर्हि विभूनामस्तिमदंशाव्रहतां पुरुषाणां मुक्तानामपि
तद्दर्शनमपरिहार्यं तथा चैतेषामपि बंधप्रसक्तिः यदि
तन्मिथ्या तर्हि यः सोवात्मसाक्षात्कारो जातस्तद्दृष्ट्या सर्वदैषैव ॰ज्ञाननास्ये
न्मृगवद्बाधितात्कालत्रयेपि नास्ति इतरेषां त्वज्ञानां वेति॰
वत्केशाको तस्मात्प्रकृतिपुरुषयोरंतरज्ञानमात्रात्कैवल्यं किं
तु प्रकृतिबाधेन पुरुषस्तज्ञानात् सर्पबाधेन रज्जुदर्शनात् ॰भी
मयानि वृत्तिवद्धं यति हंति रितिसिद्धं ३४ इति श्रीष्मपर्वं
गीतानीलकंठीये भारतभावदीपे त्रयोदशोऽध्यायः १३ ॥

आनंदी टीका १३

एवमुक्तप्रकारेण क्षेत्रक्षेत्रज्ञयोरंतरं भेदम् भूतादिविका
रोत्पत्तिक्षेत्रभूतप्रकृतिः शरीरत्वेन परिणता तस्याः सका
शान्मोक्षं च ये विदुस्ते परमात्मानं यान्ति ३४ इति श्रीभ
गवद्गीतायामानंदीटीकायां त्रयोदशोध्यायः १३॥

तदित्थंरूपमध्यायेन क्षेत्र
क्षेत्रज्ञपरमात्मलक्षणतत्त्वत्रय
निर्णयमुपसंहरन्नाह॥

195

रामकंठटीका १४

+ये योगिन एवमुक्तप्रकारेण क्षेत्रस्य शरीरभावेन परिणत
याश्चापरायाः प्रकृतेस्तथा क्षेत्रस्य नानाक्षेत्राहंकारावष्टंभे
नावस्थिताया जीवरूपायाः परायाः प्रकृतेरंतरं विशेषं
परस्परविविक्तस्वरूपं विदुर्जानंते केनामानित्वादिना
तत्त्वज्ञानदर्शनपर्यन्तेन ज्ञानेनैव चक्षुषा न केवलं तयोर
तरं जानंते यावद्भूतप्रकृतिमोक्षं च ये जानंते भूतात्मिका
येयं प्रकृतिः स्थूला निर्दिष्टा ततो मोक्षं पुनस्तत्प्रवेशा
भावादात्यंतिकं बंधत्यागं ये विदंति किमुक्तं भवति क्षे
त्रक्षेत्रज्ञयोः परस्परविविक्तस्वरूपावगममात्रमागमो
पपत्तिपरिशीलनद्वारेण कदाचित्संभवति न तु ताव
ता प्रकृतेर्मोक्षः संभवति स हि तद्विभक्तात्मस्वरूपप्रति
ष्ठावहितत्वेनैव भवति तत एतदुक्तं भूतप्रकृतिमोक्षं
चेति त एवंविधाः परं निरुत्तरं तत्त्वं समग्रमेव परतरप्रकृ
तित्वेन प्रतिपादितं परमात्मानं यान्ति प्रतिपद्यंते तदभे
दलक्षणां परां सिद्धिमधिगच्छंतीत्यर्थः भवविभवैरखिलै
र्नित्यं तापत्रयीपरिशोषिताः परमविश्रामं क्षेत्रज्ञा योगा
यतः किल भजंते विदन्तत्र च नात्र हेयोपादेयत्रयोदश
नः श्रुतेर्वचनरूपैतैः सिक्तं स्तात्ते विमुक्तिफलं श्रियम् ३४
इति श्रीराजानकरामविरचिते वाक्यार्थान्वयमात्रे सर्वतो
भद्रनाम्नि भगवद्गीताविवरणे त्रयोदशोध्यायः १३॥

अथ क्षेत्रक्षेत्रज्ञविवेकस्य फलमाह॥

क्षेत्रेत्यादि एवमुक्तेन प्रकारेण क्षेत्रक्षेत्रज्ञयोर्देहजीवयो
रन्तरं भेदं ज्ञानचक्षुषा ये विदुः प्रत्यभिजानन्ति अन्तरं की
दृशं भूतप्रकृतिमोक्षं भूतप्रकृतेः स्वस्वरूपविस्मरणाभू
पविस्मरणरूपाया मोक्षो मुक्तिर्येन तत् ते परं परमात्म
नं यान्ति प्राप्नुवन्तीति शिवम् सच्चिदस्याभिधेयं यत्तथा
प्राह भक्तितः क्षेत्रक्षेत्रज्ञनिर्देशेन तमेऽहरिमीश्वरम् ३४
इति श्रीभगवद्गीताटीकायां व्याख्यायां क्षेत्रक्षेत्रज्ञवि
भागयोगो नाम त्रयोदशोऽध्यायः १३ ॥

पंचोलेटीका

अध्यायार्थमुपसंहरति क्षेत्रेति क्षेत्रक्षेत्रज्ञयोर्यथा प्रदर्शि
तेन प्रकारेणान्तरं इतरेतरं यत्स्वरूपविशेषं ज्ञानचक्षुषा शास्त्रा
चार्योपदेशजनितज्ञानचक्षुषा पुनः भूतप्रकृतिमोक्षं च भूता
नां प्रकृतिरविद्या अव्याकृतरूपा तस्याः मोक्षणमभावगमनं ये
विदुः ते परं ब्रह्मस्वरूपतां यान्ति प्राप्नुवन्ति ३४ इति श्रीपंचोलेव्या
ख्याटीकायां त्रयोदशोऽध्यायः १३ ॥

रणवीरसमिद्धार्थिनी

अर्थमुपसंहरति क्षेत्रेति क्षेत्रक्षेत्रज्ञयोर्यथा व्याख्यातयोरेवं प्र
दर्शितप्रकारेणान्योन्यवैलक्षण्यं ज्ञानरूपेण चक्षुषा तथा भू
तप्रकृतेरविद्यायाः सकाशान्मोक्षं च ये विदुर्जानन्ति ते परं पदं ग
च्छन्तीति क्षेत्रक्षेत्रज्ञविवेकेन स्वात्मनिष्ठो मुमुक्षुः कर्तव्यस्याभावं प
श्यन् क्वापि पापात्मकैः पुण्यात्मकैर्वा कर्मभिर्लेपं भजतीति
स्वधर्मनिष्ठो भवेदिति तात्पर्यम् ३४ इति श्रीरणवीरसमिद्धार्थि
न्यां गीताव्याख्यायां त्रयोदशोऽध्यायः १३ ॥

मधुभाष

१८ ॥ इतिश्रीमद्भगवत्पादाचार्यविरचिते श्रीमद्गीताभा
ष्येऽष्टादशोऽध्यायः ॥ १८ ॥

तदिनं
हेत्र
नि

भाषा अनुवाद टीका

अब अध्याय के अर्थ का उपसंहार करते हैं कि इस प्रकार से उक्त जो क्षेत्र औ क्षेत्रज्ञ तिन दोनो का भेद जो मनुष्य विवेकज्ञानरूप चक्षु के द्वारा देखते हैं और यही हवै क ही हुई जो प्रकृति तिससे मोक्ष अर्थात् मुक्तिका उपायरूप ध्यान धारणा आदि जो जानते हैं तेई परमपदको जाते हैं ३४ अध्यासवशाते अर्थात् निकट तथा संग होने से प्र कभावको प्राप्त जो प्रकृति और पुरुष तिन दोनो को जिस ने स्वरूप भेद से पृथक रूप प्रतिपन्न किया अर्थात् निश्च य कर जाना सोई परमानन्द स्वरूप नन्दनन्दन श्रीकृष्ण भ गवान को मै जगन्नाथ सुकुल नामा प्रणाम करता हूं ॥ इति जगन्नाथ सुकुलविरचित मनभावनी भाषा टीकायां त्रयोदशोऽध्यायः १३ ॥

दोहा

यह क्षेत्र क्षेत्रज्ञको अंतरज्ञाननेत्रसें होय जो जाने अविद्या मोक्ष होयाति परमगतिसोय ३४॥ इतिश्री ॥

197

2923

Fo 1+197+6= 204

double Nos. 8, 46, 67, 139, 175, 184

२०२

